Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* णमोत्थुणं समणस्स भगवओ महावीरस्स *

॥ सागरसमुदाय मुकुटमणि पू. आगमोद्धारक आचार्यश्री आनन्दसागरसूरीश्वरेभ्यो नमः ॥

॥ तपोगणाधीश-आचार्य श्री-धर्मघोषसूरिवररचितः-श्री-शुभशीलगणिविहितवृत्तियुतः—

श्रीशत्रुंजयकल्पः

सम्पादकौ :-स्व. ग. आ. म. श्री हेमसागरसूरि शिष्यौ-मुनिश्री अमरेन्द्रसागर-महाभद्रसागरौ.

प्रकाशिका :-श्री वर्धमान जैनआगममंदिर संस्था-पालिताणा [सौराष्ट्र]

वीर-संवत्-२५२० विक्रम-संवत्-२०५० क्राइष्टसन्-१९९४ मूल्य-अमूल्य

ACHARYA SHRI KAILASSAGARSURI GYANMANDIR

For Private and Personal Use Only

प्रकाशक-प्राप्तिस्थान :—
श्री वर्धमान जैन आगममंदिर संस्था
तलेटी रोड, पालिताणा [सौराष्ट्र]
पी-नं. ३६४२७०

ट्रस्टी मंडल

મે. ટ્ર. અમરચંદ રતનચંદ જવેરી-મુંબઈ
—શાંતિચંદ છગનલાલ ઝવેરી-સુરત
—મોતીચંદ મગનભાઈ ચોકસી-મુંબઈ
—નિરંજનભાઈ ગુલાબચંદ ચોકસી „
—ધરમદાસ ત્રીકમદાસ કપુરવાલા „
—હેમચંદ મોતીચંદ જવેરી-મુંબઈ
—વસંતલાલ ઉત્તમચંદ વૈદ્ય-ઉંઝા

प्रथम संस्करण = श्री शत्रुञ्जयकल्पः
श्री आगमोद्धारक ग्रन्थमाला मु. कपडवंज
पुस्तकाकार-नकल-५००, वि. २०२६
सम्पादक-मुनिराज श्री लाभसागरजी गणि.

द्वितीय संस्करणम्
— प्रताकार —
नकल :-५००
संवत - २०५०

पृच्छास्थल :—
मुनिश्री अमरेन्द्रसागर-महाभद्रसागर
C/o. श्री श्रमणस्थविरालय उपाश्रय
कच्छीभवननी गलीमां प्लोट नं.-२५
तलाटी रोड, पालिताणा [सौराष्ट्र]

प्रकाशनस्थल :
तीर्थाधिराज श्री-
शत्रुञ्जयतीर्थ-
पालिताणा

मुद्रक : श्री ज्ञानचन्द जैन
स्थल : कहान मुद्रणालय
जैन विद्यार्थी गृह
सोनगढ़ [सौराष्ट्र]-३६४२५०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री शत्रुञ्जयकल्पवृत्तेर्द्वितीयप्रकाशनप्रसङ्गे

श्री शत्रुञ्जयकल्पवृत्तेः गुर्जरानुवादप्रकाशनानंतरमेव ज्ञानपिपासुजनानां मूलसंस्कृत-ग्रन्थस्य प्राप्तेरतीव मे विज्ञप्तिकाः प्राप्ताः, ततस्तद्विज्ञप्तिकामनुलक्ष्य पूज्यसाधुसाध्वीनां व्याख्यानक्षणेऽतीवोपयोगिमेनं ग्रन्थं विज्ञाय चैतद्ग्रंथस्य द्वितीयावृत्तिर्मया प्रकाश्यते ।

पंचाशद्वर्षपूर्वे पूज्यागमोद्धारक श्री आनंदसागरसूरिपुरन्दरैः एतद्ग्रन्थस्य प्रथमादर्शो-लिखापितः तस्यैव संशोधनपूर्वकं कार्यं श्रीमत्यागममंदिरसंस्थयैव परिपूर्णतां क्रियते ।

पूर्वमुद्रितमेतद्ग्रन्थस्य पुरोवचनरूपं यत् "प्रास्ताविकं" मुद्रितमासीत्तदतीवार्थगंभीरं सुचारुएवइति मत्वा तदेव प्रास्ताविकं अत्रपुनर्मुद्रितं तेनास्माभिर्न किंचिद्व्रियते ॥

स्वर्गस्थद्वितीयगच्छाधिपति पू. आ. श्री हेमसागरसूरीणां

शिष्यमुनि श्री महाभद्रसागरः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शासननायक श्री वर्द्धमानस्वामिने नमः ॥
श्री गौतमो गणाधीशो विजयतेतमाम् ॥

प्रास्ताविकम्

श्रीमद्भिः वीतरागसर्वज्ञपरमात्मभिः जगज्जन्तूद्धाराय सम्यग्दर्शनसहित ज्ञानपरिपूत-क्रियात्मकाऽऽत्मकल्याणमार्गः ज्ञानिनिश्रा-विधि-समुपसेवासमुपबृंहितः प्रज्ञप्तः विषमकर्मावरणविलयनप्रभुः । नैकत्रविप्रतिप्रत्तिः यदेतस्मिन् राजमार्गे सञ्चरणे सत्यपि कर्मावरणानपगमो वाऽऽत्मिक सुखानवाप्तिश्च । नैकैराराधकपुण्यात्मभिरेतन्मार्गस्याव्याहतत्वमुद्घुष्टं पुरा कोटिलक्षावधि-विपुलसमूहात्मकसिद्धिगमने-नेदानीमपि विवेकिभिः पुण्यात्मभिः विषमदुष्षमारप्रभावमपसर्पयद्भिः विविधव्यामोह जनकविषमनिमित्तानुपजीवकैः विषयवासना व्यावर्त्तवर्द्धक-मोहकपदार्थप्रलोभनं निष्फलयद्भिः सद्धर्माराधनपरैरिति ।

परन्तु नहि सर्वे आराधकपुण्यभाजः तादृशसत्त्वगुणसनाथाः भवन्तीत्यतः कर्मणां च कषायलेश्यावशेन चिरप्ररूढानां निकाचितानामनिकाचितानां द्रव्य-क्षेत्र-काल-भाव-भवस्वरूपनिमित्तपञ्चकेनोदयः विपाकरूपः भवतीत्यतश्च पुराऽज्ञानादिबलेनोपार्जितानां कर्मणामशुभ-द्रव्यादिपञ्चकबलेन जायमानाऽशुभोदयसन्निरोधार्थं सकामनिर्जरार्थं च परिपुष्टप्रगुणतमविशिष्टतम सामग्रीसहयोगसम्पत्तये उपयोगिपापह्रास-पुण्योदयप्राबल्यधानाय जम्बूद्वीपगतैतद्भरतक्षेत्रातिरिक्तचतुर्दशकर्मभूमिषु लोकत्रये वा यदधिकं यत् सदृशं वा कर्मक्षयायानन्यथासिद्धहेतु-

For Private and Personal Use Only

भूत यात्रास्पर्शनादिकंतीर्थं भूमिश्च न वर्तते । एतादृशसुमहिम शालिपरमप्रभावनासम्पन्नं विशिष्टशुद्ध-शुभाऽध्यवसाय प्राप्तये उपयोगि-कर्मनिर्जरार्थं विशिष्टतमक्षेत्रावलम्बनरूपैतच्छ्रीविमलाचलक्षेत्रप्रभावेण बहूनां पुण्यशालिनां सुविशदभावाध्यवसायप्राप्तिश्च सुतरां भवत्येवेत्यतः पारगतगदितागमनानुसारि श्रद्धालुजनेषु "श्रीशत्रुञ्जयसमंतीर्थं न भूतं न भविष्यती"ति सुक्तिः सुप्रसिद्धतरा वर्त्तते ।

[५]

अत एव श्रीमज्जिनेन्द्रशासन — धुराधरणधौरेयमनोबलभ्राजिष्णुनिष्कारणकरुणावरुणालय-मुमुक्षुभव्यजीवजीवजीवन — जीवातु समजिनपतिगदितविशुद्धात्मस्वरूपपरिचायक जिनवाणिमर्मस्पर्शि सुदेशनादक्ष-सीमातीतवर्णनातिगगुणगरिमाञ्चित-सुविशुद्धक्रियासम्यग्ज्ञानपरिपूत-श्रीमत्तपागणगगनार्हमणिसमप्रभयथार्थाभिधानुगुणचिरप्ररूढ — कर्मप्रपञ्चोच्छेदनक्षमधर्मघोषकरणप्रत्यल-सुधीराञ्चितधिषणा-प्राग्भारपराभूत सुरगुरुसुरगुरुपूजिताऽहर्निश स्मरणीयनामधेयैः श्रीमद्भिः धर्मघोषसूरीश्वरमतल्लजैः विषमारकालसहज-मेधा-श्रद्धाऽऽयु-धारणाशक्तिह्रासमवगत्य सर्वजीवात्मतुल्यभावप्रकर्षेण भववनप्रजायमानममतारण्यानी समूलङ्काषोच्छेदनसमजिनशासनाराधना-सुभगाध्यवसायनैर्मल्यप्रवृद्धेन भावदयारूपेण विशुद्धपरिणामव्रातेन मनुजत्वाऽऽर्यक्षेत्रोत्तमकुलपञ्चेन्द्रियपाटव सद्धर्माराधनसफलसामग्री परिकलित श्राद्धकुलोत्पत्तिसन्मार्गश्रवणादि यथोत्तरदुर्लभतमधर्माङ्गप्राप्तिसनाथाराधकपुण्यात्मनां श्रेयः प्रेप्सूनां हिताय प्रत्नातिप्रत्नपूर्वगतोद्धृतवृद्ध श्रीशत्रुञ्जयलघुकल्पः प्रग्रथितः ।

यमुपजीव्य विषमभववारिधिनिधिमज्जज्जन्तूद्धारे यानपात्रायमानसकलभुवनानन्यश्रेष्ठं तीर्थाधिराजं श्रीसिद्धगिरिराजं संस्मरेयुः शब्द-कलेवरलघुतयामुखपाठकरणेन च प्रत्यहं कल्पपठितं स्वात्मानं गिरिराजसंस्मरणोद्भवविशुद्धपरिणामव्रातेन विषमेभ्यः कर्मनिगडेभ्यो मोचयेयुः इति । [५]

परं संक्षिप्तरुचीनां परमपवित्रश्रीशत्रुञ्जयतीर्थराजस्मृत्याऽन्तःकरणं गिरिराजस्पर्शनाभावनाबलेन विनिर्मलीकृत्य श्रीविमलाद्रि-

[६] यात्रातुल्यलाभस्य प्राप्तावपि तीर्थोत्तंसस्य सिद्धक्षेत्रस्यैतस्य पवित्रगिरिराजस्य विशदतरमहिमानभिज्ञबालजीवानां संक्षिप्तगाथापद्धतिना बीजकरूपेण ग्रथितस्य श्रीविमलाद्रेः सातिशयं सप्रभावं माहात्म्यं यथावत् बुद्धिगम्यं स्यात्, येन च जनिमृतिविषमचक्रेऽवस्थितिमूलभूत-कर्मबीजसन्तानोच्छेदाय गिरिराजस्य विमलाद्रेः यथार्थाभिधानस्य सद्भूतं गुणगरिमाणमवगम्य भावोल्लासेनैतत्तीर्थस्पर्शन-दर्शन-वन्दन-अर्चा-पूजा स्मरणादिप्रकारैः विविधमुद्यच्छेयुः स्वात्मशुद्धिलक्ष्यं च सफलयेयुरितिहेतोः तपागच्छाधिराज-श्रीयुत-सहस्रावधानिसूरिसत्तम-श्रीमुनिसुन्दरसूरिशिष्यैः नैककथाप्रबन्ध-चरित्रग्रन्थादिप्रणेतृभिः श्री शुभशीलगणिभिः लघुकल्पस्यैतस्य गाथानां प्रतिपदं व्याख्यात्मकं मन्दबुद्धितत्त्वज्ञानबोधनेऽपटुबुद्धिमतां हिताय च सरसैतिह्य—सत्यघटनारूपविविधपुण्यशालि—जीवदृष्टान्तबहुलतासनाथं विवरणं ब्रह्मचर्यभेद (१८) कर्मभूमिप्रमित (१५) वैक्रमेऽब्दे बालजीवानां प्रबोधायाऽकारि ।

महाकायश्चैषग्रन्थः नाद्यावधिमुमुक्षूणां वाचनश्रवणगोचर आसीदिति विभाव्य प्राचीननैकहस्तलिखित सङ्ग्रहानवलोक्य विविधप्रतीः गवेषय्य सुगृहित-नामधेयाऽऽगमतलस्पर्शिमर्मज्ञप्रौढ प्रतिभोद्रेकविराजिताऽऽगमवाचनादायक-ध्यानस्थ-स्वर्गताऽऽचार्याऽऽगमोद्धारकापराह्व-श्री आनन्दसागरसूरीशैरेतद्ग्रन्थस्य सुतरां सम्यग्दर्शननिर्मलताऽवन्ध्यबीजस्य श्री सिद्धाचलतीर्थाधिराजसन्महिमख्यापकस्यग्रन्थराजस्य योग्यस्वच्छप्रतिलिपिः भूयसा श्रमेण विविधागम—साहित्यमुद्रापणशिला-ताम्रपत्रोत्कीरण-व्याख्यान-विवेचनादिकार्यजाते व्यापृतत्वेऽपि तीर्थाधिराजमहिमानं विविधकल्मषक्षालनप्रभविष्णु विभाव्य स्वपरोपकराय कारिताऽऽसीत् । सा च सूर्यपुरीयाऽऽनन्दपुस्तकालयसङ्घपूज्या-ऽऽगमोद्धारकाचार्य श्री श्रुतभक्तिस्मारक-विपुलतमसङ्ग्रहे सुरक्षिताऽऽसीत् ॥ [६]

परमेतस्याः प्रकाशनं तु काललब्धिसापेक्षं एवं हि सञ्जातं यत् पूज्यपादागममर्मज्ञाऽऽचार्यश्री (आनन्दसागरसूरीणां) जन्मना नवाङ्गवृत्तिकार श्रीमदभयदेवसूरीश्वरस्वर्गवासेन च परिपूत श्रीकर्पटवाणिज्यद्रङ्गे यतिधर्म-(१०) तत्पालनरूपेण च परित्यज्यमानहिंसाया

विश्वा (२०) संज्ञमेदमित: (२०१०) वैक्रमेऽब्दे श्रीचिन्तामणिपार्श्वनाथजीर्णोद्धारितनूतनप्रासादे वर्णप्रमाणचतुर्विंशतिबिम्बाञ्जनशलाकादि-
महोत्सवप्रसङ्गे पूज्यागमोद्धारकपट्टप्रतिष्ठितशास्त्रैदम्पर्यबोधक-मूलीनरेशप्रतिबोधक-वात्सल्यसिन्धु-पूज्यतमगच्छाधीश्वरश्रीमन्माणिक्यसागर-
[७] सूरीश्वरप्रभुनिश्रायां पूज्यागमोद्धारकाचार्य श्री लघुशिष्योत्तंससप्तवर्षमितलघुवयसि-पित्रा-मात्रा-स्वस्रा सत्रा सुदीक्षित-सप्तविंशतिसंख्य
सुदीक्षितस्वजनसम्बन्धिक-कर्मग्रन्थादिविचारचतुरसुनिपुणमतिराजितपूज्य-गणिवर्य श्री सूर्योदयसागरजित् प्रेरणया (१) पूज्याऽऽचार्यपाद
सुभक्तिरागाञ्चित श्राद्धवर्यैः पूज्यागमोद्धारकाचार्यैराजीवनं वाचना-पठन-पाठन-व्याख्यानुयोगादिरूपेण कृतायाः श्रुतभक्तेरुपबृंहणाय
तैः प्रास्थापितां श्रुतभक्तिं समुपजीवयन्तीं "श्री आगमोद्धारकग्रन्थमाला" पूज्यागमोद्धारकाचार्यश्रीसन्दृब्धविविधसाहित्यं तैः पूज्यपुरुषैश्च-
मुद्रणाय सङ्कलित गन्थराशिगतं महत्त्वपूर्णं साहित्यं पूज्यगच्छाधिपतिनिश्रया प्रकाशमाप्नुयादिति निर्णयस्य मूर्त्तस्वरूपभूता संस्थापिता।

एतया ग्रन्थमालया च षोडशवर्षीययाऽद्ययावत् विविधानि भव्यजनोपयोगीनि पुस्तकानि पूज्यागमोद्धारकाऽऽचार्य विरचितानि प्रकाशितानि ततश्च यथोत्तरमेषा च ग्रन्थमाला सुविशदोज्ज्वलयशः-ख्यातिमाप्नुवती, शिरोरत्नभूतो ह्येषग्रन्थ एतस्या ग्रन्थलायाः नाऽद्यावधिकुत्रापि प्रतिशर्करमनन्तसिद्धावासभूतस्य गिरिराजस्य विमलाद्रेः विविध विषय विवेचकः माहात्म्यख्यापकः सुन्दरतमदृष्टान्तो-पनिबद्ध-व्याख्यासनाथः बालजीवोपयोगी प्रकाशितो वर्त्तते ।

※ अत एव वार्धक्यशरीरापाटवनैकविधशासन सम्बन्धिकार्यजातव्यापृतिप्रभृतिप्रत्यापायानविगणय्यतत्त्वविवेचक-शान्तमूर्ति-करुणा-
वात्सल्यपरिपूर्णान्तःकरणः-श्रीमद्गच्छाधिपतिभिः गुरुभक्तिसेवापरायण विद्वन्मतल्लिका ज्योतिषशास्त्रसुनिपुण-प्राचीनशास्त्रसंशोधना [७]
दिकार्यसुदक्षपूज्यगणिवर्य श्री लाभसागरजिन्महाराजद्वारैतद् ग्रन्थमुद्रापणं विहितमेतद्धि अतिशयेन प्रमोदावहं गुणगरिमाञ्चितविदुषां सरलाशयमुमुक्षुता विभ्राजिबालजीवानां चेति ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* प्रान्ते च प्रार्थये समधिकपवित्र परमाणुपुञ्जमय-श्रीशैलेन्द्रनगाधिराज-श्रीशत्रुञ्जयस्य तीर्थस्य महिमव्यावर्णगर्भस्य कल्पस्यैषा भूरिप्रथितैतिह्य चरितकथासन्दर्भात्मिकां सुविसदतरां वृत्तिं सम्प्रधार्य सुरुचिपूर्वं भावोल्लासवृद्धये एतद्वाचनादि समुपयुज्य सर्वेऽपि भव्यजीवाः कल्याणपथगामिनो भवेयुरिति शुभाशंसापूर्वं प्रचुरपुण्यसन्दोहलभ्यस्य विमलाद्रेरेतस्य लघुकल्प-व्यावर्णनस्वरूपस्य ग्रन्थस्य "प्रास्ताविक" लिखनसौभाग्यं वात्सल्यवारांनिधि प्रशमपयोनिधि पूज्यतमगच्छाधीश्वरप्रेरणया सहृदयिजनोत्तंस विद्वन्मतल्लिका श्रीलाभसागरगणिवरैः सम्पादिमिति च भूयो भूयोऽनुमोदये एतादृशं स्पृहणीयसेवाऽवसरप्राप्त्या शासनपद्धत्याकर्मनिर्जरापथि समुत्सर्पण-लाभाधिगत्येति विनिवेदये क्षयोपशमवैचित्र्यमूलक-स्वस्खलनासम्बन्धि मिथ्यादुष्कृतदानपूर्वं पूज्यागमोद्धारकाचार्यश्रीपट्टविनेयश्रीसिद्ध-चक्राराधनतीर्थोद्धारक-वैयाकरणकेशरी स्वर्गताचार्यश्रीचन्द्रसागरसूरिवर-श्रीपरमविनेयशान्तमूर्ति-तपस्वीधुरीण शासनसंरक्षक सुगृहित-नामधेयतारकवर्य-पूज्यगुरुदेवोपाध्याय श्री धर्मसागरजिन्महाराज-चरणारविन्दमिलिन्दायमानोऽभयाब्धिः श्रमणसङ्घसेवकः इति ॥

जैन उपाश्रयः इन्द्रपुरं (इन्दोर) (म. प्र.)

वीर नि. सं. २४९६, वि. सं. २०२६

शुभं भूयात् सर्वजीवानाम्

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयानुक्रमः

विषयः	पृष्ठांकः
मंगलाचरणम्	१
एकविंशतिनामानि	५
श्री विमलगिरि नामविषये सूरभूपर्षिकथा	५
श्री मुक्तिनिलयनामदाने वीरसेननृपकथा	११
,, शत्रुञ्जयनामोपरि शुकभूपकथा	१७
,, सिद्धक्षेत्रनामोपरि दण्डवीर्यनृपकथा	३३
,, पुण्डरीकनामोपरि श्री वृषभजिन प्रथम गणधर पुण्डरीक कथा	३६
,, सिद्धशेखरनामोपरि पद्मभूपकथा	३९
,, सिद्धपर्वतोपरि निर्जरकथा	४२
,, सिद्धराजोपरि चन्द्रचूडादिभूपकथा	४५
श्री बाहुबलि नामोपरि केलिप्रियभूपकथा	४८
,, शत्रुञ्जयस्य मरुदेव नामोपरि चन्दनमहीपतिकथा	५०
,, भगीरथनामोपरि सगरचक्रि-पुत्र-भगीरथकथा	५२
,, सहस्रपत्रनामोपरि सहस्रपत्रकुमारकथा	५४
,, शतावर्तनामोपरि सोमदेवमहीपतिकथा	५६
,, अष्टोत्तरशतकूटनामोपरि वीरनृपकथा	५९
,, नगाधिराजोपरि निर्जरकथा	६२
,, सहस्रकमलोपरिरणवीरभूपकथा	६३
,, ढङ्क नामोपरि हरभूपकथा	६४
,, कोटिनिवासनामोपरि धर्मनन्दनभूपतिकथा	६६
,, लौहित्यनामोपरि लौहित्यर्षिकथा	६९

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयः	पृष्ठांकः
श्री तालध्वजनामोपरि धरापालभूपकथा	७१
,, कदम्बकनामोपरि इन्द्रश्रेष्ठिकथा	७३
,, शत्रुञ्जयस्य एकविंशातिः नामानि	८१
,, रत्नाकरविषये सोम-भीमकथा	८२
,, विवरविषये भीमभूपकथा	८६
,, औषधविषये पद्मसेननृपकथा	८८
,, रसकूपिकोपरि सुन्दरकथा	९०
,, ऋषभजिनस्य शत्रुञ्जयागमन-सम्बन्धः	९५
,, अजितजिनशत्रुञ्जयसमागमनसम्बन्धः	१०५
,, सम्भवजिनस्यशत्रुञ्जयागमनसम्बन्धः	१०६
,, अभिनन्दनस्यशत्रुञ्जयागमनसम्बन्धः	१०९
,, सुमतिजिनस्यशत्रुञ्जयसमवसृतिस्वरूपम्	११३
,, पद्मप्रभस्य शत्रुञ्जयसमवसृतिस्वरूपम्	११६

विषयः	पृष्ठांकः
श्री सुपार्श्वजिनकथा	१२०
,, चन्द्रप्रभजिनस्य समवसृतिस्वरूपम्	१२२
,, सुविधिजिनस्य समागमनस्वरूपम्	१२५
,, शीतलजिनस्य शत्रुञ्जयसमागमनस्वरूपम्	१२७
,, श्रेयांसजिनस्य शत्रुञ्जयसमागमनस्वरूपम्	१३०
,, वासुपूज्यजिनस्य श्री शत्रुञ्जयतीर्थे समागमन स्वरूपम्	१२३
,, विमलजिनस्य शत्रुञ्जयागमनसमवसृतिस्वरूपम्	१३६
,, अनन्तजिनस्यशत्रुञ्जयागमनसमवसृतिस्वरूपम्	१३९
,, धर्मजिनस्यशत्रुञ्जयागमन स्वरूपम्	१४२
,, शांतिजिनस्य शत्रुञ्जयागमनस्वरूपम्	१४५
,, कुन्थुतीर्थंकरस्य शत्रुञ्जयागमन समवसृति स्वरूपम्	१४७

॥ १० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयः	पृष्ठांकः
श्री अरजिनस्य शत्रुञ्जयागमनसम्बन्धः	१५०
,, मल्लिजिनस्य शत्रुञ्जयागमन-सम्बन्धः	१५३
,, मुनिसुव्रतजिनस्य शत्रुञ्जयागमनस्वरूपम्	१५६
,, नमिजिनेश्वरस्य शत्रुञ्जयसमागमनस्वरूम्	१५९
,, पार्श्वनाथस्य शत्रुञ्जय-समागमन-स्वरूपम्	१६१
,, वीरजिनस्य शत्रुञ्जयागमन-सम्बन्धः	१७२
,, नेमिनाथस्य शत्रुञ्जयगिरेरूर्ध्वानारोहण-स्वरूपम्	१७६
,, पुण्यपालकथा	१८०
,, महाबाहुभूप त्रिविक्रमराजर्षि-मुक्तिगमन-सम्बन्धः	१८४
,, सर्प्पे जीवसम्बन्धः	२०३
,, सुधासेनभूपकथा	२०८

विषयः	पृष्ठांकः
श्री शत्रुञ्जये धरापाल भूपादीनां मुक्तिगमन-स्वरूपम्	२१०
,, नीलपुत्र-सम्बन्धः	२१६
,, महानील-द्वितीयपुत्रस्य-सम्बन्धः	२२२
,, कालपुत्रः-सम्बन्धः	२२३
,, महाकाल-सम्बन्ध-चतुर्थः	२२४
,, शत्रुञ्जयानदीप्रभावे शान्तनभूपकथा	२२६
,, चन्द्रप्रभास तीर्थसम्बन्धः	२२८
,, नेमिस्थापनासम्बन्धः	२२९
,, भरतचक्रि संक्षेपतः सम्बन्धः	२३१
,, श्रेयांसकुमारसम्बन्धः	२३७
,, पुण्डरीक-सिद्धिगमनसम्बन्धः	२४०
,, बाहुबलिकारित श्री मरुदेवी भवनसम्बन्धः	२४३

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विषयः	पृष्ठांकः
श्री नमिविनमिमुक्तिगमन सम्बन्धः	२४६
,, नमितत्पुत्री-मुक्तिगमनस्वरूम्	२५०
,, आदित्ययशोमुख्यभूपानां सम्बन्धः	२५१
,, सिद्धदंडिका यन्त्रम्	२५२
,, सगरस्य सम्बन्धः प्रोच्यते	२५५
,, इशानेन्द्रोद्धारः	२६१
,, प्रथमनाकीन-वीर्यसारनृपोद्धार-सम्बन्धः	२६२
,, सागरचक्रि-सम्बन्धः उच्यते	२६४
,, व्यंतरेशकृतोद्धारः	२९०
,, चन्द्रयशः कृतो-नवमोद्धारः	२९१
,, शान्तिनाथस्य चतुर्मास-स्थितिः शत्रुञ्जयेऽभूदिति सम्बन्धः	२९५

विषयः	पृष्ठांकः
श्री द्राविड वालिखिल्लादि भूपालर्षि-मुक्तिगमन सम्बन्धः	३०६
,, जैनगीता सम्बन्धः (रामायणम्)	३१४
,, नारदमुक्तिगमन-स्वरूपम्	४६४
,, नन्दिषेणसूरि अजितशान्तिस्तव-मुक्तिगमन-सम्बन्धः	४६८
श्रीकृष्णचरिते नेमिनाथ सम्बन्धगुम्फित-साम्बप्रद्युम्नप्रमुख श्रीकृष्णनरकगमनस्वरूपम्	४७१
प्रथमो विभागः संपूर्णः॥	५५२
श्री शत्रुञ्जयगिरिना-१०८ नामो	५५२

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

સંપાદકીય નિવેદન

આજથી લગભગ બારેક વર્ષ પહેલાં મુનિમિલનના એક સુંદર નાનકડા પ્રસંગમાંથી પ્રેરણા પામીને શ્રી શત્રુંજયતીર્થ સંબંધી કંઈક લખવા માટે **श्री शत्रुंजयकल्पवृत्ति** પુસ્તકાકારે પ્રાપ્ત થતાં અવર્ણનીય આનંદ પ્રાપ્ત થયો હતો.

ત્યારબાદ તે ઇચ્છિત ગ્રંથની પ્રાપ્તિ થતાં સમયની સાનુકૂલતાએ તે મૂલ ગ્રંથને પંડિતજી પાસે ભણીને ભાષાંતર લખીને તૈયાર કરેલ હતું. ત્યાર પછી તે ભાષાંતર છપાવવાનો વિચાર આવતાં મુંબઈ, સૂરત, અમદાવાદ, વડોદરા, ઇન્દૌર વગેરે સંઘો અને ભાવિક ભાઈ બહેનોની લાગણીભરી સુંદર સહાયથી તે ભાષાંતર બે ભાગમાં છપાવીને તા. ૫-૪-૯૧ના શુભ દિવસે રવિવારે સવારે ૧૦ વાગે શ્રી શત્રુંજયતીર્થની ગૌરવવંતી તળેટીમાં તેનું વાંચન દ્વારા ઉદ્ઘાટન થયું.

ત્યારબાદ બે વર્ષમાં આ ભાષાંતરના પુસ્તકની સતત માંગણી ચાલુ જ છે. અને તેમાંય કેટલાક અભ્યાસપ્રેમી પૂ. સાધુ-સાધ્વી ભગવંતોએ આનું મૂલ સંસ્કૃત પુસ્તક વ્યાખ્યાનમાં વધુ ઉપયોગી થાય માટે પ્રતાકારે છપાવવાનો તમે જ પ્રયત્ન કરો. એવી આંતરિક લાગણી સાથેની વિનંતિ થતાં એના માટે કંઈક કરવું એવા વિચારમાં આગળ વધ્યા.

અને આ બાજુ પ્રથમ પ્રકાશનનું જે પુસ્તક કપડવંજમાં રહેલ "શ્રી આગમોદ્ધારક સંસ્થા દ્વારા વિ. સં. ૨૦૨૬માં પ્રકાશન થયેલ તેની નકલો પણ ત્યાં ખલાસ થયેલ હોવાથી અમે આ ગ્રંથને પુસ્તકાકારને બદલે પ્રતાકારે છપાવવાના વિચારમાં મક્કમ થયા.

પછી પાલિતાણા વર્ધમાન જૈન આગમમંદિરના ટ્રસ્ટીઓને આ ગ્રંથને પ્રતાકારે છપાવવાની ભાવના દર્શાવતાં તેઓએ તુરત જ

For Private and Personal Use Only

આ વાતનો સહર્ષ સ્વીકાર કર્યો. એટલે આ ગ્રંથને છપાવવા માટેની મંગલ ઘડીઓ આવી ગઈ. અને પછી "શ્રી શ્રમણ સ્થવિરાલય ટ્રસ્ટ" પાસે શ્રી શત્રુંજયકલ્પ ભાષાંતર છપાવવાની જે અનામત રકમ હતી તે રકમ આગમમંદિર સંસ્થાને ભેટ કરી દીધી. આ રીતે અમારા કાર્યમાં દિનપ્રતિદિન સથવારો મળતો જ ગયો. અને અમે એ કાર્યમાં આગળ વધતાં જ ગયા.

॥૧૪॥

છાપકામ નક્કી થતાં અમને પ્રુફ જોવામાં વધુ અનુકૂલતા રહે, અને કાર્ય ઝડપથી થાય માટે સોનગઢમાં કહાન મુદ્રણાલયવાળા શ્રીયુત્ જ્ઞાનચંદજીને બોલાવ્યા અને તેઓનું હિન્દીકામ સુંદર-સુઘડને સ્વચ્છ હોવાથી તેમના પ્રેસમાં જ છપાવવાનું નક્કી કર્યું.

* ત્યારબાદ તેઓની સલાહથી તે પ્રતના છાપકામમાં દેખાવે સારું લાગે અને વધુ ટકે માટે લેજર પેપર લીધા.
* વાંચનની સગવડતા વધુ રહે માટે એક પાનામાં તેર જ શ્લોક લીધા.
* જેની આંખોનું તેજ ઘટ્યું હોય અથવા ચશ્માના નંબરો કે બેતાલાં આવેલા હોય માટે સહેલાઈથી વંચાય તેવા મોટા અક્ષરો લીધા.
* અને જ્યાં જ્યાં શુભાષિતો તથા સંગ્રહની ગાથાઓ આવે છે ત્યાં તેની સમજ માટે આગળા ભાગમાં 卐-સ્વસ્તિક મૂક્યો છે.
* સહુ પ્રથમ શુદ્ધિપત્રક પ્રમાણે શુદ્ધિ કરી, ત્યારબાદ ચાલુકામમાં જ્યાં શુદ્ધિ કરવા જેવી લાગી, પાદપૂર્તિ કરવા જેવી લાગી ત્યાં અર્થને સન્મુખ રાખીને શુદ્ધિકરણ કર્યું.
* ચાલુ કથાના અક્ષરો કરતાં મૂલ ગાથાના અક્ષરો મોટા લીધા. ॥૧૪॥
* પ્રતના પાનાઓ છૂટા રહેતાં હોવાથી બે ભાગ પાડયા. અને પાનાઓની બન્ને બાજુએ નંબર ગોઠવ્યા. જેથી ગોઠવવાની અનુકૂલતા વધુ રહે.

卐 બધે ઠેકાણે મૂલ ગ્રંથ બહાર પડયા પછી ભાષાંતર પડતું હોય છે. ત્યારે અહીં ભાષાંતર બહાર પડયા પછી મૂલ ગ્રંથ પ્રતાકારે છપાવવાનો અવસર આવ્યો. તેમાં કોઈ તેવો જ યોગ હશે ?

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* આ ગ્રંથના સંપાદનમાં પૂજ્ય શાસનકંટકોદ્ધારક શ્રી આચાર્ય ભગવંતના શિષ્ય પ્રખર અભ્યાસી જ્યોતિર્વિદ્ પૂજ્ય આચાર્ય ભગવંતશ્રી નરેન્દ્રસાગરસૂરીશ્વરજી તરફથી–વાંચન–પાદપૂર્તિ વગેરે દરેક કાર્યોમાં અનુપમ ને સુંદર સહકાર પ્રાપ્ત થતો હતો. તે કારણ વડે જ આ ગ્રંથ સુંદર ને જલદી પ્રકાશન થઈ શક્યો છે.

* આ ગ્રંથને છપાવવાની વાતની શરૂઆત કરતા પહેલાં જ આ ગ્રંથની પાટલી પર "શ્રી શત્રુંજય મહિમારથ"નું ચિત્ર બનાવવાની ભાવના છે, તે વાતને પ્રગટ કરતાં જ અમારા પરમ સ્નેહિ પૂજ્ય ઉપાધ્યાય શ્રી નરદેવસાગરજી મહારાજે પોતાની આચાર્યપદની સ્મૃતિ નિમિત્તે સૌજન્યનો લાભ પોતાના કુટુંબીજનો વડે લેવડાવ્યો. તેનું આ પ્રસંગે સંભારણું કરું છું. આ ગ્રંથને બીજા પ્રકાશનમાં પ્રતાકારે પ્રસિદ્ધ કરતાં પહેલાં કપડવંજની આગમોદ્ધારક સંસ્થાનો ઉપકાર યાદ કરવો જ જોઈએ.

* આ ગ્રંથમાં જે હસ્તલિખિત પાનાનો ફોટો છે. તે મૂલ પ્રત અત્યારે પણ—સૂરત જૈનાનંદ પુસ્તકાલયમાં હસ્તલિખિત વિભાગમાં શોભી રહી છે ને સચવાઈ છે. અત્યાર સુધીમાં તેની બે જ પ્રતિઓ મલી છે. વધુ મલી નથી.

આ ગ્રંથને સુંદર રીતે ને ઝડપથી છાપી આપનાર શ્રીયુત જ્ઞાનચંદજી પણ આ કાર્યના ભાગીદાર છે. અને પાલિતાણાથી પ્રુફને રોજ સોનગઢ લઈ જવા ને લાવવા માટે પાલિતાણામાં માળીના ખાંચામાં રહેતાં ગુણવંતભાઈ વનમાળીદાસ સઠીયાનો સહકાર ખૂબ જ અમૂલ્ય હતો. સાથે સાથે આગમમંદિરના મેનેજર હસમુખભાઈ અને નરેન્દ્રભાઈને યાદ કર્યા વગર કેમ ચાલે? આ સિવાય પણ આ ગ્રંથના પ્રકાશનમાં પ્રત્યક્ષ કે પરોક્ષ તથા તન–મન–ધનથી સહકાર આપનાર ચતુર્વિધ સંઘના ઉપકારને યાદ કરી આ લખાણને પૂર્ણ કરું છું. આ ગ્રંથના પ્રકાશનમાં શુદ્ધિ જાળવવા માટે પૂરતો પરિશ્રમ કર્યો જ છે છતાં પણ કોઈ ક્ષતિ રહી હોય તો જૈનધર્મની પરિપાટીએ મિચ્છામિ દુક્કડં.

લી. મહાભદ્રસાગર.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

પ્રકાશકીય-નિવેદન

આજથી ૫૧ વર્ષ પહેલાં જ્યારે પૂજ્ય સાગરાનંદસૂરીશ્વરજી મહારાજ સાહેબે પ્રથમ વખત આગમો અને મૂર્તિને એક જ સ્થાને
॥૧૬॥ મંદિરમાં સ્થાપીને નવીનતા જેવું "આગમમંદિર" તૈયાર કરાવ્યું. તે સમયે તેઓને આ "શ્રી શત્રુંજયકલ્પવૃત્તિ" મૂલ સંસ્કૃત ગ્રંથ હસ્તલેખિત પોથીમાં વાંચવા મળેલ હતો, ત્યારે તેઓશ્રીને શ્રી શત્રુંજયના મહિમાને વર્ણવતો આ ગ્રંથ અપ્રસિદ્ધ—નવો ને અદ્ભુત લાગ્યો હતો. તેથી તેજ સમયે તેની પ્રેસકોપી કરાવીને આગમો પછી તુરત જ છપાવવા માટે તેને ૪૬મો નંબર આપેલ હતો. પણ કોઈ અગમ્ય કારણોસર તેઓશ્રી પોતાના શુભહસ્તે તેનું સંપાદન કરી ન શકયા.

ત્યારબાદ તેઓશ્રીના અનન્ય પટ્ટધર—સ્વ. ગ. પૂ. આ. મ. શ્રી માણિક્યસાગરસૂરિજી મ.ના શિષ્ય શતાવધાની પૂજ્ય ગણિવર્યશ્રી લાભસાગરજી મ.શ્રીએ વિ. સં. ૨૦૨૯માં કપડવંજમાં રહેલ આગમોદ્ધારક સંસ્થા દ્વારા આ ગ્રંથ પુસ્તકાકારે છપાવેલ હતો.

તેની નકલો અપ્રાપ્ય થવાથી ઘણા જ પૂજ્ય સાધુ-સાધ્વી ભગવંતોની માંગણી હોવાથી અને વ્યાખ્યાનમાં વાંચન માટે પ્રતની ઉપયોગીતા હોવાથી સ્વ. ગ. પૂજ્ય આ. મ. શ્રી હેમસાગરસૂરિજી મ.ના શિષ્યો પૂજ્ય મુનિશ્રી અમરેન્દ્રસાગરજી તથા પૂજ્ય મુનિશ્રી મહાભદ્રસાગરજીએ આ ગ્રંથને પ્રતાકારે છપાવવાની ભાવના દર્શાવતાં અમારી સંસ્થાએ એ કાર્યને આનંદથી વધાવી લીધું અને નિર્વિઘ્ને પાર પાડયું. આ રીતે પૂજ્ય આગમોદ્ધારક ગુરુદેવની ઇચ્છાને સફલ કરતાં અમે આનંદ ને ગૌરવ અનુભવીએ છીએ.

આ કાર્યમાં શ્રી શ્રમણ સ્થવિરાલય ટ્રસ્ટે પોતાની પાસેની શ્રી શત્રુંજયકલ્પ ભાષાંતર પ્રકાશનની જે રકમ હતી તે રકમ અમારી ॥૧૬॥
સંસ્થાને ભેટ આપી છે. તેથી તેનો આભાર માનીએ છીએ.

આ કાર્યમાં કહાન મુદ્રણાલયવાળા શ્રી જ્ઞાનચંદજી જૈન તથા બીજી રીતે સહાયક બનનાર સહુનો અમે આભાર માનીએ છીએ.

લી. શ્રી વર્ધમાન જૈન આગમમંદિર સંસ્થા (પાલીતાણા)ના ટ્રસ્ટીગણ.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

શ્રી આગમોદ્ધારક આનંદસાગર સૂરિવરેભ્યો નમઃ

સપ્રેમ–સસ્નેહ–સાદર–અર્પણ–સમર્પણ

સાગર સમુદાયરૂપી આકાશમાં શોભી રહેલાં સપ્તર્ષિઓ

卐 પ. પૂ. સ્વ. આગમોદ્ધારક આ. શ્રી આનંદસાગરસૂરીશ્વરજી મ.

卐 પ. પૂ. સ્વ. ગચ્છાધિપતિ આ. શ્રી માણિક્યસાગરસૂરિજી મ.

卐 પ. પૂ. સ્વ. ગ. આચાર્યદેવ શ્રી હેમસાગરસૂરિજી મ.

卐 પ. પૂ. સ્વ. ગ. આચાર્ય મ. શ્રી દેવેન્દ્રસાગરસૂરિજી મ.

卐 પ. પૂ. સ્વ. ગ. આ. મ. શ્રી ચિદાનંદસાગરસૂરિજી મ.

卐 પ. પૂ. સ્વ. ગ. આ. મ. શ્રી દર્શનસાગરસૂરિજી આદિ પુણ્ય પુરુષોને સંભારીને સરળ–સ્વભાવી–જ્ઞાનદીપક–માર્ગપ્રેરક–વર્તમાન–ગચ્છાધિપતિ–પરમ પૂજ્ય આચાર્ય મ. શ્રી

卐 સૂર્યોદયસાગરસૂરિજી મ. ને આ ગ્રંથરત્ન સમર્પણ ને વંદનાવલી.

લી. અમરેન્દ્રસાગર — મહાભદ્રસાગર.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

દાદાના દેરાસરની વિશાલતા ને અદ્ભુતતા

* આ દેરાસર મૂલ જમીનથી બાવન હાથ ઊંચું પર્વતની જેમ શોભે છે. તેની ઊંચાઈ બાજુથી અથવા પાછળથી દેખાશે. * આ દેરાસરના આગળના શિખરમાં ૧૨૪૫ કુંભના મંગલ ચિહ્નો મંગલની સાક્ષી પૂરે છે. * સિંહના ૨૧ વિજય ચિહ્નો સંસાર વિજયની મૂક પ્રેરણા દે છે. * ચારે દિશામાં ચાર યોગિનીઓ અને દશદિક્પાલો રક્ષણ કરવા ખડે પગે તૈયાર ઊભા છે. * ચાર ગવાક્ષો-બત્રીસ તોરણો-બત્રીસ પૂતળીઓથી મંદિર અધિક શોભે છે * આરસ પાષાણના ૨૪ હાથીઓને ૭૨ આધારસ્તંભો શોભામાં અભિવૃદ્ધિ કરે છે. * આ મંદિરને બાહડમંત્રીએ બનાવ્યું ત્યારે તેનું નામ "ત્રિભુવનપ્રસાદ" હતું. તે જીર્ણ થતાં ખંભાતના તેજપાલ સોનીએ જીર્ણોદ્ધાર કરાવી સં. ૧૬૫૦ બંધવ્યું ત્યારે તેનું નામ "નંદિવર્ધન પ્રાસાદ" પાડ્યું હતું. લોકોએ તેની ઉદારતા જોઈને "કુબેર ભંડારી"નું બિરુદ આપ્યું. દાદના દેરાસરની બન્ને બાજુએ બે ભવ્ય જિનાલયો શોભે છે. જમણી બાજુએ કહેવાતું સીમંધર-સ્વામીનું દેરાસર તેને વસ્તુપાલ-તેજપાલે બંધાવેલું. તેમાં મૂલપ્રભુ આદિનાથ છે. ડાબી બાજુના દેરાસરમાં જે "નવા આદીશ્વર પધરાવેલા છે તેની કિંવદંતી કંઈક આવી છે. નાસિકાથી ખંડિત થયેલ પ્રતિમાની જગ્યાએ નવી મૂર્તિ લાવવામાં આવી પણ કારીગરો જૂની મૂર્તિ ઉપાડવા ગયા ત્યારે ભયંકર અવાજો થયા. ત્યારે સંઘે વિચાર્યું કે પ્રભુજી અત્રે જ રહેવા માંગે છે. તેમના સ્થાને પધરાવવા લાવેલી મૂર્તિને તે બાજુના દેરાસરમાં પધરાવી ને તેનું નામ "નવા આદીશ્વર પડ્યું. આને પણ વસ્તુપાલ-તેજપાલે બંધાવેલ હતું. દાદાના દરબારમાં આવનાર યાત્રિક એક એક દેરી-પ્રભુપ્રતિમાઓ-ચરણ-પાદુકાઓને જોતાં અને પ્રદક્ષિણાઓ દેતાં આનંદથી નાચી ઊઠે છે.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

❀ णमोत्थु णं समणस्स भगवओ महावीरस्स ❀

॥ पू० आगमोद्धारक-आचार्यश्री आनन्दसागरसूरीश्वरेभ्यो नमः ॥

तपोगणाधीश-श्रीधर्मघोषसूरिवररचितः—श्रीशुभशीलगणिविहितवृत्तियुतः

❀ श्री शत्रुञ्जय-कल्पः ❀

यस्यादेशादुपेत्य प्रथमगणधरः पुण्डरीकाभिधानः, सिद्धाद्रौ पञ्चकोटीमितयतिसहितः केवलज्ञानमाप्य ।
श्रेयःपुर्यामयासीदमरनरपतिश्रेणिसंसेविताङ्घ्रिः, स श्रीमानादिदेवः शिवसुखमचिरात् प्राणभाजां प्रदेयात् ॥ १ ॥
यत्र तीर्थेऽखिलं कर्म-राशिं क्षिप्त्वा चिरार्जितम् । असङ्ख्या यतयो जग्मु-र्यास्यन्ति च शिवश्रियम् ॥ २ ॥
तस्मिँस्तीर्थे जिनाधीशान् वृषभादीन् सुरार्चितान् । नृणां पूजयतां ध्यानं कुर्वतां शिवशं (दं) भवेत् ॥ ३ ॥
यतः शत्रुञ्जये दृष्टे दुर्गतिद्वितयं क्षिपेत् । सागराणां सहस्रं च पूजास्नात्रविधानतः ॥ ४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पल्योपमसहस्रं तु ध्यानाल्लक्षमभिग्रहात्। दुष्कर्म क्षीयते मार्गे सागरोपमसञ्चितम् ॥ ५ ॥
सिद्धाद्रौ पक्षिणः सन्ति क्षुद्रा अन्येऽपि येऽङ्गिनः। हिंसका अपि सेत्स्यन्ति ते भवैस्त्रिभिरुत्तमाः ॥ ६ ॥
तावद् गर्जन्ति हत्यादि-पातकानीह सर्वतः। यावच्छत्रुञ्जयेत्याख्या श्रूयते न गुरोर्मुखात् ॥ ७ ॥
शास्त्रान्तरेऽप्युक्तं-अष्टषष्टिषु तीर्थेषु यात्रया यत्फलं भवेद्। आदिनाथस्य देवस्य स्मरणेनापि तद्भवेत् ॥ ८ ॥
इत्यादि भूरिशो यस्य माहात्म्यं श्रूयते जने। तस्य तीर्थस्य वर्ण्येत तत्कथं मन्दबुद्धिभिः ॥ ९ ॥
सुधर्मस्वामिना यस्य माहात्म्यं ग्रन्थकोटिभिः। वर्णितं तच्च सङ्क्षिप्तं भद्रबाहुगुरूत्तमैः ॥ १० ॥
तच्च वज्रर्षिणा भव्योपकाराय लघूकृतम्। ततः श्रीपादलिप्तेन सूरिणापि हितेच्छुना ॥ ११ ॥
ततो धनेश्वरसूरीश्वरः सङ्क्षिप्तवाँस्तदा। ततोऽन्येऽपि गुरूत्तंसाः सञ्चिक्षिपुश्च तत्पुनः ॥ १२ ॥
ततस्तपोगणाधीशो धर्मघोषगुरूत्तमः। श्रीशत्रुञ्जयकल्प तु चकारामुं तमोऽपहम् ॥ १३ ॥
तपोगच्छाम्बरादित्याः, श्रीमद्देवेन्द्रसूरयः आसँस्तेषांविनेयास्तु, श्री विद्यानन्दसूरयः ॥ १४ ॥
(तयोर्जाते मृतेऽकस्मात्त्रयोदशदिनान्तरे। धर्मकीर्तिरुपाध्यायोऽजनि तस्मिन् गणे तदा ॥ १४ ॥)
क्रमात्तस्य पदे सूरेर्जाते सति शुभोदये। धर्मघोषगुरुरिति नामाऽजनि जनेऽभितः ॥ १५ ॥
तेनैव धर्मघोषेण सूरिणा विदधेतराम्। श्रीशत्रुञ्जयकल्पोऽयं भव्याऽङ्गिबोधहेतवे ॥ १६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

'तच्चेदं स्तवनं तथाहि—'सुयधम्मकित्तिअं तं तित्थं'

धर्मघोषगुरूत्तंस-कृतस्यास्य स्तवस्य तु। वृत्तिर्विधीयते तत्तत्कथायुक्ता मया किल ॥ १७ ॥

तथाहि-सोमसुन्दरसूरीशस्तपोगच्छवियद्रवेः। पट्टालङ्करणो जातो मुनिसुन्दरसूरिराट् ॥ १८ ॥

तस्य पट्टोदयाद्रिं तु भासयन्त्यधुना ध्रुवम्। रत्नशेखरसूरीशास्सूर्याः प्रतापिनः पुनः ॥ १९ ॥

मुनिसुन्दरसूरीश-शिष्येण मुग्धबुद्धिना। शुभशीलाभिधेनैव भव्याङ्गिबोधहेतवे ॥ २० ॥

धर्मघोषगुरूत्तंस-कृतस्यास्य स्तवस्य तु। वृत्तिस्तत्तत्कथायुक्ता क्रियते साम्प्रतं किल ॥ २१ ॥ युग्मम् ॥

तस्य स्तोत्रस्य प्रथमगाथायाः सम्बन्ध आदौ प्रोच्यते। तथाहि—

सुयधम्मकित्तिअं तं तित्थं देविंद [विंद] वंदिअं थुणिमो।
पाहुडए विज्जाणं देसिअमिगवीसनामं जं ॥ १ ॥

व्याख्या-श्रुतस्य धर्मः-बोधः श्रुतधर्मः-सिद्धान्तः। अथवा श्रुत एव धर्मः। स च द्विधा-श्रमण-धर्मः श्राद्धधर्मश्च, शास्त्रे उक्तं च—

दुह दव्वभावधम्मो दव्वे दव्वस्स दव्वमेवऽहवा। तित्ताइसहावो वा गम्मा इत्थी कुलिंगो वा ॥१॥ [आव०]

For Private and Personal Use Only

दुह होइ भावधम्मो सुअ चरणे वा सुअम्मि सज्झाओ । चरणम्मि समणधम्मो खंतीमाई भवे दसहा ॥ २ ॥

एवंविधे श्रुतधर्मे-धर्मशास्त्रे तस्मिन् कीर्तितं-व्याख्यातं गणधरादिभिः 'तीर्थं' शत्रुञ्जयाभिधं तीर्थम् । तीर्यते संसाराम्भोधिरनेनेति तीर्थम्, भवोद्भूततापोपशामकत्वात् तीर्थम्, उक्तं च—

नामं ठवणातित्थं दव्वतित्थं च भावतित्थं च । इक्किक्कंपि अ इत्तोऽणेगविहं होइ नायव्वं ॥ १ ॥

दाहोवसमं तण्हाइ छेअणं मलपवाहणं चेव । तीहिं अत्थेहि निउत्तं तम्हा तं दव्वओ तित्थं ॥ २ ॥

कोहम्मि अ निग्गहिए दाहस्सोवसमणं भवे तित्थं । लोहम्मि अ निग्गहिए तण्हावुच्छेअणं होइ ॥ ३ ॥

अट्ठविहं कम्मरयं बहुएहिं भवेहिं संचिअं जम्हा । तव-संजमेण धोवइ तम्हा तं भावओ तित्थं ॥ ४ ॥

दंसण-नाण-चरित्तेसु निउत्तं जिणवरेहिं सव्वेहिं । तिसु अत्थेसु निउत्तं तम्हा तं भावओ तित्थं ॥ ५ ॥

'देविंद'त्ति । देवाः-सुरास्तेषामिन्द्राः-स्वामिनः तेषां 'वृन्दानि' समूहाः तैर्वन्दितं 'वदि स्तुत्य-भिवादनयोः' क्ते रूपं, 'थुणिमो' स्तवीमि, तत्तीर्थं 'पाहुडे'त्ति प्राभृतं-अधिकारविशेषः विद्यानां-चतुर्दशपूर्वाणां प्राभृते 'देशितं' कथितं, एकविंशतिः नामानि यस्य तत्, स्तुमः । द्वितीयोऽर्थः कथ्यते-'श्रुतो' विख्यातो धर्मकीर्तिरुपाध्यायस्तस्यापरं नाम धर्मघोषसूरिस्तेन कीर्तितं-स्तुतं, तीर्थं 'देविंद'त्ति धर्मघोषसूरेर्गुरुः देवेन्द्राचार्यः, तेन 'वन्दितं' स्तुतं 'थुणिमो' सु (स्तुमो) विद्यानन्दसूरिणा देशितं-त्वं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुरु कल्पं धर्मघोषस्याग्रे प्राभृते-अधिकारे अधिकारविशेषे वा कथितं विद्यानन्दैर्देशितं 'एकविंशतिनाम' यस्य तत्। शत्रुञ्जयतीर्थस्य एकविंशतिर्दत्तानि (नामानि) यानि सुरनृपनरैर्मुनिभिश्च तेषां नामकथनाय गाथात्रयमुच्यते—

[1]विमलगिरि [2]मुत्तिनिलयं[3]सित्तुंजो [4]सिद्धखित्त [5]पुंडरीओ ।
[6]सिरिसिद्धसेहरो [7]सिद्धपव्वओ [8]सिद्धराओ अ ॥ २ ॥
[9]बाहुबली[10]मरुदेवो[11]भगीरहो[12]सहसपत्त[13]सयवत्तो ।
कूड[14]य अट्ठुत्तरओ[15]नगाहिराओ सहसकमलो[16] ॥ ३ ॥
ढंको[17]कोडिनिवासो[18]लोहिच्चो[19]तालज्झओ[20]कयंबुत्ति[21]
सुरनरमुणिकयनामो सो विमलगिरी जयउ तित्थं ॥ ४ ॥

तत्रादौ विमलगिरेर्नाम्न उत्पत्तिः प्रोच्यते, तथाहि—

॥ श्री विमलगिरि नाम विषये सूरभूपर्षिकथा ॥

अभ्रंलिहमहेभ्यार्हन्-महीरमणमन्दिरैः । रराज नगरं नाम्ना पद्माह्वं भूमिभूषणम् ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्रासीन् मदनः क्षोणी-पतिन्यायैकमन्दिरम् । तथाऽपात् पृथिवीं सौख्य-भाजोऽभूवन् यथा प्रजाः ॥ २ ॥
* यतः दुर्बलानामनाथानां बालवृद्धतपस्विनाम् । अन्यायैः परिभूतानां सर्वेषां पार्थिवो गुरुः ॥ १ ॥ 卐
तस्य प्रेमवती पत्नी मन्त्रीशो मतिसागरः । सूराह्वो नन्दनो वर्य-रूपोऽभूवन्नमी क्रमात् ॥ ३ ॥
साधयन् विषयान् भूपः प्रत्यर्थिपार्थिवान् बहून् । स्वीयाज्ञां ग्राहयामासाऽर्जयामास यशोऽमलम् ॥ ४ ॥
एकदा भूप उद्याने गतः सारपरिच्छदः । कुर्वन् क्रीडां ददर्शैकां श्वेताम्बरधरां स्त्रियम् ॥ ५ ॥
अप्राक्षीद् भूपतिर्नारीं काऽसौ त्वं कुत आगता ? ! स्त्री प्राह किं तवेदानीं नामादिपृच्छनैरिह ॥ ६ ॥
राजाऽऽचष्ट करोषि त्वं किं लोकस्य सुखासुखे । नार्याहैमि गृहे यस्य तस्य स्यात् कमला बहु ॥ ७ ॥
राजाऽवक् तर्हि मे सद्म कृतार्थय निजागमात् । देव्यभाणीत् प्रगे गेहे समेष्यामि तवेश्वर ! ॥ ८ ॥
हृष्टो नृपो गृहेऽभ्येत्य द्वितीये दिवसे प्रगे । यावद्विलोकते देव्या आगमं संसदि स्थितः ॥ ९ ॥
तावद् भम्भारवं कुर्वन् नरोऽभ्येत्य जगावदः । स्वामिन् ! सिंहरथोऽरिस्त्वद्राज्यं लातुमिहागमत् ॥ १० ॥
भूप उत्थाय सन्नह्य युद्धं कर्तुं पुराद् बहिः । ययौ यावद्रिपोः सैन्यं महद्वीक्ष्येत्यचिन्तयत् ॥ ११ ॥
यद्यहं करवै युद्ध-मनेन रिपुणा समम् । तदाऽहं हत एवास्मि नूनं स्त्रीजल्पनच्छलात् ॥ १२ ॥
नंस्यते साम्प्रतं चेद्धि तदा मे जीवितं भवेत् । जीवन् पुनर्नरो भद्र-शतानि लभते किल ॥ १३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुरु कल्पं धर्मघोषस्याग्रे प्राभृते-अधिकारे अधिकारविशेषे वा कथितं विद्यानन्दैर्देशितं 'एकविंशतिनाम' यस्य तत् । शत्रुञ्जयतीर्थस्य एकविंशतिर्दत्तानि (नामानि) यानि सुरनृपनरैर्मुनिभिश्च तेषां नामकथनाय गाथात्रयमुच्यते—

[१]विमलगिरि [२]मुत्तिनिलयं[३]सित्तुंजो [४]सिद्धखित्त [५]पुंडरीओ ।
[६]सिरिसिद्धसेहरो [७]सिद्धपव्वओ [८]सिद्धराओ अ ॥ २ ॥
[९]बाहुबली[१०]मरुदेवो[११]भगीरहो[१२]सहसपत्त[१३]सयवत्तो ।
कूड[१४]य अट्ठुत्तरओ[१५]नगाहिराओ सहसकमलो[१६] ॥ ३ ॥
ढंको[१७]कोडिनिवासो[१८]लोहिच्चो[१९]तालज्झओ[२०]कयंबुत्ति[२१]
सुरनरमुणिकयनामो सो विमलगिरी जयउ तित्थं ॥ ४ ॥

तत्रादौ विमलगिरेर्नाम्न उत्पत्तिः प्रोच्यते, तथाहि—

॥ श्री विमलगिरि नाम विषये सूरभूपर्षिकथा ॥

अभ्रंलिहमहेभ्यार्हन्-महीरमणमन्दिरैः । रराज नगरं नाम्ना पद्माह्वं भूमिभूषणम् ॥ १ ॥

For Private and Personal Use Only

ततः प्रविश्य पुर्यन्तर्दत्त्वा वप्रारर्रिं दृढम् । विमृश्य मन्त्रिणा सार्द्धं नंष्टुकामोऽभवन्नृपः ॥ १४ ॥
कियतीं कमलां लात्वा पत्नीनन्दनमन्त्रियुक् । राजा छन्नं पुराद्रात्रौ निर्ययौ जीवितेच्छया ॥ १५ ॥
* यतः–अमेध्यमध्ये कीटस्य सुरेन्द्रस्य सुरालये । समाना जीविताकाङ्क्षा समं मृत्युभयं द्वयोः ॥ १ ॥ 卐
* सव्वे जीवावि इच्छन्ति जीविउं न मरिज्जिउं । तम्हा पाणवहं घोरं जावज्जीवाइ वज्जए ॥ २ ॥ 卐
गतं भूपं प्रगे ज्ञात्वा वैर्यभ्येत्य पुरान्तरे । मदनक्ष्मापते राज्य–मलंचक्रे सुखेन सः ॥ १६ ॥
यावन्मदनभूपालो गच्छन् पल्लयां ययौ क्रमात् । तावद्भिल्लैर्हृता सर्वा लक्ष्मीस्तस्य महीपतेः ॥ १७ ॥
* यतः–गतसारेऽत्र संसारे सुखभ्रान्तिः शरीरिणाम् । लालापानमिवाङ्गुष्ठे बालानां स्तन्यविभ्रमः ॥ १ ॥ 卐
* सम्पदो जलतरङ्गविलोला यौवनं त्रिचतुराणि दिनानि । शारदाभ्रमिव चञ्चलमायुः किं धनाद्यैः कुरुत धर्ममनिंद्यं॥२॥卐
गतायां श्रियि निःशेषः परिवारोपि गतः क्वचित् । एक एव स्थितो मन्त्री स्वामिभक्तिपरायणः ॥ १८ ॥
बुभूक्षापीडितो भूपः पत्नीतनयमन्त्रियुग् । स्वनिर्वाहं फलैश्चक्रे जीवितेच्छुरनारतम् ॥ १९ ॥
चलन्नुमापुरेऽभ्येत्य भूपः स्थित्वा क्वचिद् गृहे । काष्ठादिविक्रयाच्चक्रे निर्वाहं कष्टतो निजम् ॥ २० ॥
तदा मन्त्र्यपि कष्टेन बिभ्राणः स्वोदरं स्वयम् । भूपपृष्ठिं न मुञ्चेत क्षणमेकं सुभक्तितः ॥ २१ ॥
* यतः–' चित्तज्ञः शीलसंपन्नो वाग्मी दक्षः प्रियंवदः । यथोक्तवादी स्मृतिमान् मन्त्रीशः श्लाघ्यते जनैः ' ॥१॥卐

गते वर्षाष्टके भूप एधान्यानेतुमेकदा । यावद्ययौ वने तावद् वनितैका जगावदः ॥ २२ ॥
तव गेहेऽहमेष्यामि यदि ते रोचतेऽधुना ।
चटिष्यति पितू राज्यं हस्ते रिपोः शयान्ननु (हस्ते मेऽतिशयात् ननु) ॥ २३ ॥
राजाऽवग् वाहितः पूर्वं–महं नार्येकया छलात् । राज्यापहारतः किं मे साम्प्रतं लास्यते त्वया ? ॥ २४ ॥
नार्यभाणीद्यया राज्यं गमितं तव भूपते ! । सा तु दारिद्रिणी देवी समेता ते कुकर्मतः ॥ २५ ॥
अहं शुभोदयाद्राज्या–धिष्ठात्री देवताऽधुना । आगताऽस्मि प्रदातुं ते राज्यं पैतामहं द्रुतम् ॥ २६ ॥
भूपोऽभणद्वचोदम्भात् किं वाहयसि मामिह ? । देव्याचष्ट व्रज स्वीय-पुरे तिष्ठ रहोऽधुना ॥ २७ ॥
मासत्रये गते श्वेत-पञ्चम्यां दिवसात्यये । अनपत्यो रिपुर्याता तवैव यममन्दिरम् ॥ २८ ॥
तदा त्वामागतं ज्ञात्वा मन्त्र्याद्या राज्यमञ्जसा । तुभ्यं दास्यन्ति सद्भाग्यो-दयादेवावनीपते ! ॥ २९ ॥
ततो भूपः सूरीवाक्याद् गत्वा स्वीयपुरे रहः । मृते तस्मिन् नृपे रात्रौ राज्यं प्राप स्वकं क्रमात् ॥ ३० ॥
स्वराज्यगमनोदन्तो राज्ञा पृष्टोऽन्यदा मुनिः । जगौ पूर्वे भवे भीम-पुरेऽभूत् क्षत्रियस्त्वकम् ॥ ३१ ॥
तत्र कस्याः स्त्रिया रत्नं हृत्वा छन्नं त्वया ननु । अष्टयामान्तिके दत्तं पश्चादेवानुकम्पया ॥ ३२ ॥
सा स्त्री मृत्वाऽभवत् सिंह-रथो राजा रिपुस्तव । क्षत्रियो मरणं प्राप्तस्त्वमभून्मदनो नृपः ॥ ३३ ॥

* जायम्मि जीवलोए दो चेव नरेण सिक्खिअव्वाइं। कम्मेण जेण जीवइ जेण मुओ सुग्गइं जाइ ॥ २ ॥ 卐

इतः–पद्मपुरे वैर–सिंहस्य मेदिनीपतेः। चन्द्रलेखामुखाः पत्न्य आसन्नष्टौ सदाशयाः ॥ ७ ॥

तासामासन् क्रमात्पुत्राः पञ्च पञ्च पृथक् पृथग् । एकैका तनया वर्य-रूपाः प्रत्येकतोऽभवन् ॥ ८ ॥

पद्मा रामा रमा लक्ष्मी कमला विमलाऽचला । श्रीमतीति सुता अष्टौ बभूवुर्गुणमन्दिरम् ॥ ९ ॥

पठन्त्यः पण्डितोपान्ते सर्वाः शास्त्राणि भूरिशः । बभूवुः कोविदोत्तंसा भारतीव तनूभवाः ॥ १० ॥

* यतः–"जले तैलं खले गुह्यं पात्रे दानं मनागपि। प्राज्ञे शास्त्रं स्वयं याति विस्तारं वस्तुशक्तितः" ॥१॥ 卐

भगिन्योऽन्येद्युरेकत्र मिलित्वेति जगुर्मिथः । अस्माकं कांत एकः स्याद्यदि विद्वांस्तदा वरम् ॥ ११ ॥

मूर्खश्चेज्जायते कान्तो यदा नार्याः कुकर्मतः । यावज्जीवं तदा दुःखं पृष्ठिं नैव विमुञ्चते ॥ १२ ॥

अस्मत्कृतसमस्यानां पूरणं यः करिष्यति । स एव रमणोऽस्माकं भवताद् वह्निरन्यथा ॥ १३ ॥

एवं कृतां प्रतिज्ञां तां पुत्रीभिरवगत्य च । भूप आकारयामास भूपानुद्वाहहेतवे ॥ १४ ॥

वीरसेनोऽपि तत्रागाद् मानितो मेदिनीभुजा। सुस्थानदानतोऽन्येपि नृपाः सन्मानिताः स्थिताः ॥ १५ ॥

सद्वेषभूषणाः सर्वा भगिन्यः सखिसंयुताः । अभ्येत्य भूभुजां पार्श्वे समस्यामपृच्छन्निति ॥ १६ ॥

सव्वन्नू हुंति अरिहंता[1] सा नारी मम कथ्यताम्[2] । तइआ गवरावए गीअं[3] मूलं च सुकृतस्य कः[4] ॥

स्नानं कृत्वा मुदा राजा-दन्या अधःस्थमृत्स्नया । रूषयित्वा तनुं स्नानं क्रियते शतसङ्ख्यया ॥ ४५ ॥
ध्यानं युगादिदेवस्य क्रियते प्रतिवासरम् । तदा पञ्चदशे घस्रे कुष्ठं याति न संशयः ॥ ४६ ॥
श्रुत्वैतां ज्ञानिनो वाणीं राजा ज्ञान्युदितं मुदा । कुर्वन् कुष्ठं निजाद् देहाद् गमयामास वेगतः ॥ ४७ ॥
विमले विग्रहे जाते भूपोऽसङ्ख्यनृपान्वितः । शत्रुञ्जयस्य नामादाद्विमलाद्रिरिति ध्रुवम् ॥ ४८ ॥
ततः स एव भूपालस्तीर्थे विमलनामनि । यात्राः शतप्रमाश्चक्रे-ऽसङ्ख्यक्ष्मापसमन्वितः ॥ ४९ ॥
कुर्वन् शत्रुंजये यात्रां भूपोऽसङ्ख्यजनाश्रितः । अर्जयामास कल्याणा-गमकृत्कर्म धर्मतः ॥ ५० ॥
* यतः-यो दृष्टो दुर्गतिं हन्ति प्रणतो दुर्गतिद्वयम् । सङ्केशार्हन्त्यपदकृत् स जीयात् विमलाचलः ॥ १ ॥ 卐
स्वपुत्राय निजं राज्यं वितीर्य सूरभूपतिः । शत्रुञ्जये गिरौ लात्वा (गत्वा) तपश्चक्रेऽतिदुष्करम् ॥ ५१ ॥
सूरस्तीव्रं तपः कुर्वन् केवलज्ञानमाप्तवान् । ततः प्राबूबुधद् भव्य-जनान् धर्मं जिनोदितम् ॥ ५२ ॥
सहस्रत्रयसत्साधु-सहितः सूरसंयतः । विमलो विमलक्ष्माध्रे मुक्तिपुर्यां समीयिवान् ॥ ५३ ॥
यतः-'कृत्वा पापसहस्राणि हत्वा जन्तुशतानि च । तपोऽस्मिन् ये वितन्वन्ति ते गच्छन्ति शिवालयम्' ॥५४॥
मुनिसुन्दरसूरीशां तपोगच्छखभास्वताम् । शुभशीलेन शिष्येण वृत्तिरेषा विनिर्मिता ॥ ५५ ॥

* * * * * *

अष्टौ यामान् त्वया रत्नं हृतं यस्याः पुरा भवे । तेनाष्टौ हायनान् यावद्राज्यं तव ललेऽरिणा ॥ ३४ ॥

※ यतः–' फरुसवयणेण दिणतवं अहिक्खिवंतो हणेइ मासतवं । वरिसतवं सवमाणो हणइ हणंतो अ सामन्नं ' ॥१॥卐

※ तित्वयरे उ पओसे सयगुणिओ सयसहस्सकोडिगुणो । कोडाकोडिगुणो वा हुज्ज विवागो बहुतरो वा ॥२॥卐

श्रुत्वैतन्निजपुत्राय दत्त्वा राज्यं सदुत्सवम् । प्रान्तेऽनशनतो मृत्वा मदनः स्वर्गमीयिवान् ॥ ३५ ॥

सूरः कुसङ्गतेर्योगात् आप व्यसनसप्तकम् । दिनं प्रति पशून् भूरीन् हन्ति पापर्द्धिसङ्गतः ॥ ३६ ॥

एकदा शूकरो हन्य-मानो भूमीभुजा दृढम् । दंष्ट्रया भूपतिं पृष्ठे जघानातीव निर्दयम् ॥ ३७ ॥

यथा यथा विधीयेत चिकित्सा भूपविग्रहे । तथा तथाऽभवत्कुष्ठं गलत्पीडाविधायकम् ॥ ३८ ॥

राजा चिकित्सितो वैद्यैर्भूरिभिर्विविधौषधैः । सज्जो नाभूद्यदा दुःखी तदार्त्तिं कुरुते हृदि ॥ ३९ ॥

गङ्गा-गयादितीर्थानां पयोभिः स्नपितो नृपः । नीरोगो न यदा जातस्तदा मन्त्रीश्वरान् जगौ ॥ ४० ॥

पावकेन करिष्यामि प्राणत्यागमहं लघु । ततो राजा ययौ प्रेत-वने त्यक्तुं तनुमसौ ॥ ४१ ॥

तदा तत्रागतो ज्ञानी जगौ म्रियस्व मा नृप ! । राजा प्राह न शक्नोमि क्षणं कुष्ठप्रपीडितः ॥ ४२ ॥

यदि कुष्ठं व्रजेद् देहान्मदीयात् साम्प्रतं द्रुतम् । तदा मे जीवितं भूयान्नान्यथा मरणं पुनः ॥ ४३ ॥

ज्ञानी प्रोवाच चैत्रस्य पूर्णिमाया दिने प्रगे । गत्वा शत्रुञ्जये चन्द्र–कुण्डे नीरेण हारिणा ॥ ४४ ॥

* जायम्मि जीवलोए दो चेव नरेण सिक्खिअव्वाइं । कम्मेण जेण जीवइ जेण मुओ सुग्गइं जाइ ॥ २ ॥ 卐

इतः–पद्मपुरे वैर–सिंहस्य मेदिनीपतेः । चन्द्रलेखामुखाः पत्न्य आसन्नष्टौ सदाशयाः ॥ ७ ॥

तासामासन् क्रमात्पुत्राः पञ्च पञ्च पृथक् पृथग् । एकैका तनया वर्य-रूपाः प्रत्येकतोऽभवन् ॥ ८ ॥

पद्मा रामा रमा लक्ष्मी कमला विमलाऽचला । श्रीमतीति सुता अष्टौ बभूवुर्गुणमन्दिरम् ॥ ९ ॥

पठन्त्यः पण्डितोपान्ते सर्वाः शास्त्राणि भूरिशः । बभूवुः कोविदोत्तंसा भारतीव तनूभवाः ॥ १० ॥

* यतः–" जले तैलं खले गुह्यं पात्रे दानं मनागपि । प्राज्ञे शास्त्रं स्वयं याति विस्तारं वस्तुशक्तितः " ॥१॥ 卐

भगिन्योऽन्येद्युरेकत्र मिलित्वेति जगुर्मिथः । अस्माकं कांत एकः स्याद्यदि विद्वांस्तदा वरम् ॥ ११ ॥

मूर्खश्चेज्जायते कान्तो यदा नार्याः कुकर्मतः । यावज्जीवं तदा दुःखं पृष्ठि नैव विमुञ्चते ॥ १२ ॥

अस्मत्कृतसमस्यानां पूरणं यः करिष्यति । स एव रमणोऽस्माकं भवताद् वह्निरन्यथा ॥ १३ ॥

एवं कृतां प्रतिज्ञां तां पुत्रीभिरवगत्य च । भूप आकारयामास भूपानुद्वाहहेतवे ॥ १४ ॥

वीरसेनोऽपि तत्रागाद् मानितो मेदिनीभुजा । सुस्थानदानतोऽन्येपि नृपाः सन्मानिताः स्थिताः ॥ १५ ॥

सद्वेषभूषणाः सर्वा भगिन्यः सखिसंयुताः । अभ्येत्य भूभुजां पार्श्वे समस्यामपृच्छन्निति ॥ १६ ॥

सव्वन्नू हुंति अरिहंता[1] सा नारी मम कथ्यताम्[2] । तइआ गवरावए गीअं[3] मूलं च सुकृतस्य कः[4] ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तओ लग्गउ परमत्थि[५] किं कुर्वन्ति तपोधनाः[६] जग सकलओ जिणि ऊधरिओ[७] दिवसकयं किं हरइ पावं[८] ?।
एतासां तु समस्यानां पूरणं न महीधरैः । यदा कृतं तदा वीर-सेनः प्राहेति ताः प्रतिः ॥१७॥

घरमज्झे घररहिआ चउवीस जिणा (जया) निरावरणा ।
केवलनाणसमग्गा सव्वन्नू हुंति अरिहंता ॥१८॥ [धुट्ट २४]
रोचते या सुपुण्यानां पापानां या न रोचते ।
गौराङ्गी वल्लभा पत्युः सा नारी मम कथ्यताम् ॥१९॥ [राका पूर्णिमा]
भिल्लस्स तिन्नि भज्जा एगा पभणेइ पाणीयं पाइ ।
बीआ मग्गइ मंसं तइआ गवरावए गीयं ॥२०॥ [सरो नत्थि]
किमाशीर्वचनं राज्ञां ? का शंभोस्तनुमण्डनम् ?।
कः कर्त्ता सुखदुःखानां ? मूलं च सुकृतस्य कः ? ॥२१॥ [जीव-रक्षा-विधिः]
नयरि भमंतइ दिट्ठ मइं केसरि चडिओ हत्थि ।
जलनिही परघरि रमइ तओ लग्गउ परमत्थि ॥२२॥ [क्षुरपलकः]

For Private and Personal Use Only

कथं सम्बोध्यते राजा? सुग्रीवस्य च का प्रिया?।
निर्धनास्तु किमिच्छन्ति? किं कुर्वन्ति तपोधनाः?॥ २३ ॥ [देव-तारा-धनं]
एकनारि वनगहनि उप्पन्ना, सव्वसुलक्खण जग सइ बनि।
इसिउ वेंटउं कूरपइं धरिओ जग सकलो जिणि ऊधरिओ ॥ २४ ॥ [चउणि]
का चीवराणं पवरा? किं दुलहं मरुदेसमज्झम्मि?।
किं पवणाओ चवलं? दिवसकयं किं हरइ पावं॥ २५॥ [पडिकमणं]

पूरितासु समस्यासु वीरसेनेन भूभुजा। तं वव्रु भूपनन्दिन्यो रुचिरोत्सवपूर्वकम् ॥ २६ ॥
वीरसेनकुमाराय हस्त्यश्वमणिसश्चयान्। ददौ महीपतिर्वर्य-वस्त्रदानपुरस्सरम् ॥ २७ ॥
अष्टकन्यायुतो वीर-सेनोऽभ्येत्य निजे पुरे। मातापित्रोः पदौ नत्वा प्रमोदं चक्रवांस्तराम् ॥ २८ ॥
भीमसेनोऽन्यदा वीर-सेनपुत्राय सूत्सवम्। राज्यं दत्त्वा गुरूपान्ते संयमश्रियमाप्तवान् ॥ २९ ॥
कुर्वंस्तीव्रं तपः प्राप्य केवलज्ञानमन्यदा। भीमसेनमुनिः पुत्र-प्रबोधायागमत् क्रमात् ॥ ३० ॥
वीरसेनो ययौ धर्मं श्रोतुं तातान्तिकेऽन्यदा। तदा ज्ञानी ददौ धर्मो-पदेशमिति सादरम् ॥ ३१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जिनेन्द्रगुरुगीतानि गायन् सङ्घः पदे पदे । आरुरोहाऽनघं तीर्थं सिद्धशैलं तमद्रिछदे ॥ ४४ ॥
अधूलिकपदे देवं प्रपूज्य प्रथमं जिनम् । सङ्घेशो ददते दान-मर्थिभ्यो मुखमार्गितम् ॥ ४५ ॥
स्नात्रपूजाध्वजादानमुख्यकृत्यान्यनेकशः । कृत्वा मुख्यार्हतश्चक्रे नृपः पादुकयोः पुनः ॥ ४६ ॥
भूपः प्रदक्षिणीकृत्य राजादन्या वराक्षतैः । वर्द्धापनं व्यधाद् भूपो गीतगानपुरस्सरम् ॥ ४७ ॥
तदा तीर्थस्य माहात्म्यात् साधूनां कोटिपञ्चकम् । सम्प्राप्य केवलज्ञानमलञ्चक्रेऽक्षयां पुरीम् ॥ ४८ ॥
मुक्तिं गतान् बहून् साधून् निरीक्ष्यावनिनायकः । तीर्थस्य प्रददौ मुक्तिनिलयेत्यभिधां यदा ॥ ४९ ॥
तदाऽन्येपि जनाः प्रोचुरेवं तीर्थस्य तस्य तु । एतच्च मुक्तिनिलयं तीर्थं मुक्तिप्रदानतः ॥ ५० ॥
एवं विस्तरतो यात्रां विधायाऽवनिनायकः । निजे पुरे समायातः प्रवेशोत्सवपूर्वकम् ॥ ५१ ॥
वीरसेनः प्रजां न्याय-मार्गेण पालयन् सदा । चकार दानशीलादि-धर्मं चतुर्विधं मुदा ॥ ५२ ॥
तुर्ये वयसि पुत्रस्य मीनकेतोरिलापतिः । दत्त्वा राज्यं ललौ दीक्षां श्रुतसागरसन्निधौ ॥ ५३ ॥
कुर्वाणे गुरुणा सार्द्धं विहारं वीरसेनकः । ययौ विमलभूमिध्रे तीर्थे मुक्तिसुखप्रदे ॥ ५४ ॥
तत्र वितन्वतो ध्यानं वीरसेनस्य सुन्दरम् । उत्पन्नं केवलज्ञानं लोकालोकप्रकाशकम् ॥ ५५ ॥
सर्वकर्मक्षयाद् वीर-सेनवाचंयमो मुनिः । तत्रैव निर्वृतिं प्राप भूरिसाधुसमन्वितः ॥ ५६ ॥

For Private and Personal Use Only

जिनेन्द्रगुरुगीतानि गायन् सङ्घः पदे पदे । आरुरोहाऽनघं तीर्थं सिद्धशैलं तमद्रिछदे ॥ ४४ ॥
अभूलिकपदे देवं प्रपूज्य प्रथमं जिनम् । सङ्घेशो ददते दान-मर्थिभ्यो मुखमार्गितम् ॥ ४५ ॥
स्नात्रपूजाध्वजादानमुख्यकृत्यान्यनेकशः । कृत्वा मुख्यार्हतश्चक्रे नृपः पादुकयोः पुनः ॥ ४६ ॥
भूपः प्रदक्षिणीकृत्य राजादन्या वराक्षतैः । वर्द्धापनं व्यधाद् भूपो गीतगानपुरस्सरम् ॥ ४७ ॥
तदा तीर्थस्य माहात्म्यात् साधूनां कोटिपञ्चकम् । सम्प्राप्य केवलज्ञानमलञ्चक्रेऽक्षयां पुरीम् ॥ ४८ ॥
मुक्तिं गतान् बहून् साधून् निरीक्ष्यावनिनायकः । तीर्थस्य प्रददौ मुक्तिनिलयेत्यभिधां यदा ॥ ४९ ॥
तदाऽन्येपि जनाः प्रोचुरेवं तीर्थस्य तस्य तु । एतच्च मुक्तिनिलयं तीर्थं मुक्तिप्रदानतः ॥ ५० ॥
एवं विस्तरतो यात्रां विधायाऽवनिनायकः । निजे पुरे समायातः प्रवेशोत्सवपूर्वकम् ॥ ५१ ॥
वीरसेनः प्रजां न्याय-मार्गेण पालयन् सदा । चकार दानशीलादि-धर्मं चतुर्विधं मुदा ॥ ५२ ॥
तुर्ये वयसि पुत्रस्य मीनकेतोरिलापतिः । दत्त्वा राज्यं ललौ दीक्षां श्रुतसागरसन्निधौ ॥ ५३ ॥
कुर्वाणे गुरुणा सार्द्धं विहारं वीरसेनकः । ययौ विमलभूमिध्रे तीर्थे मुक्तिसुखप्रदे ॥ ५४ ॥
तत्र वितन्वतो ध्यानं वीरसेनस्य सुन्दरम् । उत्पन्नं केवलज्ञानं लोकालोकप्रकाशकम् ॥ ५५ ॥
सर्वकर्मक्षयाद् वीर-सेनवाचंयमो मुनिः । तत्रैव निर्वृतिं प्राप भूरिसाधुसमन्वितः ॥ ५६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुनिसुन्दरसूरीशस्तपोगच्छखभास्वतः । शुभशीलेन शिष्येण वृत्तिरेषा विनिर्मिता ॥ ५७ ॥

॥ श्री शत्रुञ्जयनामोपरि शुकभूपकथा ॥

शुकभूमिपतिः शत्रु-ञ्जयेत्याह्वां यथा ददौ । तथा सङ्क्षेपतोऽत्रैव कथ्यते मयका किल ॥ १ ॥
श्रीभद्दिलपुरे वर्ये जितारेर्मेदिनीपतेः । हंसी च सारसी पत्न्या बभूतां वरमानसे ॥ २ ॥
स्वभावात् सरला हंसी सारसी कुटिलाशया । नरोत्पत्तिभवं कर्म हंसी बबन्ध सद्वृषात् ॥ ३ ॥
शत्रुञ्जये नृपो यात्रां कृत्वाऽभ्येत्य निजालये । प्रासादमर्हतः प्रौढं कारयामास सुन्दरम् ॥ ४ ॥
कृतपुण्योऽपि भूपालोऽन्यदा मृत्युक्षणे किल । प्रासादशिखरे कीर-मुपविष्टं व्यलोकत ॥ ५ ॥
शुभध्यानान्नृपो मृत्वा वने चन्द्रवराभिधे । शुकोऽजनि यतः प्रान्ते या मतिः सा गतिर्भवेत् ॥ ६ ॥
भर्तु र्मरणकर्त्तव्यं कृत्वा ते वल्लभे वरे । व्रतं जगृहतुस्तीव्रं तपश्च चक्रतुः सदा ॥ ७ ॥
मृत्वा द्वे अपि ते देव-लोके गत्वाऽवधेर्बलात् । ज्ञात्वा निजं पतिं कीरं तत्रैत्येत्यूचतुः स्फुटम् ॥ ८ ॥
जितारिस्त्वमभूद्राजा भद्दिलाह्वे पुरे वरे । इत्यादि चरितं मृत्यु-प्रान्ते कीरपुरस्तदा ॥ ९ ॥

For Private and Personal Use Only

त्वं चेदनशनं लाहि साम्प्रतं कीरभावतः । देवलोके सुरस्फार-रूपधारी भविष्यसि ॥ १० ॥ (युग्मम्)
गृहीत्वाऽनशनं कीर-स्तयोर्देव्योरभूत् पतिः । च्युत्वा देव्यौ ततो मर्त्य-भवं चालभतां क्रमात् ॥ ११ ॥
ततस्तत्र सुरावासे कीरस्य वल्लभे वरे । अभूतां पूर्वपुण्येन हृष्टोऽभूत्स सुरस्तदा ॥ १२ ॥
हंसी देवी च्युता स्वर्गात् क्षितिप्रतिष्ठपत्तने । मृगध्वजोऽभवद् भूपो रूपलावण्यसुन्दरः ॥ १३ ॥
सारसी स्वर्गात् च्युत्वा गागलेश्च तपस्विनः । पुत्री कमलमालेति बभूवार्हतधर्मकृत् ॥ १४ ॥
जितारिर्निर्जरोऽन्येद्युः पप्रच्छ ज्ञानिसन्निधौ । भविष्यत्यर्हतो धर्म-प्राप्ति र्न वा निगद्यताम् ॥ १५ ॥
केवल्याहाभवद् हंसी मृगध्वजमहीपतिः । क्षितिप्रतिष्ठनगरे मरुत्पुरसहोदरे ॥ १६ ॥
गागलेस्तापसस्यासीत् सारस्या असुमान् पुनः । नाम्मा कमलमालेति रूपनिर्जितनिर्जरी ॥ १७ ॥
मृगध्वजस्य कमल-मालायाः पाणिपीडने । जाते त्वं चैतयोः पुत्रो भविष्यसि शुकामर ! ॥ १८ ॥
तदा ते सर्वविद्धर्म–प्राप्तिर्भवति निश्चितम् । श्रुत्वैतत् स सुरः कीररूपभृदभवत् क्षणात् ॥ १९ ॥
क्षितिप्रतिष्ठनगरे यावद्यातः शुकामरः । तावद् भूपः पुरोद्याने चूतस्याधःस्थितो मुदा ॥ २० ॥
क्षणार्द्धया (स्वाः) प्रिया दृष्ट्वा सर्वा दध्याविदं हृदि । ममान्तःपुरनारीणां तुल्या नारी न विद्यते ॥२१॥
तदा माकन्दशाखायां स्थितः सुरः शुकः स च । जगौ गर्वो न कर्त्तव्य उत्तमैर्मानवैरिति ॥२२॥

०यतः–'स्वचित्तचिन्तितो गर्वः कस्य नाम न विद्यते ? । उत्क्षिप्य टिट्टिभः पादौ शेते भङ्गभयाद् भुवः ॥

० रे ! पक्षिन्नागतस्त्वं कुत इह सरसः तत् कियद्भो ! विशालं,
किं मद्धाम्नोपि बाढं नहि नहि सुमहत् पाप ! मा जल्प मिथ्या ।
इत्थं कूपोदरस्थः शपति तटगतं दर्दुरो राजहंसं,
नीचः स्वल्पेन गर्वीभवति विषया नापरे येन दृष्टाः ॥ २ ॥

* दन्ताः सप्त चलं विषाणयुगलं पुच्छांचलः कर्बुरः, कुक्षिश्चन्द्रकितो वपुः कुसुमितं सत्त्वच्च्युतं चेष्टितम् ।
अस्मिन् दुष्टवृषे मृषाग्रिमगुणग्रामानभिज्ञात्मनो, ग्रामीणस्य तथापि चेतसि चिरं धुर्येति विस्फूर्जितम् ॥ ३ ॥

शुकोक्तं भूप आकर्ण्य जगौ मेऽन्तःपुरं वरम् । यादृशं विद्यते तादृक् शुक ! क्वापि न वीक्ष्यते ॥ २३ ॥
शुकोऽवग् भूपते ! गर्वः क्रियते न सता क्वचित् । यतो हि विद्यते तार–तम्यं विश्वत्रयेऽपि हि ॥२४॥
श्रीपुरनगरे वर्ये बभूव गागलिनृपः । स चोत्पन्नविरागः सन् जग्राह तापसं व्रतम् ॥२५॥
सगर्भापि प्रियाकान्त–पृष्ठावजनि तापसी । ऋषभस्य जिनेशस्योपास्ति तौ कुरुतः स्म च ॥२६॥
वने सा तापसी पुत्रीं प्रसूय सूतिरोगतः । प्राप मृत्युं ततस्तातो वर्द्धयामास तां क्रमात् ॥२७॥
यादृक् कमलमाला सा सुरूपा विद्यतेऽबला । तादृगेकापि नो तावकीनाऽस्ति सहचारिणी ॥२८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यद्यस्ति वीक्षितुं कन्यां तां वाञ्छाऽस्ति तवाधुना। तदा पृष्ठौ ममाऽऽगच्छ दर्शयामि यथाऽद्भुतम् ॥२९॥
इत्युक्त्वा चलिते कीरे वायुवेगं तुरङ्गमम् । आरुह्य नृपतिस्तस्य पृष्ठ चचाल वेगतः ॥३०॥
तथाऽश्वो वेगतोऽचालीद् यथा गच्छति कीरराट् । क्रमाद्ययौ महाटव्यां महीशः कीरपृष्ठितः ॥३१॥
दृष्ट्वाऽऽद्यार्हद्गृहं स्फारं गत्वा मध्ये जिनेश्वरम् । यावन्ननाम तावच्च स शुकः क्वचिदियिवान् ॥३२॥
ततो भूपो विशिष्टार्थ-स्तोत्रैश्चारुतरैस्तदा । तुष्टावेति जगद्वन्द्यं युगादीशं जिनाधिपम् ॥३३॥
सुरासुरमहीनाथ मौलिमालानतक्रम ! । श्रीनाभिभूपपुत्र ! त्वं स्तवीमि शिवशर्मणे ॥३४॥
संसारविपुलाम्भोधि तारणैकतरीनिभ ! । दत्तानन्तसुख ! श्रीमद्वृषभ ! त्वं चिरं जय ॥३५॥
श्रुत्वैतद् गागिलिस्तत्राऽऽगत्य नत्वा जिनेश्वरम् । स्वाश्रये नृपतिं नीत्वाऽभोजयत् स्वान्नदानतः ॥३६॥
ततो गागिलिराचष्ट कन्यामेनां ममाऽधुना । परिणीय व्रज स्वच्छ ! ततो भूपो जगावदः ॥३७॥
अज्ञात्वा मत्कुलं मह्यं त्वं दास्यसि कनीं कथम् । ऋषिः प्राह शुकेनोक्तं समेत्येति ममाश्रमे ॥३८॥
अहं मृगध्वजं भूप-मानेष्येऽत्र ऋषे ! द्रुतम् । तस्मै दत्त्वा सुतां कुर्या भक्तिं श्रीवृषभप्रभोः ॥३९॥
तेनोक्तस्त्वमगा अत्रो-द्वाहयाङ्गभवां मम । ततः कमलमालां तु परिणीय मृगध्वजः ॥४०॥
यियासुं स्वपुरीं कान्तं मत्वा तापसनन्दिनी । वृषभावसथे नत्वा युगादीशं जगाविति ॥४१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

० यतः–' स्वचित्तचिन्तितो गर्वः कस्य नाम न विद्यते ? । उत्क्षिप्य टिट्टिभः पादौ शेते भङ्गभयाद् भुवः ॥

० रे ! पक्षिन्नागतस्त्वं कुत इह सरसः तत् कियद्भो ! विशालं,
किं मद्धाम्नोपि बाढं नहि नहि सुमहत् पाप ! मा जल्प मिथ्या ।
इत्थं कूपोदरस्थः शपति तटगतं दर्दुरो राजहंसं,
नीचः स्वल्पेन गर्वीभवति विषया नापरे येन दृष्टाः ॥ २ ॥

* दन्ताः सप्त चलं विषाणयुगलं पुच्छांचलः कर्बुरः, कुक्षिश्चन्द्रकितो वपुः कुसुमितं सत्त्वच्युतं चेष्टितम् ।
अस्मिन् दुष्टवृषे मृषाग्रिमगुणग्रामानभिज्ञात्मनो, ग्रामीणस्य तथापि चेतसि चिरं धुर्येति विस्फूर्जितम् ॥ ३ ॥

शुकोक्तं भूप आकर्ण्य जगौ मेऽन्तःपुरं वरम् । यादृशं विद्यते तादृक् शुक ! क्वापि न वीक्ष्यते ॥ २३ ॥
शुकोऽवग् भूपते ! गर्वः क्रियते न सता क्वचित् । यतो हि विद्यते तार–तम्यं विश्वत्रयेऽपि हि ॥२४॥
श्रीपुरनगरे वर्ये बभूव गागलिनृपः । स चोत्पन्नविरागः सन् जग्राह तापसं व्रतम् ॥२५॥
सगर्भापि प्रियाकान्त–पृष्ठावजनि तापसी । ऋषभस्य जिनेशस्योपास्ति तौ कुरुतः स्म च ॥२६॥
वने सा तापसी पुत्रीं प्रसूय सूतिरोगतः । प्राप मृत्युं ततस्तातो वर्द्धयामास तां क्रमात् ॥२७॥
यादृक् कमलमाला सा सुरूपा विद्यतेऽबला । तादृगेकापि नो तावकीनाऽस्ति सहचारिणी ॥२८॥

For Private and Personal Use Only

सामी सुणइ अतुलबल बल जाणीसि इहेव हीअडा । अब्भिंतर मइ गहिओ जइस कि नीकलि देव ! ॥४२॥
एवं स्तुत्वा प्रभुं भक्त्या गागल्यङ्गभवा तदा । प्रणम्य पितरं पत्युः समीपं समुपागमत् ॥ ४३ ॥
मृगध्वजोऽपि सर्वज्ञं प्रणम्य गागलिं पुनः । यावच्चलितुकामोऽभूत् तावत्कीरो जगावदः ॥ ४४ ॥
मत्पृष्ठौ भवताऽऽगम्यं त्वरितं त्वरितं नृप ! । ततोऽचलद् नृपः: कीर-पृष्ठौ पत्नीसमन्वितः ॥ ४५ ॥
इतश्चन्द्रवतीपत्न्या पत्यूराज्ये स्वसोदरम् । आनीय वेष्टयामास नेतुं नगरमञ्जसा ॥ ४६ ॥
सोऽपि मृगध्वजं भूप-मागतं चावगत्य तु । गत्वा सन्मुखमाचष्ट पातु ते पुरमागमम् ॥ ४७ ॥
त्वत्सेवकैरहं शत्रुः कृत्वेति पुरमध्यतः । सम्प्रविशन्निषिद्धस्तु पूर्या बहिः स्थितस्ततः ॥ ४८ ॥
मृगध्वजो जगौ वर्यं कृतं तु भवताऽधुना । रक्षितं नगरं यस्मात् त्वया मे चन्द्रशेखर ! ॥ ४९ ॥
ततोऽभ्येत्य पुरीमध्ये मृगध्वजो लसन्महम् । तस्यै पत्न्यै ददौ सद्म स्फारं वासकृते तदा ॥ ५० ॥
मृगध्वजविसृष्टोऽथ चन्द्रशेखर ईयिवान् । मृगस्ततः पपालोर्वीं न्यायमार्गेण सन्ततम् ॥५१॥
कीरो जितारिजीवस्तु स सुरः स्वर्गतश्च्युतः । अवातरत् ऋपेः पुत्र्याः गर्भे शोभनवासरे ॥ ५२ ॥
क्रमाज्जाते सुते पित्रा कृत्वा जन्मोत्सवं महत् । शुकेति प्रददे नाम सर्वस्वजनसाक्षिकम् ॥ ५३ ॥
कौमुद्या उत्सवेऽन्येद्यु-र्भूमीनाथः प्रियायुतः । गत्वोद्याने निविष्टः सन् चूतस्याधो जगाविति ॥ ५४ ॥

अस्मिन् चूते स्थितो गर्वं कुर्वन् शुकेन केनचित् । निषिद्धोऽहं पुरा श्लोक-जल्पनात् प्रेयसि ! ध्रुवम् ॥ ५५ ॥
'स्वचित्तचिन्तितो गर्व' इत्यादि ऋषिनन्दिन्या स्वगेहानयनान्तिमे ।
प्रोक्ते विवाहसम्बन्धे शुको मूर्च्छामुपागमत् ॥ ५६ ॥
वायुक्षेपादिना पुत्रो लब्धचैतन्यवैभवः । जातिस्मृत्या भवं पूर्वं दृष्ट्वा जजल्प नो मनाग् ॥ ५७ ॥
उपचारेषु भूयस्सु कृतेषु भूभुजा तदा । शुकोऽजल्पद् यदा नैव तदेति मनुजा जगुः ॥ ५८ ॥

* यतः—' शशिनि खलु कलङ्कं कण्टकाः पद्मनाले, उदधिजलमपेयं पण्डिते निर्धनत्वम् । 卐
दयितजनवियोगो दुर्भगत्वं सुरूपे, धनपतिकृपणत्वं रत्नदोषी कृतान्तः ॥ १ ॥

द्वितीयवत्सरे लोकाभ्यर्थितो मेदनीपतिः । कौमुद्या उत्सवे बाह्ये चूते पूर्ववदीयिवान् ॥ ५९ ॥
पुत्रयुतो जगौ राजा तस्मिन्नाम्रतरौ त्वया । मयापि च न गंतव्यं यतो मूकोऽभवत् सुतः ॥ ६० ॥
जल्पत्येवं नृपे कश्चिदागत्य सेवको जगौ । तस्मिन् आम्रतले साधो-रुत्पन्नं ज्ञानमव्ययम् ॥ ६१ ॥
राजा राज्ञीयुतस्तत्र गत्वा नत्वा मुनीश्वरम् । धर्म्मं श्रोतुमुपाविष्टः भूरिलोकसमन्वितः ॥ ६२ ॥

* सद्वंशजन्म गृहिणी स्पृहणीयशीला, लीलायितं वपुषि पौरुषभूषणश्रीः । 卐
पुत्राः पवित्रचरिताः सुहृदोऽपदोषाः स्युर्धर्मतः खलु फलानि पचेलिमानि ॥ १ ॥

* विरोधिता बन्धुजनेषु नित्यं, सरागता मूर्खजने प्रसङ्गः । 卐
क्रूरस्वभावः कटुवाक् सरोषा, नरस्य चिह्नं नरकाऽऽगतस्य ॥ २ ॥
* स्वर्गच्युतानामिह जीवलोके, चत्वारि नित्यं हृदये वसन्ति । 卐
दानप्रसङ्गो विमला च वाणी, देवार्चनं सद्गुरुसेवनं च ॥ ३ ॥

देशनान्ते महीपालो योजयित्वा करद्वयम् । पप्रच्छ भगवन् ! केन हेतुना वक्ति नो सुतः ॥ ६३ ॥
ज्ञान्याचष्ट भवो ह्येष विद्यते गहनो भृशम् । पिता पुत्रो भवेत् पुत्रः पिता वा जननी पुनः ॥ ६४ ॥
* यतः–"मातापितृसहस्राणि पुत्रदारशतानि च । संसारेऽत्र व्यतीतानि कस्याऽहं कस्य बान्धवः" ॥६५॥ 卐
नृपोऽभाणीत् सुतः स्वामिन् ! जल्पन्नेव (ल्पेदेवं) विधीयताम् । ततो ज्ञान्यखिलं पूर्वं भवं प्रोक्त्वा जगावदः ॥६६॥
स्वपूर्वभवसम्बन्धो मातापितादिसम्भवः । ज्ञातोऽपि ज्ञानतो जीवैश्चिन्तनीयो न चेतसि ॥ ६७ ॥
पुत्रपित्रादिसम्बन्धा विद्यन्ते नैकशो मिथः । नृणां स्त्रीणां भवेत्तेन सम्बन्धो नैव चिन्त्यते ॥ ६८ ॥
* यतः–"अतीतं नैव शोचन्ते भविष्यं नैव चिन्तयेत् । वर्त्तमानेन कालेन वर्त्तन्ते च विचक्षणाः ॥ ६९ ॥ 卐
यत्त्वं चिन्तयसि स्वान्ते माता तातो प्रिये मम । अतो माता पितेत्यत्र कथं जल्पामि साम्प्रतम् ॥७०॥ इत्यादि । ॥ २३ ॥
* ततः प्राग्भवसम्बन्धं त्यक्त्वाशेषं शुकाऽधुना । वन्दस्वाऽस्मान् पितुर्मातुर्नाम लाहि ग्रहं त्यज ॥ ७१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुत्वेति शुक उत्थाय वन्दित्वा विधिवद् गुरुम् । लात्वा मातुः पितुर्नाम्नी ननाम चरणौ मुदा ॥ ७२ ॥
ततः सम्यक्त्वमूलानि श्रावकस्य व्रतानि हि । राजा राज्ञ्यन्यलोकाश्च ललुः केवलिसन्निधौ ॥ ७३ ॥
मृगध्वजो जगौ मे क्व वैराग्यं प्रभविष्यति ? । ज्ञान्याचष्ट यदा चन्द्र-वत्याः पुत्रं निरीक्षसे ॥ ७४ ॥
ततः स केवली स्वीय-चरितं गहनं तदा । प्रोक्त्वा भव्यप्रबोधाय विजहार धरातले ॥ ७५ ॥
क्रमात्पुत्रोऽभवद्धंसनामा तस्य महीपतेः । ऋषिपुत्री सुतौ द्वौ तु वर्द्धयामास सन्ततम् ॥ ७६ ॥
अन्यदा गागलिर्गत्वा मृगध्वजनृपान्तिके । आपृच्छय भूपतिं पुत्रीं शुकं स्वावटजेऽनयत् ॥ ७७ ॥
तत्र तीर्थावनकृते मुक्त्वा शुकं सुतासुतम् । सिद्धाद्रौ ऋषभं नन्तु-मचालीद् गागलिर्मुदा ॥ ७८ ॥
शुकः कुर्वन् युगादीश-पूजां सततमन्यदा । देवौकस्थां स्त्रियं वीक्ष्याप्राक्षीत् त्वमागमः कुतः ? ॥ ७९ ॥
नारी साऽऽचष्ट चम्पाया-मरिमर्दनभूपतेः । श्रीमतीगेहिनीजाता पद्मावत्यभवत् सुता ॥८०॥
धात्र्या मात्रा च सा पाल्य-माना यौवनमासदत् । पिता विलोकमानोऽभूद्वरस्य कन्यकाकृते ॥ ८१ ॥
पद्मावतीं मया सार्द्धं गवाक्षस्थां दिनोदये । वायुवेगः खगो लात्वा विमानस्थोऽम्बरेऽचलत् ॥ ८२ ॥
विमानात् पतिताऽत्राहं प्रासादे समुपागमम् । खेटः पद्मावतीं लात्वा क्वाप्यगात्तेन रोदिमि ॥ ८३ ॥
ततः शुको व्रजन् द्रष्टुं तां कन्यामाप्तवान् धुरि । ततोऽग्रे यान् नरं त्वेकं क्रन्दन्तं वीक्षते स्म सः ॥ ८४ ॥

For Private and Personal Use Only

शुकोऽवक् क्रन्द्यते कस्मात् सोऽवक् पद्मावतीं कनीम् । लात्वा विमानमारूढो यावदत्राहमागमम् ॥ ८५ ॥
तावदेकाऽबला यानात् पपाताऽनवबालिका । ततोऽहमपतं नष्टं विमानं च क्वचिन्मम ॥ ८६ ॥
खगामिनी गता विद्या तेन रोदिमि साम्प्रतम् । स्त्र्यपहारो मयाऽकारि यत्ततः श्वभ्रगाम्यहम् ॥ ८७ ॥
पापादुपरतं तं तु ज्ञात्वाऽऽनीय जिनाश्रये । नत्वा देवं खगस्त्रीयुक् स्वाश्रये शुक ईयिवान् ॥ ८८ ॥
वानेयान्नप्रदानेन भोजयित्वाऽऽदराच्च तान् । शुकोऽवग् व्योमगा विद्याऽऽयाति वा विस्मृता तव ॥ ८९ ॥

खगोऽवक् प्रथमं पद्यं समेति मम साम्प्रतम् । शुकोऽवक् श्रावय त्वं तत् कर्णयोर्व्योमगाऽधुना ॥ ९० ॥
खगामिनाऽऽदिमे पद्ये प्रोक्ते सति शुकस्तदा । सम्पूर्णां व्योमगां विद्यां शिक्षयामास तं तदा ॥ ९१ ॥
शुकेनापि (खगेनापि) खगा विद्या शुकाय प्रददे मुदा । द्वावप्यथ खगौ जातौ वायुवेगशुकावपि ॥ ९२ ॥
शत्रुञ्जये जिनान् नत्वा गागलौ समुपागते । शुकः खगयुतश्चम्पा-नगर्यां समुपेयिवान् ॥ ९३ ॥
खगोऽरिमर्दनक्षोणी-पतेरग्रे जगाविति । मया पापात्मना पद्मा-वती तव हृता सुता ॥ ९४ ॥
इत्यादि सकलं स्वीय-वृत्तंतत्रागमान्तिकम् । वायुवेगो जगौ वृत्तं शुकस्य च नृपाग्रतः ॥ ९५ ॥
शुके पद्मावतीचेतो ज्ञात्वाऽरिमर्दनस्तदा । शुकाय प्रददौ चारु-महोत्सवपुरस्सरम् ॥ ९६ ॥
वायुवेगस्ततो नीत्वा स्वपुरे शुकमादरात् । वायुवेगां सुतां तस्मै व्यश्राणयद्वरोत्सवम् ॥ ९७ ॥

तत्र शाश्वतचैत्यानि वायुवेगशुकः शुकः । ववन्दे चार्चयामास सुमनोभिर्वरैर्मुदा ॥ ९८ ॥
वरं विमानमारुह्य शुकः पत्नीद्वयीयुतः । वायुवेगखगाऽऽसेव्यः स्वपुरान्ते समीयिवान् ॥ ९९ ॥
मुहूर्ते रुचिरे चारु-महोत्सवपुरस्सरम् । मातापित्रोः पदाम्भोजं विनयेनाऽनमत् शुकः ॥ १०० ॥
वायुवेगस्ततोऽशेषं शुकस्य चेष्टितं तदा । मृगध्वजर्षिनन्दिन्योः पुरतः प्रोक्तवान् मुदा ॥ १०१ ॥
मृगध्वजनृपो वायु-वेगव्योमगपुत्रयोः । विशेषाद् गौरवं चक्रे स्वान्नपानादिदानतः ॥ १०२ ॥
परिधाप्याम्बरैर्वायु-वेगं मृगध्वजो नृपः । विससर्ज यदाऽनंसीत् शुकः सोपि पुरस्सरम् ॥ १०३ ॥
भूपोऽथ शुकहंसाभ्यां पुत्राभ्यां सह सन्ततम् । पालयन् पृथिवीं सौख्य-सहितां विदधेतराम् ॥ १०४ ॥
वैराग्यं मेऽभवन्नैव चन्द्रवत्यां सुतोऽपि च । ध्यायत्येवं नृपे कश्चिद् बालोऽभ्येत्य नतिं व्यधात् ॥ १०५ ॥
कस्त्वं कुतः समायातो जल्पत्येवं महीपतौ । खेऽभूद् वाणी तदा तेऽसौ पुत्रश्चन्द्रवतीभवः ॥ १०६ ॥
यद्यस्ति तव सन्देहो तदा चम्पककानने । गत्वा यशोमतीं पृच्छ योगिनीं सा च वक्ष्यति ॥ १०७ ॥
श्रुत्वैतद् भूपतिस्तत्र गत्वा चन्द्रवतीजयुग् । पप्रच्छाऽयं सुतो मेऽसौ कथं योगिनि ! जल्पताम् ॥ १०८ ॥
ततोऽवग् योगिनी भूप-चन्द्रवत्यां तवाङ्गजः । विषमोऽयं भवोऽसारो यतो न कस्य को निजः ॥ १०९ ॥
* कोऽहं कस्त्वं कुत आयातः कामे जननी को मे तातः । यद्येवं दृष्टः संसारः सर्वोऽयं (ते) स्वप्नविचारः ॥ ११० ॥ 卐

For Private and Personal Use Only

चन्द्राह्वपुरि सोमक्ष्मा-पतेर्भानुमतीप्रिया । असूत पुत्रनन्दिन्यावेकस्मिन् वासरे किल ॥ १११ ॥
क्रमाज्जातिस्मृतिं प्राप्य दृष्ट्वा स्वं युगलिनो भवम् । मिथो विवाहमीहानौ तौ पृथक् परिणायितौ ॥ ११२ ॥
दूरस्थावपि सङ्गं न प्रापतुर्द्वौ यदा नृप ! । आराधितस्तदा देवश्चन्द्रेण प्रोक्तवानिति ॥ ११३ ॥
मृगध्वजप्रिया चन्द्र-वती सुतं सुविष्यति । यं तं पश्यति नो यावद् मृगध्वजो नरेश्वरः ॥ ११४ ॥
तावद् विद्या तवादृश्य-कारिणी चन्द्रशेखर ! । भविष्यति ततश्चेतश्चिन्तितं स्वेच्छया कुरु ॥ ११५ ॥
ततश्चन्द्रवतीजातं चन्द्राङ्कं तनयं रहः । आनीयाऽत्रामुचच्चन्द्रो मयाऽस्थापि सुतस्तव ॥ ११६ ॥
त्यक्ता भोगसुखेनाहं पत्याऽन्येद्युस्तवाङ्गजम् । अवचं भुंक्ष्व मां भोगांश्चन्द्राङ्क ! विलसत् सुखम् ॥ ११७ ॥
ततश्चन्द्राङ्क आचष्ट मातरेवं किमुच्यते ? । मया प्रोचे न मे पुत्र-स्त्वं तु मृगध्वजेशितुः ॥ ११८ ॥
तेन त्वं देहि मे भोग-सुखं चन्द्राङ्क ! साम्प्रतम् । चन्द्रोऽवग् धिग् भवतीं तु धिग् भवं धिग् मनोभवम् ॥ ११९ ॥
* यतः–राजपत्नी गुरोः पत्नी मित्रस्य प्रेयसी तथा । स्वमाता पत्नीमाता च पञ्चैता मातरः स्मृताः ॥१२०॥ 卐
त्यक्त्वा मां जननीं सद्यश्चन्द्राङ्कस्ते पदद्वयम् । नन्तुं चेतोऽचलत् सायं योगिन्यासं ततोऽहकम् ॥ १२१ ॥
चन्द्रवत्या स्वसोदर्या भोगाय चन्द्रशेखरः । स्थापितोऽस्ति भवद्गेहे दृश्यतेऽतो न केनचित् ॥ १२२ ॥
अवधिज्ञानतो मत्वा मयैतत्ते निवेदितम् । ततः क्रुद्धस्य भूपस्योपशमाय जगाद सा ॥ १२३ ॥

※ पुता मित्ता हुइ अनेरा नरह नारि अनेरी। मोहइ मोहियओं मूढउ जंपइ मुहीआ मोरी मोरी ॥१२४॥ 卐
※ अतिहिं गहना अतिहिं अपारा संसारसायरखारा। बूज्झउ बूज्झउ गोरख बोलइ सारा धर्मविचारा ॥१२५॥ 卐
※ कवण केरा तुरंगम हाथी कवण केरी नारी। नरकी जाता कोइ न राखइ हीअडइ जोइ विचारी ॥१२६॥ 卐
※ क्रोध परिहरि मान म करी माया लोभ निवारे । अवर वयरी मनि म आणे केवल आपू तारे ॥१२७॥ 卐

इत्याकर्ण्य नृपो मुक्त-क्रोधश्चन्द्रकसंयुतः । स्वपुर्या बहिरुद्याने समेत्याऽस्थात् व्रतेच्छया ॥ १२८ ॥
व्रतेच्छुं नृपतिं मत्वा तत्रैत्य सचिवा जगुः । राज्यं वितीर्य पुत्राय लातव्यः संयमस्त्वया ॥ १२९ ॥
राजाऽऽचष्ट न मे किञ्चिद् विद्यते विग्रहादिकम् । ततो दिनोदये गत्वा गुर्वन्ते संयमं श्रये ॥ १३० ॥
जिघृक्षोः संयमं बाह्यो-द्यानस्थस्य सुचेतसः । मृगध्वजस्य भूपस्य शुक्लध्यानजुषो भृशम् ॥ १३१ ॥
अनित्यतादिकाऽशेष-भावनाभावितात्मनः । बभूव केवलज्ञानं लोकालोकावलोककम् ॥ १३२ ॥ (युग्मं)
रैपद्मे विहिते सद्य उपविश्य मृगध्वजः । धर्मोपदेशनं चक्रे भव्यानां पुरतस्तदा ॥ १३३ ॥
व्याख्यान्ते हंसचन्द्राङ्कौ युतौ कमलमालया । जगृहाते व्रतं श्रेयः सुखदं ज्ञानिसन्निधौ ॥ १३४ ॥
उत्पन्नेऽप्यव्यये ज्ञाने पत्न्या वृत्तं मृगध्वजः । कस्याप्यग्रे जगौ नैव धर्मवृद्ध्यादिहेतवे ॥ १३५ ॥
इतश्चन्द्राङ्कमायातं मृगध्वजस्य चक्षुषोः । मत्वा स्पष्टतनुश्चन्द्र-शेखरः स्वपुरं ययौ ॥ १३६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चकार राजर्षिरविर्विहारं, भव्याङ्गि-राजीवविबोधनार्थम् ।
शुकः क्षितीशश्च चकार राज्यं, प्रवर्त्तयन् न्यायपथे जनौघम् ॥ १३७ ॥

आराध्याथ सुरं चन्द्र-शेखरो भक्तिपूर्वकम् । भोक्तु चन्द्रवतीं रूपं शुकस्यामार्गयत्तमाम् ॥ १३८ ॥
चन्द्रशेखरभूपालो राज्यं वाञ्छन् शुकस्य हि । विदेशगमनं तस्य ववाञ्छ प्रतिवासरम् ॥ १३९ ॥
शुकः पद्मावतीवायु-वेगापत्नीयुतोऽन्यदा । शाश्वतानर्हतो नन्तुं चचाल शुभवासरे ॥ १४० ॥
शुकरूपधरश्चन्द्रशेखरः शुकसद्मनि । गत्वा निश्यमिलत् चन्द्र-वत्या भोगस्य हेतवे ॥ १४१ ॥
शुकरूपधरो देव-प्रभावात् चन्द्रशेखरः । कुर्वाणे निशि पूत्कार-मुत्तस्थाविति तत्क्षणात् ॥ १४२ ॥
मम-पत्नीद्वयं व्योम-विद्यां च कोऽपि खेचरः । लात्वा ययावहं तेन पश्चादत्र समागमम् ॥ १४३ ॥
मन्त्रिणो जगदुः स्वामिं-स्तवास्ति कुशलं तनौ । शुकोऽवक् कुशलं मेऽस्ति शरीरे साम्प्रतं किल ॥ १४४ ॥
उक्तं च मन्त्रिभिः स्वामिन् ! लक्ष्मीपत्नीसुतादयः । भवन्ति भूरिशो भूयो जीवितं न कदाचन ॥१४५॥
* यतः-" मातापितृसहस्राणि पुत्रदारशतानि च । संसारेऽत्र व्यतीतानि कस्य कोऽयं भवेज्जनः " ॥ १४६ ॥卐
शुकदेहधरो देव-प्रभावात् चन्द्रशेखरः । प्रजाः पाति सदा सत्य-शुकवत् निखिलाः खलु ॥ १४७ ॥
चन्द्रवत्या समं भोग-सुखं श्रयन् मुदा सदा । मायायाः सदनं चन्द्र-शेखरोऽभून् महीपतिः ॥ १४८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतः शाश्वततीर्थेषु नत्वा देवान् प्रियायुतः । उद्याने समगाद्यावत् तावत् कूटशुको जगौ ॥ १४९ ॥
भो मन्त्रीश ! प्रिये व्योम-विद्यां हृत्वा य ईयिवान् । स एवात्र समायातो राज्यं लातुं ममाधुना ॥ १५० ॥
स चारित मायिकः कूट-कपटादिविधौ पटुः । कार्यस्तस्य न विश्वासो भवद्भिर्वचने मनाग् ॥ १५१ ॥
ये पत्न्यौ मोहिते तस्मिन् परस्त्रीलम्पटे नरे । तयोरपि न विश्वासः कार्यो भवद्भिरेकदा ॥ १५२ ॥
चक्रे कूटः शुकः सर्वान् स्ववशान् सचिवांस्तदा । यथा सत्यशुकस्याऽक्षि-गोचरे ते ययु र्नहि ॥ १५३ ॥
* यतः—आसन्नमेव नृपतिर्भजते मनुष्यं, विद्याविहीनमकुलीनमसंस्तुतं वा । 卐
प्रायेण भूमिपतयः प्रमदा लता वा, यत्पार्श्वतो भवति तत् परिवेष्टयन्ति ॥ १५४ ॥
* अश्वः शास्त्रं शस्त्रं वीणा वाणी नरश्च नारी च । पुरुषविशेषं प्राप्ता भवन्त्ययोग्याश्च योग्याश्च ॥१५५॥ 卐
यदा कोपि प्रधानादि-जनः सत्यशुकं मनाग् । न मन्यते तदा दध्यौ शुको राज्यं गतं मम ॥ १५६ ॥
प्रतिकूले विधौ किञ्चिन्नैव स्यादात्मनः क्वचित् । ममाधुनाऽखिलो मन्त्रि-वर्गो विघटितः खलु ॥ १५७ ॥
* यतः—तावच्चन्द्रबलं ततो ग्रहबलं तावद् बलं भूबलं, तावत्सिद्ध्यति वाञ्छितार्थमखिलं तावज्जनः सज्जनः । 卐
मुद्रामण्डलमन्त्रतन्त्रमहिमा तावत्कृतं पौरुषं, यावत्पुण्यमिदं महद्विजयते पुण्यक्षये क्षीयते ॥ १५८ ॥
ततस्तस्मात् पुरात्तस्य यातोऽन्यत्राऽम्बराध्वना । विमानं स्खलितं यत्र तत्रेति ध्यातवान् शुकः ॥ १५९ ॥

For Private and Personal Use Only

卐

* क्षते प्रहारा निपतन्त्यवश्यं, धान्यक्षये स्फूर्जति जाठरोऽग्निः ।
आपत्सु मित्राणि विसंवदन्ति, छिद्रेष्वनर्था बहूलीभवन्ति ॥ १६० ॥
ततोऽधस्तात् शुको दृष्ट्वा दिशन्तं धर्ममार्हतम् । तातं तत्रैत्य शुश्राव देशनां नतिपूर्वकम् ॥ १६१ ॥
देशनान्ते शुकोऽप्राक्षीद्राज्यं केन हृतं मम । तातोनाऽनर्थदण्डस्य भियोक्तं तस्य नाम न ॥ १६२ ॥
* यतः—'शरीराद्यर्थदण्डस्य प्रतिपक्षतया स्थितः योऽनर्थदण्डस्तत्त्यागस्तृतीयं तु गुणव्रतम् ॥ १ ॥'
* वैरिघातो नरेन्द्रत्वं पुरघाताग्निदीपने । खचरत्वाद्यपध्यानं मुहूर्त्तात् परतस्त्यजेत् ॥ २ ॥
* वृषभान् दमय क्षेत्रं कृष षण्डय वाजिनः । दाक्षिण्याऽविषये पापोपदेशोऽयं न कल्पते ॥ ३ ॥
* यन्त्रलाङ्गलशस्त्राग्नि-मुशलोदूखलादिकम् । दाक्षिण्याविषये हिंस्रं नार्पयेत् करुणापरः ॥ ४ ॥
* कुतूहलाद् गीतनृत्य-नाटकादिनिरीक्षणम् । कामशास्त्रप्रसक्तिश्च द्यूतमद्यादिसेवनम् ॥ ५ ॥
* जलक्रीडाऽऽन्दोलनादिर्विनोदो जन्तुयोधनम् । रिपोः सुतादिना वैरं भक्तस्त्रीदेशराट्कथाः ॥ ६ ॥
* रोगमार्गश्रमौ मुक्त्वा स्वापश्च सकलां निशाम् । एवमादि परिहरेत् प्रमादाचरण सुधीः ॥ ७ ॥
विमृश्येति तदा ज्ञानी कृत्यं निष्पापमञ्जसा । प्राह द्वयो रिपोः सून्वोर्हिताय हितकृद्यथा ॥ १६३ ॥
गच्छ सिद्धाचले चन्द्र-गुहायां वृषभं जिनम् । स्मरंस्तिष्ठैकभक्तः सन् षण्मासान् ब्रह्मचर्ययुग् ॥ १६४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदा तस्यां गुहायां तु तेजः स्फुरति सर्वतः । तदा यास्यत्यरिर्नष्ट्वा करे ते राज्यमेष्यति ॥ १६५ ॥
नत्वा तातं शुको गत्वा सिद्धशैले गुहान्तरे। स्थित्वाऽऽदिमं जिनं चित्ते दध्यौ तातोक्तयुक्तितः ॥ १६६ ॥
तेनोक्तविधिना सर्वं स्मरतस्तस्य तत्र तु । षण्मासान्तेऽस्फुरत्तेजो गुहायां सर्वतो बहु ॥ १६७ ॥
इतश्चन्द्रो निजं रूपं निरीक्ष्य प्रकटं रहः । मृत्युभीतो निजं स्थानं तरसा समुपागमत् ॥ १६८ ॥
शुकस्तु स्वपुरेऽभ्येत्य पत्नीद्वययुतस्तदा । निजं राज्यमलञ्चक्रे नानोत्सवपुरस्सरम् ॥ १६९ ॥
एत्य मन्त्र्यादयो लोकाः प्रणम्य भूपतेः पदौ । भक्त्या निजापराधं तु क्षमयामासुरञ्जसा ॥ १७० ॥
ततो भूपो बहुं सङ्घं भूरिभूपसमन्वितः । गत्वा सिद्धगिरौ स्नात्रा-द्युत्सवं निखिलं व्यधात् ॥ १७१ ॥
ततो राजा जगौ भूरि-भूभुजामग्रतस्तदा । ममाऽस्मात् तीर्थमाहात्म्यात् जयः शत्रोरजायत ॥ १७२ ॥
अतोऽस्य भूभृतः शत्रुञ्जयेत्याह्वा विधीयते । भूपैरुक्तं तवाभीष्टं नामास्याऽस्तु नरेश्वर ! ॥ १७३ ॥
अयं शत्रुञ्जयः शैलो घोषयन्नभितो नृपः । सप्तक्षेत्रे धनं भूरि व्ययति स्म सदुत्सवम् ॥ १७४ ॥
इतस्तत्राऽऽगतश्चन्द्र-शेखरः प्रथमं जिनम् । नत्वा दध्यौ मया पापं कृतं दुर्गतिदायकम् ॥ १७५ ॥
ध्यात्वेति संयमं पार्श्वे महोदयमुनेस्तदा । लात्वाऽऽत्मना भृशं निन्दन् चन्द्रश्चिक्षेप पातकम् ॥ १७६ ॥
शुकोऽप्राक्षीत् गुरूपान्ते कृत्वा मद्रूपमत्र तु । येन राज्यं लले तस्य नाम साम्प्रतमुच्यताम् ॥ १७७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुनिः प्राह भवादस्माद् द्विपञ्चाशत्तमे भवे । भवतोद्दालितं यस्य ललौ स धरणीधरः ॥ १७८ ॥
यस्यात्र क्षणतो ज्ञानं विश्वविश्वावलोककम् । उत्पत्स्यते तमेव तं भूपं जानीहि भूपते ! ॥ १७९ ॥
चन्द्रशेखरराजर्षेः कैवल्युत्सवमादरात् । मुहूर्त्तात् कुर्वतो देवान् दृष्ट्वा जज्ञौ रिपुंतकम् ॥ १८० ॥
ततस्तत्र समेत्याऽऽशु क्षमयित्वाऽतिभक्तितः । शुकोऽपि श्लाघयामास ज्ञानिनं चन्द्रशेखरम् ॥ १८१ ॥
यात्रां विस्तरतः कृत्वा शुको भूपो निजे पुरे । समेत्य स्वीयपुत्राय राज्यं दत्त्वा व्रतं ललौ ॥ १८२ ॥
सहस्रद्वितय भूपाः सामान्याः स्वामिभक्तितः । जगृहुः संयमं ज्ञानि-पार्श्वे विशदमानसाः ॥ १८३ ॥
पालयन् निरतीचारं चारित्रं शुकसंयतः । शत्रुञ्जये ययौ तुर्य-तीर्थेशसमये क्रमात् ॥ १८४ ॥
सर्वकर्मक्षयात् प्राप्य ज्ञानं शुकयतीश्वरः । कोटिसाधुयुतो मुक्तिं ययौ सिद्धमहीधरे ॥ १८५ ॥

इति शत्रुञ्जयनामोपरि शुकभूपकथा संक्षेपादुक्ता. विस्तरात् मत्कृतविक्रमार्कचरित्राद् ज्ञातव्या

श्री सिद्धक्षेत्रनामोपरि दण्डवीर्यनृपकथा ॥

समं भूरिनृसङ्घातान् सिद्धान् वीक्ष्य सुमानसः । दण्डवीर्यो ददौ नाम सिद्धक्षेत्रेति तस्य तु ॥ १ ॥
अयोध्यायां पुरि श्रीमन्नाभेयस्यान्वये क्रमात् । जलवीर्यनृपस्याभूद् दण्डवीर्याभिधः सुतः ॥ २ ॥
दिग्यात्रां कुर्वता तेन भुवः खण्डत्रयं क्रमात् । तथाऽसाधि यथा सर्वे तस्यासन् वशगा द्विषः ॥ ३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* यतः–'राया आइच्चजसे महाजसे अइबले अ बलभद्दे । बलविरिअ कत्तविरिए जलवीरिए दण्डविरिए अ' ॥१॥
* एएहिं अद्धभरहं सयलं भुत्तं सिरेण धरिओ अ । जिणसंतीओ मउडो सेसेहिं न चाइओ वोढुं ॥ २ ॥
धर्म्माचार्यान्तिकेऽन्येद्युर्दण्डवीर्यमहीपतिः । धर्म्मं श्रोतुं ययौ यावत्तावच्चेति जगौ गुरुः ॥ ४ ॥
* धम्मो मंगलमउलं ओसहमउलं च सव्वदुक्खाणं । धम्मो बलं च विउलं धम्मो ताणं च सरणं च ॥५॥卐
इत्यादिदेशनां श्रुत्वा दण्डवीर्यनृपोऽलपत् । तीर्थे शत्रुञ्जये गच्छन् योऽस्मिन् मार्गे समेष्यति ॥ ६ ॥
तं तं सर्वं लसद्भक्तदानात् सन्मान्य भक्तितः । जेमितव्यं मया प्राणात्ययेऽपि नान्यथा पुनः ॥ ७ ॥
लक्षकोटिमितान् श्राद्धान् तत्र मार्गे समागतान् । भोजयित्वा स्वयं दण्ड वीर्यो जेमति भूपतिः ॥ ८ ॥
इतः सुरालये शक्रो दण्डवीर्यमहीपतेः शश्लाघाऽभिग्रहं घोरं सभायां द्युसदां पुरः ॥ ९ ॥
दण्डवीर्यो नृपः स्वीया-भिग्रहात् निर्जरादिभिः । न चाल्यते ततश्चैकः सुरः स्वार्गाद्विनिर्ययौ ॥ १० ॥
इतो देवगृहे देवं पूजयित्वा वरैः सुमैः । दण्डवीर्यनृपो गेह-देवौकस्यर्चयज्जिनम् ॥ ११ ॥
उपविष्टे नृपे जग्धुं यावत् सूपकृतो वराः । मुञ्चन्ति भाजने भक्तं तावद् भृत्यो जगावदः ॥ १२ ॥
शत्रुञ्जये व्रजन् सङ्घः समेतोऽस्ति पुराद् बहिः । राजोत्थाय गतः सङ्घं तत्राऽऽकारयितुं द्रुतम् ॥ १३ ॥
सङ्घं निमन्त्र्य लेहायानीय भोजितवान्नृपः । यावत्तावत् समायातो महान् सङ्घोऽपरः पुनः ॥ १४ ॥

For Private and Personal Use Only

जेमयित्वाऽखिलं सङ्घं यावद् भूपोऽत्तुमिच्छति । तावदन्यः समायातो महान् सङ्घः पुराद्बहिः ॥ १५ ॥
एवं जेमयतः सङ्घं भूपस्याऽस्तं ययौ रविः । पुनः प्रौढः समायातः सङ्घं प्रातः पुराद् बहिः ॥ १६ ॥
तस्मिन् भुक्ते तदा सङ्घे पुनः सङ्घः समीयिवान् । तं च जेमयतः सङ्घं भूपस्याऽस्तं ययौ रविः ॥ १७ ॥
एवं सप्तदिना याता अभुक्तस्य महीपतेः । ततो देवोऽवधिज्ञानाद् जज्ञौ भूपं स्थिराशयम् ॥ १८ ॥
प्रादुर्भूय ततो देवो वर्यभूषणभूषितः । जगौ धन्यो महीश ! त्वं स्थिरं चेतोऽस्ति ते यतः ॥ १९ ॥
सङ्घमेनं विकुर्व्याहं तेऽकरिष्यं परीक्षणम् । त्वं तु नो चलितः स्वीयाभिग्रहाद् भूप ! साम्प्रतम् ॥ २० ॥
सप्त चिन्तामणीन् दत्त्वा दण्डवीर्यमहीभुजे । तत्प्रशंसापरः स्वर्गं समगाद् भूरिसातदम् ॥ २१ ॥
ततःप्रभृति भूपालो विशेषाद् धर्मकृत्यकृत् । सप्तक्षेत्रे धनं स्वीयं वपते स्म सदा मुदा ॥ २२ ॥
दण्डवीर्यो नृपः श्रुत्वा तीर्थमाहात्म्यमद्भुतम् । यात्रायै मेलयामास सङ्घमेवंविधं क्रमात् ॥ २३ ॥
महीपालाः सहस्राणि षोडशोत्तंसबद्धकाः । पञ्च कोट्यो महेभ्यानां कुलान्यष्टौ नृणां पुनः ॥ २४ ॥
जाम्बूनदमया देवा-लयाः सप्तशतप्रमाः । एकादशशती रौप्य-मयदेवौकसां पुनः ॥ २५ ॥
मनुष्या विंशतिः कोट्यः स्त्रियः कोट्यो द्विसप्ततिः । महिषाः कोटिरेकं च जलानयनहेतवे ॥ २६ ॥
स्यन्दनाः स्थगिता वस्त्रैर्विंशतिः कोटिरद्भुताः । एवमन्यदपि ज्ञेयं सङ्घे तस्य महीपतेः ॥ २७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवंविधेन सङ्घेन दण्डवीर्यः समन्वितः । चलन् शत्रुञ्जये तीर्थे ययौ कुर्वन् महोत्सवम् ॥ २८ ॥
स्नात्रार्चाध्वजदानादि-कृत्यानि समहोत्सवम् । दण्डवीर्योऽर्जयामास कर्म मुक्तिगमोचितम् ॥ २९ ॥
तस्मिन् सङ्घे स्थिते तत्र सप्त कोट्यो नराः स्त्रियः । लेभिरे केवलज्ञानं ययुर्मुक्तिं क्रमात् पुनः ॥ ३० ॥
सिद्धक्षेत्रे गतेष्वेषु नरादिषु तदा क्रमात् । सिद्धक्षेत्रमिति क्ष्मापो नाम तीर्थस्य दत्तवान् ॥ ३१ ॥
यात्रां कृत्वा समेतः स्व-नगरे मेदिनीपतिः । राज्यं दत्त्वा स्वपुत्राय जग्राह संयमश्रियम् ॥ ३२ ॥
क्रमात् सूरिपदं प्राप्य केवलज्ञानमप्यथ । ययौ शत्रुञ्जये मुक्तिं दण्डवीर्यनरेश्वरः ॥ ३३ ॥

॥ श्री पुण्डरीकनामोपरि श्रीवृषभजिन–प्रथमगणधरपुण्डरीककथा ॥

तृतीयस्याऽरकस्यान्तेऽवसर्पिण्यामिहाऽधुना । आसन् कुलकराः सप्त युगलित्वेन शोभिताः ॥ १ ॥
तथाहि–' पढमित्थ विमलवाहण चक्खुम जसमं चउत्थमभिचंदे । तत्तो अ पसेणइए मरुदेवे चेव नाभी य ॥२॥
चंदजस चंदकंता सुरूव पडिरूव चक्खुकंता य । सिरिकंता मरुदेवी कुलगरपत्तीण नामाइं ' ॥ ३ ॥
नाभेः कुलकरस्यासीन्मरुदेवाभिधा प्रिया । तयोः ऋषभनामाभूत् पुत्र आद्यो जिनाधिपः ॥ ४ ॥
सुमङ्गला प्रिया तस्य भरतं भारतीयुतम् । असूत युग्मतश्चैकोनपञ्चाशत्सुतद्वयम् ॥ ५ ॥

For Private and Personal Use Only

पुत्रं बाहुबलिं पुत्रीं सुन्दरीं युग्मयोगतः ! आदिदेवप्रियाऽभूत, सुनन्दाऽन्या शुभेऽहनि ॥ ६ ॥
भरतस्यादिमः पुत्रः पुण्डरीकाभिधोऽभवत् । अन्ये तु नन्दनाः कोटि-प्रमाणा अभवन् क्रमात् ॥ ७ ॥
निवार्य युग्मधर्मं तु व्यवहारपथं समम् । प्रकाश्य वृषभो राज्यं विदधे समयं बहुम् ॥ ८ ॥
इत्यादि शास्त्रान्तराद् ज्ञेयं स्वयम् ॥
अयोध्याया ददौ राज्यं भरतायाऽऽदिमो जिनः । विभज्य राज्यमन्येभ्यः पुत्रेभ्यो निवृत्तः पुनः ॥ ६ ॥
लात्वा व्रतं प्रपद्याऽथ ज्ञानं श्रीवृषभः प्रभुः । प्रबोधितुं जनान् भव्यान् विजहाराऽवनीतले ॥ १० ॥
पुण्डरीको गृहीत्वादौ व्रतं श्रीवृषभान्तिके । गणभृत्सु पदं धुर्यं लभते स्माखिलेष्वपि ॥ ११ ॥
पुण्डरीको जनान् भव्यान् बहून् प्रबोधयन् वृषे । पूर्वाण्यनेकशो निन्ये जीवितव्यस्य सन्ततम् ॥ १२ ॥
वृषभान्तेऽन्यदाऽप्राक्षीत् पुण्डरीको गणाधिपः । मम कुत्र शिवं भावि स्वामिन्नादिश्यतामिति ॥ १३ ॥
स्वाम्याचष्ट सुराष्ट्रासु तुङ्गोऽस्ति धरणीधरः । तत्र ते गमनं मोक्षे भविष्यति न संशयः ॥ १४ ॥
श्रुत्वा प्रभोर्वचः सम्यग् भूरिसाधुसमन्वितः । पुण्डरीकोऽचलद् गन्तुं तुङ्गं महीधरं प्रति ॥ १५ ॥
सुराष्ट्रासु स्थितं तुङ्गं पर्वतं भूविभूषणम् । दृष्ट्वा चक्रे नतिं भक्त्या पुण्डरीको गणाधिपः ॥ १६ ॥
तुङ्गपर्वतमारूढः पुण्डरीको गणाधिपः । ध्यानमौनपरो जातो भूरिवाचंयमान्वितः ॥ १७ ॥

For Private and Personal Use Only

पालयन् शुद्धचारित्रं वर्षं क्रियाकलापकृत् । पुण्डरीको ददौ धर्मो-पदेशं भविनां पुरः ॥ १८ ॥
धर्मोपदेशोऽत्र वाच्यः तदानीं पञ्चकोटीभिर्वर्यसाधुभिरन्वितः । पुण्डरीको गणी ध्यान-लीनचित्तोऽभवत्तदा ॥
मासक्षपणमुच्चर्य पुण्डरीकादयस्तदा । सर्वे वाचंयमाः शुक्लध्यानारूढा बभुर्भृशम् ॥ २० ॥
चैत्रस्य पूर्णिमारात्रौ पुण्डरीको गणाधिपः । सम्प्राप केवलज्ञानं ततोऽन्ये साधवोऽश्रयन् ॥ २१ ॥
पुण्डरीके गते मुक्तौ कृत्वा मोक्षमहोत्सवम् । देवास्तस्यैव तीर्थस्य पुण्डरीकाभिधां ददुः ॥ २२ ॥
यतः- " चित्तस्स पुण्णिमाए समणाणं पंचकोडीपरिवरिओ । निम्मलजसपुण्डरीअं सो विमलगिरी जयउ तित्थं" ॥
भरतस्तत्र कल्याण-मयं स्फारं जिनालयम् । कारयामास कल्याण-कोटिकोटिशतव्ययात् ॥ २४ ॥
तत्र रत्नमयं बिम्बं श्रीयुगादिजिनेशितुः । स्थापयामास भरतः प्रतिष्ठोत्सवपूर्वकम् ॥ २५ ॥
द्वाविंशतिर्जिनावासान् द्वाविंशत्यर्हतां पुनः । भरतः कारयामास भूरिस्वर्णव्ययात् पुनः ॥ २६ ॥

उक्तं च पुण्डरीकप्रकीर्णके—

" चित्तस्स पुण्णिमाए मासक्खमणेण केवलं नाणं । उत्पन्नं सव्वेसिं पढमं वर पुंडरीअस्स ॥ १ ॥
केवलिमहिमं दट्ठुं पुंडरीए सुरगणेहिं कीरंतं । उप्पन्ननाणरयणा केवलि जाया तओ सव्वे ॥ २ ॥
देवेहिं कया महिमा सिद्धिं पत्ताणं सव्वसाहूणं । पुंडरीयकेवलिस्स वि सरीरपूया कया विहिणा ॥ ३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूअं काऊणं तओ देवा वच्चंति अप्पणो ठाणं। पुंडरीअकेवलिस्स वि भरहेण कयं तु जिणभवणं ॥ ४ ॥
देवेहिं इमं घुट्ठं जिणेण परिसागएण भविआणं। पुन्नो एस नगवरो नामेण य पुंडरीओत्ति ॥ ५ ॥ ”

—*— —*— —*— —*—

॥ श्री सिद्धशेखरनामोपरि पद्मभूपकथा ॥

यथा सिद्धान् जनान् भूरीन् दृष्ट्वा पद्ममहीपतिः। तीर्थस्याऽस्य ददौ सिद्ध-शेखरेत्युच्यते तथा ॥ १ ॥
लक्ष्मीपुर्यामभूल्लक्ष-महीशो न्यायतः प्रजाः। पालयन् कुरुते जैनं धर्म्मं शिवसुखप्रदम् ॥ २ ॥
तस्याऽऽसीत् प्रेयसी प्रीतिमती लावण्यशालिनी। पालयन्ती सदा शीलं सीतेव रामभूपतेः ॥ ३ ॥
पुत्रः पद्मकुमारोऽभूत् मन्त्री मुकुन्दनामकः। मन्त्रिसू-नुर्धरो नाम्ना सर्वशास्त्रविशारदः ॥ ४ ॥
* यतः-“ विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन। स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥ ५ ॥ 卐
मध्यरात्रेऽन्यदा नारी-रोदनं नगराद्बहिः। श्रुत्वैकाकी ततः पद्मो गत्वा स्त्र्यन्ते जगावदः ॥ ६ ॥
किं त्वया रुद्यते नारि! किं दुःखमस्ति तेऽधुना?। नारी जगावहं राज्या-धिष्ठातृकाऽस्मि देवता ॥ ७ ॥
रक्षां करोमि राज्यस्य सर्वविघ्नापहारतः। मन्त्रीशनन्दनो योऽस्ति पुण्यवान् मदनोपमः ॥ ८ ॥
स एव योगिनाऽऽनीतो वनेऽत्र हन्तुमिच्छता। अग्निकुण्डे प्रक्षिप्याऽथ साध्यते रैनरोऽचिरात् ॥ ९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कोऽपि पाता न तस्याऽस्ति साहसी भुवि साम्प्रतम् । यो रक्षति सुतं मन्त्रि-नाथस्य कष्टतोपि च ॥ १० ॥
पद्मः प्राह स कुत्रास्ति ? देव्याहाऽस्य तरोः पुरः । अग्निकुण्डान्तिके योगि-समीपे विद्यतेऽधुना ॥ ११ ॥
पातयित्वाऽग्निकुण्डान्तस्तं धरं योगिराट् दृढं । साधयिष्यति कल्याण-पुरुषं दुष्टमानसः ॥ १२ ॥
पद्मस्तत्रैत्य मन्त्रीश पुत्रं विमोच्य वेगतः । योगिनं पातयामास वह्निकुण्डे दुराशयम् ॥ १३ ॥
वह्निकुण्डे तदा योगी पतितो हेमपुरुषः । अभूत् तं वारिणा सिक्त्वा शीतं चक्रे नृपाङ्गजः ॥ १४ ॥
इतो मन्त्रिसुतं योग्यपहृतं स्वसुतं गतम् । ज्ञात्वा मन्त्रियुतो भूपोऽचालीत् तयोर्विलोकितुम् ॥ १५ ॥
अवीक्ष्य स्वसुतं मन्त्रिसुतं चाभून्नृपोऽसुखी । यतो मोहोऽस्ति संसारे बन्धनं महतामपि ॥ १६ ॥
निषिध्य गीतगानादि समेत्य स्वगृहे नृपः । प्राह यः कथिता पद्म-धरयोः शुद्धिमञ्जसा ॥ १७ ॥
तस्मै ग्रामशतं वर्यं-वाजिविंशतिसंयुतम् । दास्येऽहं विलसन्मान-दानपूर्वं न संशयः ॥ १८ ॥
इतोऽभ्येत्य जगौ काष्ठ-विक्रयी कोऽपि मानवः । भवतो नन्दनो हेम-नरयुग् वीक्षितो वने ॥ १९ ॥
भूपालोऽग्रेसरं तं च कृत्वाऽचालीद् यदा पुरात् । तदाऽकस्मात् सुतो मन्त्रिसुतयुग् मिलितोऽध्वनि ॥ २० ॥
पुत्रं हेमनृसंयुक्तं प्रेक्ष्य भूपो जगावदः । भो ! मन्त्रिपुत्र ! कुत्रायं हेमना प्रापि सूनुना ? ॥ २१ ॥
ततो मन्त्रिसुतः प्राह सर्वं योगिविचेष्टितम् । समहं नन्दनं स्वीये गेहेऽनैषीन् नृपस्ततः ॥ २२ ॥

For Private and Personal Use Only

काष्ठवाहकमर्त्याय स्वोक्तं भूपो ददौ धनम् । मन्त्रिसूनोर्विशेषेण भक्तिरासीन्नृपात्मजे ॥ २३ ॥
सुवर्णमर्त्यसान्निध्याद् राजाऽनृणां महीं व्यधात् । सप्तक्षेत्र्यां धनं भूरि व्ययति स्म यथाविधि ॥ २४ ॥
* 'जिणभवण-बिंब-पुत्थय-संघसरूवेसु सत्तखित्तेसु । ववित्रं धणंपि जायइ सिवफलयमहो अणंतगुणं ॥ २५ ॥ 卐
लक्षभूपः स्वपुत्राय दत्त्वा राज्यं सदुत्सवम् । जग्राह संयमं मुक्ति-सुखश्रीकारणं रयात् ॥ २६ ॥
पद्मोऽथ पृथिवीं पाति न्यायमार्गात् तथा सदा । विसस्मार प्रजा लक्ष-महीशं निजचेतसः ॥ २७ ॥
रैनराद् विभवं भूरि प्राप्य प्रगे प्रगे सदा । अर्थिभ्योऽदात्तथा जाता इभ्यास्तेऽपि श्रिया क्रमात् ॥ २८ ॥
राजा सङ्घमसङ्ख्यातं मेलयित्वा शुभेऽहनि । यात्रां कर्त्तुं चचालाथ शत्रुञ्जयगिरिं प्रति ॥ २९ ॥
सिद्धभूमीधरारूढः पद्मभूपो जिनेशितुः । स्नात्रार्चारात्रिकादीनि कृत्यानि विदधेतराम् ॥ ३० ॥
धर्मघोषो गुरुः साधुकोटिद्वयनिषेवितः । कुर्वन् ध्यानं तदा प्राप केवलज्ञानमञ्जसा ॥ ३१ ॥
* स्तोकैर्दिनैर्गतान् सिद्धि-पुर्यां तांस्तान् मुनीन् नृपः । दृष्ट्वाऽदात्तस्य तीर्थस्य सिद्धशेखरनाम तु ॥ ३२ ॥
* तदा भूपोऽपि तत्रस्थो भावनां भावयन् हृदि । सर्वकर्म्मक्षयान्मुक्ति-नगरीं समुपेयिवान् ॥ ३३ ॥
राज्ञोऽङ्गरक्षकाः पञ्च-शतं ध्यानपरायणः । क्षीणकर्माष्टकाः सिद्धि-पुरीं प्रपेदिरे रयात् ॥ ३४ ॥
तदाऽभ्येत्या सुरास्तत्र कृत सिद्धमहोत्सवम् । ययुः स्वर्गे ततः पद्म-पुत्रो हीरो व्यधान्महः ॥ ३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततो हीरः समेत्य स्व-नगरे सङ्घमादरात् । भोजयित्वाम्बरैर्वर्यैर्मुदा पर्युदधापयत् ॥ ३६ ॥
पद्मपट्टे मिलित्वाथ, मन्त्रिमुख्यैस्तदङ्गजः । हीरोऽस्थापि शुभे घस्रे महोत्सवपुरस्सरम् ॥ ३७ ॥

॥ श्री सिद्धपर्वतोपरि निर्जरकथा ॥

यत्र केवलिनः पार्श्वे ज्ञात्वा मुक्तिगतिं निजाम् । सिद्धपर्वत इत्याख्यां ददतुर्निर्जरौ यथा ॥ १ ॥
श्रीपुरे धनदेभ्यस्य पत्नी धन्यभिधाऽभवत् । नाम्ना हरहरीपुत्रौ वरौ बभूवतुः क्रमात् ॥ २ ॥
व्यवसायं करन् (रचन्) श्रेष्ठी (रैणां) रायां कोटित्रयं क्रमात् । अर्जयन्न तथाऽप्याप लोभस्यान्तं स्वचेतसि

* यतः-" अर्था नराणां पतिरङ्गनानां, वर्षा नदीनां ऋतुराट् तरूणाम् । 卐
सद्धर्मचारी नृपतिः प्रजानां, गतं गतं यौवनमानयन्ति ॥ १ ॥"

* तृष्णा खनिरगाधेयं दुष्पूरा केन पूर्यते ? । या महद्भिरपि क्षिप्तैः पूरणैरेव खन्यते ॥ ५ ॥ 卐
* धनेषु जीवितव्येषु स्त्रीषु चाहारकर्म्मसु । अतृप्ताः प्राणिनः सर्वे याता यास्यन्ति यान्ति च ॥ ६ ॥ 卐
एवंविधं धनं प्राप्या-व्ययित्वा च वृषे क्वचित् । प्रथमं नरकं प्राप धनदोऽपुण्यवान् क्रमात् ॥ ७ ॥

For Private and Personal Use Only

ततो हरहरी कृत्वा मृत्युकृत्यं पितुर्धनात् । व्यवसायं वितन्वानौ न क्षणं निवृतः स्म तौ ॥ ८ ॥

यथा यथा वितन्वाते व्यवसायं हरो हरिः । तथा तथा त्रुटत्येव धनं ग्रीष्मे यथा पयः ॥ ९ ॥

* के वंका के पद्धरा पहा दीहा हुंति नराण । हरिस विसाय न आणीइ निअ हिअडइ अप्पाण ॥ १० ॥ 卐

क्रमान्निर्विभवौ जातौ सोदरौ तौ हरो हरिः । धनार्थं गणकान् नित्यं पप्रच्छतुः कृतादरौ ॥ ११ ॥

* यतः-रोगिणां सुहृदो वैद्याः प्रभूणां चाटुकारिणः । मुनयो दुःखदग्धानां गणकाः क्षीणसम्पदाम् ॥ १२ ॥ 卐

तत्रान्यदा समायाताः श्रीधनेश्वरसूरयः । गत्वा तेषां समीपेऽतो पप्रच्छतुः कृताञ्जलि ॥ १३ ॥

विलोक्य ज्योतिषं यूयं ब्रूथावयोः कदेन्दिरा । भविष्यति गृहे प्रोचु-स्ते तु तौ नैगमौ प्रति ॥ १४ ॥

ज्योतिष्क-मन्त्र-तन्त्रादि कथितुं कल्पते नहि । साधूनां निर्वृतीच्छूनां मनाक् पातकहेतुकात् ॥ १५ ॥

* यतः-" जोइसनिमित्तअक्खरकोऊआएसभूइकम्मेसु । करणाणुमोअणेहि अ साहुस्स तवक्खओ होइ ॥१६॥ " 卐

कृतपुण्यस्य जीवस्य स्थितस्य शयितस्य वा । अनुद्यमस्य सद्मैति लक्ष्मीर्नद्य इवाम्बुधिम् ॥ १७ ॥

यद्यस्ति भवतो वाञ्छा सुखायाऽत्र परत्र च । तदा जैनं वृषं भावात् कुरुतां वां शिवप्रदम् ॥ १८ ॥

ततस्तौ प्रोचतुर्लक्ष्मीः सदनेऽस्त्यावयो र्नहि । धर्मस्थानेषु तेन श्री-रावाभ्यां व्ययते कथम् ॥ १९ ॥

गुरवो जगदुस्तर्हि कुरुतं सन्ध्ययोर्द्वयोः । प्रतिक्रान्ति नमस्कारान् स्मरतं च शतत्रयम् ॥ २० ॥

For Private and Personal Use Only

गुरूदितं वितन्वानौ धर्म्मं द्वावपि सोदरौ । ययतुः पुण्डरीकाद्रौ नन्तुं श्रीवृषभं जिनम् ॥ २१ ॥
तत्र देवान् नमस्कृत्य ध्यानमौनपरायणौ । मृत्वा तौ सोदरौ स्वर्गे प्रथमे ययतुः समम् ॥ २२ ॥
अवधिज्ञानतो ज्ञात्वा प्राग्भवं स्वं सुरौ च तौ । आगत्य पुण्डरीकाद्रौ स्थितौ यावत् प्रमोदितौ ॥ २३ ॥
तावत्तत्र रमापुर्याः स्वामी मुकुन्दभूपतिः । असङ्ख्यसङ्घसंयुक्तः समागान्नन्तुमर्हतः ॥ २४ ॥
भूपे स्नात्रं वितन्वाने जिनस्य तौ सुरौ तदा । अपूर्वं चक्रतुर्नाट्यं नमन्तौ श्रीजिनाधिपम् ॥ २५ ॥
मुकुन्दो भूपतिः पूजां ध्वजान्तां विधिपूर्वकम् । कृत्वा केवलिनः पार्श्वे धर्म्मं श्रोतुं समीयिवान् ॥ २६ ॥
तदोचतुः सुरौ द्वौतु क्वाऽऽवां मुक्तिर्भविष्यति ? । केवल्याहाऽत्र सिद्धाद्रौ गमिष्यतो युवां शिवम् ॥ २७ ॥
ततस्तौ प्रोचतुर्देवौ सिद्धपर्वत एव तु । आवयोर्मुक्तिगमनाद् गीयताममरैरपि ॥ २८ ॥
तौ देवौ पर्वते तत्र सेवित्वाऽर्हत्क्रमाम्बुजम् । नत्वा च ज्ञानिनं स्वर्गे जग्मतुर्मुदिताशयौ ॥ २९ ॥
ततश्च्युत्वा सुरौ तौ तु प्राप्य मर्त्यभवं क्रमात् । लात्वा दीक्षां गतौ सिद्धिं सिद्धपर्वतमस्तके ॥ ३० ॥

———*———*———*———*———

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री सिद्धराजोपरि चन्द्रचूडादिभूपकथा ।

यात्रां कृत्वा नृपश्चन्द्र-चूडो धर्मपरायणः । सिद्धाद्रेः सिद्धराजेति नाम चक्रे सदुत्सवम् ॥ १ ॥
कलाकेलिपुरे लक्ष्मी-धरस्य मेदिनीपतेः । लक्ष्मीवत्यभिधा पत्नी बभूवानघशीलभाग् ॥ २ ॥
बहूपयाचितैः पुत्रोऽजनिष्ट शुभवासरे । तस्य राज्ञोऽभवत् प्राणादपि वल्लभ एव सः ॥ ३ ॥
जन्मोत्सवं नृपः कृत्वा भूयिष्ठविभवव्ययात् । चन्द्रचूडेति नामाऽदात् सूनोः सज्जनसाक्षिकम् ॥ ४ ॥
धर्मकर्मकला या या विद्यन्ते विबुधान्तिके । तास्ताः सर्वाः कुमारेण शिक्षिता लीलया किल ॥ ५ ॥
कुमारः केनचिद्व्योम-गामिना पूर्ववैरिणा । अपहृत्य महारण्ये मुमुचे दुःखहेतवे ॥ ६ ॥
जलाभावात्तृषा लग्ना यावत्प्राणापहारिका । तावत् स केनचिद् व्योम-गतिनोत्पाट्य यत्नतः ॥ ७ ॥
मुक्तो जलाशये पातुं पानीयं राजनन्दनः । यतः पुण्यवतां पुण्यं जागर्ति विपदि ध्रुवम् ॥ ८ ॥ युग्मम् ।
यावत् पिबति पानीयं कुमारो माररूपभृत् । तावदुत्पाट्य तं व्योम्नि हन्तुं विद्याधरोऽचलत् ॥ ९ ॥
आस्फालयति कीराद्रि-प्रस्थे तं यावता खगः । तावदेको बली व्योम-गामी तत्राऽऽगतो जगौ ॥ १० ॥
दुष्ट ! पापिष्ठ ! विद्याभृत् ! किमेनं नरपुङ्गवम् । हंसि ? बिभेषि नो पापात् मत्तो वा किल साम्प्रतम् ॥ ११ ॥
उक्त्वेति व्योमगो व्योम-गमरिं तं दुराशयम् । हत्वा पृष्ठौ दृढं कुब्जं व्यधान्मुष्टिप्रहारतः ॥ १२ ॥

For Private and Personal Use Only

खगो भग्नकटिः सोऽपि रुदन् क्रन्दन् बहुस्वरम् । रोदयामास पार्श्वस्थान् मृगफेरुरुरूनपि ॥ १३ ॥
तदा खगो जगौ व्योम-गामिन् ! किं रुद्यते त्वया । खगोऽवग् मम देहेऽस्ति वेदना प्राणहारिका ॥ १४ ॥
व्योमगामिन् ! त्वया भूमी-पतिपुत्रापहारतः । यत्पापं विहितं तस्य बीजमात्रमिदं फलम् ॥ १५ ॥
परलोकफलं श्वभ्र-पातरूपं भविष्यति । तत्र या विद्यते पीडा तस्या (सा हि) वक्तुं न शक्यते ॥ १६ ॥
स दुष्टव्योमगोऽप्राक्षीत् मया पापं कृतं बहु । अतः परं कुमारस्यो-परि दुष्टं न चिन्त्यते ॥ १७ ॥
ततोऽन्यो व्योमगो विद्या-प्रभावात् तस्य विग्रहात् । अपाचक्रेऽचिराद् दूरं वेदना दुःखदायिनी ॥ १८ ॥
ततो द्वाभ्यां खगामिभ्यां मिथो मैत्रीं प्रपद्य च । ददिरे तस्य सद्विद्या व्योमगाद्या मनोहराः ॥ १९ ॥
इतोऽप्रेक्ष्य सुतं भूपो दुःख्यरण्ये जनेऽभितः । न्यवर्त्तयत् पुरीमध्ये गीतगानादि सर्वतः ॥ २० ॥
दुःखितो नृपतिर्यावदुपाविष्टः सभान्तरे । तावत्पुत्रो युतो द्वाभ्यां खगाभ्यामीयिवान् ध्रुवम् ॥ २१ ॥
विद्याधरं सुतं मत्वा तयोर्व्योमगयोर्मुखात् । राजा हृष्टो ददौ राज्यं सूनवे नयशालिने ॥ २२ ॥
लक्ष्मीधरो नृपः कृत्वाऽष्टाह्निकां जिनसद्मसु । अग्रहीत् संयमं धीर-सूरीश्वरान्तिके मुदा ॥ २३ ॥
लक्ष्मीधरयतिस्तीव्रं तपः कुर्वन् सदादरात् । ययौ शत्रुञ्जये तीर्थे सार्द्धं गुरुभिरन्यदा ॥ २४ ॥
इतस्तत्र नृपश्चन्द्र-चूडोऽपि भूरिसङ्घयुग् । अभ्येत्य सङ्घकृत्यानि चक्रे स्नात्रपुरस्सरम् ॥ २५ ॥

लक्ष्मीधरयतेस्तत्र शुक्लध्यानं वितन्वतः । उत्पन्नं केवलज्ञानं विश्वविश्वप्रकाशकम् ॥ २६ ॥

ततो लक्ष्मीधरस्यर्षेः केवलज्ञानसूत्सवम् । क्रियमाणं सुरैः श्रुत्वा सङ्घः शेषः समागमत् ॥ २७ ॥

देवैर्विनिर्मिते हेम-पद्मे निविश्य केवली । श्रीसङ्घस्य पुरो धर्मोपदेशमिति दत्तवान् ॥ २८ ॥

* " दिवसनिसाघडिमालं आऊ सलिलं जणस्स घित्तूणं । चंदाइच्च-बइल्ला कालरहट्टं भमाडंति ॥ २९ ॥ 卐

* जलनिहिसंठिअपवहण इक्काबनभागसरिसगिहकज्जे । बावन्न-भागसरिसो जिणधम्मो होइ कायव्वो ॥ ३० ॥ 卐

* छायामिसेण कालो सयलजिआणं छलं गवेसंतो । पासं कह नवि मुंचइ तो धम्मे आयरं कुणह ॥ ३१ ॥ 卐

* दोहाः—कम्मह वारह रुपउओ धम्मह मंदी देह । आपणसरिसो चोरडी तइं किमु सीखी एह ॥ ३२ ॥ 卐

एवं धर्मोपदेशं तु श्रृण्वतां भव्यदेहिनाम् । कोटिद्वयप्रमाणानां जज्ञे ज्ञानमनुत्तरम् ॥ ३३ ॥

सर्वेषां ज्ञानिनां तेषां ज्ञानोत्पत्तिमहोत्सवम् । आदौ चक्रुः सुरा भूपास्ततो भूरिधनव्ययात् ॥ ३४ ॥

अस्मिँस्तीर्थे तपोध्यान-मौनार्हत्पूजनादिभिः । भवन्ति भविनः सिद्ध-राजानोऽनेकशः क्षणात् ॥ ३५ ॥

अतोऽस्य तीर्थराजस्य सिद्धराजाभिधा वरा । उच्यतां निखिलैर्लोकैरित्यवक् स नरेश्वरः ॥ ३६ ॥ युग्मम् ॥

सिद्धराजेति लोकेषु ध्यायत्सु भूरिषु स्फुटम् । बभूव केवलज्ञानं देवा ज्ञानोत्सवं व्यधुः ॥ ३७ ॥

चन्द्रचूडस्तदा ज्ञानि-पार्श्वे श्रयन् वृषं वरम् । शत्रुञ्जयस्य माहात्म्य-मश्रृणोदिति सादरम् ॥ ३८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पञ्चाशद्योजनो मुक्तिर्दर्शनात् स्पर्शनादपि । ये जातास्ते गमिष्यन्ति कालेनापि परां गतिम् ॥ ३९ ॥
तेषां जन्म च चित्तं च जीवितं सार्थकं च ये । सिद्धक्षेत्राचलं यान्ति परेषां व्यर्थमेव तत् ॥ ४० ॥
चतुर्विंशतयोऽनन्ताः सिद्धाः सिद्धाचलेऽर्हताम् । सेत्स्यन्ति चैवानन्ता याः तत्सङ्ख्यां वेत्ति केवली ॥ ४१ ॥
श्रुत्वेति चन्द्रचूडक्ष्मा-पतिः पुष्पैः सुगन्धिभिः । अपूजयन्मुदा सिद्ध-राजं तीर्थं च सङ्घयुग् ॥ ४२ ॥
विधाय विस्ताराद्यात्रां चन्द्रचूडावनीधवः । आजगामोत्सवाद्वैतं स्वपुरोद्यानभूतले ॥ ४३ ॥
भोजयित्वाऽखिलं सङ्घं परिधाप्याम्बरैर्वरैः । विसृज्य नृपतिः स्वीय-सद्माऽगात्समहोत्सवम् ॥ ४४ ॥

* * * *

॥ श्री बाहुबलिनामोपरि केलिप्रियभूपकथा ॥

यात्रां शत्रुञ्जये कृत्वा केलिप्रियमहीपतिः । सिद्धाद्रेः प्रददौ बाहु-बलिनाम सदुत्सवम् ॥ १ ॥
कलाकेलिपुरे केलि-प्रियस्य मेदिनीपतेः । केलिप्रिया प्रिया जाता शीलादिगुणशालिनी ॥ २ ॥
शोभनेऽह्नि सुतं केलि प्रियाऽसूत सुलक्षणम् । पिता बाहुबलिर्नाम ददौ सूनोः सदुत्सवम् ॥ ३ ॥
वर्द्धमानः क्रमाद्बाहु-बलिः पण्डितसन्निधौ । अशिक्षयत् कला वर्यास्तथाऽजनि यथा बुधः ॥ ४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्रोद्याने समायाता मानमर्दनसूरयः । ददते देशनां भव्या-ङ्गिभ्यः शिवसुखप्रदाम् ॥ ५ ॥
* जन्तूनामवनं जिनेशमहनं भक्त्याऽऽगमाकर्णनं, साधूनां नमनं मदापनयनं सम्यग् गुरोर्माननम् । 卐
मयाया हननं क्रुधश्च शमनं, लोभद्रुमोन्मूलनं, चेतः शोधनमिन्द्रियाश्वदमनं यत्तच्छिवोपायनम् ॥ ६ ॥
तदा राजा प्रियापुत्र-मित्रादिपरिवारयुग् । धर्मं श्रोतुं ययौ श्रेयः-सुखसन्ततिदायकम् ॥ ७ ॥
कुमारो बाहुबल्याह्वः कृत्वा पूजां जिनेशितुः । कुर्वन् ध्यानं सितं प्राप्य केवलज्ञानमञ्जसा ॥ ८ ॥
विहिते केवलज्ञानो-त्सवे देवैः प्रमोदतः । बाहुबलिर्ददौ धर्मो-पदेशमिति सादरम् ॥ ९ ॥ युग्मम्
तदा वाचंयमाः कोटि-मिताः प्राप्ताः व्रतश्रियम् । क्रमात् क्षीणतमोव्राताः प्रापुर्ज्ञानमनुत्तरम् ॥ १० ॥
तत्रैव क्षीणनिश्शेषा-युषो वाचंयमाः समे । मुक्तिपुर्यां ययुर्देवाश्चक्रुश्चारूत्सवं पुनः ॥ ११ ॥
तत्राऽऽयुषः क्षये बाहु-बलिर्मुक्तिं यदा ययौ । तदा राजा ददौ बाहू-बलिनाम्नाऽस्य भूभृतः ॥ १२ ॥
अथवा श्रीऋषभजिनस्य बाहुबलिपुत्रोऽत्र तीर्थे सिद्धिं गतः अतोऽस्य तीर्थस्य बाहुबलिनाम दत्तं देवैः ॥

————*——*——

For Private and Personal Use Only

श्री शत्रुञ्जयस्य-मरुदेवनामोपरि चन्दनमहीपतिकथा ॥

मुक्तिगतं निजं तातं मत्वा चन्दनभूतिः । सिद्धाद्रेर्मरुदेवेति नामाऽदात् लसदुत्सवम् ॥ १ ॥
तथाहि–वीराह्वे नगरेऽनङ्ग-सेनस्य धरणीपतेः । मरुदेव्यभिधा पत्नी बभूवाऽनघशीलभाग् ॥ २ ॥
राज्ञ्यन्यदा सुखं सुप्ता मरुदेवा लसत्तनुः । स्वप्नेऽपश्यत्तमां नाभि-नन्दनं पूजितं सुमैः ॥ ३ ॥
प्रातः राज्ञी नृपस्याग्रे स्वप्नवृत्तान्तमूचुषी । राजाऽऽचष्टात्मनः पुत्रः पुण्यवाँश्च भविष्यति ॥ ४ ॥
ततो राज्ञ्युदरे पुण्य-वति प्राणिनि सद्दिने । अवतीर्णेऽभवन्नेवं दोहदाः प्रतिवासरम् ॥ ५ ॥
* अर्चयामि जिनं दानं शुद्धं ददामि साधुषु । यात्रां कुर्वे सुतीर्थेषु सुश्राद्धान् भोजयाम्यहम् ॥ ६ ॥ 卐
उच्चस्थे तरणौ चन्द्रे राज्ञ्यसूत सुतं वरम् । तस्य नाम महीपालो मरुदेवेत्यदान्मुदा ॥ ७ ॥
यथा यथा कुमारोऽथ ववर्द्धे मदनोपमः । तथा तथाऽवनीपाल-राज्यं वृद्धिमुपैति च ॥ ८ ॥
चन्द्रपुरे हरक्ष्माप-नन्दिनीं कमलाभिधाम् । पित्रा परिणायितः पुत्रो मरुदेवो वरेऽहनि ॥ ९ ॥
कृत्वा जिनार्चनं भावात् प्रतिलाभ्य यतीन् मुदा । भोजयित्वा वरश्रद्धान् कुमारोऽत्ति निरन्तरम् ॥ १० ॥
* यत–' पढमं जईणं दाऊण अप्पणा पणमिऊण पारेइ । असई अ सुविहियाणं भुंजेइ अ कयदिसालोओ ॥११॥ 卐
* साहूण कप्पणिज्जं जं नवि दिन्नं कहिंचि किंपि तहिं । धीरा जहुत्तकारी सुसावगा तं न भुंजंति ॥ १२ ॥ 卐

For Private and Personal Use Only

* "वसहीसयणासणभत्तपाणभेसज्जवत्थपत्ताइं । जइ वि न पज्जत्तधणो थोवावि हु थोवयं देइ" ॥ १ ॥ 卐

राजा राज्येऽभिषिच्य स्वं नन्दनं सूरिसन्निधौ । प्रव्रज्यामग्रहीत् मुक्ति–सुखसंपत्तये क्रमात् ॥ १३ ॥

मरुदेवनृपो न्याया–दपालीज्जनतां तथा । यथाऽभूत् सुखिनी बाढं धर्म्मकर्म्मणि कर्म्मठा ॥ १४ ॥

* यतः–"राज्ञि धर्म्मिणि धर्म्मिष्ठाः पापे पापाः समे समाः । राजानमनुवर्त्तन्ते यथा राजा तथा प्रजा" ॥१५॥ 卐

मरुदेवनृपस्याऽभून् नन्दनश्चन्दनाभिधः । धर्मकर्मरतोऽकार्षीद् जिनार्चां च दिवानिशम् ॥ १६ ॥

जिनधर्मरतं भूप–सूनुं वीक्ष्य प्रजाऽपि च । जैनधर्मं वितन्वन्ति कल्याणसातहेतवे ॥ १७ ॥

मरुदेवः सुतं राज्ये विन्यस्य संयमश्रियम् । लात्वा गुर्वन्तिकेऽपाठीद् भूरि शास्त्राणि यत्नतः ॥ १८ ॥

मरुदेवं विनीतं च सर्वशास्त्राब्धिपारगम् । मत्वा सूरिपदं सूरिर्ददौ शोभनवासरे ॥ १९ ॥

क्रमात् पञ्चशती वाचं–यमानां शुद्धचेतसाम् । सेवते मरुदेवस्य सूरीशस्य पदाम्बुजम् ॥ २० ॥

क्रमेण विहरमाणो मरुदेवो यतीश्वरः । तीर्थे शत्रुञ्जये देवान् नन्तुं साधुयुतो ययौ ॥ २१ ॥

तस्मिँस्तीर्थे शुभध्यानान्मरुदेवो यतीश्वरः । प्रापाऽऽदौ केवलज्ञानं ततोऽन्येऽपि यतीश्वराः ॥ २२ ॥

प्रबोध्य भूरिशो जीवान् मरुदेवो यतीश्वरः । सिद्धशैले ययौ मुक्ति–मन्येऽपि भूरिसाधवः ॥ २३ ॥

शिवप्राप्तिः पितुः श्रुत्वा तस्मिन् सिद्धमहीधरे । चन्दनक्ष्मापतिर्भूरि–सङ्घयुक् चलितोऽध्वनि ॥ २४ ॥

For Private and Personal Use Only

गत्वा शत्रुञ्जये पूजां कृत्वा स्तुत्वाऽर्हतः पुनः । पितुर्मुक्तिगमस्थाने प्रासादं चन्दनो व्यधात् ॥ २५ ॥
पितुर्मुक्तिगमस्थानं मत्वा शत्रुञ्जये गिरौ । मरुदेवेति तीर्थस्य तस्य नाम ददौ नृपः ॥ २६ ॥
चन्दनक्ष्मापतिस्तीर्थ–पूजां कृत्वाऽतिविस्तरात् । स्वपुरेऽभ्येत्य सस्मार शश्वच्छत्रुञ्जयं गिरिम् ॥ २७ ॥
चन्दनोऽपि स्मरन् नित्यं तीर्थं शत्रुञ्जयं हृदि । स्वपुरस्थोऽपि सम्प्राप्य ज्ञानं मुक्तिपुरीं ययौ ॥ २८ ॥

॥ श्री भगीरथनामोपरि सगरचक्रिपुत्रभगीरथकथा ॥

सगरक्षोणीनाथस्य पुत्रो भगीरथाभिधः । यात्रां कृत्वा निजं नाम तीर्थस्याऽदाद् वरोत्सवम् ॥ १ ॥
अयोध्यानगरे चक्री द्वितीयः सगरोऽजनि । सूनु भगीरथो नाम्ना तस्याऽऽद्योऽजनि रूपवान् ॥ २ ॥
अन्येऽभूवन् सुताः षष्टि–सहस्रप्रमिता वराः । तस्यैव चक्रिणोऽशेष–विद्याम्भोनिधिपारगाः ॥ ३ ॥
सगरश्चक्रिराट् तीर्थ–माहात्म्यमजितान्तिके । श्रुत्वा श्रीआदिदेवस्य सद्म स्फारमकारयत् ॥ ४ ॥
मेलयित्वा बहुं सङ्घं सगरश्चक्रिराट् क्रमात् । शत्रुञ्जयादितीर्थेषु यात्रां विस्तरतो व्यधात् ॥ ५ ॥
भगीरथोऽन्यदा यात्रां कर्तुं शत्रुञ्जये गतः । सङ्घेशः सर्वकृत्यानि विधिवद्विदधेतराम् ॥ ६ ॥

For Private and Personal Use Only

कोटीकोटियतीशानां तत्र ध्यानं वितन्वताम् । बभूव केवलज्ञानं तदा विश्वावलोककम् ॥ ७ ॥
तत्र तेषां क्रमादायुः क्षयान्मुक्तिरजायत । सिद्धोत्सवः सुरैश्चक्रे गीतनृत्यपुरस्सरम् ॥ ८ ॥
यत्र स्थाने गता मुक्तिं साधवश्चायुषः क्षयात् । कोटाकोटयभिधं सद्म तत्र व्यधाद् भगीरथः ॥ ९ ॥
अजितस्वामिनं मूल-नाथं तत्र जिनालये । सगरस्याऽऽदिमः पुत्रोऽतिष्ठिपत् रुचिरोत्सवम् ॥ १० ॥
प्रासादमादिदेवस्य कारयित्वा भगीरथः । बिम्बं रत्नमयं पञ्च-कोटिस्वर्णैरतिष्ठिपत् ॥ ११ ॥
तीर्थरक्षाकृते दण्ड-रत्नेन मेदिनीं क्रमात् । खनित्वाऽब्धिप्रवाहं तु तत्रानयद् भगीरथः ॥ १२ ॥
तदा तत्र समेत्येन्द्रः प्रोवाच भो! भगीरथ ! अब्धिना वेष्टिते तीर्थे नन्तुं को जन एष्यति ? ॥ १३ ॥
भगीरथः सुरेशेन वारितो नाग्रतोम्बुधिम् । अनैषीत् सलिलं तत्रा-द्याप्यब्धौ दृश्यते जनैः ॥ १४ ॥
तेनेन्द्रदिशि पाथोधि-जलं तीर्थस्य तस्य तु । वेष्टयित्वा स्थितं स्तम्भ-तीर्थं यावन्निरन्तरम् ॥ १५ ॥
भगीरथस्ततस्तीर्थे गत्वा श्रीऋषभप्रभोः । भगीरथाभिधं सार्व-सद्म भगीरथो व्यधात् ॥ १६ ॥
ततो देवा ददुस्तत्रा-ऽऽगतास्तीर्थस्य तस्य तु । भगीरथेति नामाऽभून् नानोत्सवविधानतः ॥ १७ ॥
भगीरथोऽपि निश्शेषकर्म्म क्षिप्त्वा तपोबलात् । शत्रुञ्जये ययौ मुक्तिं तथाऽन्येऽपि महीधराः ॥ १८ ॥

————*——*

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री सहस्त्रपत्रनामोपरि सहस्त्रपत्रकुमारकथा ॥

यतः सहस्त्रपत्रस्य केवलज्ञानमुत्सवम् । कुर्वन् शक्रो ददौ नाम सहस्त्रपत्र इत्यपि ॥ १ ॥
रमापुरे महाजिष्णु-भूपतेः श्रीमती प्रिया । सहस्त्रपत्रः पुत्रोऽभूद् विनीतः कोविदोत्तमः ॥ २ ॥
सभायां मेदिनीशस्य पुरतो दूत एककः । समागत्य प्रणम्याङ्घ्री लेखमेकं समर्प्पयत् ॥ ३ ॥
उत्खिल्य मुद्रितं लेखं भूमीपतिः शनैः शनैः । वाचयामासिवानेवं स्वयं मन्त्रिसमन्वितः ॥ ४ ॥
वीरपुर्यामहं भूपो रोधनी (सु) कनीकृते । माघस्य श्वेतपञ्चम्यां शुक्रस्य वासरे वरे ॥ ५ ॥
मण्डपिष्यामि रोचिष्णु-सत् स्वयं वरमण्डपम् । शीघ्रं तत्र समागम्यं भवद्भिर्विशदाशयैः ॥ ६ ॥ युग्मम् ॥
वाचयित्वा तदा पुत्रं मनोरमपरिच्छदम् । प्रेषयामास भूपालः शोभने वासरे क्रमात् ॥ ७ ॥
तत्र दूत्या महीशानां बहूनां कीर्त्तने कृते । वृणुतेस्म महीभुग्भूः सहस्त्रपत्रमादरात् ॥ ८ ॥
तदा तत्राऽऽगता भूपाः शतद्वयमिता वराः । एकैकां कन्यकां तस्मै महाजिष्णुभुवे ददुः ॥ ९ ॥
असङ्ख्यरैतुरङ्गादि प्राप्य जिष्णुतनूभवः । आययौ स्वपुरोद्याने यावत् तादृक्प्रियायुतः ॥ १० ॥
तावत्तत्राऽऽगतो मोह-मर्दनाभिधकेवली । उपविष्टः सुवर्णाब्जे प्रददौ धर्मदेशनाम् ॥ ११ ॥ युग्मम्
* क्ष्मामृद्रङ्कयोर्मनीषिजडयोर्नीरोगरोगार्त्तयोः, श्रीमद्दुर्गतयोर्बलाबलवतोः सद्रूपनीरूपयोः । 卐

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कोटीकोटियतीशानां तत्र ध्यानं वितन्वताम् । बभूव केवलज्ञानं तदा विश्वावलोककम् ॥ ७ ॥
तत्र तेषां क्रमादायुः क्षयान्मुक्तिरजायत । सिद्धोत्सवः सुरैश्चक्रे गीतनृत्यपुरस्सरम् ॥ ८ ॥
यत्र स्थाने गता मुक्तिं साधवश्चायुषः क्षयात् । कोटाकोटचभिधं सद्म तत्र व्यधाद् भगीरथः ॥ ९ ॥
अजितस्वामिनं मूल–नाथं तत्र जिनालये । सगरस्याऽऽदिमः पुत्रोऽतिष्ठिपत् रुचिरोत्सवम् ॥ १० ॥
प्रासादमादिदेवस्य कारयित्वा भगीरथः । बिम्बं रत्नमयं पञ्च–कोटिस्वर्णैरतिष्ठिपत् ॥ ११ ॥
तीर्थरक्षाकृते दण्ड-रत्नेन मेदिनीं क्रमात् । खनित्वाऽब्धिप्रवाहं तु तत्रानयद् भगीरथः ॥ १२ ॥
तदा तत्र समेत्येन्द्रः प्रोवाच भो! भगीरथ! अब्धिना वेष्टिते तीर्थे नन्तुं को जन एष्यति? ॥ १३ ॥
भगीरथः सुरेशेन वारितो नाग्रतोम्बुधिम् । अनैषीत् सलिलं तत्रा-द्याप्यब्धौ दृश्यते जनैः ॥ १४ ॥
तेनेन्द्रादिशि पाथोधि-जलं तीर्थस्य तस्य तु । वेष्टयित्वा स्थितं स्तम्भ-तीर्थं यावन्निरन्तरम् ॥ १५ ॥
भगीरथस्ततस्तीर्थे गत्वा श्रीऋषभप्रभोः । भगीरथाभिधं सार्व-सद्म भगीरथो व्यधात् ॥ १६ ॥
ततो देवा ददुस्तत्रा-ऽऽगतास्तीर्थस्य तस्य तु । भगीरथेति नामाऽभून् नानोत्सवविधानतः ॥ १७ ॥
भगीरथोऽपि निश्शेषकर्म्म क्षिप्त्वा तपोबलात् । शत्रुञ्जये ययौ मुक्तिं तथाऽन्येऽपि महीधराः ॥ १८ ॥

****

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री सहस्रपत्रनामोपरि सहस्रपत्रकुमारकथा ॥

यतः सहस्रपत्रस्य केवलज्ञानमुत्सवम् । कुर्वन् शक्रो ददौ नाम सहस्रपत्र इत्यपि ॥ १ ॥
रमापुरे महाजिष्णु-भूपतेः श्रीमती प्रिया । सहस्रपत्रः पुत्रोऽभूद् विनीतः कोविदोत्तमः ॥ २ ॥
सभायां मेदिनीशस्य पुरतो दूत एककः । समागत्य प्रणम्याङ्घ्री लेखमेकं समर्प्पयत् ॥ ३ ॥
उत्खिल्य मुद्रितं लेखं भूमीपतिः शनैः शनैः । वाचयामासिवानेवं स्वयं मन्त्रिसमन्वितः ॥ ४ ॥
वीरपुर्यामहं भूपो रोधनी (सु) कनीकृते । माघस्य श्वेतपञ्चम्यां शुक्रस्य वासरे वरे ॥ ५ ॥
मण्डपिष्यामि रोचिष्णु-सत् स्वयं वरमण्डपम् । शीघ्रं तत्र समागम्यं भवद्भिर्विशदाशयैः ॥ ६ ॥ युमग्म् ॥
वाचयित्वा तदा पुत्रं मनोरमपरिच्छदम् । प्रेषयामास भूपालः शोभने वासरे क्रमात् ॥ ७ ॥
तत्र दूत्या महीशानां बहूनां कीर्त्तने कृते । वृणुतेस्म महीभुग्भूः सहस्रपत्रमादरात् ॥ ८ ॥
तदा तत्राऽऽगता भूपाः शतद्वयमिता वराः । एकैकां कन्यकां तस्मै महाजिष्णुभुवे ददुः ॥ ९ ॥
असङ्ख्यैरैतुरङ्गादि प्राप्य जिष्णुतनूभवः । आययौ स्वपुरोद्याने यावत् तादृक्प्रियायुतः ॥ १० ॥
तावत्तत्राऽऽगतो मोह-मर्द्दनाभिधकेवली । उपविष्टः सुवर्णाब्जे प्रददौ धर्मदेशनाम् ॥ ११ ॥ युग्मम्

* क्ष्मामृद्रङ्ककयोर्मनीषिजडयोर्नीरोगरोगार्त्तयोः, श्रीमद्दुर्गतयोर्बलाबलवतोः सद्रूपनीरूपयोः । 卐

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सौभाग्यासुभगत्वसङ्गमजुषोस्तुल्येऽपि नृत्वेऽन्तरं, यत्तत् कर्म्मनिबन्धनं तदपि नो जीवं विना युक्तिमत् ॥१२॥

* भवारण्यं भीमं तनुगृहमिदं छिद्रबहुलं, बली कालश्चौरो नियतमसिता मोहरजनी । 卐
गृहीत्वा ध्यानासिं विरतिफलकं शीलकवचं, समाधानं कृत्वा स्थिरतरदृशो जाग्रत जनाः ! ॥ १३ ॥

* तैलोदकायोऽनलवारिदुग्ध-लोहोल्लसन् सिद्धरसाः क्रमेण । सद्धर्मरङ्गो भविनां बहूनां दृष्टान्तभावं बिभराम्बभूव ॥ 卐

श्रुत्वा गुरुवचः सर्व-पत्नीयुग् जिष्णुनन्दनः । प्रबुद्धः पितरं पर्य-वसाय्य विनयान्वितः ॥ १५ ॥
ललौ दीक्षां गुरूपान्ते संसाराम्भोधितारिणीम् । राजा तदा व्यधात् पुत्र-दीक्षोत्सवमनुत्तरम् ॥ १६ ॥
प्रवर्त्तिन्याः समीपे ताः सहस्रपत्रवल्लभाः । मुक्ताः केवलिना शुद्ध-चारित्राराधनाकृते ॥ १७ ॥
पठित्वैकादशाङ्गानि सूत्रार्थाभ्यां नरेन्द्रसूः । प्राप्तसूरिपदो भव्यान् बहून् प्राबोधयत् क्रमात् ॥ १८ ॥
विहरन् सूरिराट् शत्रु-ञ्जये गत्वा सुसाधुयुग् । शुक्लध्यानेन सम्प्राप केवलज्ञानमुत्तमम् ॥ १९ ॥
सूरेः सहस्रपत्रस्य कुर्वन् ज्ञानोत्सवं हरिः । सहस्रपत्रमम्भोजं रैमयं व्यरचन्मुदा ॥ २० ॥
तदा तत्र यतीनां तु कोटेर्ज्ञानमनुत्तरम् । उत्पन्नं धवलध्यान-योगात् कर्मक्षयात् किल ॥ २१ ॥
हृष्टः शक्रस्तदा शेष-ज्ञानिनां रैमयान्यपि । चक्रे सहस्रपत्राण्यु-पवेशाय पृथक् पृथक् ॥ २२ ॥
प्रत्येकमखिलज्ञान-वतां पार्श्वे सुराधिपः । धर्मोपदेशमाकर्ण्य स्वान्तहृष्टोऽभवद् भृशम् ॥ २३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदा तत्र महाशैले सहस्रपत्रसूरिराट् । मुक्तिपुर्यां ययौ शक्र-श्चक्रे चारूत्सवं तदा ॥ २४ ॥
सहस्रपत्रगेहिन्यः समेत्य सिद्धपर्वते । संप्राप्याऽनुत्तरं ज्ञानं मुक्तिपुर्यां समागमन् ॥ २५ ॥
सहस्रपत्रसूरीशे मुक्तौ याते मरुत्पतिः । ददौ सहस्रपत्रेति नाम तीर्थस्य सूत्सवम् ॥ २६ ॥

*

॥ श्री शतावर्तनामोपरि सोमदेवमहीपतिकथा ॥

यात्रां शत्रुञ्जये कृत्वा सोमदेवो नरेश्वरः । शतावर्त्तेति नामाऽदा-च्चारूत्सवपुरस्सरम् ॥ १ ॥
कुण्डकेलिपुरे सोमदेवो न्यायेन मेदिनीम् । पालयन् कुरुते धर्म-कर्माणि सततं मुदा ॥ २ ॥
साधयन् विषयान् भूपः क्रमाद्दक्षिणदिक्तटे । अरिमर्दनभूपालं स्वाज्ञामग्राहयद् बलात् ॥ ३ ॥
सोमदेवे महीपाले पालयति क्ष्मां नयात् । प्रजा प्रमुदिता जाता सोमे सत्युडुपङ्क्तिवत् ॥ ४ ॥
यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा । तथा यथार्थनामाऽभूद् राजा प्रकृतिरञ्जनात् ॥ ५ ॥
भेदयित्वाऽन्यदा सर्वं परिवारं धनार्पणात् । मदनोऽरिनृपः कुण्ड-केलिपुर्यां समागमत् ॥ ६ ॥
सोमदेवो नृपः पुर्या निर्गत्य बहिरञ्जसा । युद्ध्यन् सहाऽरिणा जज्ञे बलं विघटितं निजम् ॥ ७ ॥

For Private and Personal Use Only

दध्यौ सोमोऽधुना कर्त्तुं युद्धं मे नाऽरिणोचितम् । यतो विघटितं सर्वं बलं दुष्कर्मयोगतः ॥ ८ ॥
विमृश्येति तदा सर्वं बलं विमुच्य वेगतः । पत्नीयुक्तो रहो रात्रौ निःससार पुराद् बहिः ॥ ९ ॥
मार्गे तस्य महीशस्य पुत्रोऽसावि सुतो वरः । तस्य नाम ददौ देव-कुमारेति पिता तदा ॥ १० ॥
चन्द्रपुर्यन्तिके चन्द्राऽऽचार्योपान्ते स भूपतिः । धर्मं श्रोतुमुपाविष्टः प्रणम्य गेहिनीयुतः ॥ ११ ॥

* पूआ जिणिंदेसु रुई वएसु, जत्तो अ सामाइअ पोसहेसु । दाणं सुपत्ते सवणं च सुत्ते सुसाहुसेवा सिवलोअमग्गो ॥ 卐
* नाणं नियमग्गहणं नवकारो नयरुई य निद्दा य । पंच नयविभूसिआणं न पयारो तस्स संसारे ॥ १३ ॥ 卐
* के रोगा कानि कष्टानि कानि पापानि भूतले । पुरतः पुण्डरीकाद्रेस्तमांसीव विवस्वतः ॥ १४ ॥ 卐
राजाऽप्राक्षीद् गतं राज्यं वलिष्यति कथं मम ? । गुरवो जगदुर्गच्छ तीर्थे शत्रुञ्जयाभिधे ॥ १५ ॥
तत्र श्रीशान्तिनाथस्य पूजां कृत्वा वरैः सुमैः । षष्ठं तपः सदा कार्यं भवता मेदिनीपते ! ॥ १६ ॥
श्रुत्वैतन्नृपतिः शत्रुञ्जये गत्वा निरन्तरम् । गुरूदितं तपः कुर्वन् ध्यायति प्रभुमन्वहम् ॥ १७ ॥
तत्र तुष्टेन गरुड-यक्षेण शान्तिसेविना । शतावर्त्तं महाचक्रं दत्त्वा तस्मै च जल्पितम् ॥ १८ ॥
लात्वा करे शतावर्त्तं चक्रं गच्छ निजे पुरे । यस्ते नाज्ञां तु मन्येत तस्य कृन्तति मस्तकम् ॥ १९ ॥
लात्वा भूपः शतावर्त्त-मायान्तं तं महीपतिम् । श्रुत्वा वैरी भियाऽभ्येत्य सन्मुखं प्राणमन्मुदा ॥ २० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जगौ वैरी गृहाण त्वमिदं राज्यं तवाधुना । अहं ते किङ्करोऽस्म्येष कार्यमादिश्यतां मम ॥ २१ ॥
सोमदेवो निजं राज्यं प्राप्य शस्त्रेणानेन तु । अनेकशो रिपून् स्वाज्ञां ग्राहयामास वेगतः ॥ २२ ॥
कृत्वा देवालयान् स्वर्ण-मयान् पञ्च शतान् वरान् । वर्यदारुमयान् सप्त-दशैव च शतानि च ॥ २३ ॥
सप्तकोटिनृसंयुक्तः सोमदेवोऽवनीपतिः । कुर्वाण उत्सवं शत्रु-ञ्जये तीर्थे समीयिवान् ॥ २४ ॥ युग्मम्
स्नात्रपूजा-ध्वजारोप-कृत्यानि–निखिलानि तु । कृत्वा सोममहीपालः तुष्टावाऽऽदिजिनेश्वरम् ॥ २५ ॥
श्रीसङ्घसन्मुखं भूय स्तीर्थस्य शिवदायिनः । शतावर्त्तेति नामाऽदात् शतावर्त्तायुधाप्तितः ॥ २६ ॥
शतावर्त्तान् गुहारूपान् निरीक्ष्य मेदिनीपतिः । शतावर्त्तेति नामाऽदात् शतावर्त्तायुधाप्तितः ॥ २७ ॥ पाठांतरं ।
सोमेदेवोऽन्यतीर्थेषु यात्रां कृत्वाऽतिविस्तरात् । स्वपुर्यामेत्य पुत्राय निजं राज्यं वितीर्णवान् ॥ २८ ॥
सहस्रैरष्टभिर्भृत्यैः पञ्चाशद्भूमिपैः समम् । सोमदेवो ललौ दीक्षां चन्द्रसूरीश्वरान्तिके ॥ २९ ॥
पठन् गुर्वन्तिके सोम-देवराजर्षिरन्वहम् । गुरुभिः स्वपदे न्यस्तः सर्वशास्त्रार्थपारगः ॥ ३० ॥
प्रबोध्य भविनो भूरीन् विहरन् सोमयतीश्वरः । शत्रुञ्जये ययौ भूरि-मुमुक्षुसहितोऽन्यदा ॥ ३१ ॥
तत्र ध्यायन् जिनं सोम-देवसूरीश्वरः क्रमात् । प्राप्तज्ञानो ययौ मुक्तिं लक्षसाधुसमन्वितः ॥ ३२ ॥

卐 卐 卐 卐

For Private and Personal Use Only

॥ श्री अष्टोत्तरशतकूटनामोपरि वीरनृपकथा ॥

वीराह्वो भूपतिर्भूरि-पापकृत् सिद्धभूभृतः । अष्टोत्तरशतकूटं नाम व्यश्राणयन्मुदा ॥ १ ॥
वीरपुर्यां नृपो वीरः कुर्वन् पापं निरन्तरम् । न मन्येत गुरुं देवं मातृपितॄनपि क्वचित् ॥ २ ॥
पापर्द्धि परनारी-स्व-हरणादिपापकृत् सदा । वारितोऽपि क्षणं नैव विरराम स भूपतिः ॥ ३ ॥
एकदाऽन्यधनं हृत्वा यावदागात् स्ववेश्मनि । भूपस्तावदमुं श्लोकं शुश्राव वनवर्त्मनि ॥ ४ ॥
* धर्मादधिगतैश्वर्यो धर्ममेव निहन्ति यः । कथं शुभायतिः स्वामि-द्रोहकस्येह तस्य तु ॥ ५ ॥ 卐
अमुं श्लोकार्थमुर्वीशो ज्ञात्वा दध्याविदं हृदि । भूरिपापकृतो मे न छुट्टनं हि भविष्यति ॥ ६ ॥
तस्यैनसश्छिदे वह्नौ प्रविशामि जलेऽथवा । ध्यायन्नेवं ययौ यावद् बहिः पुर्या नरेश्वरः ॥ ७ ॥
तदाऽकस्मात् समायाता गौ र्घ्नन्ती मनुजान् बहून् । हताऽसिना महीशेन तेन वीरेण निर्दयम् ॥ ८ ॥
तदा काचित् समेत्य स्त्री कर्त्तिकां दधती करे । जगौ रे नृप ! किं जघ्ने गौरियं भवता मुधा ॥ ९ ॥
आरब्धपापशुद्धिना हता गौरस्त्रवर्जिता । यद्यस्ति कापि ते शक्तिस्तद् युध्यस्व मया सह ॥ १० ॥
श्रुत्वैतद् वनिता-प्रोक्तं कठोरं मेदिनीपतिः । नारीं प्रति जगावुच्चै-स्तरं चोत्पाटयन्नसिम् ॥ ११ ॥
भवन्ती युवती काचित् कदलीदलकोमला । अहं तु क्षत्रियः शूरः शस्त्रशास्त्रविशारदः ॥ १२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्त्री प्राह यदि ते शक्ति-र्युध्यस्वाऽमा मया तदा । तदा भूपो न्यहँस्तां च खड्गेन निर्दयं दृढम् ॥ १३ ॥
ततः सा चाऽर्जुनी भूत्वा भाषते स्म नृभाषया । कथं गो-स्त्रीवधात् पापात् छुटिष्यसि नरेश्वर ! ॥ १४ ॥
* यतः-तावद् बलं महस्ताव-त्तावत् कीर्तिरखण्डिता । यावत् पुराकृतं पुण्यं नो म्लानिमधिगच्छति ॥ १५ ॥ 卐
* पुण्यमेव प्रमाणं स्याद्-ङ्गिनां शुभकर्मभिः । क्षीणतेजाः कियत्कालं तपत्यपि प्रभाकरः ॥ १६ ॥ 卐
* पुण्यैः सम्भाव्यते सर्वं सुखदायि सदाऽऽयतिः । तदेव हीनपुण्यस्य विषवद् दुःखदायकम् ॥ १७ ॥ 卐
एवं प्रोक्तो यदा राजा व्यरमन्न ततोद्य(घ्न)तः । तदोत्पाट्य महारण्ये मुक्तस्तया सुरस्त्रिया ॥ १८ ॥
बुभुक्षितस्तदा हिंसन् जीवान् तृषार्दितो भृशम् । राजापि सहतेऽत्यन्तं दुःखं नरकसन्निभम् ॥ १९ ॥
तदैको हरिरागच्छन् सन्मुखं भूभुजा हतः । ततश्चैको मृगो जघ्ने मृगीव पवनाशनः ॥ २० ॥
ततो राजा व्रजन्नेकं साधुं दृष्ट्वाऽतिरोषतः । जघानाऽथाऽसिना तावद् यावत् प्राणा गता द्रुतम् ॥ २१ ॥
ततो भ्रमन् गतः शत्रु-ञ्जयाद्रौ वीरभूपतिः । स शत्रुञ्जयमाहात्म्य-मश्रृणोद् यतिसन्निधौ ॥ २२ ॥
* अकर्त्तव्यं न कर्त्तव्यं प्राणैः कण्ठगतैरपि । सुकर्त्तव्यं तु कर्त्तव्यं प्राणैः कण्ठगतैरपि ॥ २३ ॥ 卐
मयूर-सर्प्प-सिंहाद्या हिंस्रा अप्यत्र पर्वते । सिद्धाः सेत्स्यन्ति सिध्यन्ति प्राणिनो जिनदर्शनात् ॥ २४ ॥
वज्रलेपायितैः पापै-र्जन्तुरत्यन्तदुःखभाग् । तावद् यावन्न सिद्धाद्रि-मधिरुह्य जिनं नमेत् ॥ २५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुत्वैतन्नृपतिः प्राह जीवो नैको मया क्वचित् । हन्तव्यश्च विधातव्यं तपः षष्ठं निरन्तरम् ॥ २६ ॥
गोरूपादिककृद् देवी नत्वा भूपं तदा जगौ । अहं ते भगिनी पूर्व-भवभूता नरेश्वर ! ॥ २७ ॥
बोधितोपि मया नैव बुद्धस्त्वं भूमिभुग् यदा । तदोत्पाट्येह सिद्धाद्रौ नीतो जानीहि साम्प्रतम् ॥ २८ ॥
भूपोऽभ्येत्य पुरे स्वीये भूरिसङ्घसमन्वितः । शत्रुञ्जये पुनर्यात्रा-कृते कुटुम्बयुग् ययौ ॥ २९ ॥
अष्टयुग्शतकूटेषु तालध्वजादिषु क्रमात् । गच्छतः संयतान् भूरीन् मुक्तिं ददर्श भूपतिः ॥ ३० ॥
तेषु कूटेषु सर्वेषु प्रत्येकं श्रीजिनालयान् । कारयित्वा नृपः सार्व-बिम्बान्यस्थापयन्मुदा ॥ ३१ ॥
अष्टोत्तरशतकूटं पर्वतोऽयं निगद्यताम् । जगादेति नृपः सर्व-लोकभूमिभुजां पुरः ॥ ३२ ॥
ततोऽभ्येत्य पुरे स्वीये राज्ये न्यस्य निजं सुतम् । दीक्षां वीरमहीपालो जग्राह गुरुसन्निधौ ॥ ३३ ॥
प्राप्तसूरिपदो भूरि-साधुयुग् वीरसूरिराट् । शत्रुञ्जये गतो ज्ञानं प्रपेदेऽनुत्तरं तदा ॥ ३४ ॥
लक्षत्रयमुमुक्षूणां तत्र सिद्धमहीधरे । उत्पन्नं केवलज्ञानं वीरसूर्युपदेशतः ॥ ३४ ॥
वीरभूमिपतिर्लक्ष-त्रयसाधुसमन्वितः । अलङ्करकार कल्याण-पुरीं सिद्धमहीधरे ॥ ३५ ॥

卐 卐 卐 卐

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री नगाधिराजोपरि निर्जरकथा ॥

एत्य स्वयम्प्रभो देवः शत्रुञ्जयमहीधरे । ददौ नगाधिराजेति नाम भूपभुसाक्षिकम् ॥ १ ॥
तथाहि-स्वर्गेऽन्यदा हरिः प्राह सभायां भुवनत्रये । शत्रुञ्जयसमं तीर्थं विद्यते नहि कुत्रचित् ॥ २ ॥
तदा स्वयम्प्रभो देवो जगावेवं हरेः पुरः । प्रभुत्वात् प्रभुणा यद्यद् जल्प्यते तद्धि मन्यते ॥ ३ ॥
इन्द्रोऽवक् सर्वतीर्थेभ्यस्तीर्थे शत्रुञ्जये गिरौ । पदे पदे शिवं जग्मु-रसङ्ख्याता मुमुक्षवः ॥ ४ ॥
तीर्थेऽन्यस्मिंस्तपोदाना-दिभिर्यद् जायते वृषम् । ततः शत्रुञ्जयेन तं फलं भवति निश्चितम् ॥ ५ ॥
सर्वशाश्वततीर्थेषु विलोकयन् स्वयम्प्रभः । ददर्शाल्पान् शिवं यातांस्तीर्थेषु कृत्रिमेष्वपि ॥ ६ ॥
ततः शत्रुञ्जये याव-दायातः स सुरो भ्रमन् । तावन्मुक्तिययुर्लक्ष-मिता वाचंयमा लघु ॥ ७ ॥
द्वितीये दिवसे कोटि-मिता वाचंयमाः किल । तृतीये दिवसे पञ्च सहस्रप्रमितान् यतीन् ॥ ८ ॥
चतुर्थेऽह्नि शतं पञ्च-साधून् षष्ठे यतीन् दश । सप्तमेऽष्टौ शतान्यष्ट-विंशतिः षड् दिनेऽष्टमे ॥ ९ ॥ 卐
एवं दिने दिने मुक्तिं यातोऽसङ्ख्ययतींस्तदा । दृष्ट्वा स्वयम्प्रभो देवो जगादेवं नृणां पुरः ॥ १० ॥
असङ्ख्यस्त्रीनृणां मुक्ति-गमनादस्य भूभृतः । नगाधिराज एषोऽस्तु पर्वतः सुकृतास्पदम् ॥ ११ ॥
ततोऽन्यैर्मनुजैर्देवै-र्भूपैर्वाचंयमैरपि । नगाधिराजनामाय-मिति घुष्टं तदाऽभितः ॥ १२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री सहस्रकमलोपरि रणवीरभूपकथा ॥

मेलयित्वा बहुं सङ्घं गत्वा शत्रुञ्जयाऽचले । रणवीरो ददौ नाम सहस्रकमलाभिधम् ॥ १ ॥
कल्याणकोटिनगरे कल्याणधरणीपतिः । कल्याणिन्यभिधा पत्नी शीलभूषणशालिनी ॥ २ ॥
रणवीराभिधः पुत्रो रणनिर्जितशात्रवः । विनीतोऽभूद् भृशं माता-पित्रोः सेवनतत्परः ॥ ३ ॥
निर्गच्छन्नन्यदा पुर्या बहिः शण्डद्वयं दृढम् । मिथो युध्यन्तमैक्ष्योर्वी-पतिर्दध्याविदं हृदि ॥ ४ ॥
इदं शण्डद्वयं पीनं जीविष्यति चिरं ननु । तेन केलिकृते स्वीय-सदने स्थाप्यते मया ॥ ५ ॥
गत्वोद्याने समागच्छन् पश्चाच्छण्डद्वयं मृतम् । दृष्ट्वा महीपतिर्दध्यौ संसारासारतामिति ॥ ६ ॥
* आयुर्वारितरङ्गभङ्गुरतरं श्रीस्तूलतुल्यस्थितिः, तारुण्यं करिकर्णचञ्चलतरं स्वप्नोपमाः सङ्गमाः । 卐
यद्वान्यद् रमणीमणीप्रभृतिकं वस्त्वस्ति तच्चास्थिरं, विज्ञायेति विधीयतामसुमता धर्मः सदा शाश्वतः ॥ ७ ॥
इत्याद्यनित्यतां ध्यायन् गत्वोद्याने महीपतिः । स्वयम्प्रभगुरूपान्ते प्रव्रज्यामग्रहील्लघु ॥ ८ ॥
तदाऽभ्येत्य पितुः पार्श्वे रणवीरो जगाविति । तात! राज्यमिदं कस्या-धारे सम्प्रति वर्त्तते ॥ ९ ॥
अहमप्यस्मि ताताऽद्य कस्याधारेऽधुना वद । त्वां विना निखिलं राज्यं विनश्यति न संशयः ॥ १० ॥
राजाऽऽचष्ट न मेऽसि त्वं नाहं तव कदाचन । एकोऽस्म्यहं निराधारो निष्पुण्यो नन्दनोत्तम! ॥ ११ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निषिद्ध इति तातेन रणवीरो नृपाङ्गजः । तत्पट्टस्थापितो मन्त्रि-सामन्तैर्लसदुत्सवम् ॥ १२ ॥

रणवीरोऽन्यदा धर्म्म-सूरिपार्श्वे गतो वने । धर्म्मोपदेशमश्रौषी-देवं कृताञ्जलिस्तदा ॥ १३ ॥

* प्रासाद-प्रतिमा-यात्रा-प्रतिष्ठादिप्रभावना । अमार्युद्घोषणादीनि महापुण्यानि गेहिनाम् ॥ १४ ॥ 卐

श्रुत्वेति देशनां सम्यग् रणवीरमहीपतिः । शत्रुञ्जये जिनागार-मकारयन् महत्तमम् ॥ १५ ॥

सहस्रस्तम्भरोचिष्णौ तस्मिन् श्रीवृषभालये । अस्थापयद् युगादीश-बिम्बं रणमहीपतिः ॥ १६ ॥

तदा सहस्रसाधूनां ज्ञाने जातेऽव्यये क्षणात् । उपवेशाय शक्रो रै-मयान्यब्जानि संव्यधात् ॥ १७ ॥

तदा ज्ञानोत्सवं तेषां कृत्वा भूपो जगाविदः । सहस्रकमलो ह्येप गिरिर्विजयतां चिरम् ॥ १८ ॥

रणवीरोऽपि पुत्रं स्वं राज्ये न्यस्य सदुत्सवम् । दीक्षां ललौ श्रुताचार्य-पार्श्वे बहु व्यधात्तपः ॥ १९ ॥

प्राप्य सूरिपदं कालाद् रणवीरो यतीश्वरः । भूरिसाधुयुतः शत्रु-ञ्जये तीर्थे समीयिवात् ॥ २० ॥

प्राप्य तत्राव्ययं ज्ञानं साधुलक्षत्रयान्वितः । आयुःक्षयाद् ययौ मुक्तिं रणवीरयतीश्वरः ॥ २१ ॥ 卐

——卐——————卐——————卐——————卐——

॥ श्री ढङ्कनामोपरि हरभूपकथा ॥

शत्रुञ्जये युगादीश-पूजां कृत्वाऽतिविस्तरात् । ढङ्केति प्रददौ नाम हरक्षोणीपतिर्मुदा ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हीराह्वे नगरे ढङ्क-भूपस्य न्यायशालिनः । ढङ्कश्रीः प्रेयसी चञ्चद्-गुणमाणिक्यभूरभूत् ॥ २ ॥
सत्स्वप्नसूचितं पुत्र-मसूत ढङ्कगेहिनी । जन्मोत्सवं पिता कृत्वा हरेत्याह्वां ददौ सुते ॥ ३ ॥
कुमारोऽन्येद्युरानन्द-सूरिक्षमणयामलं । प्रणम्य देशनां श्रोतु-मुपविष्टः कृताञ्जलिः ॥ ४ ॥
※ पूजा पच्चक्खाणं पडिकमणं पोसहो परुवयारो । पंच पयारा जस्स य न पयारो तस्स संसारे ॥ ५ ॥ 卐
शुद्धं धर्मं चरन् जीवो लभते सुखमुत्तमम् । पापं कुर्वन्नवाप्नोति श्वभ्रे दुःखपरम्पराम् ॥ ६ ॥
तत्र भूपसुतः प्राह नमस्कारशतत्रयी । गणनीया मया नम्यो जिनेन्द्रः प्रतिवासरम् ॥ ७ ॥
राज्यभारं समारोप्य सुतस्कन्धे निजांसतः । अलञ्चकार चारित्र-रमां ढङ्कमहीपतिः ॥ ८ ॥
पठित्वा भूरिशास्त्राणि गुरूणां सन्निधौ क्रमात् । बृहस्पतिसमो जातो विद्यया ढङ्कसंयतः ॥ ९ ॥
प्राप्य सूरिपदं कुर्वन् विहारं वसुधातले । बोधयामास सर्वज्ञ-धर्मं भूरिजनान् क्रमात् ॥ १० ॥
शत्रुञ्जये गतोऽन्येद्यु-र्ढङ्कसूरिः सुसाधुयुग् । ढङ्ककूटे तपस्तीव्रं चकार शिवशर्मदम् ॥ ११ ॥
ढङ्कसूरिः शुभध्यानात् केवलज्ञानमाप्तवान् । तदाऽन्ये बहवो वाचं-यमा ज्ञानजुषोऽभवन् ॥ १२ ॥
आयुःक्षयेऽखिला वाचं-यमा मुक्तिं यदाऽगमन् । तदा सिद्धोत्सवं तेषां चक्रुरेत्य सुधाभुजः ॥ १३ ॥
पितुर्मुक्तिगतिं तुङ्गे कूटे शत्रुञ्जयाचले । श्रुत्वा हरमहीपालो हृष्टोऽजनि स्वचेतसि ॥ १४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

असङ्ख्यसङ्घसंयुक्तः कुर्वन् हरः क्ष्मापतिः । शत्रुञ्जये ययौ देवान् नन्तुं पूजयितुं मुदा ॥ १५ ॥

मूलनाथस्य कृत्वाऽर्चां तुङ्गे कूटे नृपो ययौ । तत्र स्फारं जिनागारं भूपश्चाचीकरन् मुदा ॥ १६ ॥

तत्र युगादिदेवस्य बिम्बं रत्नमयं वरम् । शुभेऽह्नि स्थापयामास सङ्घयुग् मेदिनीपतिः ॥ १७ ॥

तत्राष्टकोटयो हेम्नां व्ययिता मेदिनीभुजा । ततस्तीर्थं समं पुष्पै-रपूजयन् नरेश्वरः ॥ १८ ॥

अनेकभूपमर्त्यानां साक्षिकं हरभूधरः । ढङ्केति प्रददौ नाम शत्रुञ्जयक्ष्माभृतः ॥ १९ ॥

यात्रां विस्तरतः कृत्वा हरोर्वीशो निजे पुरे । समेत्य मानसेऽस्मार्षीद् ढङ्क ढङ्केति मुक्तिदम् ॥ २० ॥

ढङ्क ढङ्क इति ध्यायन् चित्ते शत्रुञ्जयाचलम् । भूपः स्वकपुरे तिष्ठन् ज्ञानं प्रापाऽक्षयं क्षणात् ॥ २१ ॥

तदा कोटिद्वयं वाचं-यमाः प्राप्तलसच्चिदः । कल्याणनगरीनारी-भूषणा अभवन् क्रमात् ॥ २२ ॥

अन्तकृत्केवली धर्म्म-घोषसूरीश्वरः पुनः । अलश्चकार कल्याण-नगरीमायुषः क्षये ॥ २३ ॥

॥ श्री कोटिनिवासनामोपरि धर्मनन्दनभूपतिकथा ॥

धर्ममाराधयन् जैनं शुद्धं धर्म्ममहीधरः । नाम कोटिनिवासेति सिद्धाद्रेर्हर्षतो ददौ ॥ १ ॥

For Private and Personal Use Only

धरणीभूषणे नाम्ना पुरे चन्द्रमहीपतेः । पत्नी प्रेमवती पुत्रं प्रासूत शुभवासरे ॥ २ ॥
कारयित्वा महिपालः सूनोर्जन्मोत्सवं महत् । धर्म्मनन्दन इत्याह्वां ददौ सज्जनसाक्षिकम् ॥ ३ ॥
द्वितीयो नन्दनो दामो-दराह्वोऽजनि तस्य तु । द्वावेव पाठितौ धर्म-कर्मशास्त्राणि भूरिशः ॥ ४ ॥
क्रमाच्चचन्द्र कुसङ्गत्या द्यूतादिसक्तमानसः । राज्यचिन्तां विसस्मार चित्ताद्धर्ममत्र्यवत् ॥ ५ ॥
क्रमात् समागते तत्र द्विट्सैन्ये प्रबले सति । धर्मपुत्रो बलं लात्वा युद्धं कर्त्तु समुत्थितः ॥ ६ ॥
तथा युद्धं कृतं धर्म-नन्दनेनाऽरिभिः समम् । यथा दिशोदिशं भग्ना नेशुर्निश्शेषवैरिणः ॥ ७ ॥
ततस्तत्र महानन्द-सूरिराट् समुपागमत् । पुत्रयुक्तो नृपो धर्म-माकर्णयितुमीयिवान् ॥ ८ ॥
तदेति गुरुभिधर्म्म-देशना विहिताऽऽदरात् । धर्मेण लभ्यते राज्यं कल्याणकमला पुनः ॥ ९ ॥
द्युतादिव्यसनं यस्तु सेवते मानवः खलु । स एव लभते दुःख-मिहामुत्र निरन्तरम् ॥ १० ॥
* द्यूतं सर्वापदां धाम द्यूतं दीव्यन्ति दुर्धियः । द्यूतेन कुलमालिन्यं द्युताय श्लाध्यतेऽधमः ॥ ११ ॥ 卐
* वैर वैश्वानर-व्याधि-वाद-व्यसनलक्षणाः । महानर्थाय जायन्ते वकाराः पञ्च वर्द्धिताः ॥ १२ ॥ 卐
श्रुत्वेति भूपतिस्त्यक्त्वा द्यूतस्य व्यसनं तदा । राज्यं वरोत्सवं वृद्ध-सूनवे दत्तवान् मुदा ॥ १३ ॥
युवराजपदं दत्त्वा लघुपुत्राय भूपतिः । धर्मसेनगुरूपान्ते जग्राह संयमं तदा ॥ १४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शत्रुञ्जयस्य माहात्म्य-माकर्ण्य धर्मभूपतिः । बहुसङ्घयुतोऽचालीद् वन्दितुं जिननायकम् ॥ १५ ॥
गत्वा शत्रुञ्जये मूल-नायकप्रतिमां धुरि । पूजयित्वा नृपोऽन्येषां जिनानामर्चनं व्यधात् ॥ १६ ॥
विस्तरादादिदेवस्य ध्वजान्तामर्चनां तदा । कृत्वाऽऽनर्च प्रभोः पादौ प्रियालोश्च प्रदक्षिणाम् ॥ १७ ॥
शान्तिनाथस्य कृत्वाऽर्चां निशीथिन्यां महीपतिः । ध्यानं वितन्वतः प्रादुर्भूत्वा यक्षो जगावदः ॥ १८ ॥
तीर्थभक्तेस्तवेदानीं तुष्टोऽस्मि मेदिनीपते ! । दृश्या श्रीशान्तिनाथस्य समस्ति रसकूपिका ॥ १९ ॥
तां मुत्कलमुखामद्य करिष्यामि दिनोदये । त्वया ग्राह्यो रसस्तस्यास्ततो हेम भविष्यति ॥ २० ॥
यक्षदर्शितकूपात्तु रसं लात्वा यथेप्सितम् । कोटिभारमितं हेम व्यरचन् मेदिनीपतिः ॥ २१ ॥
दशभारप्रमाणानि शतबिम्बानि रुक्मिनाम् । चतुर्विंशतिसार्वाणा-मकारयन् महीपतिः ॥ २२ ॥
लक्षबिम्बानि रूप्यस्य पित्तलस्य वरस्य च । नवलक्षमितान्येव नवतिं प्रास्तराणि च ॥ २३ ॥
एवं कोटिमितान्येव बिम्बानि सिद्धपर्वते । स्थापयित्वा नृपः सङ्घं भक्तितः पर्यधापयत् ॥ २४ ॥
तदा धर्मधनाचार्यः प्राह नृप ! नृणां पुरः । अयं कोटिनिवासाह्वो गिरिर्निगद्यतां जनैः ॥ २५ ॥
धर्मभूपः क्रमाद् राज्ये न्यस्य स्वनन्दनं गजम् । दीक्षां लात्वा तपः शत्रु-ञ्जये तीर्थे बहु व्यधात् ॥ २६ ॥
क्षिप्त्वा कर्माऽखिलं धर्म-राजर्षिज्ञानमव्ययम् । प्राप्य शत्रुञ्जये मुक्तिं ययौ भूरिसुसाधुयुग् ॥ २७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री लौहित्यनामोपरि लौहित्यर्षिकथा ॥

लौहित्यादियतीन् भूरीन् दृष्ट्वा सिद्धिपुरीगतान् । लौहित्याह्वां व्यधा-दिन्द्रः श्रीमत्सिद्धमहीभृतः ॥ १ ॥
पद्मपुरे धनः श्रेष्ठी धर्मं श्रुत्वाऽन्तिके गुरोः । अदत्तं लाति नो कस्य तृणमात्रमपि क्वचित् ॥ २ ॥
स्थानाधिष्ठायकं देव-मनुज्ञाप्यैव सन्ततम् । श्रेष्ठी तिष्ठति भुङ्क्ते च करोति कायिकामपि ॥ ३ ॥
नाऽदत्तं लाति कस्यापि धन इत्युदिते सति । शक्रेणैकः सुरश्चाल-यितुं तं निर्ययौ दिवः ॥ ४ ॥
पातयित्वा बहुं लक्ष्मीं मार्गे स निर्जरोऽनिशम् । यदा चालयितुं नेश-स्तदेति प्रोक्तवान् स्फुटम् ॥ ५ ॥
यादृशो वर्णितो नाकि-पतिना तादृशः स्फुटम् । अतो रत्नद्वयं दत्त्वा सुरलोकं समीयिवान् ॥ ६ ॥
श्रेष्ठ्यन्येद्युर्बहिर्भूमौ देहचिन्ताकृते गतः । यत्र यत्रानुजानाति स्थानाधिष्ठायकं प्रति ॥ ७ ॥
तत्र तत्र जगौ स्थाना धिष्ठाता निर्जरः स्फुटम् । श्रेष्ठिन् ! माऽत्रोपविश त्वं गच्छाऽन्यत्र यथेप्सितम् ॥ ८ ॥
एवं संन्ध्याक्षणं यावद् भ्रमन् श्रेष्ठी वनान्तरे । तं यक्षं वञ्चयित्वाऽऽशु कायिकामकरोल्लघु ॥ ९ ॥
यक्षः प्राहाऽद्य तुष्टोऽस्मि याचस्व त्वं यथेप्सितम् । श्रेष्ठ्यवग् यदि मे धर्मो विद्यते किं तदा नहि ? ॥ १० ॥
अलोभिनं तदा श्रेष्ठि-राजं मत्वा मणीन् दश । कोटीमूल्यान् वितीर्यावग् यक्षो ध्येयोऽस्म्यहं सदा ॥ ११ ॥
गते यक्षे मणीन् लात्वा समेत्य श्रेष्ठिराड्गृहम् । पञ्च रत्नानि विक्रीय जनेभ्यो राजमानितः ॥ १२ ॥

॥ ६९ ॥

For Private and Personal Use Only

भूरिसङ्घयुतः श्रेष्ठी गत्वा श्रीसिद्धपर्वते । पञ्चभिर्मणिभिः पूजां चकाराऽऽदिजिनेशितुः ॥ १३ ॥
तदा तुष्टो जगौ यक्षः श्रेष्ठिन् ! मार्गय वाञ्छितम् । श्रेष्ठ्यवग् विद्यते सर्वं जिनेन्द्राङ्घ्रिप्रसादतः ॥ १४ ॥
ततो यक्षो मणीन् पञ्च विंशतिकोटिमूल्यकान् । प्रददौ श्रेष्ठिने किं किं जायते न जिनार्चनात् ? ॥ १५ ॥
विक्रीय तान् मणीन् श्रेष्ठी स्फारं जिनवरालयम् । कारयामास तत्राऽऽदि-जिनबिम्बमतिष्ठिपत् ॥ १६ ॥
धनश्रेष्ठी तदा ध्यायन् जिनेशं प्रथमं मुदा । प्राप्य ज्ञानं ययौ मुक्ति-पुर्यां क्षीणाघसन्ततिः ॥ १७ ॥
इतः पुण्यपुराधीशो लौहित्यो धरणीधरः । राज्ये न्यस्याऽङ्गजं दीक्षा-मलात् कोटिजनान्वितः ॥ १८ ॥
भणितद्वादशाङ्गीकः प्राप्तसूरिपदः क्रमात् । कोटिसाधुयुतः शत्रु-ञ्जये तीर्थे समागमत् ॥ १९ ॥
जिनागारे जिनागारे नत्वा तीर्थङ्कराधिपान् । लौहित्यर्षिः पुनर्मूल-नाथं स्तौति च नौति च ॥ २० ॥
धनेन श्रेष्ठिना नाभि-पुत्रसद्मनि कारिते । लौहित्यर्षिर्ययौ देवं नन्तुं भूयिष्ठसाधुयुग् ॥ २१ ॥
श्रीयुगादिजिनस्याग्रे ध्यानं तस्य वितन्वतः । बभूव केवलज्ञानं हेमाब्जं निर्जरैः कृतम् ॥ २२ ॥
तस्मिन् हेमाम्बुजे ज्ञान्यु-पविश्य धर्मदेशनाम् । तथा चक्रे यथा सर्वे साधवो ज्ञानिनोऽभवन् ॥ २३ ॥
लौहित्यादियतीन् सिद्धि-गतान् ज्ञात्वा हरिर्जगौ । लौहित्याह्वमिदं तीर्थं नाम्ना जयतु भूतले ॥ २४ ॥

For Private and Personal Use Only

॥ श्री तालध्वजनामोपरि धरापालभूपकथा ॥

श्रीसिद्धधरणीध्रस्य धरापालः क्षमापतिः । तालध्वजेति नामाऽदात् नानोत्सवपुरस्सरम् ॥ १ ॥
कुम्भपुर्यां धरापाल-भूपस्य न्यायशालिनः । बभूव प्रेयसी पद्मा नाम्ना श्रीः श्रीपतेरिव ॥ २ ॥
पुत्रः पुरन्दरस्तस्य पुरन्दरपराक्रमः । मातापित्रोस्तनोतिस्म हर्षं सद्विनयो नयी ॥ ३ ॥
राजाऽन्यदा गुरोः पार्श्वे धर्म्मं श्रुत्वा जिनोदितम् । पूजां श्रीजिननाथस्य तनुते–स्मोपर्वैणवम् ॥ ४ ॥
इतः स्वर्गे सुरेन्द्रोऽवग् धरापालो महीपतिः । पूजां कुर्वन् प्रभोर्नैव चाल्यते निर्जराऽसुरैः ॥ ५ ॥
अश्रद्दधत् सुधाभोजी मुकुन्दाह्वो जगावहं(दः) । अहं तं चालयिष्यामि भूपं स्वाभिग्रहात् द्रुतम् ॥ ६ ॥
उक्त्वेति स्वर्गतः कुम्भ-पुर्यामेत्य स निर्जरः । भूपस्य कुर्वतः पूजां हस्तात् पुष्पाण्यपाहरत् ॥ ७ ॥
एवं यदा यदा भूपः पुष्पाणि स्वशये ललौ । तदा तदाऽहरद्देवः पुष्पाण्यलक्ष्यरूपभाग् ॥ ८ ॥
एवं दिनत्रयीं यावद् विना पूजां नरेश्वरः । बुभुजे न यदा तावत् स सुरः प्रकटोऽवदत् ॥ ९ ॥
धन्योऽसि त्वं यतस्ताव-कीनं चेतोऽचलन् नहि । लाहि चिन्तामणिं चित्त-चिन्तितार्थप्रदं वरम् ॥ १० ॥
चिन्तामणिं समाराध्य याचं याचं च वैभवम् । व्ययति स्म नृपः सप्त-क्षेत्रेषु प्रतिवासरम् ॥ ११ ॥
राजा स्फटिकपाषाणै-रष्टोत्तरशतप्रमैः । मण्डपैः कारयामास जिनौकः स्वगृहाङ्गणे ॥ १२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रासादमण्डपच्छत्र-पर्यङ्कासनविग्रहैः । निर्दोषमूर्त्या दध्यौ च देवो नास्ति जिनात् परः ॥ १३ ॥
प्राच्यरत्नमयी मूल-नाथमूर्तिररप्रभोः । तस्मिन् जिनालयेऽस्थापि भूपेन लसदुत्सवम् ॥ १४ ॥
तत्राऽरजिननाथस्य मणीमयविभूषणैः । भूषयामास भूपालो मूर्त्तिं सद्गतिहेतवे ॥ १५ ॥
दिने दिनेऽर्हतः पूजां नव्यां नव्यां लसत्सुमैः । कुर्वाणः कारयामास भूपो नृत्यं नवं नवम् ॥ १६ ॥
चतुष्कोटिनृसंयुक्तो भूत्वा सङ्घपतिर्नृपः । ग्रामे ग्रामे महं कुर्वन् तीर्थे शत्रुञ्जये ययौ ॥ १७ ॥
तत्र मुख्यजिनावासे स्नात्रपूजाध्वजादिभिः । स्वजन्म सफलं चक्रे भूपः सङ्घयुतो मुदा ॥ १८ ॥
तस्मिन् सङ्घे जिनध्यानाद् लक्षमेकं जनास्तदा । सम्प्राप्य केवलज्ञानं मुक्तिपुर्यां ययुः क्रमात् ॥ १९ ॥
यत्र तालध्वजः सूरि–र्लक्षसाधुसमन्वितः । सर्वकर्मक्षयाद् ज्ञानं प्राप्य मुक्तिपुरीं ययौ ॥ २० ॥
तत्र शृङ्गे जिनागारं कारयित्वा महत्तमम् । स्थापयामास नाभेयं धरापालो महीधरः ॥ २१ ॥
श्रीसिद्धभूभृतस्ताल–ध्वजेति नाम भूपतिः । साक्षिकं सर्वसङ्घस्य व्यश्राणयद् वरोत्सवम् ॥ २२ ॥
धरापालः पुरे स्वीये समेत्य स्वकमङ्गजम् । न्यस्य राज्ये ललौ दीक्षां पद्माचार्यान्तिके क्रमात् ॥ २३ ॥
पठित्वाऽनेकशास्त्राणि गुरूपान्ते सुभक्तियुग् । प्राप्य सूरिपदं चक्रे विहारं स यतीश्वरः ॥ २४ ॥
प्रबोध्य भविनो भूरीन् गत्वा शत्रुञ्जयाचले । प्राप्तज्ञानोऽगमन्मुक्तिं धरापालगणाधिपः ॥ २५ ॥

For Private and Personal Use Only

॥ श्री कदम्बकनामोपरिइन्द्रश्रेष्ठिकथा ॥

स्वर्गादागत्य देवेशोऽमरमानवसाक्षिकम् । ददौ कदम्बकेत्याह्वां श्रीसिद्धधरणीभृतः ॥ १ ॥
लक्ष्मीपुरे पुरे भीम-भूपतेर्न्यायशालिनः । लक्ष्मीवती प्रिया पुत्रः पद्मोऽभूतां मनोहरौ ॥ २ ॥
तत्रैव नगरे भीम-श्रेष्ठिनः श्रेष्ठिचेतसः । रतिप्रीत्यभिधे पत्न्यौ सुष्ठुरूपे बभूवतुः ॥ ३ ॥
ते-द्वे प्रिये प्रीति-रोचिष्णू सततं मिथः । न पृथक् तिष्ठतः कस्मिन् वासरे क्षणमेककम् ॥ ४ ॥
श्रेष्ठी दध्याविदं चित्तेऽन्यदेति गृहिणीद्वयम् । कथं प्रीतियुतं त्यक्त्वा सपत्नीभावमस्ति मे ! ॥ ५ ॥
ध्यायन् छन्नं निशि श्रेष्ठय-न्यदा पत्न्योर्निरीक्षितुम् । चरित्रं तस्थिवान् यावत् तावत्ते उत्थिते शनैः ॥६ ॥
वटवृक्षं समारुह्य द्वे अपि श्रेष्ठिनः प्रिये । नभोऽध्वना क्वचिद्याते हुंकारारावतत्परे ॥ ७ ॥
श्रेष्ठी दध्याविमे पत्न्यौ मदीये व्योमवर्त्मना । यत्राऽद्य जग्मतुः स्थाने तज्ज्ञातव्यं मयाऽचिरात् ॥ ८ ॥
एवं चिन्तयतस्तस्य यामादनु प्रिये तके । समेत्योत्तीर्य तरुतः स्वस्थाने तस्थतुः शनैः ॥ ९ ॥
श्रेष्ठी दध्यौ मया पत्न्यो-रमुयोश्चरितं पुरा । ईदृशं वीक्षितं नैव कदाचित्तिष्ठता गृहे ॥ १० ॥
एवं निशि नितम्बिन्यो याः प्रयान्ति निजेच्छया । तासां सुशीलता नैव दृश्यतेऽत्र महीतले ॥ ११ ॥
* यतः- " यात्रा-जागर-दूरनीरहरणं मातुर्गृहेऽवस्थिति-र्वस्त्रार्थं रजकोपसर्पणमपि स्याच्चर्चिकामेलकः । 卐

स्थानभ्रंश-सखीविवाहगमनं नृत्यप्रवासादयो, व्यापाराः खलु शीलजीवितहराः प्रायः सतीनामपि ॥ १२ ॥
ततोऽन्येद्युर्निशि श्रेष्ठी तस्य वृक्षस्य कोटरे । पत्न्योः पूर्वं समेत्यास्थात् तयोश्चरितमीक्षितुम् ॥ १३ ॥
ते गेहिन्यौ समारूढे तस्मिन् महीरुहे द्रुतम् । व्योमाध्वना गते स्वर्ण-द्वीपे लक्ष्मीपुरान्तिके ॥ १४ ॥
सरःपालौ तरुं न्यस्य तत्पुरं वीक्षितुं तदा । जग्मतुः श्रेष्ठिनः पत्न्यौ निर्गतोऽथ स कोटरात् ॥ १५ ॥
इतः तत्पुरवास्तव्यः श्रेष्ठी श्रीदः कुलामरीम् । आरराध स्वनन्दिन्या वरार्थं पूजयन् सुमैः ॥ १६ ॥
तया सन्तुष्टया प्रोक्तं भो ! श्रेष्ठिन् पञ्चमे दिने । सरःपालौ निशामध्ये यः समेति नरो वरः ॥ १७ ॥
तस्मै त्वया प्रदातव्या तनया सुरसुन्दरी । विचारोऽत्रत्वया श्रेष्ठिन् ! विधातव्यो न चेतसि ॥ १८ ॥
※ यतः—जं जेण किंपि विहियं सुहं व दुक्खं व पुव्वजम्मम्मि । तं सो पावइ जीवो वच्चइ दीवंतरं जइवि ॥१९॥ 卐
श्रुत्वैतद्वचनं श्रेष्ठी सरःपालौ समाययौ । वराकारं वरं वीक्ष्य श्रेष्ठी च मुमुदेतराम् ॥ २० ॥
तमानीय गृहे सद्यः श्रेष्ठी प्राहेति सद्गिरा । गृहाणोद्वाहतः (मे) पुत्री-मिमां त्वं सुरसुन्दरीम् ॥ २१ ॥
ततो विवाहवस्त्रादि-भूषितो भीमनैगमः । माहरे श्रीदहस्तां तां गृहीत्वा समुपाविशत् ॥ २२ ॥
इतस्ते तत्प्रिये तत्राऽऽगते वीक्ष्य वरं वरम् । जजल्पतुर्वरो ह्येष विद्यते स्वपतेः समः ॥ २३ ॥
भ्रमद्भिर्भूतले तुल्य-रूपा नार्यो नरा अपि । वीक्ष्यन्ते तेन न भ्रान्तिः कार्याऽऽवाभ्यामिहाधुना ॥ २४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रोक्त्वैवं वरमालोक्य द्रष्टुमन्यं वरं पुनः । जग्मतुस्ते नितम्बिन्यौ पुरमध्ये कृतत्वरे ॥ २५ ॥

श्रेष्ठी दध्यौ मृगाक्षीणां विद्यते चपलं मनः । कौतुकानि यतो द्रष्टुं ययतुर्मे प्रिये पुनः ॥ २६ ॥

* यतः—पुरतोपि स्थितं वस्तु नैवान्धो द्रष्टुमीशते । अहो ! चित्रं यदीक्षन्ते रागान्धा रैमयं जगत् ॥ २७ ॥ 卐

इतः पाणिग्रहं तस्या विधाय भारपट्टके । स्वाह्वां निजपुराह्वां च लिलेख भीमनैगमः ॥ २८ ॥

देहचिन्ता-छलं कृत्वा समेत्य वटकोटरे । तस्थौ श्रेष्ठी रहो याव-त्तावत्ते समुपागते ॥ २९ ॥

वृक्षमारुह्य तत्कालं समेत्य निजसद्मनि । उत्तेरतुः तरोस्तस्माच्छ्रेष्ठिपत्न्यौ प्रमोदतः ॥ ३० ॥

श्रेष्ठी तु रहसि स्वीय-तल्पे समेत्य तत्क्षणात् । सुष्वाप यावता तावत् स्वस्थाने ते अपि स्थिते ॥ ३१ ॥

श्रेष्ठी दध्यौ मृगीनेत्रा अबलाः शास्त्रमध्यतः । यत्कथ्यन्ते तदेवात्र स्त्रियोर्वृथा विलोक्यते ॥ ३२ ॥

* यतः—"जीवतोऽपि गलन् मत्स्यान् मुनिवद् दृश्यते बकः । मृतानपि न गृद्धोऽत्ति धिगाकारदुरन्तताम् ॥३३॥ 卐

प्रातः सुप्तं विवाहोढवस्त्रयुक्तं निजं पतिम् । दृष्ट्वोचतुर्मिथश्छन्नं छन्नं भीमप्रिये इति ॥ ३४ ॥

येन लक्ष्मीपुरे कन्याऽङ्गीकृता सुरसुन्दरी । स एवायं पतिः स्वीयो विवाहाम्बरसंयुतः ॥ ३५ ॥

आवां तत्र गते ज्ञाते पत्याऽनेन बलात्मना । तेन जागरितो वां प्राग् हनिष्यति पतिः स्फुटम् ॥ ३६ ॥

विचार्येति तदा ताभ्यां निबध्य मूलिकां कटौ । शुकं कृत्वा पतिं काष्ठ-पञ्जरे स्थापितो द्रुतम् ॥ ३७ ॥

For Private and Personal Use Only

इतः श्रीदो धनी प्राह पुत्रीं प्रत्यन्यदा स्फुटम् । त्वां परिणीय जामाता जगाम किं करिष्यते ॥ ३८ ॥
पुत्री प्राह पितर्भार-पट्टे स्वकीयसद्मनः । लिखिताऽस्त्यक्षरश्रेणी जामात्रा गच्छता तव ॥ ३९ ॥
वाचयित्वाऽक्षरश्रेणीं जगाद सुरसुन्दरी । श्रीपुरेऽस्ति पतिर्भीमनामा मम पितर्वरः ॥ ४० ॥
तेन विश्राणयाऽऽदेशं मह्यं तत्र प्रयाम्यहम् । पिताऽऽचष्ट न ते पुत्रि ! गमनं युज्यते तव ॥ ४१ ॥
आदौ तत्र तव भ्राता-गत्वोपलक्ष्यते पतिम् । आयात्यत्र ततो गच्छेस्त्वमपि स्वेशसन्निधौ ॥ ४२ ॥
एकाकिन्या स्त्रियः स्वेच्छं गच्छन्त्या दूरनीवृति । शोभा भवति नो याति, प्रतिष्ठा स्वयमेव च ॥ ४३ ॥
विचार्येति तदा श्रीदः स्वं पुत्रं चन्द्रनामकम् । प्रेषयामास जामातुः शुद्धिं ज्ञातुं कृतत्वरः ॥ ४४ ॥
चन्द्रोऽब्धिवर्त्मना गत्वा श्रीपुरे भीमसद्मनि । मिलितो भीमगेहिन्योः सन्नमस्कृतिपूर्वकम् ॥ ४५ ॥
चन्द्रोऽप्राक्षीत् क्व ते कान्तो जगामाऽत्र निवेद्यताम् । ताभ्यामुक्तं तवेदानीं किं कार्यं विद्यते वद ॥ ४६ ॥
चन्द्रस्ततो जगौ स्वीया-गमनोदन्तमादितः । सपत्नीभ्रातरं ज्ञात्वा ताभ्यामुक्तं छलात् तदा ॥ ४७ ॥
भूरि-लक्ष्मीं समादाय व्यवसायायाऽन्यनीवृति । भवतो भगिनीकान्तश्चलितोऽस्ति परेऽहनि ॥ ४८ ॥
ततस्ताभ्यां विशिष्टान्न-पानदानविधानतः । चन्द्रो भ्राताऽऽदरेणैव भोजितो मुदितोऽभवत् ॥ ४९ ॥
ताभ्यामूचे भवद्यामि-पतिर्दूरे गतोऽस्ति हि । तेन मासा लगिष्यन्ति बहवस्तत्र तस्य हि ॥ ५० ॥

भवतो भगिनीकान्तो यदैष्यत्यत्र पत्तने । तदा तत्र समेत्यैव (त्वेव) नेतुं तु सुरसुन्दरीम् ॥ ५१ ॥
चन्द्रो दध्याविदं काष्ठ-पञ्जरं शुकभासुरम् । नीयते चेत् पुरे स्वीये भगिन्याः स्यात्तदा च मुद् ॥ ५२ ॥
ततश्चन्द्रो रहः काष्ठपञ्जरं शुकभासुरम् । नीत्वा निजपुरे स्वीये भगिन्यै दत्तवान् द्रुतम् ॥ ५३ ॥
रमयन्ती शुकेनाऽमा स्वमनः सुरसुन्दरी । समयं गमयामास वहु पितुर्गृहे स्थिता ॥ ५४ ॥
एकदा मूलिकां कीर-पक्षमध्यस्थितां वराम् । दृष्ट्वा सुरसुन्दर्याऽऽशु छोटयामास यावता ॥ ५५ ॥
तावदाविरभूत् कान्तस्त्यक्त्वा शुकत्वमञ्जसा । तदा श्रीदसुता दृष्टा मातृपितृयुताऽभवत् ॥ ५६ ॥
तया समं सदा भोगान् भुञ्जानो भीमनैगमः । श्वसुरस्य गृहे कालं गमयामास भूरिशः ॥ ५७ ॥
अन्यदा रहसि प्राह श्रीदपुत्री पतिं प्रति । श्वसुरस्य गृहे शोभा न स्यात् पुंसः स्थितस्य हि ॥ ५८ ॥
* यतः–"उत्तमा स्वगुणैः ख्याता मध्यमास्तु पितुर्गुणैः । अधमा मातुलैः ख्याताः श्वसुरैश्चाधमाधमाः ॥५९॥" 卐
भीमोऽवग् भो ! प्रिये पत्न्यौ द्वे स्तो मम गृहे पुरा । कौटिल्यकुशले तेन गन्तुं तत्र स्पृहा न मे ॥ ६० ॥
सुरसुन्दर्यवक् कान्त ! पुरुषैर्नैव कर्हिचित् । कातर्यं क्रियते तस्मात् त्वमत्र साहसं कुरु ॥ ६१ ॥
* "अपमानं पुरस्कृत्य मानं कृत्वाऽद्य पृष्ठतः । कार्यमुद्धरते प्राज्ञः कार्यभ्रंशो हि मूर्खता ॥ ६२ ॥ 卐
* दोषेणैकेन न त्याज्यः सेवकः सद्गुणोधिपैः । धूमदोषभयाद्वह्निर्नहि केनाप्यपास्यते ॥ ६३ ॥ 卐

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* अत्याचारमनाचार-मतिनिन्द्रामतिस्तुतिम् । अतिशौचमशौचं च षडेते जडबुद्धयः ॥ ६४ ॥ 卐
* तेजस्विनां मनस्तुङ्गं नभस्वदन्तदशास्वपि । गच्छतस्तरणेरस्तं स्फुटमूर्ध्वमरीचयः ॥ ६५ ॥ 卐

जल्पितं सुरसुन्दर्याः श्रुत्वा भीमो जगावदः । भो पत्नि ! यत्त्वया प्रोक्तं तद्वयं रोचते मम ॥ ६६ ॥
यदि ताभ्यां गृहिणीभ्यामहं पशुः करिष्यते । तदा किं क्रियते तत्र मया त्वया च तत्र हि ॥ ६७ ॥
सुरसुन्दर्यवक् कान्त ! मां लात्वा स्वगृहे व्रज । सर्वं ते सुकरं तत्र करिष्येऽहं सुखग्रहम् ॥ ६८ ॥

* यतः–' महिषविषाणे मशकः शशकः शैले पिपीलिका पङ्के । 卐
सच्चरित्रे गुणिनि जने पिशुनः कुपितोऽपि किं कुरुते ? ' ॥ ६९ ॥

आकर्ण्येति प्रियावाक्यमायतौ हितकारकम् । भीमो दध्यौ गुणैः श्लाघ्या ममेयं गेहिनी किल ॥ ७० ॥

* यतः–" ऋतुर्वसन्तः प्रियवादिनी प्रिया, प्रभुर्गुणज्ञो गुणगौरवक्रिया । 卐
सुतो विनीतः समये घनाघनः, करोति नो कस्य मुदास्पदं मनः ? ॥ ७१ ॥ "

गृहिणीप्रेरितो भीमः सप्रियः स्वपुरं प्रति । चलन् ततो निजे ग्रामे समागात् मुदिताशयः ॥ ७२ ॥
द्वाभ्यां सहचरीभ्यां स सप्रिय आगतस्तदा । निरीक्ष्य स्वागतं चक्रे तस्यास्तस्य च सादरम् ॥ ७३ ॥
आलोचि पूर्वपत्नीभ्यां स्थिता रहसि तत्क्षणम् । आवाभ्यां विहितः कीर एष पूर्वं पतिः स्वयम् ॥ ७४ ॥

न तदा निहतो मह्यां, (भूद्यः) कृतः पञ्जरगः शुकः । आवयोः कीरकरणं ज्ञातं भाव्यमुना ननु ॥७५॥
आगतः प्रेयसीयुक्तोऽधुनाऽत्र रमणः खलु । मण्डयित्वा छलं छन्नमावामेव भविष्यति ॥ ७६ ॥
तेनाऽऽवाभ्यां विधातव्य उपाय एव साम्प्रतम् । स्वीयजीवितरक्षायै अभीष्टा असवो यतः ॥ ७७ ॥
* यतः–“सव्वे जीवावि इच्छंति जीविउं न मरिज्जिउं । तम्हा पाणिवहं घोरं निग्गंथा वज्जयंति णं ॥७८॥” 卐
विचार्येति तदा ताभ्या-मुक्तं विनयपूर्वकम् । भो पते ! त्वं कुरु स्नानं कृतमुष्णं जलं वरम् ॥ ७९ ॥
भीमः स्नानं यदा कर्त्तुमुपविष्टः सुविष्टरे । तदा ताभ्यां पयःपूर्णी कुल्या नीता गृहान्तरे ॥ ८० ॥
स्नानं वितन्वतस्तस्य भीमस्य तन्निकेतनम् । प्रपूर्णं पयसा शीर्षं यावत् सर्वत्र तत्क्षणात् ॥ ८१ ॥
जले भीमो ब्रूडन्नाह श्राक् सुरसुन्दरीं प्रति । मग्नोऽहं साम्प्रतं पत्नि ! पूर्वोक्तं त्वं कुरु द्रुतम् ॥ ८२ ॥
सुरसुन्दर्यवक् कान्त ! मा त्वं भीतिं कुरु प्रभो ! । अहमत्र स्थिता त्रातुं त्वां नीराच्च प्रदत्तदृग् ॥ ८३ ॥
मज्जन्तं मानवं वार-त्रयं स्वोद्ध्वं पयः स्वयम् । उच्छालयति निष्पाप-कृते ख्यातिः समस्ति हि ॥ ८४ ॥
उच्छलितेऽम्भसा वार-त्रयं पत्यौ तदोर्ध्वतः । फुम्फया सुरसुन्दर्या गमितं निखिलं पयः ॥ ८५ ॥
द्वाभ्यां हुंकाररावाभ्यां द्वे सपत्न्यौ दुराशये । शकुन्यौ विहिते मन्त्रात् श्रीदनन्दनया तदा ॥ ८६ ॥
ततः पाणिगृहीतीनां तिसृणां दुष्टचेष्टितम् । मत्वा भीम इदं दध्यौ किमत्र स्थीयते मया ? ॥ ८७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं ध्यात्वा क्षणं त्यक्त्वा गेहिनीत्रितयं तदा । प्रययौ बहिरुद्याने सुव्रताचार्यसन्निधौ ॥ ८८ ॥

श्रीगुरुभिस्तदा ज्ञान-शालिभिः करुणात्मभिः । उपदेशो ददे तस्मै कैवल्यसौख्यदायकः ॥ ८९ ॥

* तथाहि-अशुभं वा शुभं वापि स्वस्वकर्मफलोदयम् । भुञ्जानानां हि जीवानां कर्त्ता हर्त्ता न कश्चन ॥९०॥ 卐

* मृतप्रायं यदा वित्तं मृतप्रायं यदा वपुः । मृतप्रायं यदाक्षाणा मूर्द्धपक्वं तदा सुखम् ॥ ९१ ॥ 卐

* कायेन मनसा वाचा यत् कर्म कुरुते यदा । सावधानस्तदा तत्र धर्मान्वेषी भवी भवेत् ॥ ९२ ॥ 卐

* इष्टानिष्टेषु भावेषु सदाऽव्यग्रमना मुनिः । सम्यग्निश्चयतत्त्वज्ञः स्थिरीकुर्वीत सात्त्विकः ॥ ९३ ॥ 卐

इत्यादिदेशनां श्रुत्वा भीमः श्रीगुरुसन्निधौ । जग्राह संयमं सद्यः संसारार्णवतारकम् ॥ ९४ ॥

गुरूक्तं विधिवद् यत्नं सर्वजीवेषु सर्वदा । कुर्वन् भीमयतिस्तीव्रं तपस्तपति भावतः ॥ ९५ ॥

पालयित्वा चिरं वृत्तं क्षिपन् दुष्कृतसन्ततिम् । भीमवाचंयमो मृत्वाऽऽदिमे स्वर्गेऽभवद्धरिः ॥ ९६ ॥

सवासवोऽन्यदा शत्रु-ञ्जये श्रीप्रथमं जिनम् । प्रणम्य ज्ञानिनः पार्श्वे सुश्राव धर्मदेशनाम् ॥ ९७ ॥

तदा कदम्बकाचार्या लक्षसंयतसंयुताः । शत्रुञ्जये समायाता नन्तुं श्री जिननायकान् ॥ ९८ ॥

पार्श्वे केवलिनस्तस्य सिद्धाद्रिमहिमां किल । सूरिः कदम्बकः श्रोतु-मुपविष्टो मुमुक्षुयुग् ॥ ९९ ॥

तेषां कदम्बमुख्यानां साधूनां श्रृण्वतां वृषम् । शुक्लध्यानादभूज्जातं केवलं सर्वलोकगम् ॥ १०० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेषां ज्ञानशिवप्राप्त्यु-त्सवं स निर्जराधिपः । कृत्वा कदम्बकेत्याह्वां सिद्धाद्रेर्दत्तवान् मुदा ॥ १०१ ॥

卐 卐 卐 卐

उक्तं च "शत्रुञ्जयस्य नामानि—

॥ शत्रुञ्जयः पुण्डरीकः सिद्धिक्षेत्रं महाबलः । सुरशैलो विमलाद्रिः पुण्यराशिः श्रियः पदम् ॥ १ ॥

॥ पर्वतेन्द्रः सुभद्रश्च दृढशक्तिरकर्मकः । मुक्तिगेहं महातीर्थं शाश्वतः सर्वकामदः ॥ २ ॥

॥ पुष्पदन्तो महापद्मः पृथ्वीपीठं प्रभोः पदम् । पातालमूलः कैलाशः क्षितिमण्डलमण्डनम् ॥ ३ ॥

॥ शतमष्टोत्तरं नाम्नामित्याद्युक्तममुष्य हि । महाकल्पे विजानीयात् सुधर्मोक्तेऽतिशर्मदे ॥४॥ चतुर्भिः कलापकम् ॥

॥ नामान्यमूनि य प्रातः पठत्याकर्णयत्यपि । भवन्ति सम्पदस्तस्य व्रजन्ति विपदः क्षयम् ॥ ५ ॥

रयणायरविवरोसहि रसकूवजुआ सदेवया जत्थ ।
ढंकाइ-पंचकूडा सो विमलगिरी जयउ तित्थं ॥ ५ ॥

For Private and Personal Use Only

व्याख्या–रत्नानां "आकरः" खानिः वर्त्तते "विवराणि" गुहारूपाणि यक्षौषधाद्यधिष्ठितानि, औषधयो विविधाः याभिरनेके रोगा यान्ति, वशीकरणादिर्भवति "रसकूपिका" स्वर्णरसकूपिका एकगुदी-आनकमात्रो रसः तन्मध्ये चतुःषष्टिगुदीआनका लोहं ताम्रं वा क्षिप्यते, अग्निसंयोगात् सुवर्णं भवति, ढङ्कादयः पञ्चकूटा यत्र सन्ति, स "विमलगिरिः" शत्रुञ्जयपर्वतः "जयउ" जयतात् "तित्थं" तीर्थम् ॥ आदौ रत्नाकरस्य सम्बन्ध उच्यते—

卐

॥ श्री रत्नाकरविषये सोमभीमकथा ॥

श्रीपुरेऽभवतां सोम-भीमाह्वौ सोदरद्वयम् । तयोः पत्न्यौ रमारामे बभूवतुर्मनोरमे ॥ १ ॥
पृथग् जातावपि द्वौ तु सोदरौ विहृतिं सदा । एकत्र कुरुतः स्मैव स्नेहलौ तु परस्परम् ॥ २ ॥
गुरूपान्तेऽन्यदा सोम-भीमौ वन्दितुमीयतुः । तदेति देशनां श्रीमद्गुरवो ददुरादरात् ॥ ३ ॥
* हस्तो दानविधौ मनो जिनमते वाचः सदा सूनृते, प्राणाः सर्वजनोपकारकरणे वित्तानि चैत्योत्सवे । 卐

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

येनैवं विनियोजितानि शतशो विश्वत्रयीमण्डनं, धन्यः कोपि स विष्टपैकतिलकं काले कलौ श्रावकः ॥ ४ ॥

* दौर्भाग्यं प्रेष्यतां दास्य-मङ्गच्छेदं दरिद्रताम् । अदत्तात्तफलं ज्ञात्वा स्थूलस्तेयं विवर्जयेत् ॥ ५ ॥ 卐

देशनान्ते ललौ सोमोऽभिग्रहं चातिसादरम् । अतः परमदत्तं नो मया ग्राह्यं मनागपि ॥ ६ ॥

भीमो जग्राह नादत्ता-भिग्रहं गुरुणोदितः । यतः सर्वे न जायन्ते सदृशाः मनुजाः क्वचित् ॥ ७ ॥

* एकोदरसमुत्पन्ना एकनक्षत्रजातकाः । न भवन्ति समाः शीलैः (समशीला) यथा बदरीकण्टकाः ॥ ८ ॥ 卐

द्रव्यार्जनार्थमन्येद्युर्द्वावेव सोदरौ मुदा । गच्छन्तौ विषयेऽन्यत्र गतौ वीरपुरान्तिके ॥ ९ ॥

ततः सोमो व्रजन्नग्रे मणीखचितकुण्डलम् । कोटिमूल्यं निरीक्ष्याला-न्न निर्लोभतया तदा ॥ १० ॥

भीमश्छन्नं गृहीत्वा तत् सोदरस्यामिलत् पथि । सोमोऽवक् किं त्वया दृष्टं भीमः प्राह मया नहि ॥ ११ ॥

ततस्तावपि पश्चायां पुर्यगातां सहोदरौ । कुर्वाणौ व्यवसायं तौ लक्ष्मीमर्जयतः क्रमात् ॥ १२ ॥

विक्रीय कुण्डलं छन्नं भीमो भूरिक्रियाणकम् । यदाऽगृह्णात्तदा पृष्टं सोमेनेति कृतादरम् ॥ १३ ॥

भूरिक्रियाणकं ताव-कीनोपान्ते किमीक्ष्यते ? । भीमोऽभाणीन्न प्रष्टव्यं त्वया भ्रातरिहाधुना ॥ १४ ॥

पृष्टः बह्वाग्रहाद् भ्राता भीमः कुण्डलसङ्ग्रहम् । यदाऽगदत्तदा सोमः प्राहेति सोदरं प्रति ॥ १५ ॥

कुण्डलेन क्रयाणं यद् गृहीतं भवताऽधुना । तदस्तु तव नो लामि विभागं तस्य सोदरः ॥ १६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यवसायमतः कुर्म आवां पृथक् सहोदरौ । परकीयं धनं प्राणा-त्ययेपि लामि न क्वचित् ॥ १७ ॥
ततः पृथक् पृथक् स्वीयं क्रयाणं द्वौ सहोदरौ । लात्वाऽऽगत्य पुरे स्व-स्वसदने निन्यतुश्च तत् ॥ १८ ॥
तस्यामेव निशीथिन्यां भीमस्यैव निकेतने । प्रविश्य धाटिकाऽहार्षीत् सर्वं विभवसञ्चयम् ॥ १९ ॥
गतं सर्वं धनं दृष्ट्वा कुट्टयन्नुदरं दृढम् । भीमोऽभणन्ममाऽऽवासो धाट्याऽद्य मुषितो निशि ॥ २० ॥
सोमोऽभ्येत्य जगौ भ्राता ! रुदनेन तवाऽस्ति किम् । अदत्तं द्रविणं लातं त्वया तन्न वरं कृतम् ॥ २१ ॥
* अदत्तो विभवो लातोऽग्रेतनविभवं समम् । नाशयत्येव भूपाग्नि-तस्करादिकपार्श्वतः ॥ २२ ॥ 卐
* अन्यायोपार्जितं द्रव्यं दश वर्षाणि तिष्ठति । प्राप्ते षोडशमे वर्षे समूलं च विनश्यति ॥ २३ ॥ 卐
* वरं वह्निशिखा पीता सर्पस्य डङ्कितं वरम् । वरं हलाहलं पीतं परस्वहरणं न तु ॥ २४ ॥ 卐
* चौरश्चौरापको मन्त्री भेदज्ञः काणकक्रयी । अन्नदः स्थानदश्चैते चौरः सप्तविधः स्मृतः ॥ २५ ॥" 卐
* हरिऊणं परदव्वं पूअं जो करइ जिणवरिंदाणं । दहिऊण चंदणतरुं कुणइ अंगारवाणिज्जं ॥ २६ ॥" 卐
अतः परं त्वयाऽन्यस्याऽदत्तं द्रव्यं मनागपि । न ग्रहीतव्यं ततस्ते स्या-दिहामुत्र सुखं खलु ॥ २७ ॥
सन्तोषं कुर्वतां पुंसां सुखं चात्र परत्र च । जायते सततं दुःख-मसन्तोषान्न संशयः ॥ २८ ॥

For Private and Personal Use Only

सर्पाः पिबन्ति पवनं न च दुर्बलास्ते, शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।
कन्दैः फलैर्मुनिवरा गमयन्ति कालं, सन्तोष एव पुरुषस्य परं निधानम् ॥ २९ ॥
ततो भीमो जगादेति परद्रव्यं मया मनाग् । अदत्तं न ग्रहीतव्यं सदा सद्गतिहेतवे ॥ ३० ॥
एकदा सोदरौ द्वौ तु गतौ श्रीगुरुसन्निधौ । अश्रोष्टामिति माहात्म्यं शत्रुञ्जयावनीभृतः ॥ ३१ ॥
'रयणायरे'त्यादि ।
भीमोऽभणद् गतः सिद्ध-शैलेऽपश्यत् पदे पदे । अपश्यन्न मणीस्तेन त्वयेत्थमुच्यतां किमु ? ॥ ३२ ॥
गुरुराह मणीखानिर्देवताधिष्ठिताऽस्ति हि । अतो भाग्यं विना नैव कोपि पश्यति मानवः ॥ ३३ ॥
ततो भीमः समेत्याद्रौ तस्मिन्नभ्यर्च्य तीर्थपम् । जगौ यदा मणीखानिं द्रक्ष्याम्यन्नं तदा ह्यहम् ॥ ३४ ॥
गतेषु दशघस्रेषु सुरोऽभ्येत्येवमूचिवान् । उत्तिष्ठ भीम ! ते रत्न-खनिः प्रादुर्भविष्यति ॥ ३५ ॥
यावदुत्थाय भीमोऽग्रे वीक्ष्यते तावदेव तु । रत्नखानिरभूद् दृष्टि-गोचरेऽथ सुरो जगौ ॥ ३६ ॥
तुष्टोऽस्म्यहं मणीन् पञ्च गृहाणाऽनुगृहाण माम् । साहसी त्वमसीदानीं चालितोऽप्यचलन्नहि ॥ ३७ ॥
ततः पञ्च मणीन् प्राप्य तस्या रत्नखनेर्वणिग् । प्रासादं रत्नखन्याह्व-मकारयदथार्हतः ॥ ३८ ॥
सोमभीमौ क्रमाज्ज्ञात्वा चारित्रं गुरुसन्निधौ । गतौ शत्रुञ्जये कर्म-क्षयान्मुक्तिं समीयतुः ॥ ३९ ॥

For Private and Personal Use Only

॥ श्री विवरविषये भीमभूपकथा ॥

विवराणि गुहारूपाणि सन्ति बहूनि, येषु विवरेषु साधवस्तपस्तपन्तो मुक्तिं गच्छन्ति जग्मुर्यास्यन्ति, यक्षादिदेवा रक्षां कुर्वते, चन्द्राह्वविवरस्य स्वरूपं प्रोच्यते—

वाराणस्यां प्रजापाल-भूपस्य प्रेयसी रमा । अजनिष्टाऽनघाङ्गश्री-जितप्रीतिसुराङ्गना ॥ १ ॥

अनपत्या सुतप्राप्त्यै ज्योतिष्कादिककोविदान् । पृच्छन्ती ददते तेभ्यो धनधान्यादि भूरिशः ॥ २ ॥

* यतः—रोगिणां सुहृदो वैद्याः प्रभूणां चाटुकारिणः । मुनयो दुःखदग्धानां गणकाः क्षीणसम्पदः ॥ ३ ॥ 卐

तथापि न सुतो जातस्तस्या दुष्कर्मयोगतः । ततः सन्तोषमाधाय तस्थौ सा नृपगेहिनी ॥ ४ ॥

* यतः—'सर्पाः पिबन्ति पवनं न च दुर्बलास्ते, शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति । 卐

कन्दैः फलैर्मुनिवरा गमयन्ति कालं, सन्तोष एव पुरुषस्य परं निधानम् ॥ ५ ॥

* निरीहस्य निधानानि प्रकाशयति काश्यपी । अङ्गोपाङ्गानि डिम्भानां न गोपयति कामिनी ॥ ६ ॥ 卐

शुभकर्मोदयेऽन्येद्यु-रागत्यैकः सुरो जगौ । एकस्मिन् हायने याते तव पुत्रो भविष्यति ॥ ७ ॥

ततो राज्ञाऽन्यदा पृष्ट एको ज्योतिषिकस्त्ववित । कस्मिन् क्षणे सुतो जातो भविष्यति लसत्तमः ॥ ८ ॥

ज्योतिष्किको जगावुच्च-ग्रहेषु यो भवेत् सुतः । स एव जायते चक्री वासुदेवोऽथवा बलः ॥ ९ ॥

For Private and Personal Use Only

* यतः—"अजवृषमृगाङ्गनाकर्कमीनवणिजांशकेष्विनाद्युच्चाः । दशशिख्यष्टाविंशति तिथीन्द्रियत्रिघनविंशेषु ॥१०॥卐
* सुखी भोगी धनी नेता जायते मण्डलाधिपः । नृपतिश्चक्रवर्त्ती च क्रमादुच्चगृहे फलम् ॥ ११ ॥ 卐
यस्मिन् क्षणे ग्रहा उच्चा द्वित्रा भवन्ति वासरे । तस्मिन्नौषधयोगेन राज्यसूत सुतं वरम् ॥ १२ ॥
जनिते तनये तस्मिन् राज्ञीमृत्युमुपाययौ । चिन्तितं नहि कस्यापि जायते दुष्कृतोदयात् ॥ १३ ॥
* अघटित घटितानि घटयति सुघटित घटितानि जर्जरीकुरुते । विधिरेव तानि घटयति यानि पुमान् नैव चिन्तयति ॥卐
स्तन्यपानादिदानेन धात्र्या संवर्धितोऽनिशम् । भीमनामा सुतोऽभीष्टोऽभवत् तातस्य सन्ततम् ॥ १५ ॥
ततोऽन्या भूमिभृत्पत्नी सूते स्म नन्दनं वरम् । तस्याऽदाज्जनको नाम हरेत्याह्वां नरेश्वरः ॥ १६ ॥
राज्ञी स्वसुनवे राज्यं दातुकामा सपत्निजम् । निहन्तुं ददते धान्य-मध्ये क्ष्वेडं निरन्तरम् ॥ १७ ॥
दृढायुष्कतया तस्य लग्नं न गरलं मनाग् । विमातृचेष्टितं सर्वं भीमो जज्ञे नृपाङ्गजः ॥ १८ ॥
भीमो दध्यौ न राज्येच्छा विद्यते मम चेतसि । विमातेयं मुधा हन्तुं मां वाञ्छति सदा दृढम् ॥ १९ ॥
निर्गत्य नगराद् भीमो ययौ शत्रुञ्जयाचले । ददर्श तत्र भूरीणि विवराणि वराणि सः ॥ २० ॥
तेषु किन्नर-किन्नर्यो गीतानि वृषभप्रभोः । गायन्ती रञ्जयन्त्येव सुरान् यक्षान् नरानपि ॥ २१ ॥
निर्झरेषु पिबन्त्यम्बु व्याघ्र-पञ्चास्य-फेरवः । अदन्तः स्वेहितं भिक्षं तत्र तिष्ठन्ति सौख्यतः ॥ २२ ॥

तपन्तः सन्ततं तीव्रं तपोध्यानपरायणाः । गमयन्ति सुखात् काल-मर्जयन्ति शिवश्रियम् ॥ २३ ॥
औषधीभिः सदोद्योतो आभले तत्र सन्ततम् । केलिं कुर्वन्ति यक्षाद्या निर्जरा भूरिशो मुदा ॥ २४ ॥
विलोक्य कौतुकान्येवं भीमः पदे पदे मुदा । पूजयित्वा प्रभुं झम्पां शैलाद्दातुं यदोद्यतः ॥ २५ ॥
तदा तत्र स्थितो ज्ञानी जगादेति नरोत्तम ! । आत्मनो घाततो जीवा न छुटन्ति स्वकर्मतः ॥ २६ ॥
तेन त्वं कुरु तीव्रं तु तपः ते स्याद्यतः सुखम् । चन्द्राह्वविवरे गत्वा कुरुष्व च तपोऽनिशम् ॥ २७ ॥
तत्र गत्वा तपस्तस्य भीमस्य कुर्वतः सतः । श्रीपुरस्याऽभवद्राज्यं चतुरङ्गचमूयुतम् ॥ २८ ॥
राज्यं कृत्वा चिरं शत्रुञ्जये गत्वा व्रतं स च । लात्वा तपो व्यधातीव्रं चन्द्राह्वविवरस्थितः ॥ २९ ॥
तत्र भीमऋषेस्तीव्रं तपो वितन्वतः सतः । बभूव केवलज्ञानं जगत्त्रयावलोककम् ॥ ३० ॥
तत्रैत्य निर्जरा ज्ञान्युत्सवं चक्रुस्तथाऽऽदरात् । यथा तं पश्यतां नृणां ज्ञानमासीन्निरत्ययम् ॥ ३१ ॥
* तत्र भीमोऽगमन्मुक्तिमन्येऽपि बहवः पुनः । साधवश्च ययुः केचित् प्रथमादिसुरालये ॥ ३२ ॥

卐 卐 卐 卐

॥ श्री औषधविषये पद्मसेननृपकथा ॥

'ओसह 'त्ति-व्याख्या-औषधयो रोगाद्यपहाः सन्ति, तथाहि—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षितिभूषापुरे वीर-भूपतेर्न्यायशालिनः । पत्नी पद्मावती पुत्रः पद्मसेनाभिधोऽभवत् ॥ १ ॥

वर्धमानः क्रमात् पित्रा पुत्रः पण्डितसन्निधौ । पाठितोऽभूद्यथाधर्म-कर्मशास्त्रेषु कोविदः ॥ २ ॥

※ यतः–" जायम्मि जीवलोए दो चेव नरेण सिक्खियव्वाइं । कम्मेण जेण जीवइ जेण मुओ सुग्गइं जाइ ॥३॥ " 卐

भूपतीनां सुताः पञ्च शतानि परिणायितः । पुत्रः पित्रा सुखी जातो दोगुन्दुक कुमारवत् ॥ ४ ॥

सन्ततं गीतनृत्यादि कारयन् नृपनन्दनः । अस्तोद्गतो न जानाति मार्तण्डस्य मनागपि ॥ ५ ॥

एवं सुखातिलीनस्य कुमारस्य निरन्तरम् । राजयक्ष्माभिधो रोगो जातस्तीव्रार्त्तिकारकः ॥ ६ ॥

ततश्चिकित्सका राज्ञाऽऽकारिताः सुतरुक्छिदे । औषधानि ददुस्तस्य यानि तानि मुधाऽभवन् ॥ ७ ॥

राज्ञाऽऽकार्योदिता विज्ञा गणकाः पुत्ररुक्छिदे । जगुस्तव सुतस्यैति क्षयं रोगोऽष्टभिर्दिनैः ॥ ८ ॥

तेषामप्युदितं नैव मिलितं च यदाऽभवत् । तदा शान्तिकपौष्टयादि कारयामास भूपतिः ॥ ९ ॥

तस्मिन्नपि मुधा जाते कृत्ये नन्दनदुःखतः । महीपालोऽभवद्दुःखी बाढं नारकजीववत् ॥ १० ॥

मेलयित्वा ततः सङ्घं भूपः पुत्रसमन्वितः । ययौ शत्रुञ्जये तीर्थे नन्तुं श्रीजिननायकान् ॥ ११ ॥

गेहे गोमुखयक्षस्य कृत्वा क्षपणसप्तकम् । उपविष्टो जगौ भूप-सुनुरेवं तदग्रतः ॥ १२ ॥

भो यक्ष ! वक्षि मे रोगच्छिदे त्वमौषधं हि तत् । येन मद्विग्रहाद् याति राजयक्ष्मा क्षयं क्षणात् ॥ १३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गोमुखः प्रोक्तवान् राज-पुत्राऽमुष्य तरोः फलम् । आस्वादयाऽधुना रोगः सर्वस्ते यास्यति क्षयम् ॥१४॥
यक्षोक्तवृक्षतो लात्वा फलान्यास्वाद्य भूपभूः । नीरोगोऽभूत्तदा देवकुमार इव वेगतः ॥ १५ ॥
पद्मसेनस्ततो गत्वा श्रीयुगादि-जिनालये । पूजयित्वा जिनं चक्रे पारणं भवतारणम् ॥ १६ ॥
ततो वीरनृपो मत्वा नीरोगं तनयं तदा । प्रासादं कारयामास तुषाराचलसोदरम् ॥ १७ ॥
ततः श्रीशान्तिनाथस्य प्रतिमां रैमयीं वराम् । स्थापयित्वा नृपः स्वीय-नगरं समुपेयिवान् ॥ १८ ॥

॥ श्री रसकूपिकोपरि सुन्दरकथा ॥

कुन्तलाह्वपुरे श्रेष्ठी धनदो धनदोपमः । धनवत्यभिधा पत्नी शीलादिगुणभूषिता ॥ १ ॥
क्रमात् सोमामरश्रीदसुन्दराह्वास्तनूभवाः । चत्वारो जनिताः श्रेष्ठि-पत्न्या शोभनवासरे ॥ २ ॥
सुवस्त्राभरणैः सर्वान् पुत्रान् विषयान् सदा । सदन्नपानतः श्रेष्ठी पुपोष मुदिताशयः ॥ ३ ॥
भूरिरैव्ययतो धर्म-कर्मशास्त्राणि सूरिभिः । पाठिता नन्दनाः सर्वे पित्रा च परिणायिताः ॥ ४ ॥
श्रेष्ठी पृथक् पृथक् सर्व-पुत्रेभ्यो धवलालयान् । वितीर्य जनको मोदं तनुते वीक्ष्य नन्दनान् ॥ ५ ॥

For Private and Personal Use Only

क्रमाच्छ्रेष्ठिसुताः सर्वे स्वस्वपत्नीवशीकृताः । धनं लात्वा पृथग् भूताः पशुवत्पितृपार्श्वतः ॥ ६ ॥
लक्ष्म्यर्जनकृते सत्सु चतुर्षु तनयेष्वपि । रलति श्रेष्ठिराट् रात्रिं दिवं विश्रामवर्जितः ॥ ७ ॥
एकदा श्रेष्ठिनं सर्पिरानयन्तं स्वयं गृहे । दृष्ट्वाऽऽह विमलो मित्रं श्रेष्ठिन् ! रलसि किं स्वयम् ॥ ८ ॥
श्रेष्ठ्याह वसति ग्रामे नारीभिमुषितोऽस्म्यहम् । श्रेष्ठी बभाण का नार्यो याभिस्त्वं मुषितः सुहृत् ? ॥ ९ ॥
श्रेष्ठ्यवक् पश्यतो मेऽत्र स्नुषाभिर्मुषिताः सुताः । विमलोऽवक् स्नुषाः किं स्युस्तस्कर्यस्तव सम्प्रति ? ॥१०॥
श्रेष्ठ्यभाणीद् वरं स्तेनास्ते ये लात्वा धनंगृहात् । नायान्ति चक्षुषोरेताः स्नुषास्त्वाऽऽयान्ति सन्ततम् ॥११॥
सुहृज्जगौ वधूभ्यस्ते वालयिष्यामि नन्दनान् । त्वया दुःखं न कर्त्तव्यं कार्यो धर्मादरः पुनः ॥ १२ ॥
ततो मित्रसुतोपान्तेऽभ्येत्येति विमलो जगौ । मातुः पितुः समं तीर्थं विद्यते न जगत्त्रये ॥ १३ ॥
※ यतः–' ते पुत्रा ये पितुर्भक्ता स पिता यस्तु पोषकः । तन्मित्रं यत्र विश्वासः सा भार्या यत्र निर्वृतिः ॥१४॥卐
※ जनेता चोपनेता च यस्तु विद्यां प्रयच्छति । अन्नदः प्राणदश्चेति पिता पञ्चविधः स्मृतः ॥ १५ ॥卐
स एव कथ्यते पुत्रः यः स्वीयं कुलमन्वहम् । पितुः कीर्तिं च धर्म्मं च गुणांश्चापि विवर्द्धयेत् ॥ १६ ॥
इत्यादि सूपदेशेन श्रेष्ठिपुत्रास्त्रयः क्रमात् । वालिताः सुहृदो भेजुस्तातं सद्भक्तिपूर्वकम् ॥ १७ ॥
मित्रेण वालितान् पुत्रांस्त्रीन् मत्वा श्रेष्ठिपुङ्गवः । हृष्टः करोति पुण्यानि स्वदानादीन्यनेकशः ॥ १८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* यतः—"वज्रलेपस्य मूर्खस्य नारीणां मर्कटस्य च। एको ग्रहस्तु मीनानां नीलीमद्यपयोस्तथा ॥ १९ ॥"卐

चतुर्थस्तनयो निःस्वी-भूतस्त्यक्त्वा पुरं निजम् । ययौ शत्रुञ्जयोपान्ते भीमे कक्षे दिवात्यये ॥ २० ॥

प्रातस्तत्र यतीन् दृष्ट्वा गत्वा नत्वा सुभक्तितः । मुख्यसाधोः पुरोऽश्रोषी-द्वं सुन्दरनैगमः ॥ २१ ॥

अस्मिन् शत्रुञ्जये तीर्थे श्रीशान्तिर्दृष्टिगोचरे । रसकूपी समस्त्येव स्वर्णकृद्रसपूरिता ॥ २२ ॥

यः श्रीशान्तिजिनस्याग्रे षष्ठादि कुरुते तपः । कुल्माषान् पारणे भुङ्क्ते विंशतिप्रमितान् पुनः ॥ २३ ॥

रसकूपीसुरस्तस्य स्मरतः शान्तिमर्हतम् । दर्शयेच्च रसस्याशु करिं स्वर्णविधायिकाम् ॥ २४ ॥

उक्तं च—श्रीशान्तिचैत्यस्य पुरो हस्तानां त्रिंशतः पुनः ।

पुरुषैः सप्तभिरधः (नीचै) खानीद्वेस्वर्णरूप्ययोः ॥ २५ ॥

ततो हस्तशतं गत्वा पूर्वद्वारेऽस्ति कूपिका । अधस्तादष्टभिर्हस्तैः श्रीसिद्धरसपूरिता ॥ २६ ॥

श्रीपादलिप्ताचार्येण तीर्थोद्धारकृते किल । अस्ति संस्थापितं रत्न-सुवर्णं तत्समीपगम् ॥ २७ ॥

पूर्वस्यामृषभबिम्बा-दधश्चर्षभकूटतः । धनूंषि त्रिंशतं गत्वोपवासांस्त्रीन् समाचरेत् ॥ २८ ॥

कृते बलिविधानादौ वैरोट्या स्वं प्रदर्शयेत् । सदाज्ञया समुत्पाट्य शिलां रात्रौ प्रविश्यते ॥ २९ ॥

तत्रोपवासतः सर्वाः सम्पद्यन्ते च सिद्धयः । तत्रर्षभार्चानमनाद् भवेदेकावतारभाक् ॥ ३० ॥

For Private and Personal Use Only

पुरो धनुःपञ्चशत्या सप्तपाषाणकुण्डिका । ततः सप्त क्रमान् नीत्वा कुर्याद्बलिविधिं बुधः ॥ ३१ ॥
शिलोत्पाटनतस्तत्र कस्यचित् पुण्यशालिनः । उपवासद्वयेन स्यात् प्रत्यक्षा रसकूपिका ॥ ३२ ॥
श्रुत्वैतत् सुन्दरो गत्वा तीर्थे तस्मिन् गुरूदितम् । तपश्चक्रे तथा प्रादु-रभूत् कूपीसुरोऽचिरात् ॥ ३३ ॥
जगौ सुरस्तवेदानीं तुष्टोऽस्मि रसकूपिकाम् । दर्शयिष्याम्यहं तुभ्यं गृहाण रसमञ्जसा ॥ ३४ ॥
रसभारत्रयं स्वर्णकरं प्राप्य ततस्तदा । आगतः स्वपुरेऽकार्षीत् सुन्दरः कनकं बहुम् ॥ ३५ ॥
सुरोक्त्या सुन्दरो माता-पित्रोर्भक्तिपरः सदा । प्रासादं कारयामास कैलासगिरिसोदरम् ॥ ३६ ॥
तन्मध्ये शान्तिनाथस्य प्रतिमां रैमयीं वराम् । त्रिंशद्भारमितामस्था-पयत् सुन्दरनैगमः ॥ ३७ ॥
प्रतिमां प्रवरां स्वर्ण-मयीं शत्रुञ्जयाचले । कारयित्वाऽर्हतः शान्ते-र्गेहे सोऽतिष्ठिपन्मुदा ॥ ३८ ॥
सुन्दरो विस्तरात् मातृ-पितृभ्रातृसमन्वितः । यात्रां वितनुते सिद्ध-पर्वते भूरिरैव्ययात् ॥ ३९ ॥
तत्र शान्तिजिनस्याग्रे श्रीशान्तिं ध्यायतः सतः । सुन्दरस्याभवज्ज्ञानमव्ययं पातकक्षयात् ॥ ४० ॥
देवतादत्तलिङ्गः सन् सुन्दरः केवली तदा । तथा दिदेश सर्वज्ञा-गमोपदेशमादरात् ॥ ४१ ॥
यथा लक्षत्रयी वाचं-यमानां शृण्वतां वृषम् । उत्पेदे केवलज्ञानं विश्वत्रयप्रकाशकम् ॥ ४२ ॥

卐 卐 卐 卐

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ढङ्कादिपञ्चकूटेषु याता यास्यन्ति यान्ति ये । शिवं तेषां न छद्मस्थैः संख्या ज्ञायेत च क्वचित् ॥ १ ॥
इत्यादि ढङ्कादिपञ्चकूटवर्णनं पुरापि कृतमप्यस्ति । तेनाऽत्र नोच्यते ।

जो अरयछग(च्छक्क)म्मि असीसत्तरिसट्ठीपन्नबारजोयणए ।
सगरयणीविच्छिन्नो सो विमलगिरी जयउ तित्थं ।६॥

'यो' गिरिः अरकेषु षट्सु क्रमात् अशीति-सप्तति-षष्टि-पञ्चाशत्-द्वादश-सप्तहस्तप्रमाणोऽस्ति, स विमलगिरिस्तीर्थं जयतात् चिरम् ॥ ६ ॥

जो अट्ठजोअणुच्चो पन्ना-दसजोअणं च मूलुवरिं ।
विच्छिन्नो रिसहजिणे सो विमलगिरी जयउ तित्थं ॥ ७ ॥

'यो' गिरिः–पर्वतः श्रीऋषभदेवे विजयमाने अष्टौ योजनान्युच्चः, "मौलौ" धुरि पञ्चाशद्योजनानि क्षितौ विस्तीर्णः "उपरि" ऊर्ध्वं दशयोजनानि विस्तीर्णः, प्रथमजिने वर्त्तमाने स विमलगिरिर्जयतात्तीर्थम् ॥ ७ ॥

जहिं रिसहसेणपमुहा असंख तित्थंकरा समोसरिआ ।
सिद्धा य सिद्धसेले सो विमलगिरी जयउ तित्थं ॥ ८ ॥

For Private and Personal Use Only

यत्र ऋषभसेनप्रमुखास्तीर्थंकरा असङ्ख्याताः समवसृताः 'सिद्धाः' सिद्धिगताः 'सेले' शैले, स च विमलगिरिस्तीर्थं जयतात् । अत्र कथा—

॥ श्री ऋषभजिनस्य शत्रुञ्जयागमनसम्बन्धः ॥

अयोध्यायां जनानन्दा-भिधो भूमीपतिर्नयी । पत्नी शीलवती नाम्ना तस्यासीच्छीलशालिनी ॥ १ ॥
गजाहिवह्निपर्यन्तैः स्वप्नैश्चतुर्दशप्रमैः । सूचितस्तनयोऽसावि शीलवत्या सुखं निशि ॥ २ ॥
"गयवसहसीहअभिसेयदामससिदिणयरं झयं कुंभं । पउमसरसागरविमाणभवणरयणुच्चयसिहिं च" ॥ ३ ॥
जन्मोत्सवः कृतः शक्र-पितृभ्यां तस्य तु क्रमात् । पिता ऋषभसेनेति नामाऽदाल्लसदुत्सवम् ॥ ४ ॥
वर्द्धमानः क्रमात् प्राप्य राज्यं पैतृकमद्भुतम् । त्यक्त्वा च तृणवद्राज्यं जग्राह संयमं स च ॥ ५ ॥
छद्मस्थतां व्यतिक्रम्य श्रीमान् ऋषभसेनकः । सम्प्राप्य केवलज्ञानं सुरासुरनमस्कृतः ॥ ६ ॥
वप्रत्रये मणीरूप्य-जाम्बूनदमये वरे । उपविश्याऽऽसने तीर्थ-ङ्करोजगौ वृषं तदा ॥ ७ ॥
※ अपि लभ्यते सुराज्यं लभ्यन्ते पुरवराणि रम्याणि । नहि लभ्यते विशुद्धः सर्वज्ञोक्तो महाधर्मः ॥ ८ ॥ 卐

* चत्वारः प्रहरा यान्ति देहिनां गृहचेष्टितैः । तेषां पादे तदर्द्धे वा कर्तव्यो धर्मसङ्ग्रहः ॥ ९ ॥ 卐
* उत्थायोत्थाय बोद्धव्यं किमद्य सुकृतं कृतम् । आयुषः खण्डमादाय रविरस्तमुपागतः ॥ १० ॥ 卐
* अनित्यानि शरीराणि विभवो नैव शाश्वतः । नित्यं सन्निहितो मृत्युः कर्तव्यो धर्मसङ्ग्रहः ॥ ११ ॥ 卐

अन्यदा बोधयन् भव्य-जीवान् वृषभसेनकः । ययौ शत्रुञ्जये शैले कल्याणकमलाप्रदे ॥ १२ ॥
देवैर्वप्रत्रये रत्न-स्वर्णरूप्यमये कृते । उपविश्य ददौ धर्म-देशनामिति शर्मदाम् ॥ १३ ॥

* अन्यायन्यायभेदेन चतुर्भङ्गी धने ततः । सतां सर्वोत्तमी भङ्गी न्यायार्जितस्य सद्व्ययात् ॥ १४ ॥ 卐
* पादमायान्निधिं कुर्यात् पादं वित्ताय वर्द्धयेत् । धर्मोपभोगयोः पादं पादं भर्तव्यपोषणे ॥ १५ ॥ 卐
* संसाराम्बुनिधौ सत्त्वाः कर्मोर्मिपरिघट्टिताः । संयुज्यन्ते वियुज्यन्ते तत्र कः कस्य बान्धवः ? ॥ १६ ॥ 卐

श्रुत्वेति तत्र सर्वज्ञधर्मं धर्मशरीरिणः । सम्यक्त्वसहितं श्राद्ध-धर्मं जग्रहुरादरात् ॥ १७ ॥
आयुःप्रान्ते जिनः सोऽपि भूरिसाधुसमन्वितः । शत्रुञ्जये ययौ मुक्ति-नगरीं क्षीणपातकः ॥ १८ ॥
ततश्चन्द्रधनः सार्वः क्षीणाष्टकर्म्मसञ्चयः । अस्मिन् सिद्धगिरौ भूरि-मुमुक्षुयुक् शिवं ययौ ॥ १९ ॥
ततोऽनन्तजिनः कुर्वन् विहारमायुषः क्षये । अत्रैव पर्वते मुक्ति-नगरीं समुपेयिवान् ॥ २० ॥
एवं चासङ्ख्यसर्वज्ञा युक्ता असङ्ख्यसाधुभिः । शत्रुञ्जये समाजग्मु-र्ययुर्मुक्तिपुरीं क्रमात् ॥ २१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उत्सर्पिण्यामतीतायां सम्प्रत्याह्वो जिनेश्वरः । तस्याऽजनि कदम्बाख्यो गणेशः प्रथमो वरः ॥ २२ ॥
स च शत्रुञ्जयेऽभ्येत्य मुनिकोटिसमन्वितः । सिद्धिं ययात्रतः काद-म्बक एष गिरिः स्मृतः ॥ २३ ॥
卐 सन्त्यत्र दिव्यौषधयः प्रभावपरिपेशलाः । रसकूपोऽपि रत्नानि कल्पवृक्षास्तथा परे ॥ २४ ॥
卐 दीपोत्सवे शुभे वारे सङ्क्रान्तावुत्तरायणे । न्यसेन् मण्डलमत्रैत्य स्युः प्रत्यक्षा हि देवताः ॥ २५ ॥
卐 न ता औषधयः काश्चित् हृदकुण्डानि तानि न । सिद्धयोऽपि न ताः पृथ्व्यां या न सन्ति गिराविह ॥२६॥
卐 सुराष्ट्रामण्डलजुषो दारिद्र्येण कथं जनाः । पीड्यन्ते यत्र कादम्ब-गिरिः सिद्धिनिकेतनम् ॥ २७ ॥
卐 तुष्टो यस्याऽस्त्ययं शैलः कामधेनुः सुरद्रुमः । चिन्तामण्यादयस्तस्य सर्वे तुष्टाः समन्ततः ॥ २८ ॥

तह पउमनाहपमुहा समोसरिस्संति जत्थ भाविजिणा ।
तं सिद्धखित्तनामं सो विमलगिरी जयउ तित्थं ॥ ९ ॥

व्याख्या–‘तहा’ तथा पद्मनाभप्रमुखा जिनेश्वराः असङ्ख्याता भाविनो यत्र सिद्धगिरौ समवसरिष्यन्ति, तत् सिद्धक्षेत्रं नाम नाम्ना वर्तते, अतः स विमलगिरिः पर्वतो जयतात् । अत्र कथा—
मगधाविषये राज-गृहे सूरपुरोपमे । आसीत् प्रसेनजिद् भूपो वैरिमातङ्गकेसरी ॥ १ ॥

For Private and Personal Use Only

तस्याऽऽसीत् प्रथमः पुत्रः श्रेणिकोऽमलविक्रमः । पृथक् पृथक् प्रिया-जाताः सुता नवनवप्रभाः ॥ २ ॥
राजा दध्यौ ममेदानीं पुत्राः सन्ति शतं पुनः । न परीक्षा विना ज्ञेयो राज्ययोग्योऽधुना सुतः ॥ ३ ॥
※ स्वर्णरूप्यमणीकुम्भि-वाजिनृस्त्रीमु(सु)खादि वा । परीक्ष्य सत्तमैर्ग्राह्यं यथा धर्मोऽत्र धर्मिणा ॥ ४ ॥ 卐
ततः पक्वान्नसम्पूर्णा करण्डाः कोरका घटाः । जलपूर्णाः गृहस्यान्तो मोचिता मेदिनीभुजा ॥ ५ ॥
पुत्रानाऽऽकार्य भूपोऽवग् भोज्यं पेयं पयः पुनः । करण्डका घटा नैवोद्घाटया बद्धा अपाटढम् ॥ ६ ॥
बुभुक्षितेषु सर्वेषु भ्रातृषु श्रेणिको जगौ । धूनियित्वा करण्डाँश्च कुम्भानाऽऽछाद्य वाससा ॥ ७ ॥
निष्पीडय भोजयामास पाययामास सोदरान् । अभोजयन् स्वयं तेषु भुङ्क्तेषु सोदरेष्वपि ॥८॥ युग्मम् ।
श्रेणिकस्य धियं मत्वा राजाऽध्यासीत् स्वचेतसि । सूनुरेषु समस्त्येत्र राज्ययोग्यो परे नहि ॥ ९ ॥
※ यतः—वाजिवारणलोहानां काष्टपाषाणवाससाम् । नारीपुरुषतोयानामन्तरं विद्यते महत् ॥ १० ॥ 卐
ततः सिताघृतक्षीर–भृतेषु भाजनेष्वथ । नन्दनेषूपविष्टेषु भोक्तुं भूपनिदेशतः ॥ ११ ॥
बुभुक्षितान् शुनस्तेषु भाजनेष्वत्तुमञ्जसा । मोचयामास भूपालः परीक्षार्थं रहः पुनः ॥ १२ ॥ युग्मम् ।
क्षीरमत्तुं समेतेषु श्वसु नष्टा नृपाङ्गजाः । एकः श्रेणिक उत्तस्थौ न तदा बुद्धिभाजनम् ॥ १३ ॥
खरण्टितान्यमत्राणि कुमारैरुज्झितान्यथ । तेभ्यः श्वभ्यः क्षिपन्नाद श्रेणिको नृपनन्दनः ॥ १४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूपाऽऽवासे ज्वलत्याशु भम्भा लात्वाऽऽदिमः सुतः । निर्ययौ निर्ययुश्चान्ये दुकुलादि गृहान्तरात् ॥ १५ ॥
ततो भूपो जगौ रे रे ! श्रेणिकाऽतो व्रजाऽधुना । भम्भा त्वं वादयन् स्वीयोदरं भर गृहे गृहे ॥ १६ ॥
आकारणं विना नात्राऽऽगन्तव्यं भवता पुनः । त्वया शुना समं भुक्त-मतोऽसि त्वं शुना समः ॥ १७ ॥
श्रेणिकोऽथ निशि च्छन्नं निर्गत्य स्वपुरात्तदा । गतोऽटव्यां ददर्शैकं स्वप्नं सत्सातदायकम् ॥ १८ ॥
कल्ये गच्छन्नदीतीरे दृक्ष्यस्यश्वत्थ-सागरौ । तन्मूलयोः समस्त्येका शिला मध्ये महत्तमा ॥ १९ ॥
मणयोऽष्टादश प्रौढ-प्रभावाः सन्ति सुन्दराः । पयोग्निव्याघ्रसिंहेभ-शाकिनीस्तम्भकारकाः ॥ २० ॥
अन्धत्वशूलशीर्षार्त्ति-स्फेटका वश्यकारकाः । मौढ्योत्पादकसन्तान वर्धकः कमलाप्रदः ॥ २१ ॥
भयहृत् प्रीतिदः पुष्टि शान्तिदो रोगहारकः । एतान् मणीन् गृहीत्वा त्वं श्रेणिकोऽदुःखवान् भव ॥ २२ ॥
प्रातस्तांस्तान् मणीन् लात्वा ग्रन्थौ बद्ध्वा पृथक् पृथग् । प्रभावं च स्थिरीकृत्य श्रेणिकोऽचलदग्रतः ॥ २३ ॥
भिल्ल्येका मिलिता मार्गे प्राह मां वृणु सत्तम ! । भिल्लोऽस्ति मत्पिता लक्ष-ग्रामस्वामी मनोरम ! ॥ २४ ॥
अहं बिभेमि नो व्याघ्राद् भूतात् प्रेतात् मतङ्गजात् । अन्यस्मादपि नो कस्माद् भीति र्मेऽस्त्यस्ति वाऽग्रितः ॥
श्रेणिकोऽवग् न ते पाणि-ग्राहं कुर्वेऽत्र भामिनि ! । अहं भूपसुतोऽस्मि त्वं भिल्लीत्येवं कथं वद ॥ २६ ॥
एवं जल्पन् कुमारस्तु तत्राऽऽयाते दवानले । स्मृत्वा वह्निमणिं शीघ्रं प्रविश्याऽवक् च तां प्रति ॥ २७ ॥

For Private and Personal Use Only

आपृच्छाऽत्र वृणु त्वं मां तत्रै भिल्ली जगाविदः । मौढ्यान्मयोदितो भेदस्तेनाहं वञ्चिता त्वया ॥२८॥
ततो गच्छन् कुमारस्तु गतो बिन्नानदीतटे । यावद् वृक्षेऽचटन् तावन्मूलात् पपात वारिणि ॥ २९ ॥
आरुह्य तं तरुं भूप-पुत्रो बेन्नाटपत्तने । ययौ यावत्तदा जज्ञे करेषु चन्दनं द्रुमम् ॥ ३० ॥
इभ्येभ्यस्तं वितीर्यं द्रुं प्राप्य भूरीन् मणीन् वरान् । श्रेणिकः प्रययौ हट्टे धनावहरमावतः ॥ ३१ ॥
तस्मिन् हट्टस्थिते भूरि-लाभे जाते वणिग् जगौ । कस्य प्राघुर्णकोऽसि त्वं ? स प्राह भवतोऽस्म्यहम् ॥३२॥
स्वगृहे श्रेष्ठिनाऽऽनीतं दृष्ट्वा च रुचिराकृतिम् । नन्दापुत्री जगौ ताताऽमुना मां परिणापय ॥ ३३ ॥
श्रेष्ठिना भोजयित्वा तं तस्मै नन्दां निजाङ्गजाम् । वितीर्य स्वगृहेऽस्थापि स श्रेणिको नृपाङ्गजः ॥ ३४ ॥
धूलिं पूर्वागतां यान-पात्रेभ्यः स धनावहः । हट्टस्याग्रेऽक्षिपद्यां तु तां दृष्ट्वा श्रेणिकोऽगदत् ॥ ३५ ॥
एवं कथं त्वया क्षिप्ता धूली तेजनतूरिका । श्रेष्ठी प्राहाऽनया धूल्या विद्यते किं प्रयोजनम् ? ॥ ३६ ॥
श्रेणिकः प्रोक्तवानेषा न धूलिर्विद्यते वणिग् ! । इयं क्षिप्ताऽनले स्वर्णं जायते त्रपुयोगतः ॥ ३७ ॥
श्रेष्ठ्यपि स्वर्णमादाय धूलितो धनवानभूत् । श्रेणिकोऽन्यां महीपाल-पुत्रीं दिव्यदृशं व्यधात् ॥ ३८ ॥
सगर्भां गेहिनीं मुक्त्वा तातेनाऽऽकारितो रहः । श्रेणिकोऽभ्येत्य तातस्य ननाम चरणौ मुदा ॥ ३९ ॥
प्रसेनजिन्नृपो राज्यं दत्त्वा श्रेणिकसूनवे । तपो लात्वाऽऽयुषः प्रान्ते स्वर्गसातमवाप्तवान् ॥ ४० ॥

For Private and Personal Use Only

अथ पश्चात् सुतोऽसावि नन्दया शुभवासरे । तस्याऽभयकुमारेति नाम तत्राऽभवत् क्रमात् ॥ ४१ ॥
वर्द्धमानः क्रमात्तातं मत्वा राजगृहाधिपम् । दर्शयित्वा धियं स्वीया-ममिलत् पितुरञ्जसा ॥ ४२ ॥
चतुर्बुद्धिनिधिं पुत्रं मत्वा श्रेणिकभूपतिः । सर्वमन्त्रिषु मुख्यं तं तद्गुणै रञ्जितस्तदा (तो व्यधात्) ॥४३॥
अनाथिसाधुपार्श्वे तु श्रुत्वा धर्म्मं जिनोदितम् । श्रीवीरस्याऽर्हतः सेवां चकार श्रेणिकः सदा ॥ ४४ ॥
पूजयित्वा प्रभुं प्रात-रष्टोत्तरशतं यवान् । रैमयान् ढोकयित्वैव श्रेणिकोऽत्ति निरन्तरम् ॥ ४५ ॥
प्रभोः पूजां वितन्वानः श्रेणिकोऽखण्डभक्तितः । तीर्थकृत्पदवीयोग्य-मर्जयत् कर्म सुन्दरम् ॥ ४६ ॥
पूर्वं मृगवधाद् बद्धकर्मा श्रेणिकभूधवः । प्रथमे नरके यातो मध्यमायुषि शीघ्रतः ॥ ४७ ॥
इतश्चोत्सर्पिणीकाले द्वितीयारावसानके । भविष्यन्ति क्रमात् सप्त वर्याः कुलकरोत्तमाः ॥ ४८ ॥ तथाहि-
'पढमित्थ विमलवाहण बीओ सुदामो तइअ संगमओ, चउत्थ सुपासो दत्तो पंचमओ छट्ठो सुमुहो सत्तमो समुची'
आदिमः कुलकृज्जाति-स्मृत्या पुर्यादिकं समम् । स्थापयिष्यति सञ्जाते प्रकटे ज्वलने भुवि ॥ ४९ ॥
उत्सर्प्पिण्यरकद्वैता-तिक्रमे भरतान्तरे । पुड्रवर्द्धनदेशे तु शतद्वाराह्वये पुरे ॥ ५० ॥
समुचिक्ष्मापतेर्भद्रा-भिधा सहचरी वरा । भविष्यति लसद्रूपा पराभूतामरप्रिया ॥ ५१ ॥ युग्मम् ॥
सुखसुप्ताऽन्यदा भद्रा स्वप्नान्येवं चतुर्दश । गजादीनि विशन्त्यास्ये निजे द्रक्ष्यत्यहोऽत्यये ॥ ५२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रत्नप्रभाभिधे श्वभ्रे प्रस्तटे रोरकाह्वये । चतुरष्टसहस्राब्दीं पालयित्वाऽऽयुषः स्थितिम् ॥ ५३ ॥
श्रेणिकस्यासुमान् भद्रा-देव्याः कुक्षौ शुभे क्षणे । अवातरिष्यति क्षोणीं क्षणं सुशं (स्थां) करिष्यति ॥५४॥
उच्चेषु रविचन्द्रादि-ग्रहेषु सकलेष्वपि । शुक्लचैत्रत्रयोदश्यां भद्रा साविष्यते सुतम् ॥ ५५ ॥
करिष्यतो हरि-क्ष्मापौ तस्य जन्मोत्सवं क्रमात् । पद्मनाभेति भूपालोऽभिधां दास्यति सूत्सवम् ॥ ५६ ॥
सप्तहस्ततनुः स्वर्ण-वर्णः पञ्चाननध्वजः । पद्मनाभमहीभुग्भूः सेविष्यते नृपादिभिः ॥ ५७ ॥
वर्द्धमानः क्रमाद्वैरि-मर्दनक्षितिभुक्सुताम् । पद्मनाभकुमारः सः समहं परिणेष्यति ॥ ५८ ॥
त्रिंशद्वर्षेषु जातेषु मार्गकृष्णदशम्यथ । पद्मनाभस्य दीक्षाया दात्री क्रमाद्भविष्यति ॥ ५९ ॥
वैशाखस्य सिते पक्षे दशमी ज्ञानदायिनी । भविष्यति क्रमात् पद्म-नाभस्य प्रथमार्हतः ॥ ६० ॥
कृते सालत्रये देवैः रूप्य-स्वर्ण-मणीमये । उपविष्टो जिनो धर्म्मं कथयिष्यति मुक्तिदम् ॥ ६१ ॥
देशनान्ते जिनो गच्छ-नायकान् स्थापयिष्यति । ग्राहयिष्यति सुश्राद्ध-धर्मं श्राद्धान् बहूनथ ॥ ६२ ॥
प्रतिबोध्य चिरं भव्य-जीवान् धर्मे शिवप्रदे । कार्त्तिकामावसी–रात्रौ गमिष्यति स निर्वृतिम् ॥ ६३ ॥
※ सूरदेवः सुपार्श्वश्च स्वयंप्रभो जिनेश्वरः । सर्वानुभूतिः सर्वज्ञो देव-श्रुतोदयौ जिनौ ॥ ६४ ॥ 卐
※ पेढालः पोट्टिलश्चापि श्रीशतकीर्त्तिसुव्रतौ । अममो निष्कषायोऽथ निष्पुलाकश्च निर्ममः ॥ ६५ ॥ 卐

For Private and Personal Use Only

* चित्रगुप्तसमाधी च संवर-श्रीयशोधरौ । विजयो मल्ल-देवौ चाऽनन्तवीर्यश्च भद्रकृत् ॥ ६६ ॥ 卐
एते जिनाः क्रमाच्छत्रुञ्जये तीर्थे शिवप्रदे । समेत्य भव्यजीवेभ्यो दास्यन्ति धर्मदेशनाम् ॥ ६७ ॥
तदा कोटिमिता भव्य-जीवाः क्षिप्त्वा तमोऽखिलम् । कल्याणकमलां सद्यो लभिष्यन्ति न संशयः ॥६८॥

एवं भाविनस्तीर्थङ्करा असंख्याता मुक्तिं गमिष्यन्ति शत्रुञ्जये तीर्थे—

सिरिनेमिनाहवज्जा जत्थ जिणा रिसहपमुहवीरंता ।
तेवीस समोसरिआ सो विमलगिरी जयउ तित्थं ॥ १० ॥

व्याख्या—'श्रीनेमिनाथो' द्वाविंशस्तीर्थकृत् तेन वर्जिता-रहिताः श्रीऋषभाजिताद्याः श्रीवर्द्धमान-पर्यन्तास्त्रयोविंशतिर्जिनाः समवासार्षुः यत्र गिरौ स विमलगिरि शत्रुञ्जयनामा पर्वतो जगद्वन्द्यो जयतात् इति सम्बन्धः । तत्रादौ श्रीऋषभजिनस्य समवसृतिस्वरूपं प्रोच्यते—

विहरन् वृषभः स्वामी साधूनां शिवहेतवे । सुरार्च्यः समवासार्षीत् तीर्थे शत्रुञ्जयेऽन्यदा ॥ १ ॥
तत्रेति सुरमर्त्यानां पुरतो वृषभः प्रभुः । धर्म्मोपदेशनां चक्रे पापहन्त्र्या गिरा किल ॥ २ ॥

* विरोधिता बन्धु जनेषु नित्यं सरोगता मूर्खजनेषु सङ्गः । क्रूरः स्वभावः कटुवाक् सरोषो नरस्य चिह्नं नरकागतस्य 卐

* स्वर्गच्युतानामिह जीवलोके चत्वारि नित्यं हृदये वसन्ति । दानप्रसंगो विमला च वाणी देवार्चनं सद्गुरुसेवनं च ॥
* दुर्वारा वारणेन्द्राः जितपवनजवा वाजिनः स्यन्दनौघाः, लीलावत्यो युवत्यः प्रचलितचमरैर्भूषिता राज्यलक्ष्मीः ।
उच्चैः श्वेतातपत्रं चतुरुदधितटी संकटा मेदिनीयं, प्राप्यन्ते यत्प्रभावात् त्रिभुवनविजयी सोऽस्तु नो धर्मलाभः ॥
तत्रस्थस्य प्रभोर्लक्ष-मिता वाचंयमा वराः । आसाद्य केवलज्ञानं मुक्तिपुर्यां समागमन् ॥ ६ ॥
ततः श्रीवृषभः कृत्वा विहारं बोधयन् जनान् । भूयश्च समवासार्षीन्मुमुक्षुमुक्तिहेतवे ॥ ७ ॥
तदा तत्र प्रभोरर्द्ध-लक्षं तपस्विनो वराः । अलश्चक्रुः क्रमात् प्राप्य ज्ञानं मुक्तिपुरीं पुनः ॥ ८ ॥
एवं वारानसङ्ख्याता-नेत्य तत्रादिमो जिनः । साधून् भव्यजनान् भूरीन् प्रापयन्निर्वृतेः पुरीम् ॥ ९ ॥
यतः ' नवनवई पुव्वाइं विहरंतो आगतो अ सित्तुंजे । उसभो देवेहिं समं समोसढो पढमतित्थम्मि "॥१०॥
६९८५४४०००००००००० एकोनसप्ततिः कोटाकोटयः पञ्चाशीतिः कोटिलक्षाः चतुश्चत्वारिंशत् कोटिसहस्रा
एतावान् वारान् वृषभः शत्रुञ्जये समवासार्षीत् ।
तत्र प्रभोर्गिरं श्रुत्वा ये लात्वा संयमं खलु । मुक्तिं जग्मु र्न हि तेषां संख्या ज्ञायेत कोविदैः ॥ ११ ॥

॥ श्री अजितजिन-शत्रुञ्जयसमागमनसम्बन्धः ॥

अजिततीर्थकृत् भव्य-जनान् भूरीन् प्रबोधयन् । आगात् शत्रुञ्जये तीर्थे भव्याङ्गिमोक्षहेतवे ॥ १ ॥
सालत्रये कृतेऽमर्त्यैर्हेमरूप्यमणीमये । उपविश्याऽजितस्वामी धर्ममाख्यातवानिति ॥ २ ॥
* वरपूजया जिनानां धर्मश्रवणेन सुगुरुसेवनया । शासनभासनयोगैः सृजन्ति सफलं निजं जन्म ॥ ३ ॥ 卐
अवाप्य धर्मावसरं विवेकी कुर्याद्विलम्बं नहि विस्तराय । ततो जिनस्तक्षशिलाधिपेन रात्रिं व्यतिक्रम्य पुन र्न नेमे ॥४॥
तथाहि–छद्मस्थावस्थितो नाभि-पुत्रस्तक्षशिलान्तिके । कायोत्सर्गे स्थितः सायं स्वकर्मक्षयहेतवे ॥ ५ ॥
वनपालाननाद् बाहु-बलिर्ज्ञात्वाऽऽगमं पितुः । दध्यौ प्रभोर्नतौ रात्रौ शोभा भवति नो मनाग् ॥ ६ ॥
तेनाहमुषसि न्यक्ष-विभूत्या चरणौ प्रभोः । वन्दिष्ये कृतशोभायां नगर्यां भूरिभूपयुग् ॥ ७ ॥
सामग्रीं रुचिरां कृत्वा बाहुबलिः सदुत्सवम् । वन्दितुं वृषभं यावद्-चालीद् बहुभूपयुग् ॥ ८ ॥
इतस्तावत् प्रगे स्वामी वायुवच्चलितोऽग्रतः । तत्राऽऽयातः सुतस्तात-मनीक्ष्येत्यरुदत् स च ॥ ९ ॥
स्वामिन् ! किं न त्वयाऽदर्शि दर्शनं स्वं ममैकशः । अलक्ष्यस्त्वं कथं जातो दृग्पथात् साम्प्रतं प्रभो ! ॥१०॥
इत्यादि विलपन् बाहुबलिः सचिवपुङ्गवैः । वारितः कारयामास स्तूपं जिनाङ्घ्रिराजितम् ॥ ११ ॥ युग्मम् ॥
धर्मेच्छुर्यो जनश्चक्रे विलम्बं क्षणमेककम् । स एवं शोचति स्वस्मिन् बाहुबलिनरेन्द्रवत् ॥ १२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यादि धर्ममाकर्ण्य बहवो भविनो जनाः । मुक्तिं तत्र गिरौ जग्मुः सर्वकर्मस्थितिक्षयात् ॥ १३ ॥
एकदाऽजिततीर्थेशे कुर्वाणे धर्मदेशनाम् । साधु-लक्षत्रयं मुक्ति-मीयिवत् सिद्धपर्वते ॥ १४ ॥

॥ श्री सम्भवजिनस्य शत्रुञ्जयागमनसम्बन्धः ॥

एकदा सम्भवस्तीर्थं-करः प्रबोधयन् जनान् । बहुसंयतसंयुक्तः सिद्धाद्रौ समुपेयिवान् ॥ १ ॥
कृते वप्रत्रये देवैः रूप्य-स्वर्ण-मणीमये । उपविश्य ददौ धर्मो-पदेशं सम्भवो जिनः ॥ २ ॥
नन्दीश्वरेषु यत्पुण्यं द्विगुणं कुण्डले नगे । त्रिगुणं रुचके हस्ति-दन्तेषु च चतुर्गुणम् ॥ ३ ॥
एतद् द्विगुणितं जम्बू-चैत्ये यात्रां वितन्वताम् । षोढा तु धातकीखण्डे तच्छाखिजिनपूजनात् ॥ ४ ॥
पुष्करोदरबिम्बानां द्वात्रिंशद्गुणसम्मितम् । मेरुचूलार्हदर्चायां पुण्यं शतगुणं भवेत् ॥ ५ ॥
शत्रुञ्जये कोटिगुणं स्वभावात् स्पर्शतो मतम् । मनोवचनकायानां शुद्ध्याऽनन्तगुणं नृणाम् ॥ ६ ॥
वर्द्धमानपुरे पद्म श्रेष्ठिनः श्रीमती प्रिया । तिस्रः पुत्र्योऽभवन् पद्मा-लक्ष्मी-चन्द्रावती क्रमात् ॥ ७ ॥
तिस्रोऽपि पाठिताः पित्रा धर्मकर्मकलाः समाः । सन्ध्याद्वये प्रतिक्रान्तिं जिनार्चां च वितन्वते ॥ ८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकमेव वरं तिस्रो भगिन्यः कोविदोत्तमम् । वाञ्छन्त्यो जनकस्याग्रे जगदुश्चित्तचिन्तितम् ॥ ९ ॥

ततः पिता धनश्रेष्ठि-नन्दनं श्रीदसञ्ज्ञितम् । विज्ञमाकर्ण्य शास्त्राणा-मर्थं पप्रच्छ सादरम् ॥ १० ॥

लक्षणालङ्कृतिच्छन्दो-मुख्यशास्त्रार्थमद्भुतम् । श्रेष्ठी पप्रच्छ यं यं च तं तं सोऽचकथद् द्रुतम् ॥ ११ ॥

ततः श्रेष्ठी व्ययन् भूरि-विभवं लसदुत्सवम् । तिस्रः पुत्रीर्ददौ श्रीद-वराय धनसूनवे ॥ १२ ॥

वर्षद्वये गतेऽकस्मादुत्पन्ने विषमामये । चिकित्सितोपि वैद्यैः स पञ्चत्वमगमत्क्रमात् ॥ १३ ॥

※ यतः–मातापिता भैषजमिष्टदेवो विद्याप्रियानंदनबान्धवाश्च । गजाश्च भृत्या बलपञ्चवासे नेशा जनं रक्षितुमन्तकाले ॥ 卐

※ अनाज्यं भोज्यमप्राज्यं विप्रयोगः प्रियैः सह । अप्रियैः सम्प्रयोगश्च सर्वं पापविजृम्भितम् ॥ १५ ॥ 卐

ततस्तिस्रः सहोदर्यः मिथः प्रोचू रहः स्थिताः । अस्माभिर्न कृतं पुण्य-मखण्डं पूर्वजन्मनि ॥ १६ ॥

तेनेदानीं समायातं वैधव्यं नः कुकर्मतः । अखण्डं चेद् विधीयेत पुण्यं वरं तदा भवेत् ॥ १७ ॥

※ यतः–पत्यौ मृतेपि या योषिद् वैधव्यं पालयेत् क्वचित् । सा पुनः प्राप्य भर्त्तारं स्वर्गभोगान् समश्नुते ॥१८॥ 卐

※ मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता । स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ॥ १९ ॥ 卐

ध्यात्वेति ताः सहोदर्यो भावारीन् जेतुमन्वहम् । धर्मकर्मक्रियास्वेव मस्थापयन् मनो निजम् ॥ २० ॥

इतः संसदि मोहस्य जगादेति स्मरानुगः । शश्वत् श्रेष्ठिसुतास्तिस्र-स्तथा धर्म्मं वितन्वते ॥ २१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पश्चात् स्तोकैर्दिनैरेव भवन्ती भवतोऽनुगान् । जित्वा पद्मसुताः स्वाज्ञां ग्राहयिष्यन्ति नृन् पुनः ॥ २२ ॥
तेनाऽधुना विजेतुं ता भवतोऽवसरोऽस्ति हि । उद्गच्छन्नेव नो शत्रुर्हतः सैव हनिष्यते ॥ २३ ॥
ता जेतुं मोहभूपेन वीटके स्वकरे कृते । प्रमीला-विकथे मोहं नत्वेति प्रोचतुस्तदा ॥ २४ ॥
आवयोर्बीटकं देहि प्रसद्य मोहभूपते ! । तवाज्ञां ग्राहयिष्यावो गत्वा तास्तत्र शीघ्रतः ॥ २५ ॥
ता निद्रा-विकथे जेतुं चलन्त्यौ स्वामिपार्श्वतः । पद्मनार्यन्तिके गत्वा प्रथमं चेति जल्पतः ॥ २६ ॥
वीरश्रेष्ठिप्रिया वर्य-रसवत्यादिदानतः । भोजयामास भूयिष्ठाः श्राद्धीः किमजमीस्त्वकम् ॥ २७ ॥
पद्माऽवक् चिन्तया किं मे तथा सम्प्रतिवार्तया । गुणवन्त्यश्च ताः श्राद्धयो भोजिता नागुणास्पदम् ॥२८॥
एवं निद्राविकथाभ्यां कुर्वतीभ्यां कथां पृथग् । विकथा कारिता पद्मा निद्रापि ग्राहिता पुनः ॥ २९ ॥
प्रमीला-विकथे एवं लक्ष्मीमपि क्रमात् तदा । ग्राहयामास तु स्वाज्ञां विकथादिविधानतः ॥ ३० ॥
चन्द्रावती तु भक्तादि-कथाभिर्भूरिभिर्भृशम् । चालिता न मनाग् धर्मध्यानान्निर्जरशैलवत् ॥ ३१ ॥
पद्मा-लक्ष्म्यौ तु भक्तादि–कथाकरणतत्परे । मृत्वा श्वभ्रे गते भूरि-दुःखभाजौ बभूवतुः ॥ ३२ ॥
चन्द्रावती वितन्वाना शुद्धं धर्म्मं जिनोदितम् । अस्मिंस्तीर्थे समायाता नन्तुं श्रीवृषभं जिनम् ॥ ३३ ॥
कुर्वाणा सततं ध्यानं तपश्च पुरतः प्रभोः । सम्प्राप्य केवलज्ञानं ययौ मुक्तिपुरीं क्रमात् ॥ ३४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं श्रीसम्भवप्रोक्तं वचः श्रुत्वा जना मुदा । बहवः क्षीणकर्माणः कल्याणनगरीं ययुः ॥ ३५ ॥

॥ श्री अभिनन्दनस्य शत्रुञ्जयागमनसम्बन्धः ॥

विहरन्नेकदा पृथ्व्या-मभिनन्दनतीर्थकृत् । सिद्धाद्रौ समवासार्षीत् भूरिसंयतसेवितः ॥ १ ॥
धर्मं श्रोतुं समेतेषु भव्येषु बहुष्वन्यदा । अभिनन्दनतीर्थेशो जगौ भव्याङ्गिशर्मणे ॥ २ ॥
एकेंऽह्रिभ्यां जना लक्ष्मीं हस्ताभ्यां मौलिना धिया । अर्जयन्ति क्रमात्तत्र पादाभ्यामर्जने कथा ॥ ३ ॥
वीणापुरे वणिग् भीमो दुःस्थो महेभ्यभूभुजाम् । लेखं लात्वा व्रजत्येव दूरदेशे श्रियः कृते ॥ ४ ॥
प्राप्य लेखाद् धनं स्वस्य निर्वाहं स वणिग् व्यधात् । लेखवाहक इत्यासीन्नाम तस्य जने क्रमात् ॥ ५ ॥
सन्ध्याद्वये प्रतिक्रान्ति गच्छन् मार्गे ततान सः । मध्याह्ने जिननाथस्य पूजां वितनुते स्म च ॥ ६ ॥
गुरुयोगो भवेद् यत्र तत्र श्री गुरुपादयोः । वितीर्य वन्दनं नीरमपि पिबति (व्ययति) सर्वदा ॥ ७ ॥
वने तथाविधे दुःखो-पार्जितं धर्मकर्मणि । एकं लौहडिकं सोऽपि व्ययति स्म सुभावतः ॥ ८ ॥
एवं पद्धयां धनं भीमो ऽर्जयित्वा धर्मकर्मणि । व्ययित्वा च वृषं कृत्वा स्वर्गलोकेऽगमद् वणिग् ॥ ९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततश्च्युत्वा नरभवं प्राप्य भीमः सुरः स च । कल्याणनगरे यातः क्षिप्त्वा कर्माष्टकं क्रमात् ॥ १० ॥
इत्यादि धर्ममाकर्ण्य बहवो भव्यमानवाः । श्रेयःपुरी मलञ्चक्रुः सिद्धतीर्थे शिवप्रदे ॥ ११ ॥
श्रीपुरे मण्डनश्रेष्ठी हस्ताभ्यां वस्तु तोलयन् । अर्जयामास यद् द्रव्यं तदर्द्धं व्ययति वृषे ॥ १२ ॥
हस्ताभ्यां जिननाथस्य पूजां कुर्वन् सुभावतः । शत्रुञ्जये ययौ नन्तुं नाभिभूपतिनन्दनम् ॥ १३ ॥
पूजां श्री ऋषभेशस्य कुर्वन् प्राप्याऽव्ययां विदम् । मुक्तिमत्र गिरेः शृङ्गे ययौ स च तमःक्षयात् ॥१४॥
चन्द्राह्वनगरे चन्द्र-वणिग् वस्तु स्वमौलिना । आनीयानीय विक्रीय निर्वाहं स वणिग् व्यधात् ॥ १५ ॥
मस्तकेन प्रणम्याऽऽदिजिनं शत्रुञ्जयाचले । क्षीणकर्मा ययौ चन्द्रः कल्याणनगरीं क्रमात् ॥ १६ ॥
वीराह्वनगरे वीर-श्रेष्ठिराड् बुद्धिविक्रमात् । अर्जयित्वा धनं शत्रुञ्जये यात्रां व्यधान्मुदा ॥ १७ ॥
बुद्धया श्रीजिननाथार्चां भङ्गिभिर्बहुभिः सदा । कुर्वन् शत्रुञ्जये प्राप पञ्चमं ज्ञानमन्यदा ॥ १८ ॥
क्रमाद् भूरिजनान् जैनधर्मे प्रबोधयन् सदा । शत्रुञ्जये ययौ मोक्षं भूरितपस्विसंयुतः ॥ १९ ॥
इत्यादि बहवो भव्या अभिनन्दनसार्वतः । धर्मं श्रुत्वा ययुर्मुक्तिं सिद्धपर्वतमस्तके ॥ २० ॥
तारापुरे हरो भार-वाहो भूरिभरं वहन् । एकादिविंशतिप्रान्तान् मणान् स्कन्धेऽवहत् परम् ॥ २१ ॥
दिनं प्रति द्रमान् पञ्च-सप्ताष्टौ वाऽर्जयन् सदा । द्रममेकं वृषे पश्च गृहे कोशे द्रमद्वयम् ॥ २२ ॥

॥ ११० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हरो व्ययन् सुखे दुःखे धर्मकृत्यं न मुञ्चते । प्रत्याख्यानं यथाशक्ति तनुते गुरुसाक्षिकम् ॥ २३ ॥
मस्तकेनार्जितां लक्ष्मीं-धर्मकृत्ये व्ययन् हरः । अभिनन्दनसर्वज्ञं सेवते स्म सुभावतः ॥ २४ ॥
अभिनन्दनजिनस्यान्ते दीक्षां लात्वा क्रमात् हरः । सर्वकर्मक्षयान्मुक्तिं ययौ सिद्धमहीधरे ॥ २५ ॥
जम्बूपुरे मधुश्रेष्ठी विक्रीणन् सुमतीर्वराः । वर्यवेषधरोऽनर्घ्ये हट्टे तस्थौ निरन्तरम् ॥ २६ ॥
एकदा तत्र वास्तव्य-श्चम्पकश्रेष्ठिनन्दनः । तत्रेत्याऽवग् तवाट्टेऽत्र क्रयाणं किं न दृश्यते ? ॥ २७ ॥
श्रेष्ठ्यवग् धीः क्रयाणं मे विद्यतेऽट्टे मनोहरम् । तद् यो गृह्णाति नित्यं स सुखवान् जायते खलु ॥२८॥
द्रमान् पञ्चशतीं तस्मै स दत्त्वैकां धियं ललौ । न स्थेयं भवताऽऽस्थेयं द्वयोः कुर्वाणयोः कलिम् ॥२९॥
तदा कश्चिन्नरोऽभ्येत्य श्रेष्ठिनोऽग्रे जगाविति । भवत्पुत्रो ललौ वर्यं पण्यं लाभो भविष्यति ॥ ३० ॥
ततः श्रेष्ठी मधूपान्ते गत्वाऽवक् त्वं वरोऽसि न । यतो धीदानतः पुत्रोऽदण्डयन्मम नन्दनम् ॥३१॥
श्रेष्ठ्यवग् यदि ते नैव रोचते मे क्रयाणकम् । तदा पश्चाद् धियं देहि धनं त्वं स्वं गृहाण भो ! ॥३२॥
अनेन श्रेष्ठिपुत्रेण द्वयोः कलिं वितन्वतोः । स्थेयं न चेद्यदा देयं मह्यं दशशतीं द्रमान् ॥ ३३ ॥
चम्पकः प्रतिपद्येति दत्त्वा पश्चाद् धियं च ताम् । लात्वा स्वं स्वं ययौ स्वीय-गृहे नन्दनसंयुतः ॥३४॥
मन्त्रिणः सेल्लहस्तस्य सुनोर्वितन्वतोः कलिम् । पार्श्वेऽस्थात् श्रेष्ठिसूर्याव-त्ताभ्यां साक्षीकृतः स च ॥३५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुर्वाणौ कलहं मन्त्रि-सेल्लहस्तसुतौ क्रमात् । गत्वा भूपान्तिके दोषं मिथो जजल्पतुस्तदा ॥ ३६ ॥
आकारितस्तदा साक्षी द्वाभ्यां श्रेष्ठ्यङ्गजस्तदा । मन्त्रिसूनोव्यधात् पक्षं सेल्लहस्तोऽरुषत्तदा ॥ ३७ ॥
सेल्लहस्तोऽथ भूपान्तान् छलेन चम्पकं क्रमात् । दण्डयामास भूयिष्ठ-पञ्चाया अपहारतः ॥ ३८ ॥
ततो भूरिधनं दत्त्वा धीदाय चम्पको धियम् । लात्वा तस्यौ त्रिके मार्गे धीदप्रोक्ते प्रमोदतः ॥ ३९ ॥
चम्पकस्त्रिकमार्गे तु तिष्ठन् पृच्छति मार्गगान् । भवद्भिर्वीक्षितं दृष्टं किं किं सम्प्रति जल्पताम् ॥ ४० ॥
एकः पान्थो जगौ लब्धो मयैकः प्रस्तरोऽधुना । रोचते यदि ते लाहि दत्त्वा द्रमाष्टकं मम ॥ ४१ ॥
पथिकाय द्रमानष्टौ वितीर्य चम्पकस्तदा । ग्रहीत्वा प्रस्तरं तं च समाययौ स्वमन्दिरे ॥ ४२ ॥
तस्मात् प्रस्तरतः कोटि-द्रमानासाद्य विक्रयात् । महेभ्यो राजमान्योऽभूत् चम्पकश्रेष्ठिनन्दनः ॥ ४३ ॥
मृत्युं गतेऽथ जनके चम्पको गृहनायकः । अभिनन्दनसर्वज्ञ-पार्श्वे जैनं वृषं ललौ ॥ ४४ ॥
क्रमात् स्वसूनवे गेह-भारं वितीर्य रङ्गतः । अभिनन्दनसार्वान्ते संयमं प्राप्तवान् ध्रुवम् ॥ ४५ ॥
गुरूपान्ते वृषं श्रुत्वा मधुः श्रीजिनपूजनम् । कुर्वन्नुपार्जयामास पुण्यं मुक्तिगमोचितम् ॥ ४६ ॥
धर्मिणां धर्मधिषणां कर्मिणां कर्मशेमुषीम् । मधुश्रेष्ठी ददन् नित्यं श्लाघ्योऽजनि नृपादिषु ॥ ४७ ॥
क्रमान्मधुर्जिनोपान्ते लात्वा दीक्षां दरांद्गवः (दराद्गतः)। साधुना चन्दनेनाऽमा विहारं तनुते मुदा ॥४८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गत्वा शत्रुञ्जये तीर्थे कृत्वा तीव्रं तपः पुनः । चन्दनो मधुना सार्द्धं केवलज्ञानमाप्तवान् ॥ ४९ ॥

॥ श्री सुमतिजिनस्य शत्रुञ्जयसमवसृतिस्वरूपम् ॥

सुमतिस्तीर्थकृद् भव्य-जीवान् धर्मे विबोधयन् । कोटाकोटिसुरैः सेव्यः सिद्धाद्रौ समवासरत् ॥ १ ॥

तत्र स्थिते प्रभौ वाचं-यमाः लक्षद्वयप्रमाः । क्षीणकर्माष्टका मुक्ति नगरीं समुपागमन् ॥ २ ॥

व्ययन् धर्मे धनं जीवो न्यायमार्गार्जितं खलु । लभते शाश्वतं शर्म कुन्तलश्रेष्ठिवत् क्रमात् ॥ ३ ॥

पद्मानन्दपुरे पद्म-नाभो वणिगभूद्वरः । तस्य पत्नी कलादेवी कलासु कुशला किल ॥ ४ ॥

व्यवसायं वितन्वानः श्रेष्ठी लक्षं द्रमान् क्रमात् । अर्जयामास नो धर्मे व्ययति स्म च कर्हिचित् ॥ ५ ॥

तस्याभून्नन्दनश्चन्द्र-नामा मञ्जुलविग्रहः । ताते मृतेऽभवत् स्वामी विभवस्यासमस्य स ॥ ६ ॥

चन्द्रस्याभूत् क्रमाद् द्रव्यं लक्षद्वयमितं स्फुटम् । मृते तस्मिन् सुतो लक्ष-त्रयस्वामी मनोऽजनि ॥ ७ ॥

मने मृते च तत्पुत्रः सिंहाह्वोऽजनि सुन्दरः । तस्याभवच्चतुर्लक्ष-प्रतिमो विभवः क्रमात् ॥ ८ ॥

सिंहे मृत्युंगते हस्ति-नामाऽजनिष्ट तत्सुतः । पञ्चलक्षद्रमस्वामी सोऽप्यभूदर्जयन् धनम् ॥ ९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्याऽजनि प्रिया गङ्गा-देवी गङ्गेव निर्मला । गङ्गा वक्ति प्रियेदानीं धर्मे व्यय धनं सदा ॥ १० ॥
* धर्मकृत्येषु या लक्ष्मी स्थाप्यते साऽतिसुन्दरा । अन्याऽवकेशभूमीव लक्ष्मीवान्नैव शस्यते ॥ ११ ॥ 卐
* यतः–' अधः क्षिपन्ति कृपणा वित्तं तत्र यियासवः । सन्तस्तु गुरुचैत्यादौ तदुच्चैः फलकाङ्क्षिणः ' ॥१२॥ 卐
एकदा श्रीगुरूपान्ते हस्ति नत्वा गुरुक्रमौ । धर्मं श्रोतुमुपाविष्टो यावत्तावद् गुरुर्जगौ ॥ १३ ॥
* अभयं सुपत्तदाणं अणुकंपा-उचिअ-कित्तिदाणं च । दोहिवि मुक्खो भणिओ तिन्निवि भोगाइअं दिंति ॥१४॥ 卐
* न कयं दीणुद्धरणं न कयं साहम्मिआण वच्छल्लं । हिअयम्मि वीयराओ न धारिओ हारिओ जम्मो ॥१५॥ 卐
* व्याजे स्याद् द्विगुणं वित्तं व्यवसाये चतुर्गुणम् । क्षेत्रे शतगुणं प्रोक्तं पात्रेऽनन्तगुणं भवेत् ॥ १६ ॥ 卐
श्रुत्वा धर्मं जगौ हस्ति मया जिननतिं विना । नो भोक्तव्यं पयः पेयं शयितव्यं कदाचन ॥ १७ ॥
सोऽप्रणम्यैकदा सार्वं भोक्तुं यावदुपाविशत् । तावत् पत्नी जगौ स्वामिन् ! न नतोऽद्य त्वया जिनः ॥१८॥
हस्तेऽथाभ्युच्छिते(ष्टे)पत्नी प्राह हस्तं पवित्रय । हस्यवग् धावने पाणे-र्घृतं याति च तत्स्थितम् ॥ १९ ॥
स्थगयित्वा शयं गत्वा जिनौकसि जिनं स च । नत्वा यावच्चचालाऽऽशु पश्चात्तावत् सुरो जगौ ॥ २० ॥
यक्षोऽहं गोमुखस्तुष्ट-स्तुभ्यं जिनेन्द्रभक्तितः । वरं याचस्व चित्तेष्टं दास्येऽदस्तव साम्प्रतम् ॥ २१ ॥
श्रेष्ठयवग् गेहिनीं पृष्ट्वा मार्गयिष्यामि वाञ्छितम् । ततो हस्तिस्तथावस्थो गत्वा भार्यान्तिके जगौ ॥२२॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तुष्टो मे गोमुखो यक्षः किं याचेऽहं प्रिये ! वद ? । प्राणप्रियाऽऽह याचस्व सद्बुद्धिं यक्षसन्निधौ ॥२३॥
याचित्वा सुमतिं यक्षात् श्रेष्ठ्यैत्य सदने जगौ । आनयाम्भः शयं प्रक्षा-लयिष्यामि प्रियोत्तमे ! ॥ २४ ॥
प्रियाऽभाणीद् घृतं हस्त-लग्नं तव गमिष्यति । हस्यत्यवग् न शयास्यांह्रीन्(न) प्रक्षाल्याद्म्यहं ननु ॥२५॥
पत्नी दध्यावयं कान्तो जातोऽस्ति मतिमाग् मम । प्रतिक्षाल्य ततो हस्तं हस्तिः प्रास्फेटयद् घृतम् ॥२६॥
इतस्तत्र पुरे राजा स्वकारितसरोवरे । संस्थाप्य स्तम्भमाहेति पौराणां पुरतस्तदा ॥ २७ ॥
यो ना पालिस्थितः स्तम्भं गुणेन वेष्टयिष्यति । तोलयिष्यति पट्टेभं निजबुद्धिप्रपञ्चतः ॥ २८ ॥
मन्त्रिमुख्यपदं तस्मै दास्येऽहं मानदानतः । हस्तिः श्रुत्वेति भूपेन समं सरोवरे ययौ ॥ २९ ॥
लम्बां रज्जुं सरःपालौ मुक्त्वाऽऽदौ परितस्तदा । शये लात्वैकरज्जुं तं द्वितीयं कर्षयन् पुनः ॥ ३० ॥
सरःकण्ठस्थितो हस्तिः स्तम्भं बबन्ध रज्जुना । तदा सन्मानयामास राजा तं हस्तिनैगमम् ॥ ३१ ॥
यानमध्यस्थिते पट्ट-गजे तेन कृते तदा । यावन्मात्रं जले मग्नं यानं रेखा कृता तदा ॥ ३२ ॥
उत्तीर्य कुञ्जरं यानं भृत्वाऽश्मभिश्च तान् पुनः । तोलयित्वा च जज्ञौ स कुम्भिभारं प्रमाणतः ॥३३॥युग्मम्॥
ततो ग्रामशतं तस्मै दत्त्वा मन्त्रिपदं पुनः । भूभुजा सत्कृतः सर्व-मन्त्रिमुख्यः सदुत्सवम् ॥ ३४ ॥
राजकार्यं प्रजाकार्यं कुर्वन् हस्तिः सः मन्त्रिराट् । धर्मकृत्यानि सर्वाणि चकार मुक्तिहेतवे ॥ ३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हस्तिमन्त्री त्रिसन्ध्यां तु कुर्वन् पूजां जिनेशितुः । प्रतिक्रान्ति करोति स्मो-भयकालं निरन्तरम् ॥ ३६ ॥
सिद्धाचलादितीर्थेषु प्राप्य सङ्घपतेः पदम् । चकार हस्तिमन्त्रीशो यात्रां भूरिधनव्ययात् ॥ ३७ ॥
अस्मिन्नेव गिरौ सिद्ध-ध्यानं कुर्वन् स मन्त्रिराट् । सम्प्राप्य केवलज्ञानं ययौ मुक्तिपुरीं क्रमात् ॥ ३८ ॥
धर्मोपदेशमित्यादि दत्त्वा तत्र महीधरे । सुमतिस्तीर्थकृच्चक्रे विहारमन्यनीवृति ॥ ३९ ॥
एवं सुमतितीर्थेशो वारान् सहस्रशः क्रमात् । सिद्धाद्रौ समवासार्षीद् भव्याङ्गिबोधहेतवे ॥ ४० ॥

॥ श्री पद्मप्रभस्य शत्रुञ्जयसमवसृतिस्वरूपम् ॥

कौशाम्ब्यां पुरि भूपस्य धरस्य शासतो महीम् । सुसीमा गेहिनी शुद्ध-शीलमाणिक्यशालिनी ॥ १ ॥
इतो ग्रैवेयकाद् देव-श्च्युत्वा धरमहीपतेः । सहचर्याः सुसीमाया उदरेऽवातरन्निशि ॥ २ ॥
तदा राज्ञी महास्वप्नान् चतुर्दशमितान् वरान् । मुखे प्रविशतोऽपश्यन् निशीथसमये मुदा ॥ ३ ॥
यतः-"गयवसह-सीह-अभिसेय-दामससिदिणयरं झयं कुंभं । पउमसरसागरविमाण-भवणरयणुच्चयसिहिं च" ॥
जन्म जन्मोत्सवं राज्य-प्राप्तिदीक्षाग्रहौ पुनः । ज्ञानप्राप्तिस्वरूपं च प्रोच्यान्येतानि कोविदैः ॥ ५ ॥

For Private and Personal Use Only

पद्मप्रभप्रभुः पृथ्वीं क्रमाभ्यां पावयन् क्रमात् । भूरिसाधुयुतः शत्रु-ञ्जयेऽथ समवासरत् ॥ ६ ॥
तत्र द्वादश पर्षत्सु-पविष्टासु यथाक्रमम् । पद्मप्रभोऽतिदिशति देशनां भविनां पुरः ॥ ७ ॥
सुपात्रेभ्यो ददद्दानं भव्यजीवः सदादरात् । धर्म्मं श्राद्ध इवाप्नोति कल्याणकमलां किल ॥ ८ ॥
तथाहि-अयोध्यायामभूद्धर्म-श्रेष्ठी पत्नी मनोरमा । पुत्रः पद्मरथो धर्म्म-कर्मैककरणादरः ॥ ९ ॥
श्रेष्ठी प्रोवाच पुत्राग्रे श्रीरिक्तो भाति नो नरः । तेनान्यविषये गत्वाऽऽनेष्यामि विभवं बहुम् ॥ १० ॥
* यतः-"जाई रूवं विज्जा तिन्नि वि निवडंतु कंदरे विवरे । अत्थुच्चिय परिवड्ढउ जेण गुणा पायडा हुंति ॥ ११ ॥卐
रूप्यकाञ्चनमञ्जिष्ठा-मुख्यभूरिक्रयाणकैः । भृत्वाऽनोऽह्नि शुभे धर्मोऽचालीदन्यपुरं प्रति ॥ १२ ॥
मार्गे गच्छन् कमाद्धर्म आयातांस्तस्करान् बहून् । निरीक्ष्य सम्मुखं गत्वा तेषां नतिं व्यधाद्धुरि ॥ १३ ॥
हसन्तस्तस्कराः प्रोचु-र्भो वणिग् ! मायिकोत्तम ! । यतः आदौ समेत्याऽस्मान्नमश्चक्रे मलिम्लुचान् ॥ १४ ॥
* यतः—" मायासीलह माणुसह किमु पतीज ण जाई । नीलकंठ महुरं लवइ सविषभुयंगम खाइ " ॥ १५ ॥卐
श्रेष्ठ्याह यस्य यद्वस्तु ग्रहिष्यति बलादिह । स परत्र गतो लक्ष-कोटिगुणं च दास्यति ॥ १६ ॥
* यतः-वहमारणअब्भक्खाण-दाणपरधणविलोवणाईणं । सव्वजहन्नो उदओ दसगुणिओ इक्कसि कयाणं ॥ १७ ॥卐
* तिव्वयरे उ पओसे सयगुणिओ सयसहस्सकोडिगुणो । कोडाकोडिगुणो वा हुज्ज विवागो बहुतरो वा ॥१८॥卐

For Private and Personal Use Only

हसन्तो जगदुः स्तेना अस्मभ्यं वस्तु देहि भो ! । इहैव दास्यते वस्तु तुभ्यमस्माभिरञ्जसा ॥ १९ ॥
श्रेष्ठयवक् कोऽत्र साक्ष्यस्ति यत् साक्षीं पूरयिष्यति । चौराः प्रोचुरयं साक्षी मार्जारोऽरण्यवासकः ॥ २० ॥
ततो वस्त्वखिलं त्यक्त्वा मणयित्वा स नैगमः । तस्करेभ्यो वितीर्याथ नमश्चक्रे स धीरवाग् ॥ २१ ॥
हसन्तस्तस्करा वस्तु गृहीत्वा श्रीपुरे ययुः । वणिक् छन्नं चलंस्तत्र नगरे समुपेयिवान् ॥ २२ ॥
मिलित्वा भूपतेर्धर्मः प्राहेति त्वं प्रजापतिः । अशरणस्य शरणं शिष्टसङ्ग्रहकारकः ॥ २३ ॥
दुष्टस्य दमको दीन-दुःस्थानाथादिपालकः । दाता भोक्ता विवेकी त्वं चिरं नन्द चिरं जय ॥ २४ ॥
राजाऽभाणीद् वणिक् ! किं ते कार्यं सम्प्रति विद्यते । धर्म्म आचष्ट मे वस्तु गृहीतं तस्करैः पथि ॥ २५ ॥
ततो भूपतिराकार्य मन्त्रीशान् प्रत्यवग् दृढम् । अस्य वस्तु गृहीतं यैस्तान् विलोक्याऽर्प्यतां च तत् ॥ २६ ॥
ततस्ते मन्त्रिणोऽभ्येत्य प्रोचुः क्व सन्ति तस्कराः ? । धर्मश्चौरगृहं तेभ्यो दर्शयामास तत्क्षणात् ॥ २७ ॥
ततस्तत्र स्थिताश्चौराः प्रोक्ता मन्त्रीश्वरैरिति । युष्माभिरस्य यद्वस्तु गृहीतं तत् समर्प्यताम् ॥ २८ ॥
स्तेनास्ते जगदुः स्तैन्यं वयं कुर्मः कदापि न । यद्यस्माभिर्गृहीतं चेद् वस्तु साक्ष्यस्ति कोऽत्र च ॥ २९ ॥
प्रोचुर्मन्त्रीश्वराः धर्मं साक्षिणं त्वमिहानय । ततो धर्म्मोऽऽनयत्तत्र मार्जारं कृष्णदेहभम् ॥ ३० ॥
तदा ते तस्कराः प्रोचुः सोऽभूद् रक्ततनुच्छविः । तेनायं वक्ति कूटं तु ग्रहीतुं मे धनं ध्रुवम् ॥ ३१ ॥

ततो मन्त्रीश्वराः प्रोचु र्भो ! स्तेना यूयकं ध्रुवम् । धनं जगृहिथाऽस्यत्रा-र्पयतास्मै ततः किल ॥ ३२ ॥
ततस्तान् कुट्टयित्वाऽलं मन्त्रीशास्तस्य तद् धनम् । निखिलं दापयामासु-श्चौरेभ्यः प्रसभं तदा ॥ ३३ ॥
ततस्ते तस्करा लक्ष्मी-हरणान्मेदिनीभुजा । स्वदेशं त्याजिता धर्मः श्रेष्ठी सन्मानितः पुनः ॥ ३४ ॥
धर्मो द्विगुणमूल्येन तद्वस्तु निखिलं तदा । विक्रीय टङ्कान् लक्ष मर्जयामासः क्रमतः ॥ ३५ ॥
क्षेत्रेषु सप्तसु ततो व्ययन् स्वं विभवं तदा । धर्मश्चकार सद्धर्म्मं प्रतिपन्नं पुरापि यत् ॥ ३६ ॥
※ यतः–‘ वरमग्गिम्मि पवेसो वरं विसुद्धेण कम्मुणा मरणं । मा गहिअव्वयभंगो मा जीअं खलियसीलस्स’ ॥३७॥ 卐
अर्चयित्वाऽन्यदा देवं ध्यानं धर्मस्य कुर्वतः । उत्पन्नं केवलज्ञानं सर्वविश्वप्रकाशकम् ॥ ३८ ॥
देवतादत्तलिङ्गः स निविष्टः स्वर्णविष्टरे । भव्येभ्यः प्रददौ धर्मो-पदेशं शिवशर्मदम् ॥ ३९ ॥
स धर्मः केवली भव्यान् बोधयन् भूरिशो भुवि । भूरिसाधुयुतः शत्रुञ्जये तीर्थे समागमत् ॥ ४० ॥
सहस्रसाधुसंयुक्तः स धर्मः केवली तदा । शत्रुञ्जयेऽत्र कल्याण-पुरीमेयुः क्रमाच्च ते ॥ ४१ ॥
इत्यादिदेशनां पद्म-प्रभस्याकर्ण्य शर्मदाम् । अनेके भविनः स्वर्गे मुक्तिपुर्यां ययुस्तदा ॥ ४२ ॥

For Private and Personal Use Only

॥ श्री सुपार्श्वजिन-कथा ॥

वाणारस्यां प्रतिष्ठस्य भूपस्य पृथिवी प्रिया । प्रासूत तनयं वर्य-रूपलक्षणलक्षितम् ॥ १ ॥

शक्रपितृकृते जन्मोत्सवे प्रतिष्ठभूपतिः । सुपार्श्व इति नामाऽदात् सूनोः सज्जनसाक्षिकम् ॥ २ ॥

राज्यं प्राप्य क्रमात्त्यक्त्वा दीक्षां लात्वा तमःक्षयात् । प्राप्तज्ञानः प्रभुर्भव्य-बोधाय व्यहरद् भुवि ॥ ३ ॥

अत्र सुपार्श्वचरित्रं ज्ञान-प्राप्ति यावद् वाच्यम् ।

सततं विहरन् पृथ्व्या-मन्येद्युः सिद्धपर्वते । बोधाय भव्यजीवानां सुपार्श्वः समवासरत् ॥ ४ ॥

तत्र सुपार्श्वतीर्थेशो मेघगम्भीरघोषया । वाण्या धर्मोपदेशं तु प्रददौ मुक्तिशर्मदम् ॥ ५ ॥

* चरिअं च कप्पिअं च आहरणं दुविहमेव नायव्वं । भव्वजीवबोहत्थं इंधणमिव ओअणट्ठाए ॥ ६ ॥卐

हस्ती बद्धो यथा दुःखी मुक्तः स्यात् सुखवान् यथा । तथैव कर्मणा जीवो जायते जगति ध्रुवम् ॥ ७ ॥

भीमघोषाभिधारण्ये सप्तशत्या करेणुभिः । युक्तो मतङ्गजो मत्तः सल्लकीर्भक्षयन्नभूत् ॥ ८ ॥

तस्योपान्तेऽन्यदाऽभ्येत्योन्दरः प्राह गजाधिपम् । यदि ते रोचते सेवां तदा करोम्यहं सदा ॥ ९ ॥

अहं ते रक्षणं कुर्वे दुष्टारातिसमीपतः । मया तु रक्षिताः सिंहा-दयः सत्त्वा अनेकशः ॥ १० ॥

हसन्निभो जगौ त्वं चेन्मां रक्षसि कुकष्टतः । तदाऽस्माकं समं कार्यं सिद्धमुन्दर ! वेगतः ॥ ११ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उन्दरोऽवक् कदाचित् स्यात् रक्षको महतां लघुः । रक्षितुं नहि शक्येत महतापि लघोः क्वचित् ॥ १२ ॥
हसन् हस्ती जगौ विघ्ने पतितं मामवेर्यदा । तदाऽहं त्वां वरं मन्ये भृत्यं विश्वोपकारकम् ॥ १३ ॥
भक्षयन् सल्लकीर्भ्राम्यन् स्वेच्छया सर्वतो वने । पाशे व्याधकृते हस्ती न्यपतत् कर्मयोगतः ॥ १४ ॥
बिभ्यन्मृत्युभयाद्धस्ती निर्गन्तुं पाशतो दिशः । ततो विलोकयामास पाशच्छेदनहेतवे ॥ १५ ॥
तदोन्दरः समागत्य नत्वा गजं जगाविति । स्वामी चतुःपदेषु त्व-मस्यतो मे प्रभुः पुनः ॥ १६ ॥
त्वां व्याधाः प्रहनिष्यन्ति तेनातो निस्सराऽधुना । हस्त्यवक् पाशतोऽमुष्मात् छुट्टनं दुश्शकं मम ॥ १७ ॥
यदि शक्तिस्तवास्तीह छोट्टने मम साम्प्रतम् । तदोद्यमं कुरुष्व त्वं सुन्दरोत्तम ! वेगतः ॥ १८ ॥
ततः आखुर्बहूनाऽऽखून् मेलयित्वा क्षणात्तदा । पाशमार्द्रं व्यधादास्य-थूत्कृतेनाऽम्भसेव सः ॥ १९ ॥
दन्तैश्च त्रोटयासास पाशमाखुस्तथा तदा । यथाऽऽसन् शतशः खण्डाः स्वस्थोऽभवदतो गजः ॥ २० ॥
निर्गत्य पाशतो हस्ती सर्वानाखूंस्तदा द्रुतम् । धान्यौघदर्शनेनैव प्रीणयामास सादरम् ॥ २१ ॥
※ एवं गजसमो जीवो मनो व्याधसमं मतम् । व्याधपाशोपमं कर्म्म भवोऽरण्यसमः पुनः ॥ २२ ॥卐
※ जीवः कुमनसा बद्धः शुक्लध्यानाऽऽखुना पुनः । मोचितः सुखवान् सद्यो जायते सामयोनिवत् ॥ २३ ॥卐
एष दृष्टान्तः कल्पितोऽस्ति "चरिअं च कप्पिअं वा आहरणं दुविहमेव नायव्वं० ॥"

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत एव विधातव्यं सन्मार्गे देहिना मनः । मन एव नयत्याशु जीवं श्वभ्रे शिवेऽपि च ॥ २४ ॥
इत्यादिदेशनां श्रुत्वा भविनस्तत्र भूरिशः । दीक्षां लात्वा ययुर्मुक्तिं सर्वकर्मव्रजक्षयात् ॥ २५ ॥

卐 卐 卐 卐

॥ श्री चन्द्रप्रभजिनस्य समवसृतिस्वरूपम् ॥

चन्द्रपुर्यां महीशस्य महासेनस्य लक्ष(क्ष्म)णा । पत्नी शीलगुणेनाऽऽप रेखां सर्वाऽबलासु च ॥ १ ॥
चतुर्दशमहास्वप्न सूचितः शोभनेऽहनि । सुतो लक्ष(क्ष्म)णयाऽसावि सर्वलक्षणलक्षितः ॥ २ ॥
इन्द्रपितृकृतजन्मोत्सवादिज्ञानप्राप्तिपर्यन्तं वाच्यम् ।
चन्द्रप्रभप्रभुः पृथ्वीं पावयन् पदरेणुभिः । शत्रुञ्जये महातीर्थे सुराच्र्यः समवासरत् ॥ ३ ॥
तत्र द्वादशपर्षत्सु-पविष्टेषु सुरादिषु । वाण्या योजनगामिन्या चन्द्रप्रभो जगाविति ॥ ४ ॥
क्षेत्रेषु सप्तसु स्वीय-श्रियं व्ययन् सदाऽऽदरात् । वीरसेनेभ्यवन् मुक्ति-सातवान् जायते भवी ॥ ५ ॥
रामपुर्यां महेभ्यस्य वीरसेनस्य सन्मतेः । चन्द्रकेत्वभिधः पुत्रो-ऽजनि मन्मथरूपवान् ॥ ६ ॥
पित्राऽथ पाठितो धर्म-कर्मादिशास्त्रपद्धतिम् । चकार धर्मकृत्यानि तातेन सह संततम् ॥ ७ ॥

For Private and Personal Use Only

श्रीपुरे मदनश्रेष्ठि-पुत्रीं त्रैलोक्यसुन्दरीम् । परिणीन्ये शुभे लग्ने चन्द्रकेतुः सदुत्सवम् ॥ ८ ॥
गेहकृत्यं वितन्वाना त्रैलोक्यसुन्दरी सदा । वितताना प्रतिक्रान्ति सन्ध्ययोर्द्वितये किल ॥ ९ ॥
गृहेऽन्यदा स्नुषा दीपं यावच्चक्रे दिनात्यये । तावद्दीपादधः पेतु-स्तैलस्य बिन्दवो नव ॥ १० ॥
मेदिनीपतितान् बिन्दून् दृष्ट्वाश्रेष्ठी उपानहोः । सद्यो विलेपयामास तैलव्रजनभीतितः ॥ ११ ॥
स्नुषा दध्यावयं श्रेष्ठी कृपणः किं करिष्यति ? । व्रतं द्वादशमं पाल-यिष्यतेऽत्र मया कथम् ? ॥ १२ ॥
मया सप्तसु क्षेत्रेषु धनं चेद् व्ययते मनाक् । तदाऽसौ श्वसुरो मर्ता-ऽथवा मां मारयिष्यति ॥ १३ ॥
परीक्षार्थं प्रगे सुप्तां स्नुषां वीक्ष्य स नैगमः । पप्रच्छ किं स्नुषे ! सुप्ताऽधुना दुःष्यति किं ज्वरः ? ॥ १४ ॥
स्नुषाऽवग् विद्यतेऽत्यन्तं शिरोऽर्त्तिः प्राणहारिका । अचीकरत् ततः श्रेष्ठ्यौ-षधानि भूरिशस्तदा ॥ १५ ॥
वधूः प्राह नहीदृक्षै-रौषधैर्याति वेदना । श्रेष्ठ्यभाणीच्च कीदृक्षैः शिरोऽर्त्तिर्व्रजति क्षयम् ॥ १६ ॥
वध्ववग् मे शिरःपीडा साम्प्रतं वर्द्धतेतराम् । मुक्ताचूर्णैः शिरोलिप्तैः शिरोऽर्त्तिर्मे क्षयं व्रजेत् ॥ १७ ॥
जाता(त्य)मुक्तास्ततः श्रेष्ठी नीत्वा तत्राऽश्मना द्रुतम् । चूर्णीकर्तुं यदा लग्न-स्तदोचे स्नुषया पिता ॥ १८ ॥
मा मुक्ताश्चूर्णयेदानीं शिरोऽर्त्तिर्मे गता क्षयम् । श्रेष्ठ्याह किं स्नुषे ! शीर्ष वेदना त्वरितं ययौ ॥ १९ ॥
वधूः प्राह तवौदार्य-गुणौषधिनिरीक्षणात् । शिरोऽर्त्तिर्मे ययौ सद्यो ध्वान्तं रविकरादिव ॥ २० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूमीपतिततैलस्य बिन्दून् गृह्णन् मयेक्षितः । अतः कृत्वा मिषमिदं परीक्षा ते कृता पितः ! ॥ २१ ॥
श्रेष्ठ्याहाऽव्यवहारेण यद्याति तद् वृथाऽखिलम् । व्यवहारे तु भूयिष्ठो विभवो व्ययते ध्रुवम् ॥ २२ ॥
विशेषाद्धर्मकृत्येषु व्ययंल्लक्ष्मीमहं सदा । खेदं कुर्वे मनाग् नैव व्ययत्सु नन्दनादिषु ॥ २३ ॥
ततो वधूर्जगौ तात ! त्वं धन्यः पुण्यवानसि । यतस्तवेदृशी बुद्धिर्धर्मकर्म्मणि सुन्दरे ॥ २४ ॥
सद्व्ययः क्रियते सद्भिः सदा सद्गतिहेतवे । असद्व्ययो विधीयेत मूढैर्दुर्गतिहेतवे ॥ २५ ॥
अन्यायन्यायभेदेन चतुर्भङ्गी धने भवेत् । अन्त्यः सर्वोत्तमो भङ्गो न्यायार्जितस्य सद्व्ययात् ॥ २६ ॥
श्रेष्ठिस्नुषे ततो याव-ज्जीवं लक्ष्मीं लसद्व्ययात् । सफलीचक्रतुः सप्त-क्षेत्रेषु विभवव्ययात् ॥ २७ ॥
प्रान्ते श्रेष्ठिस्नुषे मृत्वा-ऽऽदिमे स्वर्भवतां सुरौ । ततश्च्युतौ धरापुर्यां भीमभूपाङ्गजौ पुनः ॥ २८ ॥
द्वावपि भ्रातरौ प्रीति-वन्तौ गुर्वन्तिके गतौ । धर्मं दयामयं श्रुत्वा ललतुः संयमं पुनः ॥ २९ ॥
पालयित्वा व्रतं भूरि वर्षाण्याप्तविदौ क्रमात् । महोदयपुरीं सद्यो-ऽलञ्चक्रतुः सहोदरौ ॥ ३० ॥
पुण्योपदेशमित्यादि श्रुत्वा भूरिजनास्तदा । व्रतं लात्वा शिवं जग्मु-स्तीर्थे विमलपर्वते ॥ ३१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री सुविधिजिनस्य समागमनस्वरूपम् ॥

काकन्द्यां पुरि सुग्रीव-भूपस्य न्यायशालिनः । मार्गस्यासितपञ्चम्यां रामाऽसूत सुतं प्रिया ॥ १ ॥

इन्द्रजन्मोत्सवकरणादि ज्ञानप्राप्तिं यावद्वाच्यम् ।

बोधयन् भविनो जीवान्-सुविधिर्जिननायकः । सिद्धाद्रौ समवासार्षीत् भूरिसाधुसमन्वितः ॥ २ ॥

तत्र द्वादशसंसत्सु-पविष्टासु जिनेश्वरः । धर्मोपदेशनां दातु-मारेभे शिवशर्मणे ॥ ३ ॥

अन्धीभूताऽबला वृद्धा वैद्योक्तौषधयोगतः । दिव्यनेत्रा यथा जाता तथा भव्यो गुरूक्तितः ॥ ४ ॥

मीनाह्वनगरे भीम-वैद्यस्य सूनवस्त्रयः । काम-राम-मुकुन्दाह्वा बभूवुः श्रीप्रियाभवाः ॥ ५ ॥

त्रयोपि पाठिता विद्याः पित्रा पुत्रा धनार्जनात् । धन–चन्द्र–वनेभ्यानां नन्दिनीः परिणायिताः ॥ ६ ॥

श्वश्र्वा समं स्नुषाः सर्वाः कुर्वन्त्यः कलहं सदा । क्षणमेकं न विश्रामं लेभिरे कारुलोकवत् ॥ ७ ॥

कुर्वत्सु तेषु कलहं वृद्धाऽथैका नितम्बिनी । प्रष्टुकामौषधं वैद्यो-पान्तेऽभ्येत्य जगावदः ॥ ८ ॥

अन्धत्वस्फेटकं दृष्टयो-रौषधं रुचिरं मम । वैद्यराड् यच्छ कृत्वा त्वं प्रसादं मयि साम्प्रतम् ॥ ९ ॥

पुनः पुनस्तयेत्युक्ते रुष्टो वैद्यो जगाविति । अस्याऽर्कस्य क्षिप क्षीरं दृष्टयोरन्धत्वभिद् ध्रुवम् ॥ १० ॥

तया तथा कृतेऽर्कस्य क्षीरक्षेपविधानतः । दिव्यनेत्राऽभवद् दृष्टि वैद्यप्रोक्तविधेस्तदा ॥ ११ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

टङ्कानां शतं लात्वा वृद्धा नारी कुटुम्बयुग् । वैद्योपान्ते समेत्यावक् प्रसद्यैतद्धनं वृणु ॥ १२ ॥
अहं त्वया कृता दिव्य-चक्षुः स्वौषधदानतः । सत्योऽसि त्वं महान् वैद्यः परोपकृतिकारकः ॥ १३ ॥
वैद्यो जगौ मया कुत्र ददे तवौषधं वद । वृद्धाऽऽह भवता प्रोक्त-मर्कस्य क्षीरमौषधम् ॥ १४ ॥
वृद्धादत्तं धनं लात्वा वैद्यस्तस्य तरोरधः । खनित्वा घृतसम्पूर्णं भाजनमाप्तवान् रहः ॥ १५ ॥
घृतेन तेन लोकानां बहूनामन्धतां दृशोः । स्फेटयित्वा महेभ्योऽभूद् विख्यातो देशमध्यतः ॥ १६ ॥
क्रमात् स वैद्यराट् प्राप्त-वैराग्यो गुरुसन्निधौ । लात्वा व्रतं तपश्चके तीव्रं कर्मरजश्छिदे ॥ १७ ॥
वैद्यपुत्रास्त्रयः पितृ-दत्तरिक्था धनं निजम् । दीनदुःस्थादिलोकेभ्यो ददते सादरं सदा ॥ १८ ॥
ततोऽशेषतमश्छेद कृते वैद्य-तपोधनः । मासे मासे करोति स्म पारणं भवतारणम् ॥ १९ ॥
क्षिप्त्वा सर्वं तमो वैद्यः प्राप्तकेवलवित् क्रमात् । उपविश्य ददौ धर्मो-पदेशमिति देहिने ॥ २० ॥
※ धर्म्मोऽयं धनवल्लभेषु धनदः कामार्थिनां कामदः, सोभाग्यार्थिषु तत्प्रदः किमथवा नानाविकल्पैर्नृणाम् ॥ २१ ॥卐
वैद्यज्ञान्युपदेशेन गुर्वाद्या बहुसाधवः । सम्प्राप्तकेवलज्ञाना ययुर्मुक्तिपुरीं क्रमात् ॥ २२ ॥
श्रुत्वेति जिननाथोक्तं धर्मं भूयिष्ठभाविनः । जिनधर्मं व्रतं चापि तदा प्रपेदिरे सुखम् ॥ २३ ॥
क्षिप्त्वा निःशेषकर्माणि केचित्तत्र यतीश्वराः । अभवन् स्वामिनो मुक्ति-नितम्बिन्या गिरौ क्रमात् ॥ २४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं श्रीसुविधिः सार्वः प्रबोध्य भविनो बहून् । अन्यत्र विजहाराऽथ भव्याङ्गिबोधहेतवे ॥ २५ ॥

॥ श्री शीतलजिनस्य शत्रुञ्जयसमागमनस्वरूपम् ॥

भद्दिलाह्वपुरे वर्यो, भूपो दृढरथोऽजनि । तस्य नन्दाभिधा राज्ञी बभूवाऽनघशीलभाग् ॥ १ ॥
चतुर्दशमहास्वप्न-सूचितो नन्दया सुतः । असावि माघमासस्य, कृष्णस्य द्वादशीतिथौ ॥ २ ॥
शक्रकृतजन्मोत्सव-ज्ञानप्राप्ति यावद्वाच्यम् ।
शीतलतीर्थकृत् कुर्वन्, विहारं वसुधातले । सिद्धाद्रौ समवासार्षी-दनेकसाधुसंयुतः ॥ ३ ॥
तत्राऽऽगतेष्वसङ्ख्येषु, यात्रार्थं भविषु ध्रुवम् । धर्मोपदेशनां चक्रे, शीतलस्तीर्थनायकः ॥ ४ ॥
परिग्रहप्रमाणं तु, यश्चकार धनादिषु । कालनैगमवद् याति, मुक्तिपुर्यां स मानवः ॥ ५ ॥
कुन्तपुर्यां वणिक् कालो, यद् यल्लाति क्रयाणकम् । द्वित्रिचतुर्गुणलाभै-र्विक्रीणीते स्म तत्तदा ॥ ६ ॥
भाग्योदये भवेत् पुंसां पुत्रपौत्रादिकं धनम् । अभाग्यस्योदये दुःखं जायते च भवे भवे ॥ ७ ॥
यथा यथा गृहेऽभ्येति, लक्ष्मीस्तस्य निरन्तरम् । तथा तथा भवेत्तृष्णा वर्द्धमानाऽन्तरिक्षवत् ॥ ८ ॥
* यतः–तृष्णाखानिरगाधेयं, दुष्पूरा केन पूर्यते ? । या महद्भिरपि क्षिप्तैः पूरणैर्वद्धतेतराम् ॥ ९ ॥卐

For Private and Personal Use Only

शत्रुञ्जय
कल्पवृ०
॥ १२८ ॥

अर्जयन् कमलां कालो, विश्रामं लाति नो यदा । तदा रमा प्रिया प्राह कष्टं किं क्रियतेऽधिकम् ? ॥ १० ॥
* यतः–" अर्थानामर्जने दुःख-मर्जितानां च रक्षणे । आये दुःखं व्यये दुःखं, धिग् द्रव्यं दुःखभाजनम् ॥ ११ ॥卐
परत्र गच्छतः कस्य (कैश्चित्) सह याति रमा नहि । तेन श्रीर्व्ययते सप्त-क्षेत्रेषु स्यात् यतः स्थिरा ॥ १२ ॥
एवं बहूपदेशेषु, दत्तेषु प्रियया तदा । कालः स्तोकं धनं नैव, विततार वृषे क्वचित् ॥ १३ ॥
कालेऽन्यदा प्रसुप्तस्य, स्वप्ने श्रीदेवतेत्यवग् । यास्याम्यहं त्वदावासात्, पुण्यं क्षीणं यतस्तव ॥ १४ ॥
इह त्वया न दानादि-धर्मः स्तोकोऽपि निर्ममे । यस्य पुण्यं भवेत्तस्य गृहे तिष्ठाम्यहं सदा ॥ १५ ॥
* यतः–' गुरवो यत्र पूज्यन्ते वित्तं यत्र नयार्जितम् । अदन्तकलहो यत्र तत्र शक्र ! वसाम्यहम् ' ॥ १६ ॥卐
* ' द्यूतपोषी निजद्वेषी धातुवादी सदाऽलसः । आयव्ययम(स्या)नालोची तत्र तिष्ठाम्यहं नहि ' ॥ १७ ॥卐
प्रातः पत्न्याः पुरः प्रोक्ते नैशे वृत्ते श्रियोदिते । प्रिया प्राह मयाऽप्युक्तं व्यय धर्मे धनं प्रिय ! ॥ १८ ॥
अधुना व्ययते लक्ष्मीं दानधर्म्मे पते ! यदि । तदा स्थिरा भवेल्लक्ष्मीः पुण्यबद्धा यतो रमा ॥ १९ ॥
व्ययित्वा निखिलां लक्ष्मी क्षेत्रेषु सप्तसु क्रमात् । रात्रौ स्मृतनमस्कारः सुष्वाप सुखनिद्रया ॥ २० ॥ ॥ १२८ ॥
* यतः–जे कुच्छिएसु दाणं दिंति सुहभोगकारणनिमित्तं । ते कुंजराइ जाया भुंजंति हि दाणजं सोक्खं ॥ २१ ॥卐
* जह खेत्तम्मि सुकिट्ठे वड्ढइ (धन्नं) न तस्स परिहाणी । एवं सुसाहुदाणे विउलं पुण्णं समज्जिणइ ॥ २२ ॥卐

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private and Personal Use Only

* एक्कम्मि जह तलाए गो-सप्पेणं च पाणियं पीयं । सप्पे परिणमइ विसं धेणुसु खीरं समुब्भवइ ॥ २३ ॥卐
* तह निस्सीलसुसीला-दीणं दाणं फलं अफलयं च । होही परम्मि लोए पत्तविसेसेण से पुन्नं ॥ २४ ॥卐

कालेन व्ययितां लक्ष्मीं सर्वां ज्ञात्वा रमासुरी । तत्पुण्यगुणबद्धाऽवक्र श्रिया त्वत्सदनं भृतम् ॥ २५ ॥
एवं तेन धने घस्रे तस्मिँश्च व्ययिते सति । द्वितीयेऽह्नि प्रगे पूर्णं श्रियाऽपश्यत् स्वमन्दिरम् ॥ २६ ॥
एवं विंशतिघस्रान्ते कालोऽभ्येत्यान्तिके: गुरोः । परिग्रहप्रमाणं तु ललावेवं प्रमोदतः ॥ २७ ॥
टङ्कानां चतुःपञ्च सहस्राणि दशालयाः । महिष्योऽष्टौ प्रिया चैका गावो दश वृषा दश ॥ २८ ॥
घोटका विंशतिर्हेम-रूप्ययोः पलसप्ततिम् । इत्याद्यभिग्रहं लात्वा कालः सुखयभवत्तदा ॥ २९ ॥
तदाऽकस्मान् मृते भूपे निष्पुत्रे मन्त्रिपुङ्गवैः । राज्यं दत्तं बलात्तस्मै कालाय लसदुत्सवम् ॥ ३० ॥
कालो राज्ये युगादीश-बिम्बं निवेश्य तत्क्षणात् । स्वयं तु सेवकीभूतः सेवते स्म प्रभुक्रमौ ॥ ३१ ॥
परिग्रहप्रमाणं तु पालयन् कालभूपतिः । जिनभूपधनेनैव व्यधाद् भूरि जिनालयान् ॥ ३२ ॥
कालः स्वं तनयं भीमं स्थापयित्वा निजे पदे । सहस्राष्टवणिग्बाहु-जातैः सह व्रतं ललौ ॥ ३३ ॥
पठित्वा जिनसिद्धान्तं प्राप्य सूरिपदं क्रमात् । भविनो बोधयामास लक्षशो जिनधर्म्मिणः ॥ ३४ ॥
अयुतप्रमितैर्वाचं-यमैर्युक्तः स सूरिराट् । बोधयन् भविनः शत्रुञ्जये शैले समीयिवान् ॥ ३५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्र कर्म क्षयं कृत्वा केवलज्ञानमाप्य च । कालः सूरिर्ययौ मुक्ति भूरिवाचंयमान्वितः ॥ ३६ ॥
एवं धर्मोपदेशेन प्रबोध्य भविनो बहून् । श्रीशीतलो जिनोऽन्यत्र विजहार ततोऽद्रितः ॥ ३७ ॥

॥ श्री श्रेयांसजिनस्य शत्रुञ्जयसमागमनस्वरूपम् ॥

सिंहाभिधे पुरे विष्णु-भूपतेः शासतो महीम् । विष्णुदेवी प्रिया विष्णो-र्लक्ष्मीरिवाभवद्वरा ॥ १ ॥
चतुर्दश-महास्वप्न-सूचितो विष्णुभार्यया । फाल्गुनासितगौरीश-तिथावसावि-नन्दनः ॥ २ ॥
शक्रेण काञ्चनक्ष्माध्रे नीत्वा प्रभुं जनुर्महः । कृत्वा मुक्तोऽन्तिके मातु-र्जग्मे त्रिदशमन्दिरम् ॥ ३ ॥
प्रातः पिता विधायाऽथ जन्मोत्सवं मनोहरम् । श्रेयांसेत्यभिधां सूनोर्ददौ स्वजनसाक्षिकम् ॥ ४ ॥

राज्यप्राप्ति-ज्ञानप्राप्तिं यावत् सम्बन्धोऽत्र स्वयं वाच्यः ।

श्री श्रेयांसो जिनो भव्य-जीवान् भुवि विबोधयन् । सिद्धाद्रौ समवासार्षीद् भूयिष्ठसंयतान्वितः ॥ ५ ॥
तत्र स्थितः प्रभुर्भव्य जीवान् बोधयितुम् दृढम् । पुण्योपदेशमाधातुं प्रावर्त्तत लसद्गिरा ॥ ६ ॥
* देवपूजा गुरूपास्तिः स्वाध्यायः संयमस्तपः । दानं चेति गृहस्थानां षट् कर्माणि दिने दिने ॥ ७ ॥卐
चन्द्राह्वे नगरे चन्द्र-वीरस्य मेदिनीपतेः । चन्द्रावती प्रिया चञ्चच्छीलसौभाग्यवत्यभूत् ॥ ८ ॥

For Private and Personal Use Only

अन्यदा नृपतिर्यावत् सभायां समुपाविशत् । तावच्छुकशुकीयुग्मं कुर्वत् कलिं समागमत् ॥ ९ ॥

किमर्थं क्रियतेऽत्यन्तं, युवाभ्यां कलहोऽधुना । इत्युक्ते भूभुजा शुक्या, प्रोक्तमेष सुतो मम ॥ १० ॥

शुकोऽवग् मम पुत्रोऽय-मेष एव नरेश्वर ! । भूपोऽवग् क्रियते नैव विवादो हितमिच्छता ॥ ११ ॥

※ यतः–" विवादं कुर्वतां पुंसां, पशुनामिव जायते । दुःखं परत्र पातः स्यात् श्वभ्रे शङ्का (सङ्ख्या) सुखे पुनः ।१२।卐

सुतोऽयं युवयोरेष, युवाभ्यां जनितो यतः । स्वकुले कलहो दुःख-दायी स्यादुभयोरपि ॥ १३ ॥

ततो मुक्तविवादः सन्, शुकः पत्नीसुतान्वितः । ययौ युगादिदेवस्य, गृहे तस्थौ समाहितः ॥ १४ ॥

तत्रासन्नप्रदेशे तु, ज्ञानतुङ्गगुरूत्तमान् । नत्वा शृण्वत्सु भव्येषु, धर्मं कीरः समागमत् ॥ १५ ॥

※ श्रीमज्जिनेशनमनं तिलकत्यलीके, वक्षःस्थले विमलमालति सद्विवेकः ।

ताडङ्कति श्रवणयोः सुगुरूपदेश-स्त्यागस्तु कङ्कणति पाणितले सतां हि ॥ १६ ॥卐

※ पूआ पच्चक्खाणं पडिकमणं पोसह-परोवयारो य । पंच पयारा जस्स य न पयारो तस्स संसारे ॥ १७ ॥卐

अर्हत्पूजाफलं ज्ञात्वा, प्रत्यहं बहवो जनाः । समेत्य सदने भावात्, कुर्वते जिनपूजनम् ॥ १८ ॥

तदा शुकोऽपि पत्र्यंङ्गभूशाली दिवसोदये । ढौकयित्वा प्रभोरग्रे, शस्यशीर्षाणि गच्छति ॥ १९ ॥

अर्हत्पूजाप्रभावेण, मृत्वा कीरः समाधिना । चन्द्रवीरस्य पुत्रोऽभूत्, चन्द्रदेवाभिधानतः ॥ २० ॥

अर्हत्पूजाप्रभावेण, मृत्वा शुक्यमरे पुरे । लक्षभूपसुता जाता, सुन्दरी नामतः क्रमात् ॥ २१ ॥
चन्द्रदेवकुमारोऽयं, लक्षभूपतिनन्दिनी । परिणिन्ये शुभे लग्ने, तातस्यादेशतः क्रमात् ॥ २२ ॥
क्रमात् शुकसुतः कीरो मृत्वा पूजाप्रभावतः । चन्द्रदेवकुमारस्य पुत्रोऽभूत् कमलाभिधः ॥ २३ ॥
वीरभूपः सुतं न्यस्य स्वपट्टे गुरुसन्निधौ । दीक्षां लात्वा चकारोग्रं, तपो मुक्तिसुखप्रदम् ॥ २४ ॥
गुरूपान्ते पठन्नित्य-मागमं कोविदोऽजनि । ततः सूरिपदं प्राप्य प्राप ज्ञानमनुत्तरम् ॥ २६ ॥
चन्द्रदेवोऽन्यदा पत्नी-पुत्रयुक्तो दिनोदये । युगादिजिनगेहेऽगाद् नन्तुं श्रीवृषभं प्रभुम् ॥ २६ ॥
केनचिड्ढौकितं शस्य-शीर्षं वीक्ष्य नरेश्वरः । पत्नीपुत्रयुतो मूर्च्छामवाप्य न्यपतत् क्षितौ ॥ २७ ॥
शीतोपचारतः स्वस्थी-कृतो भूपः प्रियादियुग् । स्वं प्राग्भवस्वरूपं च, प्रोवाच मन्त्रिणां पुरः ॥ २८ ॥
अर्हत्पूजाफलं ज्ञात्वा भूपात्तस्माच्च तत्र तु । प्रभुपूजापरा आस-न्ननेके मनुजास्तदा ॥ २९ ॥
पत्नीपुत्रयुतो राजा, पूजयित्वा प्रभुं सदा । अन्नपाने मुखे स्वीये क्षिपत्येवान्यथा न हि ॥ ३० ॥
संसारासारतां मत्वा गुरोरास्याद्धराधवः । वितीर्य सूनवे राज्यं संयमं सप्रियो ललौ ॥ ३१ ॥
तस्मिन्नेव भवे कर्म्म-धांसि दग्ध्वा तपोऽग्निना । चन्द्रदेवयतिः प्राप महोदयपुरं रयात् ॥ ३२ ॥
राज्ञी तप्त्वा तपो गत्वा तृतीये त्रिविषे क्रमात् । प्राप्य मर्त्यभवं मुक्तौ गन्ता सर्वतमःक्षयात् ॥ ३३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कमलः स्वं तनूजातं स्वपट्टे न्यस्य सूत्सवम् । लात्वा दीक्षां ययौ मुक्तिं प्राप्य ज्ञानमनुत्तरम् ॥ ३४ ॥
एवं प्रभोर्गिरं श्रुत्वा भूयांसो भव्यदेहिनः । छित्त्वा निःशेषकर्माणि जग्मुः शत्रुञ्जये शिवम् ॥ ३५ ॥

॥ श्री वासुपूज्यजिनस्य श्रीशत्रुञ्जयतीर्थे समागमनस्वरूपम् ॥

चम्पायां वसुपूज्यस्य भूपस्याऽभूज्जया प्रिया । चतुर्दशमहास्वप्न-सूचितं गर्भमादधौ ॥ १ ॥
फाल्गुनासितमार्त्तण्ड-तिथावुच्चग्रहेष्वथ । जयाऽसूत सुतं वर्य-लक्षणैर्लक्षितं शुभैः ॥ २ ॥
शक्रेण विहिते जन्मो-त्सवे जन्मोत्सवं पिता । कृत्वाऽदात् वासुपूज्येति नाम सूनोः सदुत्सवम् ॥ ३ ॥

अत्र ज्ञानप्राप्तिं यावच्चरित्राद् ज्ञेयं स्व(स्व)यम्—

विहरन्नन्यदा वासु-पूज्यस्तीर्थङ्करो भुवि । सिद्धभूमीधरस्योद्‌र्ध्व-धरणौ समवासरत् ॥ ४ ॥
तत्रानेके जना स्वामि-वाणीं योजनगामिनीम् । सर्वपापच्छिदां श्रोतुं समीयुर्दूरदेशतः ॥ ५ ॥
* तथाहि—प्रासादप्रतिमाधर्म-शालादिपुण्यतः किल । लभन्ते मनुजाः स्वर्गा-पवर्गादिरमां रयात् ॥ ६ ॥卐
* यतः—अङ्गुष्ठमात्रमपि यो बिम्बं कारयति वरम् । वृषभादिमवीरान्त-जिनानां स शिवं श्रयेत् ॥ ७ ॥卐

For Private and Personal Use Only

* अङ्गुष्ठमात्रमपि यः करोति बिम्बं, वीरावसानवृषभादिजिनेश्वराणाम् । 卐
स्वर्गप्रधानविपुलर्द्धिसुखानि भुक्त्वा, पश्चादनुत्तरगतिं लभते स धीरः ॥ ८ ॥
अर्हत्प्रासादबिम्बानि कारयन्ति जनाश्च ये । तेषां स्वर्गादिशर्म स्या-द्धीरभूपकलत्रवत् ॥ ९ ॥
आसंश्चन्द्रपुरे धीर-भूपस्याष्टौ प्रियाः प्रियाः । आसीत्तासु वरा पट्ट-राज्ञी वीरमतिः क्रमात् ॥ १० ॥
जैनधर्मं वितन्वानो-पदेशं ददतीतराम् । पट्टराज्ञ्यन्यराज्ञीभ्य-स्तासां तत्राभवद् गुरुः ॥ ११ ॥
आदौ जिनालयं वर्यं कारयित्वा धनव्ययात् । पट्टराज्ञी ददौ तासा-मुपदेशं शिवप्रदम् ॥ १२ ॥
* आरोग्यभाग्याभ्युदयप्रभुत्वं, सत्त्वं शरीरे स्वजने महत्त्वम् । 卐
तत्त्वं च चित्ते सदने च सम्पत्, सम्पद्यते पुण्यवशेन पुंसाम् ॥ १३ ॥
पट्टराज्ञीजिनावासा-दन्या भूपप्रियाः प्रियाः । अधिकान् स्वान् जिनागारा-नचीकरन् मनोहरान् ॥ १४ ॥
तासां जिनालयान् प्रौढान् वीक्ष्य दध्यौ च सा हृदि । मया मोघाद् ददे धर्मो जैन आसां पुरोऽधुना ॥ १५ ॥
आभिर्ये कारिताः सर्वा(सार्वा)-लया उच्चतरा वराः । ते पतिष्यन्ति चेच्छीघ्रं जायते मे तदा वरम् ॥ १६ ॥
प्रायो विभूतिमन्येषा मालोक्य मानवाः सदा । ईर्ष्यां वितन्वते शश्वत् कर्त्तुं तानि सदादरात् ॥ १७ ॥
एवं दुर्ध्यानतो जात-शूला भूपप्रियाऽऽदिमा । मृता तत्र शुनी जाता वैचित्र्यं कर्मणामहो ! ॥ १८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रविशन्तीं शुनीं तत्र देवमन्दिरमध्यतः । कुट्टयित्वा बहिर्निष्का-शयन्ति मनुजाः सदा ॥ १९ ॥
अकस्मादेकदा बिम्बं प्रभोर्वीक्ष्य प्रगे शुनी । प्राप्य जातिस्मृतिं दृष्ट्वा प्राग्भवं रोदिति ध्रुवम् ॥ २० ॥
कुट्टितापि जनैरश्रु-प्रवाहोन्मोचका सदा । प्रभूवोकोद्वारतोऽन्यत्र न याति कुत्रचित् शुनी ॥ २१ ॥
पुनर्निजं कृतं कर्म परेर्ष्याविहितं शुनी । निन्दन्ती पशुभावत्वात् शक्नोति जल्पितुं नहि ॥ २२ ॥
लोका दध्युः कुतो हेतोः शुनीयं याति न क्वचित् । विना केवलिनं तच्चा-ज्ञानिभिर्ज्ञायते नहि ॥ २३ ॥
इतस्तत्राऽऽगतो ज्ञानी सर्वराज्ञीभिरादरात् । वन्दितः शुश्रुवे धर्मो-पदेशः शिवशर्मदः ॥ २४ ॥
उपदेशोऽत्र । देशनान्ते महीपाल-पत्न्यः पप्रच्छुरादरात् । अस्माकं गुरुणीवीर-मत्युत्पन्नाऽस्ति कुत्र नु ॥ २५ ॥
केवल्यवग् जिनागार-द्वारे तिष्ठति या शुनी । सैव वीरमती मृत्वा जाताऽस्तीर्ष्याविधानतः ॥ २६ ॥
ताभिः प्रोक्तं कथं पुण्य-वती वीरमती शुनी । ज्ञान्यवक् प्राप्यते तिर्यग्भव आर्त्तिविचिन्तनात् ॥ २७ ॥
* यतः—आर्त्ते तिर्यग्गतिस्तथा गतिरधो ध्याने च रौद्रे सदा, धर्मे देवगतिस्तथा भवति हि शुक्ले च जन्मक्षयः ॥ 卐
केवली प्राह यद्यत्रा—गता मामनमत् स्फुटम् । आदिनाथार्चकप्रोक्ता शुनी चेद् वीक्ष्यते त्वथः ॥ २९ ॥
तदा ज्ञेया भवन्तीभिः स्वकीया गुरुणी शुनी । कर्मयोगादियं भाग्य-वती मुक्तिं गमिष्यति ॥ ३० ॥
तत्राऽऽनीता शुनी ताभि-र्गुरूक्तं विदधेऽखिलम् । गुरुः प्राहाऽधुना पुण्यं कुरु तस्माच्छिवं भवेत् ॥ ३१ ॥

For Private and Personal Use Only

ततोऽनशनमादाय शुन्यगात् ताविषे क्रमात् । दिवश्च्युता महावीर-भूपपुत्री भविष्यति ॥ ३२ ॥
शुद्धं धर्मं विधायाऽथ पालयित्वा च संयमम् । गमिष्यति शुनीजीवो महोदयपुरीं रयात् ॥ ३३ ॥
ददतो देशनामेवं वासुपूज्यार्हतो जनाः । केचित् प्रपेदिरे श्राद्ध-धर्मं केचिद्यतेर्वृषम् ॥ ३४ ॥
अन्या अपि महीपाल-पत्न्यः सप्ताऽऽर्हतं वृषम् । पालयन्तो व्रतं प्राप्य ययुर्मुक्तिपुरीं क्रमात् ॥ ३५ ॥
तत्रस्थस्य प्रभोर्वाणीं श्रुत्वाऽनेके तपस्विनः । अलश्चक्रुः क्रमान्मुक्ति-नगरीं कर्मणां क्षयात् ॥ ३६ ॥

॥ श्री विमलजिनस्य शत्रुञ्जयागमन-समवसृतिस्वरूपम् ॥

काम्पीलाह्वे पुरे भूपः, कृतवर्माभिधोऽभवत् । श्यामादेवी लसल्लीला, तस्याऽऽसीत् प्राणवल्लभा ॥ १ ॥
फाल्गुनासितभूतेष्टा तिथावुच्चग्रहव्रजे । श्यामाऽसूत सूतं कुम्भि मुख्यस्वप्नाभिसूचितम् ॥ २ ॥
इन्द्रेण विहितजन्मो-त्सवे कृत्वा जनुर्महम् । पिताऽदाद् विमलेत्याह्वां, सूनोः सज्जनसाक्षिकम् ॥ ३ ॥
ततः प्राप्य क्रमाद्राज्यं, त्यक्त्वा लात्वा व्रतं पुनः । क्षिप्त्वा कर्माण्यय ज्ञानं विमलो जिन आप्तवान् ॥ ४ ॥
विमलो विमलां भूमीं, कुर्वन् निजाङ्घ्रिरेणुभिः । कोटाकोटिसुरैः सेव्यः सिद्धाद्रौ समवासरत् ॥ ५ ॥

तत्र द्वादशपर्षत्सु-पविष्टासु जिनाधिपः । धर्मोपदेशनां दातुं प्रवर्त्तते लसद्गिरा ॥ ६ ॥

* प्राणिभिर्य समारूढे-र्लोकाग्रमतिदुर्लभम् । प्राप्यते सैव तीर्थेशः, शाश्वतोऽयं गिरिर्वरः ॥ ७ ॥ 卐

* अनादितीर्थमेतद्धि, सिद्धास्तीर्थकृतोऽत्र वा । अनन्तमुनयश्चापि क्षिप्त्वा स्वं कर्म्मसञ्चयम् ॥ ८ ॥ 卐

* मुक्तेषु तीर्थनाथेषु, गते ज्ञाने महीतले । लोकानां तारकः सोऽयं, श्रवणात् कीर्त्तनादपि ॥ ९ ॥ 卐

* भाग्यं वर्य भवेद् यस्य, पुंसः पूर्वभवागतम् । जायते तस्य चित्तेष्ट-योगोऽत्र च परत्र च ॥ १० ॥ 卐

धरापुर्यां वणिग् मीना-भिधोऽजनि विचक्षणः । तस्याभूद् गेहिनी गौरी नाम्ना गौरगुणावली ॥ ११ ॥

भग्ने तस्मिन् पुरे द्विड्भि-र्गौरी लाताऽरिणा तदा । वैरिसैन्यं चलत्तस्थौ मध्याह्ने प्रह्निसन्निधौ ॥ १२ ॥

तत्रैत्य गृहिणीं छोट-यितुं टङ्कशताष्टकाम् । मानयित्वा गतो मीनो धनं लातुं निजालये ॥ १३ ॥

सर्वशून्यं गृहं दृष्ट्वा भूमिस्थं द्रविणं रहः । लात्वा मीनोऽचलद् यावत्तावदेको द्विजोऽमिलत् ॥ १४ ॥

मीनपार्श्वे धनं भूरि ज्ञात्वा विप्रश्छली सदा । लातुं वाञ्छन् नहि प्रापावसरं विपिने क्वचित् ॥ १५ ॥

यतः-मीनश्चलन् क्रमात् कूपो-पान्ते यावत् समीयिवान् । तावद् विप्रो जगावत्र स्थीयते पीयते पयः ॥ १६ ॥

तापतप्ततनुर्मीनः पयः पीत्वा धनं यदा । शीर्षे दत्त्वा च सुष्वाप तावच्छिद्रं द्विजो ललौ ॥ १७ ॥

उत्पाटय तं प्रहौ क्षिप्त्वा धनं लात्वा द्विजो ययौ । कटिदध्ने जले मीनो न्यपतद्दैवयोगतः ॥ १८ ॥

For Private and Personal Use Only

क्षणात्तत्र प्रियां दृष्ट्वा मीनो हृष्टो जगावदः । त्वं प्रिये ! कथमत्रागाः ? केनाऽऽनीता वदाऽधुना ॥ १९ ॥
पत्नी प्राह धृताऽहं तु वैरिणा दुष्टचेतसा । वाञ्छन्ती सरणौ नष्टुं न शक्ता वैरितस्ततः ॥ २० ॥
अत्रायाते द्विषः सैन्ये छलं कृत्वा प्रहाविह । पतिताया ममाभूवन् घस्रा पञ्च कुकर्मतः ॥ २१ ॥
ततोऽन्धुपतनोदन्ते मीनेन कथिते सति । पत्नी प्राहाऽन्धुतोऽस्माद्धि कथं च निःसरिष्यते ॥ २२ ॥
स कोपि संनिधावस्य प्रहेः कण्ठे समाययौ । यः कर्षयति मामस्मान् कृपाकवचिताशयः ॥ २३ ॥
तदाऽकस्मात् प्रहेस्तस्था–घस्था(स्ता)द्विवरतः शिवा । पयः पातुं समायाता दृष्ट्वा ताभ्यां प्रमोदितम् ॥ २४ ॥
पयः पित्वा शिवा यस्मिन् विवरे निर्गता तदा । तस्माद्विवरतः क्रोश–द्वयान्मीनो विनिर्ययौ ॥ २५ ॥
पातालस्थधरान्तस्थ-विवरद्वारि नित्यशः । प्रायः (पयः) शिवा पिबत्येव न सदा सरसीस्थितम् ॥ २६ ॥
कूपान्तस्थां प्रियां मीनो मञ्चिकायाः प्रयोगतः । कर्षयामास निन्येऽथ स्वकीये सदने क्रमात् ॥ २७ ॥
उपलक्ष्य द्विजं स्वीय-धनापहारकं क्रमात् । स्वां लक्ष्मीं वालयामास मीनः प्रोक्त्वा नृपान्तिके ऽ २८ ॥
ज्ञापयित्वा स्वविभवा-पहारं मेदिनीपतेः । द्विजान्ताद् वालयामास लक्ष्मीं मीनो वणिक् क्रमात् ॥ २९ ॥
ततो मीनः प्रियायुक्तो व्ययित्वा निखिलं धनम् । गुरूपान्ते व्रतं लात्वा तप्यते स्म तपः सदा ॥ ३० ॥
आराध्य संयमं मीनो ययौ षष्ठे सुरालये । गेहिनी ताविषे तुर्ये ययावायुःक्षये सति ॥ ३१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* यतः–"ठाणं उच्चुच्चयरं मज्झं हीणं च हीणतरगं वा । जेण जहिं गन्तव्वं चिट्ठावि से तारिसी होइ ॥३२॥ 卐

ततो मर्त्यभवं प्राप्य मीनजीवः प्रियायुतः । शत्रुञ्जये ययौ मुक्तिं सर्वकर्मगणक्षयात् ॥ ३३ ॥

विमलस्य प्रभोः पार्श्वे श्रुत्वेति धर्ममादरात् । अनेक भविनो जग्मु-र्महोदयपुरीं रयात् ॥ ३४ ॥

केचित्तत्र गिरौ स्वामि-वचः श्रुत्वा शिवं ययुः । केचिद् देवालये जग्मुः केचिद्राज्यमनुत्तरम् ॥ ३५ ॥

विमलस्य प्रभोस्तत्र तिष्ठतः साधवस्तदा । लक्षमेकं ययुर्मुक्ति-नगरीं पातकक्षयात् ॥ ३६ ॥

॥ श्री अनन्तजिनस्य शत्रुञ्जयागमन-समवसृतिस्वरूपम् ॥

अयोध्यायां पुरि क्ष्मापः सिंहसेनोऽभवन्नयी । तस्यासीत् सुयशा पत्नी लक्ष्मीरिव रमापतेः ॥ ११ ॥

वैशाखासितपक्षस्य त्रयोदश्यां शुभे क्षणे । सुयशा सुषुवे पुत्रं गजादिस्वप्नसूचितम् ॥ २ ॥

हरिणा विहिते जन्मो-त्सवे जन्मोत्सवं पिता । कृत्वा सुनोरनन्तेति नाम दत्ते स्म सादरम् ॥ ३ ॥

प्राप्य राज्यं पितुः पार्श्वात् त्यक्त्वा लात्वा च संयमम् । कर्मक्षयादनन्तोऽर्हन् केवलज्ञानञ्जसा (माप्तवान्)

* वीरं अरिट्ठनेमिं पासं मल्लिं च वासुपुज्जं च । एए मोत्तूण जिणे अवसेसा आसि रायाणो ॥ ५ ॥ 卐

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनन्तस्तीर्थकृत् पृथ्वीं बोधयन् स्वविहारतः । सिद्धाद्रौ समवासार्षीत् कोटाकोटिसुरार्चितः ॥ ६ ॥

तत्रासङ्ख्येषु भव्येषु मिलितेषु शिवाचले । अनन्तेशो ददौ धर्मो-पदेशमिति शर्मदम् ॥ ७ ॥

※ आर्यदेशकुलरूपबलायु-र्बुद्धिबन्धुरमवाप्य नरत्वम् । धर्मकर्म न करोति जडो यः पोतमुज्झति पयोधिगतः सः ॥卐

※ " मज्जं विसयकसाया निद्दा विगहा य पंचमी भणिया । एए पंच पमाया जीवं पाडंति संसारे ॥९॥ 卐

जीवस्याभयदानेन मनुजोऽत्र परत्र च । सुखवान् जायते जीर्ण श्रेष्ठिव देव बहुकालतः ॥ १० ॥

पुरे श्रीनिलये जीर्ण-श्रेष्ठिनस्तनयास्त्रयः । कर्म्माऽमर-मुकुन्दाह्वा बभूवू रूपशालिनः ॥ ११ ॥

पृथक् पृथग् महेभ्यानां नन्दिनीर्निजनन्दनाः । तातेन कुर्वता चारू-त्सवं तु परिणायिताः ॥ १२ ॥

परिग्रहप्रमाणं तु गृह्णता श्रेष्ठिना पुरा । महिष्येका च गौरेका मुत्कले मोचिते ननु ॥ १३ ॥

वत्सस्य कुरुते चिन्तां, वारकेण वधूत्रयम् । चारि-पानीयदानेन सुस्थानबन्धनेन च ॥ १४ ॥

जायमानेऽन्यदोद्वाहो-त्सवे पुत्र्या बुभुक्षितः । विस्मृतो वत्सकश्चारि--पानीयदानतस्तदा ॥ १५ ॥

द्वितीये दिवसे श्रेष्ठी वत्सं वीक्ष्य बुभुक्षितः । जगाद भो स्नुषा ! वत्सः कृशो जातः कथं भृशम् ? ॥ १६ ॥

※ " तिरिआ कसंकुसारानिवायवहबंधजंतणसयाइं । नवि इहयं पाविंता परत्थ जइ निअमिआ हुंता ॥१७॥ " 卐

स्नुषाः प्रोचुरयं वत्सः पुत्र्या विवाहवासरे । विस्मृतोऽतस्तृणादीनां दानात्तस्मात् कृशोऽभवत् ॥ १८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दत्ते तृणजलादौ च वत्सो मन्दोऽभवत्तदा । ततः सर्वप्रकारेण चिकित्साः कारिताश्च तैः ॥ १९ ॥
विश्राणिते नमस्कारे मृत्वा वत्सः सुरालये । गतोऽवधिविदा जज्ञौ श्रेष्ठिनं स्वोपकारिणम् ॥ २० ॥
अभ्येत्व स्वर्गतो वत्स-देवः श्रेष्ठिमतल्लिकाम् । प्रणम्याऽवग् ममासि त्वं गुरुर्नमस्कृतिप्रदः ॥ २१ ॥
अहं वत्सो गृहे ताव-कीनेऽभूवं मृतः पुनः । तत्र त्वया नमस्कारा दत्ता मे म्रियतः सतः ॥ २२ ॥
त्वत्प्रदत्तनमस्कार-प्रभावात्ताविषे सुरः । अहं वत्सो मृतस्ताव-कीने गेहे तदा ध्रुवम् ॥ २३ ॥
कोटिमूल्यानि रत्नानि दश दत्त्वा दृढाग्रहात् । श्रेष्ठिने तत्स्नुषाणां तु हारं पृथक् पृथग् ददौ ॥ २४ ॥
ततः श्रेष्ठी विशेषेण धर्मं जीवदयामयम् । आराध्य ताविषि तुर्ये ययौ वधूत्रयं पुनः ॥ २५ ॥
वत्सदेवोऽपि ताविषाच् च्युत्वा सुरपुरे वरे । धर्मश्रेष्ठिसुतो राम-नामाऽजनि मनोहरः ॥ २६ ॥
रामोऽन्यदा गुरूपान्ते श्रुत्वा धर्मं विरागवान् । दीक्षां लात्वा तपस्तीव्रं चक्रे कल्याणशर्मदम् ॥ २७ ॥
* यतः–पोरिसि चउत्थछट्ठे काउं कम्मं खवंति जं मुणिणो । तं नो नारयजीवा वाससयसहस्सलक्खेहिं ॥ २८ ॥ 卐
अत्र सिद्धगिरौ राम-यतिरेतोऽन्यदा क्रमात् । तपःषष्ठादि बहुश-श्चकाराऽनघमानः ॥ २९ ॥
तीर्थस्यास्य प्रभावेण प्राप्य ज्ञानमनुत्तरम् । प्रबोध्य भविनो भूरीन् रामोऽत्र मुक्तिमीयिवान् ॥ ३० ॥
श्रेष्ठि-स्नुषासुराः सर्वे च्युताः स्वर्गाद् धरापुरे । प्रजापते सुता जाताः सोमो भीमो धनाभिधः ॥ ३१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रेष्ठिजीवसुरः सोऽपि च्युत्वा स्वर्गात्ततोऽन्यदा । प्रजापतेरभूत् सूनु-रमराङ्को वराकृतिः ॥ ३२ ॥
चत्वारोऽपि मिथः प्रीति-भाजः सहोदराः क्रमात् । धर्मघोषगुरूपान्ते जैनं धर्मं प्रपेदिरे ॥ ३३ ॥
प्रपाल्य धर्ममनिशं चत्वारोऽप्यच्युतं ययुः । ततश्च्युताः कलापुर्यां जाताः श्रीदसुताः पुनः ॥ ३४ ॥
अत्र शत्रुञ्जये यात्रा-कृते समागताश्च ते । लात्वा दीक्षां तपस्तीव्रं चक्रिरे शिवसातदम् ॥ ३५ ॥
क्रमात् कर्मक्षयाज्ज्ञान-मासाद्यानुत्तरं खलु । कल्याणनगरीं जग्मु-श्चत्वारोऽपि सहोदराः ॥ ३६ ॥
इत्याद्यनन्तनाथस्य वाणीं योजनगामिनीम् । आकर्ण्य भविनोऽनेके महोदयपुरीं ययुः ॥ ३७ ॥

॥ श्री धर्मजिनस्य शत्रुञ्जयागमनस्वरूपम् ॥

पुरे रत्नपुरे भानु-भूपस्य सुव्रता प्रिया । माघशुक्लतृतीयस्यां सुषुवे नन्दनं वरम् ॥ १ ॥
शक्रेण विहिते जन्मोत्सवे जन्मोत्सवं पिता । कृत्वा धर्मेति नामाऽदात् सुनोः सज्जनसाक्षिकम् ॥ २ ॥
राज्यं प्राप्य पितुः पार्श्वात् पालयित्वा प्रजाश्चिरम् । लात्वा दीक्षां क्रमात् प्राप केवलज्ञानमञ्जसा ॥ ३ ॥
धर्मोजिनोऽन्यदा शत्रु-ञ्जये तीर्थे समागतः । ददौ धर्मोपदेशं तु भव्याङ्गिभ्यः शिवप्रदम् ॥ ४ ॥

For Private and Personal Use Only

शत्रुञ्जय कल्पवृ० ॥ १४३ ॥

※ शुद्धं क्रियाकलापं ये कुर्वते गुरुजल्पितम् । ते लभन्ते जनाः स्वर्गा-पवर्गादिसुखश्रियम् ॥ ५ ॥ 卐

※ धर्मादधिगतै श्वर्यो धर्ममेव निहन्ति यः । कथं शुभगतिर्भावी स स्वामिद्रोहपातकी ॥ ६ ॥ 卐

※ अङ्कस्थाने भवेद्धर्मः शून्यस्थाने ततः परम् । अङ्कस्थाने पुनर्भग्ने सर्वशून्यं दरिद्रता ॥ ७ ॥ 卐

अत्र कथा-कुण्डाह्वनगरे सोम-वीर-धीरा-मराह्वयाः । चत्वारः सुहृदः प्रीति-भाजो मिथोऽभवंस्तदा ॥ ८ ॥

धनार्जनकृतेऽन्येद्युश्चलिताः सुहृदः समे । मञ्जुशैले वरं सिद्ध-पुरुषं भेजुरादरात् ॥ ९ ॥

षण्मासान्ते नृणां तेषां कुर्वतां तस्य सेवनम् । पुमान् सिद्धो जगौ यूयं वरं मार्गयताऽधुना ॥ १० ॥

ते नरा जगदुर्देहि धनं दारि-द्र्यभेदकम् । सिद्धो जगौ च तुम्ब्या हि फलानि लात पूर्वकम् ॥ ११ ॥

योगे पुष्यार्कयोर्मध्यं-दिने वारान् शतं महीम् । खेटयित्वा प्ररोप्यन्ते तुम्बीबीजानि भावतः ॥ १२ ॥

मण्डपः क्रियते तस्यो-परि छायाकृते वरः । ओँ ह्रीँ मिति जल्पेत लक्षमेकं रहःस्थितैः ॥ १३ ॥

इत्यादिविधिनोप्तानि तुम्बीबीजानि सादरम् । तासां बीजानि गृह्यन्ते पुनर्वपनहेतवे ॥ १४ ॥

चूर्णीकृत्य च पत्राणि स्थाप्यन्ते निजसन्निधौ । त्रपुकर्षकषट्यन्तश्चूर्णं वालमितं क्षिपेत् ॥ १५ ॥ ॥ १४३ ॥

क्षिप्त्वाऽमत्रे च तद्वह्नौ धम्यते प्रहराष्टकम् । सर्वं भविष्यति स्वर्णं जात्यं दारि-द्र्यभेदकम् ॥ १६ ॥

एवं चेद्यदि युष्माभि-र्मदुक्तं क्रियतेऽधुना । तदा गच्छति दारि-द्र्यं भवतो मन्दिरान्ननु ॥ १७ ॥

श्रुत्वैतत् सिद्धमानम्य बीजानि तानि तत्क्षणात् । लात्वा ते सुहृदः स्वस्व-सदनं समुपागमन् ॥ १८ ॥
गुरूक्तविधिना येन बीजान्युप्तानिभूतले । कृत्वा चामीकरं भूरि सुखीभूतश्चिरं च सः ॥ १९ ॥
[विधिनैव कृता धर्मक्रिया शिवप्रदा भवेत्]
द्वितीयेन नरेणार्द्धक्रियां कृत्वान्तरान्तरा । साधितं रजतं किञ्चित् सुखीजातो नरः स च ॥ २० ॥
तृतीयेन गुरुप्रोक्ते स्तोके विधौ कृते सति । कृतं लोहं चतुर्थश्च तरिमँश्चक्रे च हीलनाम् ॥ २१ ॥
स च लोहमपि प्राप्य(प) दुःखी जातो भृशं सदा ।
एवं पुण्यमपि कृतं सुख [पुण्यात् सुखं पापात् ध्रुवं] दुःखादि जायते ॥ २२ ॥
देवपूजाप्रतिक्रान्ति-मुख्यानि निखिलान्यपि । कुर्वन् जीवः समाप्नोति सुखदुःखादि (माह्लादि) संततम् ॥ २३ ॥
सोमः सङ्घेन संयुक्तो गत्वा शत्रुञ्जयाचले । भूरि धनं व्ययित्वाऽऽशु पुण्यौघमार्जयद् बहु ॥ २४ ॥
क्रमात् स्वं विभवं सप्त क्षेत्रे वप्त्वाखिलं मुदा । दीक्षां जग्राह देवेन्द्र-सूरिपार्श्वे शिवाप्तये ॥ २५ ॥
सोमर्षिः सिद्धभूमिध्रे तपस्तप्त्वा बहु क्रमात् । अवाप्य केवलज्ञानं ययौ कैवल्यपत्तने ॥ २६ ॥
वीरधीरावपि प्रौढ-भावाच्छत्रुञ्जयाचले । यात्रां कृत्वाष्टमे स्वर्गे ययतुः स्वायुषः क्षये ॥ २७ ॥
चतुर्थो भावरहितोऽप्राप्य द्रव्यमसातवान् । यावज्जीवमभूद्दुःखी विना धर्मं भवे भवे ॥ २८ ॥

अस्मिन् शत्रुञ्जये देवान् नौति यः कुरुते तपः । स एव लभते स्वर्गा-पवर्गादिसुखं द्रुतम् ॥ २९ ॥
यतः–" अन्यतीर्थेषु यद् यात्रा-शतैः पुण्यं भवेन् नृणाम् । तदेकयात्रया पुण्यं शत्रुञ्जयगिरौ स्फुटम् ॥ ३० ॥
एकैकस्मिन् पदे दत्ते पुण्डरीकगिरिं प्रति । भवकोटिकृतेभ्योऽपि पातकेभ्यः प्रमुच्यते ॥ ३१ ॥
धर्मोपदेशमित्यादि श्रुत्वा धर्मजिनान्तिके । अनेके भविनो मुक्तिं ययुः शत्रुञ्जयाचले ॥ ३२ ॥

卐 卐 卐 卐

॥ श्री शान्तिजिनस्य शत्रुञ्जयागमनस्वरूपम् ॥

हस्तिनागपुरे विश्व-सेनस्य मेदिनीपतेः । अचिराह्वा प्रिया जाता शीलादिगुणशालिनी ॥ १ ॥
चतुर्दशमहास्वप्न-सूचितं नन्दनं वरम् । ज्येष्ठासितत्रयोदश्या-मचिरा सुषुवे सुखम् ॥ २ ॥
हरिणा विहिते जन्मो-त्सवे जन्मोत्सवं पिता । कृत्वा शान्तिकुमारेति नामाऽदात् तनयस्य तु ॥ ३ ॥
क्रमाच्चक्रिपदं प्राप्य त्यक्त्वा च संयमश्रियम् । लात्वा कर्मक्षयात् प्राप शान्तिर्ज्ञानमनुत्तरम् ॥ ४ ॥
बोधयन् भविनो भूरीन् शान्तिस्तीर्थङ्करः क्षितौ । सिद्धाद्रौ समवासार्षीद् भूरिसाधुसमन्वितः ॥ ५ ॥
शुद्धधर्मौषधेनैव भावयन्नात्मनो मनः । भवी भवति कल्याण-सातभाक् तमसां क्षयात् ॥ ६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भीमाह्वनगरे भीम-भूपस्याभूत् सुरी प्रियां । बहूपयाचितैः पुत्रोऽजनि जीवाभिधानभृत् ॥ ७ ॥
वर्धमानः क्रमात् पुत्रो जीवितादतिवल्लभः । आसीद् भूपस्य लोकानां सदारामकुमारवत् ॥ ८ ॥
राज्ञाऽध्यातं सुतायाऽस्मै वैद्यैर्दास्यामि स्वौषधम् । तथा यथा भवेत् सूनुर्नीरोगोऽयं चिरं खलु ॥ ९ ॥
ततआकार्य चत्वारो वैद्याः पृष्टा इति स्फुटम् । दत्थौषधं तथा सूनोर्यथा रोगो न जायते ॥ १० ॥
आद्यो वैद्यो जगावग्रे-तनं हन्ति ममौषधम् । यदि रोगो भवेन्नैव तदा हिनस्ति तं द्रुतम् ॥ ११ ॥
राजा प्रोवाच भो वैद्य ! सृतं तवौषधैर्मम । सदसद्रोगसत्तां तु केवली वेत्ति नापरः ॥ १२ ॥
द्वितीयः प्राह यद्यस्ति रोगस्तं हन्ति स्वौषधम् । न चेत्तदा गुणं नैव दोषं नैव करोत्यलम् ॥ १३ ॥
राजा प्राहौषधैस्ताव-कीनैः सृतं सुतस्य मे । रोगस्य सदसत्सत्तां वेत्ति ज्ञान्येव नापरः ॥ १४ ॥
तृतीयो वैद्यराट् प्राह रोगो यद्यस्ति पूर्वतः । तदा तं हन्ति नान्यं तु भवन्तं हन्ति चौषधम् ॥ १५ ॥
चतुर्थोऽवक् पुराचीन–विद्यमान–भविष्यतः । रोगान् ममौषधं हंति पुष्टिं च कुरुते तनोः ॥ १६ ॥
दापितं भूभुजा तुर्य-मौषधं सूनवे तथा । आजन्माऽजनि नीरोगो यथा भूपतिनन्दनः ॥ १७ ॥
उपनयोऽत्र—दानशीलतपोभावा बलिनः स्युर्यथोत्तरम् । भावना विद्यते तुर्यौ-षधतुल्या शिवप्रदा ॥ १८ ॥
इत्यादिधर्ममाकर्ण्य भव्या जीवा अनेकशः । लात्वा व्रतं ययुर्मुक्तिं सिद्धपर्वतमस्तके ॥ १९ ॥

For Private and Personal Use Only

तत्र वर्षाचतुर्मासं स्थितः षोडश तीर्थकृत् । बोधयामास भूयिष्ठ-भव्यान् जिनमते क्रमात् ॥ २० ॥
एवं विहारमातन्वन् शान्तिनाथोऽवनीतले । शत्रुञ्जये समायातो बहून् वारान् सुसाधुयुग् ॥ २१ ॥

—卐—卐—卐—卐—

॥ श्री कुन्थुतीर्थङ्करस्य शत्रुञ्जयागमन-समवसृतिस्वरूपम् ॥

हस्तिनागपुरे सूर-भूपस्य श्रीरभूत् प्रिया । वैशाखासितभूतेष्टा-तिथौ सूतेस्म सा सुतम् ॥ १ ॥
वासवेन कृते जन्मो-त्सवे जनुर्महः पिता । कृत्वा सूनोर्ददौ नाम कुन्थुः सज्जनसाक्षिकम् ॥ २ ॥
साधयित्वाऽथ षट्खण्डां भुवं त्यक्त्वा च रेणुवत् । जग्राह संयमं दत्त्वा दानं हायनमात्रतः ॥ ३ ॥
क्षिप्त्वा कर्म्म क्रमात् प्राप्य ज्ञानं श्रीकुंथुतीर्थकृत् । बोधयन् भविनः शत्रु-ञ्जये तीर्थे समीयिवान् ॥ ४ ॥
तत्र द्वादश पर्षत्सू-पविष्टासु जिनेश्वरः । दातुं धर्म्मोपदेशं तु प्रववर्त्ते शिवप्रदम् ॥ ५ ॥
अत्र कथा—सिद्धाह्वनगरे सिद्ध-सेनस्य मेदिनीपतेः । प्रजाः पालयतः सर्वाः सुखवन्त्योऽभवन् क्रमात् ॥६॥
तत्र भीमाभिधः कुम्भ-कारोऽतीव विचक्षणः । परजल्पनभूत्यादौ कुरुतेऽणक्षरं सदा ॥ ७ ॥
परेषां गमने वस्त्र-भूषादिपरिधापने । जल्पनं वीक्ष्य कुरुतेऽणक्षरं कुम्भकृत् सदा ॥ ८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अक्षणरोऽयमायाति याति शेते प्रजल्पति । जल्पन्निति जनो नाम तस्य कुम्भकृतो ददौ ॥ ९ ॥
लोकानां जल्पनादीनि कृत्यानि वीक्ष्य कुम्भकृत । अनीशः सहितुं वास-मरण्ये विजने व्यधात् ॥ १० ॥
तृणात्मके कुटीरे तु तिष्ठन् नित्यं स कुम्भकृत् । अश्वापहृतभूपेन तत्राऽऽयातेन वीक्षितः ॥ ११ ॥
बुभुक्षितो नृपः स्वान्न–पानदानेन तत्क्षणम् । भक्त्या कुम्भकृता स्वस्थी चक्रे च मुमुदे यथा ॥ १२ ॥
पुरीमध्ये तमानीय वितीर्य सदनं नृपः । भूरिद्रव्यप्रदानेन कुम्भकारममोदयत् ॥ १३ ॥
इतोऽरण्ये बदरिका–फलानि तैलिकाङ्गजाम् । चुटन्तीममरीतुल्यां वीक्ष्य रागी नृपोऽजनि ॥ १४ ॥
तामुद्वाह्य लसद्वस्त्रा-भरणां स्फारसद्मनि । स्थापयामास भूपालः पौलोमीं निर्जरेशवत् ॥ १५ ॥
लसत् सुखासनासीनां वर्यवेषधरां स ताम् । मोटयन्तीं मुखं राज-मार्गे यान्तीं सखीयुताम् ॥ १६ ॥
प्रजल्पन्तीं निजोत्कर्षं राज्ञीं तैलपनन्दिनीम् । निरीक्ष्येर्ष्यां वितन्वानः (नो) प्राहेत्यणक्षरस्तदा ॥ १७ ॥
"कल्ले बोरज वीणती अज्ज न जाणइ खंख (तैल) । पुणरवि अडविं करसि वर न सहू एह अणक्ख ॥१८॥
ततश्च कुम्भकृद् गत्वा पुराद्बहिर्निकेतनम् । कृत्वा तस्थौ वितन्वान ईर्ष्यां सर्वजनेष्वपि ॥ १९ ॥
इतस्तत्र समायाता धर्म्मसुन्दरसूरयः । अणक्षरस्य पुरतो जगदुर्धर्मदेशनाम् ॥ २० ॥
यतः–"कोहो पीइं पणासेइ माणो विणयनासणो । माया मित्ताणि नासेइ लोभो सव्वविणासणो ॥ २१ ॥

For Private and Personal Use Only

शत्रुञ्जय कल्पवृ० ॥ १४९ ॥

* कोह पयठो देहघरि तिन्नि विकार करेइ । अप्पं तावइ परतपइ परतह हाणि करेइ ॥ २२ ॥卐
जल्पनादि परेषां ये लक्ष्मीं वीक्ष्य रुषन्ति च । ते लभन्ते इहाऽमुत्र विपदश्च पदे पदे ॥ २३ ॥
अणक्षरो जगावीर्ष्यां परेषु कुर्वता मया । उपार्जितं तमो यद्य-च्छुट्टनं स्यात्ततः कथम् ? ॥ २४ ॥
गुरुणोक्तंमहेला-गो-बाल-संयतघातिनाम् । शुद्धिर्भवति सिद्धाद्रौ तपो वितन्वतां नृणाम् ॥ २५ ॥
* यतः-" सिंहव्याघ्राहिशंबर-पक्षिणोऽन्येऽपि पापिनः । दृष्ट्वा शत्रुञ्जयेऽर्हन्तं भवन्ति स्वर्गगामिनः ॥ २६ ॥卐
* न रोगो न च सन्तापो न दुःखं न वियोगिता । न दुर्गति र्न शोकश्च पुंसां शत्रुञ्जयस्पृशाम् ॥ २७ ॥卐
श्रुत्वैतद् गुरुणा प्रोक्त-मणक्षरोऽपि कुम्भकृत् । ययौ शत्रुञ्जये क्षेप्तुं पापपुञ्जं पुरार्जितम् ॥ २८ ॥
तत्र षष्ठाष्टमादीनि तपांसि तस्य कुर्वतः । उत्पन्नं केवलज्ञान-मणक्षरस्य गेहिनः ॥ २९ ॥
देवतादत्तलिङ्गोऽथ स्वर्णपद्मे निविश्य च । कुम्भकृत्केवली धर्मो-पदेशं प्रददाविति ॥ ३० ॥
* यतः-" धम्मो मंगलमउलं ओसहमउलं च सव्वदुक्खाणं । धम्मो बलं च विउलं धम्मो ताणं च सरणं च ॥३१॥卐
इत्यादि देशनां तस्य श्रुत्वा भव्याङ्गिनस्तदा । श्राद्धधर्म्मं यतिधर्म्मं जगृहुः शिवशर्मदम् ॥ ३२ ॥
दो चेव जिणवरेहिं जाइजरामरणविप्पमुक्केहिं । लोगम्मि पहा भणिया सुसमणो-सुसावओ वावि ॥ ३३ ॥
अनेकसाधुसंयुक्तः कुम्भकृत् केवली क्रमात् । आयुःक्षये ययौ मुक्ति-नगरीं सिद्धपर्वते ॥ ३४ ॥

॥ १४९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं धर्मोपदेशेन प्रबोध्य भविनो बहून् । कुन्थुतीर्थङ्करोऽन्यत्र व्यहार्षीत् सिद्धपर्वतात् ॥ ३५ ॥

॥ श्री अरजिनस्य शत्रुञ्जयागमनसम्बन्धः ॥

हस्तिनागपुरे वर्ये सुदर्शनमहीपतिः । पपाल पृथिवीं सुष्ठु न्यायमार्गेण सन्ततम् ॥ १ ॥
तस्य देव्यभिधा भार्या गजादिस्वप्नसूचितम् । असूत तनयं चक्र-ल्लक्षलक्षणलक्षितम् ॥ २ ॥
वासवेन कृते जन्मो-त्सवे जन्मोत्सवं पिता । कृत्वा सूनोररेत्याह्वा-मदात् सज्जनसाक्षिकम् ॥ ३ ॥
साधयित्वा क्रमात् पृथ्वीं षट्खण्डां चक्रिराड्वरः । पपाल पृथिवीं न्याय-मार्गेण सन्ततं ध्रुवम् ॥ ४ ॥
त्यक्त्वा राज्यं व्रतं लात्वा तप्त्वा तीव्रं तपः पुनः । अवाप केवलज्ञान-मरतीर्थकरः क्रमात् ॥ ५ ॥
अरस्तीर्थेश्वरः क्षोणीं पावयन् पदरेणुभिः । अनेकसाधुसंशोभी सिद्धाद्रौ समवासरत् ॥ ६ ॥
तत्रेति भव्यजीवानां पुरतो धर्म्मदेशनाम् । चकारारजिनाधीशो वाण्या मधुरया तदा ॥ ७ ॥
महीशानपुरे श्रीदः श्रेष्ठी श्रीदोपमः श्रिया । पुत्रोऽभून्मदनस्तस्य पत्नी प्रीतिमतिः सती ॥ ८ ॥
कामाभिलाषकोऽत्यन्तं मदनो गेहिनीयुतः । क्षणमेकं विना पत्न्या स्थातुं शक्नोति साऽपि न ॥ ९ ॥

For Private and Personal Use Only

मदनो जनकं पृष्ट्वा सार्थवाहाभिधानभृत् । भूरिक्रयाणकैः पृष्ठ-वाहानभृत भूरिशः ॥ १० ॥
सुदिने मदनो लक्ष्मी-कृतेऽन्यविषयं प्रति । यियासुः भामिनीं प्राह त्वमत्रास्थाः सुखं प्रिये ! ॥ ११ ॥
पत्न्यवग् न विनाऽत्र त्वां क्षणं स्थातुं प्रभुः प्रभो ! । मदनः प्राह न स्थातुं त्वां विनेह प्रियोत्तमे ! ॥१२॥
साम्प्रतं दुष्करं दूर-गमनं विद्यते प्रिये ! । तेन त्वमत्र तिष्ठाद्य रमाहेतो व्रजाम्यहम् ॥ १३ ॥
स्थापितापि बलात् पत्या पत्न्यचालीत् समं तदा । मदनो नगराद् बाह्योद्याने वासमुपागमत् ॥ १४ ॥
तत्र तुङ्गपटीं कृत्वा मदनो गेहिनीसखः । तस्थौ रात्रौ तदाऽभाणी-देवं सहचरीं प्रति ॥ १५ ॥
यदि पत्या समं पत्नी विदेशं व्रजति स्वयम् । प्रतिबन्धात् तदा पत्न्याः पतिः स्याद् दुःशको दृढम् ॥१६॥
अतिष्ठन्तीं प्रियां सुप्तां मुक्त्वा तत्र तथास्थिताम् । अचलन्मदनश्छन्नं जजागार प्रिया प्रगे ॥ १७ ॥
चलितं रमणं मुक्त्वा गतं ज्ञात्वा प्रिया तदा । रोदं रोदं भृशं स्थित्वा तत्र दध्याविदं हृदि ॥ १८ ॥
अहं मुधा समं पत्या चलन्त्यस्मि जडाशया । सद्वस्त्राभरणा नारी विना कान्तं न शोभते ॥ १९ ॥
यतः-भत्तारविरहिआणं होइ पिया आलओ महिलीआणं । अह पुण पुण्णेहिं विणा सो पुण वइरी समो जाओ ॥२०॥
तावच्चिअ हिययइट्ठा माऊणं पिऊण बंधवाणं च । जाव न धाडेइ पई महिलं नीआओ गेहाओ ॥ २१ ॥
ताव सिरी सोहग्गा ताव य गुरुआउ होंति महिलाओ । जाव य पई महग्घं सिणेहपक्खं समुव्वहइ ॥२२॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

माया पिईया भाया वच्छल्लं तारिसं करेऊणं । अवराहविरहिआए कमहुञ्जपणासियं सव्वं ॥ २३ ॥
ध्यात्वेत्याभरणादीनि बद्ध्वा पोट्टलके स्वयम् । श्वेताम्बरधरा स्वौकः समागान्मदनप्रिया ॥ २४ ॥
पपात पादयोः श्वश्र्वाः स्नुषा यावत्सुभक्तितः । तावत् श्वश्रूर्जगौ किन्तु सूनोर्मङ्गलमस्ति मे ॥ २५ ॥
स्नुषाऽवक् कुशली पुत्र–स्तव मां पदबन्धकम् । मत्वा मुक्त्वा रहोऽचालीत् दूरदेशं प्रति ध्रुवम् ॥ २६ ॥
सद्वस्त्राभरणा गेहे यदि पत्या विना कृता । स्थास्याम्यहं तदा मे न सन्मार्गे तिष्ठते मनः ॥ २७ ॥
एवं ध्यात्वा मयोत्तार्य भूषणादि शरीरतः । एवंविधा समायाता भवत्या श्वश्रूसन्निधौ ॥ २८ ॥
सबलाहारताम्बूला-दिकं रागविधायकम् । शीलरक्षाकृते प्रीति-मती समत्यजत् तदा ॥ २९ ॥
पत्यौ समागते प्रीति–मती सद्वसनादिभृत् । पत्युर्यथोचितं चक्रे विनयं जल्पनादिभिः ॥ ३० ॥
मातापित्रोर्गिरा पत्नी-विहितं सत्यु(सू)चितं च तत् । मत्वा सन्मानयामास प्रियां भूषणदानतः ॥ ३१ ॥
पितुरग्रे बहुलक्ष्मीं ढौकयित्वा नतिं व्यधात् । ततो मातुः पदौ भक्त्या ननाम मदनः सुतः ॥ ३२ ॥
क्रमाद् गुर्वन्तिके श्रुत्वा चारित्रस्य फलं शिवम् । सप्रियो मदनो दीक्षां जग्राह निर्वृतिप्रदाम् ॥ ३३ ॥
शुद्धं चारित्रमाराध्य मदनः संयुतः क्रमात् । शत्रुञ्जये तपस्तप्त्वा श्रेयःपुर्यां समीयिवान् ॥ ३४ ॥
प्रीतिमत्यपि चारित्रमाराध्य शुद्धमादरात् । प्रथमे ताविषे जातोऽमरो भासुरविग्रहः ॥ ३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्याद्यरजिनाधीश-वचः श्रुत्वा जनो बहुः । तत्र तीर्थे ययौ मुक्तिं सर्वकर्म्मक्षयात् क्रमात् ॥ ३६ ॥
तीर्थे तत्र दिनान् भूरीन् स्थित्वा श्रीअरतीर्थकृत् । भव्यान् बोधयितुं चक्रे विहारमन्यनीवृति ॥ ३७ ॥

॥ श्री मल्लिजिनस्य शत्रुञ्जयागमनसम्बन्धः ॥

मिथिलाह्वपुरे कुम्भ-भूपपत्नी प्रभावती । असूत तनयां कुम्भि-मुख्यस्वप्नादिसूचितम् ॥ १ ॥
जृम्भारिणा कृते जन्मो-त्सवे जन्मोत्सवं पिता । कृत्वा मल्लिकुमारीति नाम पुत्र्या अदान्मुदा ॥ २ ॥
गृहावासं क्रमात्त्यक्त्वा लात्वा वृत्तमनुत्तरम् । मल्लिः प्रापाऽमलं ज्ञानं समस्ततमसां क्षयात् ॥ ३ ॥
मल्लिनाथोऽन्यदा कुर्वन् विहारं बोधयन् जनान् । सिद्धाद्रौ समवासार्षीद् भूरिसाधुसुराश्रितः ॥ ४ ॥
सुरैर्वप्रत्रये रूप्य-रत्नहेममये कृते । उपविश्य दिदेशेति मल्लिनाथोऽथ देशनाम् ॥ ५ ॥
* वन्दे जन्म मनुष्यसम्भवमहं किं तद्विहीनं गुणै स्तानेव त्वरितं स्तुमः किमसमां लक्ष्मीं विना तैर्गुणैः ॥卐
तां लक्ष्मीं समुपास्महे किमनया दानादिभि र्वन्ध्यया, दानं स्तौमि वृथैव भावरहितं भावो हि भरतं (हितैषी) ततः ॥
अत्र कथा—रमापुरे धरापाल-राज्ञो मन्त्री धनाभिधः । राज्यकार्यं वितन्वानो ररक्ष जनता-नृपौ ॥ ७ ॥

For Private and Personal Use Only

* यतः—नरपतिहितकर्त्ता द्वेष्यतामेति लोके, जनपदहितकर्त्ता त्यज्यते पार्थिवेन ।卐
इति महति विरोधे वर्त्तमाने समाने, नृपतिजनपदानां दुर्लभः कार्यकर्त्ता ॥ ८ ॥

एकदाऽवग् नृपो मन्त्रिन् ! परीक्ष्यैव भटास्त्वया । स्थापनीया ममोपान्ते राज्यवर्द्धनहेतवे ॥ ९ ॥
अपरीक्ष्य कृते कार्ये दुःखं भवति निश्चितम् । सुपरीक्ष्य कृते कार्ये जायते सुखमङ्गिनाम् ॥ १० ॥
अत्रान्तरे समायाता भटाः पञ्चशता वराः । मिलिताः क्ष्मापतेः प्रोचु-र्भविष्यामोऽनुगा वयम् ॥ ११ ॥
रैदानेन तु सन्मान्य भूपोऽवग् मन्त्रिणं प्रति । शिष्टादिज्ञप्तये कार्या परीक्षैषां त्वयाऽधुना ॥ १२ ॥
दापयित्वा धनं तेषां परीक्षणकृते वरम् । शयनाय ददे शय्या सायमेका तु मन्त्रिणा ॥ १३ ॥
ममेयमर्पिता शय्या मन्त्रिणा शयनाय तु । स्वपिहि त्वं धरापीठे वक्तव्यं नाधिकं त्वया ॥ १४ ॥
एवं ते कलहं बाढं कुर्वाणाः सुभटा मिथः । विरामं तेनिरे नैव क्षणमेकं क्षु(क्रु)धाकुलाः ॥ १५ ॥
दृष्ट्वैतद् मन्त्रिराट् तत्र सर्वसुभटचेष्टितम् । जगाद भूपतेरग्रे समेत्यामूलचूलतः ॥ १६ ॥
भटा मूर्खतमा एते कुर्वन्ते कलहं मिथः । अतो नैको भटो भृत्यो विद्यते ह्येषु साम्प्रतम् ॥ १७ ॥

* यतः—सर्वस्यात्मा गुणवान् सर्वः परदोषदर्शने कुशलः । सर्वस्य चारित वाच्यं न चात्मदोषान् वदति कश्चित् ॥१८॥卐
* परवादे दशवदनः परदोषनिरीक्षणे सहस्राक्षः । सद्वृत्तवित्तहरणे बाहुसहस्रार्जुनः पिशुनः ॥ १९ ॥卐

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुक्ता भूमीभुजा ते तु गता अन्यावनीभुजाम् । पार्श्वे न मानितास्तैस्ते कृत्वा परीक्षणं पुनः ॥ २० ॥
यावज्जीवं ततस्ते तु कुर्बन्तः कलहं मिथः । बभुवुर्दुःखिता अत्र परत्र च पदे पदे ॥ २१ ॥
एवं विरोधिनो ये ये मिथो न मन्वते गुरुम् । ते तेऽत्र परलोकेऽपि भवन्ति दुःखिनश्चिरम् ॥ २२ ॥
ये ये जना गुरुं देवं तातं च जननीं (च मन्वते) वृषम् । ते ते स्वर्गापवर्गादि-सुखभाजो भवन्ति हि ॥ २३ ॥
इत्यादि श्रीजिनेन्द्रोक्तं श्रुत्वा भूरिजनास्तदा । स्वर्गापवर्गसातानि लेभिरे तत्र पर्वते ॥ २४ ॥
एवं परीक्ष्य मन्त्रीशो भटान् पञ्चशतीं वरान् । चक्रे यान् कुर्वते सेवां ते भक्त्या भूपतेः क्रमात् ॥ २५ ॥
एकदा स नृपो मंत्रि-भटादिबहुसंयुतः । शत्रुञ्जये ययौ नन्तुं युगादिजिनपुङ्गवम् ॥ २६ ॥
तत्र श्रीऋषभं तेषां भटानां ध्यायतां मुदा । उत्पन्नं केवलज्ञानं मन्त्रीशस्य तदा पुनः ॥ २७ ॥
क्रमात् सर्वेऽपि सिद्धाद्रौ मन्त्रीशाद्या भटाश्च ते । मुक्तिपुर्यां समाजग्मु-र्निःशेषकर्म्मणां क्षयात् ॥ २८ ॥
मल्लितीर्थकृतो वाचं-यमा अष्टायुतं तदा । शत्रुञ्जये इहैवेयु-र्मुक्तिपुर्यां तमःक्षयात् ॥ २९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री मुनिसुव्रतजिनस्य शत्रुञ्जयागमनस्वरूपम् ॥

श्रीमद्राजगृहे राजा सुमित्राह्वो नयी धनी । तथाऽरक्षद् जनान् सर्वे यथा ते सुखिनोऽभवन् ॥ १ ॥
तस्य पद्मा प्रिया कुम्भि-मुख्यसत्स्वप्नसूचितम् । ज्येष्ठासिताष्टमीरात्रौ सुषुवे नन्दनं वरम् ॥ २ ॥
जृम्भारिणा कृते जन्मो-त्सवे जन्मोत्सवं पिता । कृत्वा सूनोर्ददौ नाम मुनिसुव्रत इत्यपि ॥ ३ ॥
क्रमात् प्राप्य व्रतं क्षिप्त्वा सर्वकर्म्मव्रजं समम् । लेभे च केवलज्ञानं मुनिसुव्रततीर्थकृत् ॥ ४ ॥
श्रीमुनिसुव्रतो भूरि-भव्यान् प्रबोधयन् भुवि । सिद्धाद्रौ समवासार्षीत् साधु-निर्जरसंयुतः ॥ ५ ॥
तत्र द्वादश संसत्सू-पविष्टासु यथास्थिति । श्रीसुव्रतो ददौ धर्मो-पदेशं भविनां पुरः ॥ ६ ॥
तथाहि–कल्याणनगरे भानु-भूपस्य रुक्मिणी प्रिया । सूतेस्म तनयं चारु-लक्षणैर्लक्षितं वरम् ॥ ७ ॥
जन्मोत्सवं नृपः कृत्वा सूनो रूपाभिधां ददौ । धात्रीभिः पञ्चभिः स्तन्य-पानैः संवर्द्धितः स च ॥ ८ ॥
पाठितो यौवनप्राप्तः पुत्रो भीमनृपाङ्गजाम् । तातेनोद्वाहितो भोगान् भुङ्क्तेस्म गेहिनीसखः ॥ ९ ॥
मोदका एव रोचन्ते तस्य सूनोर्निरन्तरम् । मोदकप्रिय इत्यासी–न्नाम लोकेऽभितः पुनः ॥ १० ॥
वसन्ते सोऽन्यदा प्रात-रुत्थाय मोदकप्रियः । नर्त्तनं कारयामास नर्त्तकान् नर्त्तकीयुतान् ॥ ११ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मध्याह्ने मोदकान् वर्यान् जनन्या प्रेषितांस्तदा । आदौ परिजनस्यादात् कुमारोऽत्ति ततः स्वयम् ॥ १२ ॥

※ यतः—" उत्तमैः सह साङ्गत्यं पण्डितैः सह संकथाम् । अलुब्धैः सह मित्रत्वं कुर्वाणो नावसीदति " ॥ १३ ॥卐

※ अमृतं शिशिरे वह्नि-रमृतं क्षीरभोजनम् । अमृतं राजसन्मान-ममृतं प्रियदर्शनम् ॥ १४ ॥卐

वैकालिकं पुनः कृत्वा मोदकैरनुगान्वितः । रात्रियामान्तिके नृत्यं विससर्ज नृपाङ्गजः ॥ १५ ॥

स्वयं पञ्च नमस्कारान् गुणयित्वा शतत्रयम् । यावत् स्वपिति तावत्तु वायुर्विनिर्गतो गुदात् ॥ १६ ॥

नासायां पूतिगन्धं तु प्रविष्टमसुखप्रदम् । ज्ञात्वा मोदकरुग् दध्यौ वस्तुनोऽशुचितेदृशी ॥ १७ ॥

※ मिष्टान्नान्यपि विष्ठासा-दमृतान्यपि मूत्रसात् । स्युर्यस्मिन्नङ्गकस्यास्य कृते कः पापमाचरेत् ? ॥ १८ ॥卐

※ रसासृग्-मांसमेदोऽस्थि-मज्जाशुक्रान्त्रवर्चसाम् । अशुचीनां पदं कायः शुचित्वं तस्य तत्कुतः ? ॥ १९ ॥卐

※ नवस्रोतःश्रवद्विस्र-रसनिःष्यन्दपिच्छले । देहेऽपि शौचसङ्कल्पो महन्मोहविजृम्भितम् ॥ २० ॥卐

अशुचिसुभाषितान्यत्र वाच्यानि—

यद्येवं मोदका वर्या अपि दुर्गन्धतां श्रिताः तदायं विग्रहो दुष्टगन्धतां नाश्रयिष्यति ? ॥ २१ ॥

कस्तूरीप्रभृतीन्येव वस्तून्यङ्गाश्रितान्यपि । क्षणादशुचितां भेजु रहो ईदृग् जगत् खलु ॥ २२ ॥

इत्याद्यशुचितां सर्व-विश्वस्य मोदकप्रियः । मत्वा त्यक्त्वेभवाज्यादि गुर्वन्ते संयमं ललौ ॥ २३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तलितं गुलितं सर्वं स्निग्धाहारमतः परम् । गृहीष्याम्यहकं नैव ह्येवमादादभिग्रहम् ॥ २४ ॥
यतः-जह चयइ चक्कवट्टी पवित्थरं तत्तिअं मुहुत्तेण । न चयइ तहा अहन्नो दुब्बुद्धी खप्परं दमओ ॥२५॥
तीव्रं तपो वितन्वानः सम्प्राप्तावधिचित्त क्रमात् । बोधयन् भविनो भूरीन् सिद्धाद्रौ यतिरीयिवान् ॥ २६ ॥
वितन्वानः शुभं भावं मोदकप्रियसंयतः । तत्राद्रौ केवलज्ञानं प्राप्य सिद्धिं समीयिवान् ॥ २७ ॥
* यतः-संसारबीजभूतानां कर्म्मणां जरणादिह । निर्जरा सा स्मृता द्वेधा सकामा कामवर्जिता ॥ २८ ॥卐
* ज्ञेया सकामा यमिना-मकामा त्वन्यदेहिनाम् । कर्मणां फलवत्पाको यदुपायात् स्वतोऽपि च ॥ २९ ॥卐
* सदोषमपि दीप्तेन सुवर्णं वह्निना यथा । तपोऽग्निना तप्यमान-स्तथा जीवो विशुद्ध्यति ॥ ३० ॥卐
* अनशनमौनोदर्यं वृत्तेः संक्षेपणं तथा । रसत्यागस्तनुक्लेशो लीनतेति बहिस्तपः ॥ ३१ ॥卐
* प्रायश्चित्तं वैयावृत्त्यं स्वाध्यायो विनयोऽपि च । व्युत्सर्गोऽथ शुभं ध्यानं षोढेत्याभ्यन्तरं तपः ॥ ३२ ॥卐
* दीप्यमाने तपोवह्नौ बाह्ये चाभ्यन्तरेऽपि च । यमी जरति कर्म्माणि दुर्जराण्यपि तत्क्षणात् ॥ ३३ ॥卐
इत्यादि-रुचिरां धर्म्म-देशनां मुनिसुव्रतः । वितीर्य भविनो भूरीन् गमयामास निर्वृतिम् ॥ ३४ ॥
तत्रस्थस्य प्रभोर्लक्ष-त्रयं वाचंयमा वराः । सम्प्राप्य केवलज्ञानं मुक्तिपुर्यां समीयुः ॥ ३५ ॥

For Private and Personal Use Only

॥ श्री नमिजिनेश्वरस्य शत्रुञ्जयसमागमनस्वरूपम् ॥

मिथिलायां पुरि श्रीमान् विजयक्षोणिनायकः । प्रशशास प्रजां न्याय-मार्गेण धर्म्मतत्परः ॥ १ ॥
तस्य वप्रा प्रिया कुम्भि-मुख्यसुस्वप्नसूचितम् । श्रावणस्यासिताष्टम्या-मसूत तनयं वरम् ॥ २ ॥
इन्द्रकृतं जन्मोत्सवादि ज्ञानप्राप्तिपर्यन्तमत्र वाच्यम् ।
नमिनाथो बहून् भव्यान् बोधयन् पृथिवीतले । सिद्धाद्रौ समवासार्षीद् भूरिसाधुसुरार्चितः ॥ ३ ॥
तत्रैवमुपदेशं ददौ-मुञ्जाभिधे पुरे मुञ्ज-श्रेष्ठिनो धर्म्मशालिनः । पद्मापत्नीभवः पुत्रो मण्डनोऽजनि सुन्दरः ॥४॥
वर्धमानः क्रमाद् विज्ञ-समीपे पाठितस्तथा । यथा कर्म्मसु धर्म्मेषु कुशलोऽजनि मण्डनः ॥ ५ ॥
* यतः—"विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन । स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥ ६ ॥ 卐
श्रेष्ठिनोक्तं सदा कार्यं चकार मण्डनाङ्गजः । विनीतः सरलस्वान्तः सर्वेषां रोचितोऽभवत् ॥ ७ ॥
श्रेष्ठी शिक्षां ददानस्त्व-न्यदा प्राह सुतं प्रति । वृद्धस्य नोत्तरो देयः कदाचिद्धितमिच्छता ॥ ८ ॥
अङ्गीकृत्य पितुर्वाणी मन्येद्युर्मदनः सुतः । वितीर्य सदनद्वारं शय्यायां समुपाविशत् ॥ ९ ॥
इतः श्रेष्ठी समेतोऽवग् भोः पुत्रोत्तिष्ठ साम्प्रतम् । उद्घाट्य गृहद्वारं कार्यमस्ति ममाऽधुना ॥ १० ॥
पितुर्वचः स्मरंश्चित्ते मदनः सरलाशयः । ददौ प्रत्युत्तरं नैव मनाग् बिभ्यन् तमोभयात् ॥ ११ ॥

For Private and Personal Use Only

पित्रा बहूदितः पुत्रो घटीचतुष्टयान्तिके । द्वारमुद्घाटयामास गेहस्य स्वार्थहेतवे ॥ १२ ॥
पिता प्राह कथं सूनो ! त्वया नोद्घाटितं गृहम् । पुत्रो जगौ मया तात ! भवदीयं वचः कृतम् ॥१३॥
पिताऽवग् मद्वचश्चक्रे कथं ? ततोऽङ्गजो जगौ । तात ! त्वयोदितं पुत्र ! देयः प्रत्युत्तरो न च ॥१४॥
वृद्धस्य दीयते तस्मा-न्नादां प्रत्युतरं तव । यतः पितुर्वचः पाल्य मुत्तमैः सुखमिच्छुभिः ॥ १५ ॥
पिताऽऽचष्टेदृशे कार्ये देयः प्रत्युत्तरः सुत ! । ततः पुत्रो ददौ मिथ्या-दुष्कृतं पितरि ध्रुवम् ॥ १६ ॥
आराध्य जनकं भूरि कालं सद्विनयाद् दृढम् । प्रव्रज्यां श्रीगुरूपान्ते ललौ मण्डननन्दनः ॥ १७ ॥
पालयित्वा चिरं दीक्षां प्राप्य ज्ञानं चतुर्थकम् । शत्रुञ्जये ययौ भूरि-मुमुक्षुसुरसंश्रितः ॥ १८ ॥
बाह्याभ्यन्तरभेदेन तपो द्वादशधा सदा । कुर्वाणः मदनः साधुः पञ्चमं ज्ञानमाप्तवान् ॥ १९ ॥
ततोऽनेकजनान् जैन-धर्मे प्रबोध्य मण्डनः । पुण्डरीकाचले मुक्ति-नगरीं समुपेयिवान् ॥ २० ॥
इत्यादि भूरिशो धर्म्म-कथां नमिजिनेश्वरः । कथयित्वा जनांस्तत्र ग्राहयामास संयमम् ॥ २१ ॥
नमितीर्थपतेर्धर्मो-पदेशाद् बहवो जनाः । प्राप्य ज्ञानं ययुर्मुक्तिं केचिच्च त्रिदिवं ययुः ॥ २२ ॥
इत्यादि भूरिशो भव्यान् बोधयित्वा नमीश्वरः । विजहाराऽवनीपीठे जनान् बोधयितुं बहून् ॥ २३ ॥

—卐—卐—卐—卐—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री पार्श्वनाथस्य शत्रुञ्जयसमागमनस्वरूपम् ।

वाणारसीपुरे वर्ये-ऽश्वसेनस्य महीपतेः । वामादेवीभवः पार्श्व-नामाऽभूत् तनयो वरः ॥ १ ॥

क्रमात् त्यक्त्वा गृहं दीक्षां गृहीत्वा लब्धवित्तमः । शत्रुञ्जये ययौ भूरि-साधुसन्ततिसंयुतः ॥ २ ॥

अत्र श्रीपार्श्वजिनेश्वरेण धर्म्मदेशना कृता । तथाहि—

गुरुभ्योऽप्यधिकः शिष्यः कोऽपि स्याद्गुणराजवत् । करभी-तुरगेभादि-रूपैर्योऽवश्रयद् गुरुम् ॥ ३ ॥

ददानो भीमवद् दानं जीवः प्राप्नोति स क्रमात् । जिनार्चां भक्तिभिः कुर्वन् सोमवल्लभते शिवम् ॥ ४ ॥

तथाहि—वसन्तनगरे वीर-श्रेष्ठिनोऽभूत् प्रिया रमा । कोटिद्वयमितं हेम्नां व्यवसायात् क्रमात् गृहे ॥ ५ ॥

अपत्याऽभावतः श्रेष्ठि-श्रेष्ठिन्यौ दुःखितौ सदा । पृच्छतोऽपत्यसिद्ध्यर्थं नैमित्तिकविदो जनान् ॥ ६ ॥

* यतः—' देवहीनं देवकुलं यथा राज्यं विना नृपम् । विना नेत्रे मुखं नैव यथा राजति भूतले ॥ ७ ॥卐

तथा सत्यपि भूयिष्ठे विभवेऽभ्रंलिहे गृहे । कुलं न शोभते नृणां कदाचिन्नन्दनं विना ॥ ८ ॥

* यतः—यत्र न स्वजनसङ्गतिरुच्चै-र्यत्र नैव लघुलघूनि शिशूनि ।

यत्र नास्ति गुणगौरवचिन्ता, हन्त तान्यपि गृहाण्यगृहाणि ॥ ९ ॥卐

For Private and Personal Use Only

तयोः कुर्वाणयोर्धर्म्मं कुलाचारं निरन्तरम् । रमाया उदरे जीवो-ऽवततार निशात्यये ॥ १० ॥

ददे दानं सुपात्रेभ्यः कुर्वेऽर्चां श्रीजिनेशितुः । पालयिष्याम्यहं शुद्धं शीलं चित्ताङ्गवाणिभिः ॥ ११ ॥

इत्यादिदोहदेष्वेव जायमानेषु सन्ततम् । तस्यास्तांस्तान्वितन्वत्यास्त्रुटत्येव रमा गृहे ॥ १२ ॥ युग्मम् ॥

श्रेष्ठी प्राह प्रिये वर्य-दोहलेषु तवाधुना । जातेषु किं रमा याति नीरवच्छिद्रहस्ततः ॥ १३ ॥

रमा प्राहाऽऽगतं नूनमभाग्यमात्मनो गृहे । कस्याप्यभाग्यवद्गर्भावतारदम्भतोऽधुना ॥ १४ ॥

क्रमाज्जातेऽङ्गजे जन्मो-त्सवे पित्रा कृते सति । पुत्रस्य वत्सराजेति ददौ नाम शुभे दिने ॥ १५ ॥

एवं पुत्रे द्वितीयेऽपि जाते पित्रा जनुर्महे । कृते नाम ददौ तस्य गुणराजेति च क्रमात् ॥ १६ ॥

पित्रा द्वौ तनयौ लेखगृहे मुक्तौ बुधान्तिके । पठन्तौ बहुशास्त्राणि बभूवतुर्विशारदौ ॥ १७ ॥

श्रेष्ठिनः सदने सर्व-धान्याभावेन कष्टतः । निर्वाहो दुःशको जातो दुःखी श्रेष्ठी ततोऽजनि ॥ १८ ॥

समीपे गणकादीनां लक्ष्म्यार्थं श्रेष्ठिराट् सदा । पृच्छन् वितनुते सेवां वागङ्गाभ्यां सुभक्तितः ॥ १९ ॥

※ यतः—रोगिणां सुहृदो वैद्याः प्रभूणां चाटुकारिणः । मुनयो दुःखदग्धानां गणकाः क्षीणसम्पदाम् ॥ २० ॥ 卐

परगेहेषु कर्म्माणि कारं कारं दिवानिशम् । धान्यं किञ्चित् समासाद्यो-दरं श्रेष्ठी बभार सः ॥ २१ ॥

श्रेष्ठी पत्न्या समं वार्त्ता-मेवं वितनुते सदा । एतयोः पुत्रयोरात्म-सद्मन्यायातयोः सतोः ॥ २२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गता लक्ष्मीः समायातं दारि-द्र्यं दुःखदायकम् । लक्ष्मीं विना नरा नैव शोभन्ते कर्हिचित् क्वचित् ॥ २३ ॥
* यतः–" जाई रूवं विज्जा तिन्नि वि निवडंतु कंदरे विवरे । अत्थुच्चिय परिवड्ढउ जेण गुणा पायडा हुंति " ॥२४॥卐
तेन तौ तनयौ कस्मै-चिन्नरायाऽर्थसाधवे । वितीर्याऽवां सुखी स्याव्वो दारिद्र्यं नो यतो वरम् ॥ २५ ॥
* यतः—" अनाज्यं भोज्यमप्राज्यं विप्रयोगः प्रियैः सह । अप्रियैः सम्प्रयोगश्च सर्वं पापविजृम्भितम् ॥ २६ ॥卐
एवं वितन्वतो वार्त्तां श्रेष्ठिनः प्रियया समम् । एको योगी समेत्यावग् भिक्षां देहीह मेऽधुना ॥ २७ ॥
ताभ्यामुक्तं कथं भिक्षा दीयते भवतोऽधुना । यतो न मुञ्चतेऽस्माकं गृहं दारिद्र्यपादपः ॥ २८ ॥
यतः–सहोदरव्ययाः(थाः) पंच दारिद्र्यस्यानुजीविनः । ऋणं दौर्भाग्यमालस्यं बुभुक्षाऽपत्यसन्ततिः ॥ २९ ॥
विपुलमतेरपि बुद्धिर्नश्यति पुरुषस्य विभवहीनस्य । घृतलवणतैलतन्दुल-वस्त्रेन्धनचिन्तया सततम् ॥ ३० ॥
योग्याचष्टाऽनयोस्सून्वो-र्लसल्लक्षणशालिनोः । सतोर्भवद्गृहे दुःखं दारिद्र्यसम्भवं कथम् ? ॥ ३१ ॥
श्रेष्ठ्यभाणीत् सदाकारं बहिर्वर्यतमद्युति अन्तःकटु कथं मोद-प्रदं स्यादिन्द्रवारणम् ? ॥ ३२ ॥
योगी जगौ गृहे यस्य नास्त्येकोऽपि तनूभवः । शून्यं तस्य समस्त्येव गेहं जानीहि नैगम ! ॥ ३३ ॥
* यतः—" अपुत्रस्य गृहं शून्यं दिशः शून्या अबान्धवाः । मूर्खस्य हृदयं शून्यं सर्वशून्यं दरिद्रता " ॥ ३४ ॥卐
श्रेष्ठ्यवक् क्रियते तेन हेम्ना किं येन शालिना । त्रुटतः श्रवणे दुःखं जायते देहिनां यतः ॥ ३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योग्यवक् तनयावेतौ मह्यमर्पय सम्प्रति । येन सर्वाः कलाः कल्पाः (ल्याः) शिक्षयाम्येतयोर्द्रुतम् ॥ ३६ ॥
श्रेष्ठी बभाण तनयावर्प्यैते भवतः कथं ? । त्वं तु लात्वा मम सुतौ नंष्ट्वा यास्यसि दूरतः ॥ ३७ ॥
योग्यवक्र शिक्षयिष्यामि तथा ते तनयौ कलाः । यथा ताभ्यां महीशाद्या नरा रज्यन्त एव च ॥ ३८ ॥
तयोर्मध्ये भवेद् वर्य-तमो यस्तनयस्तत्र । स एव भवता ग्राह्यो देयोऽन्यो मम नैगम ! ॥ ३९ ॥
एवं चेत् क्रियते श्रेष्ठि-स्त्वया ममोदितं ध्रुवम् । तदा तवालये लक्ष्मीर्भूयसी भवति ध्रुवम् ॥ ४० ॥
मयैव शिक्षिता नूनं मनुजाः सुकलाः कलाः । श्लाघ्या भवन्ति विश्वेषां जनानां भूभुजामपि ॥ ४१ ॥
* अश्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च । पुरुषविशेषं प्राप्ता भवन्ति योग्या अयोग्याश्च ॥ ४२ ॥卐
* वाजि-वारण-लोहानां काष्ठ-पाषाण-वाससाम् । नारी-पुरुष-तोयानामन्तरं विद्यते बहु ॥ ४३ ॥卐
ततः श्रेष्ठी ददौ तस्मै योगिने तनयौ निजौ । कलाशिक्षाकृते पत्न्या सार्द्धं विचार्य तत्क्षणात् ॥ ४४ ॥
उज्ञयन्ताचले गत्वा योगी कलकलाभिधः । श्रेष्ठिपुत्रौ कला रम्या अशिक्षयदनेकशः ॥ ४५ ॥
आद्यः श्रेष्ठिसुतः प्रातः कृतैककगलाम्भसा । मुखात् पतित दीनार शतपञ्चकमञ्जसा ॥ ४६ ॥
द्वितीयः करभ्येभाश्व-पत्त्यादि रुचिरं बलम् । विधाय विक्रयात्तेषा-मर्जयद् बहुशो धनम् ॥ ४७ ॥ युग्मम् ॥
योगिना कथिते घस्रे श्रेष्ठिनोऽग्रे च तौ सुतौ । आनीतौ स्वकलाः सर्वा दर्शयामासतुः प्रगे ॥ ४८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आद्यं पुत्रं ललौ श्रेष्ठी द्वितीयं योगिराट् पुनः । योग्यवग् भवतो गेहे भवताद् भूयसी रमा ॥ ४९ ॥
श्रेष्ठिपुत्रं द्वितीयं तु गृहीत्वा योगिराड् ययौ । तत्र पञ्चशती रैणां दत्ते श्रेष्ठिसुतः पितुः ॥ ५० ॥
जाते भूरिधने श्रेष्ठी भूयिष्ठविभवव्ययात् । आवासं कारयामास कैलासाचलसोदरम् ॥ ५१ ॥
* यतः—"घोटकैः क्षत्रिया विप्रा व्याजेन वणिजो गृहैः । कौटुम्बिकाः कृषेर्लक्ष्मीं गमयत्यर्जितामपि" ॥५२॥卐
आगत्य यस्य कुर्वन्ति स्वजनाः सेवनां सदा । मान्यन्ते सधना लक्ष्म्या निर्धना न कदाचन ॥ ५३ ॥
धर्म्मकृत्यानि कुर्वाणः श्रेष्ठी दानमनर्गलम् । ददानो दानिनामाद्यौ रेखां पुरि क्रमाद्ययौ ॥ ५४ ॥
* यतः—" विद्यावृद्धास्तपोवृद्धा ये च वृद्धा बहुश्रुताः । सर्वे ते धनवृद्धस्य द्वारे तिष्ठन्ति किङ्कराः " ॥ ५५ ॥卐
श्रेष्ठिन्याहैकदा पत्युः पुरोऽस्ति नो धनं बहु । तेनायान्ति गृहे स्वीये स्वजना बहवः सदा ॥ ५६ ॥
लघुपुत्रः कदाचिन्न समेति स्वकसद्मनि । एतदेवास्ति मे दुःखं नान्यत् किञ्चित् पतेऽधुना ॥ ५७ ॥
पुत्रेण जायते सौख्यं मातापित्रोर्निरन्तरम् । पुत्रं विना गृहं शून्यं श्मशानमिव भासते ॥ ५८ ॥
* यतः—" शर्वरीदीपकश्चन्द्रः प्रभाते रविदीपकः । त्रैलोक्यदीपको धर्म्मः सुपुत्रः कुलदीपकः " ॥ ५९ ॥卐
यादृशा लघवः पुत्राः पित्रोर्भवन्ति वल्लभाः । न हि तादृग् धनं धान्यं गेहं देहं कदाचन ॥ ६० ॥
सत्सु भूरिषु पुत्रेषु रूपसौभाग्यशालिषु । लघुपुत्रो विशेषेण मातुर्भवति वल्लभः ॥ ६१ ॥

For Private and Personal Use Only

सतीषु भूरिलक्ष्मीषु गृहे श्रेष्ठिप्रिया रतिम् । तं नन्दनं विना नाऽऽपत् मत्सीव स्तोकवारिणि ॥ ६२ ॥
इतो योग्यन्तिके प्राह गुणराजः कृताञ्जलिः । मातुः पितुरहं पादा-न्नन्तुकामोऽस्मि साम्प्रतम् ॥ ६३ ॥
योग्यवक् त्वां विना सारां मदीयां कःकरिष्यति ? । त्वत्तः स्यान्मे सुखं भूरि विनीतोऽसि त्वमन्वहम् ॥ ६४ ॥
गुणराजोऽभणद् माता-पित्रोर्नत्वा पदाम्बुजम् । स्थित्वा तत्र दिनान्यष्टौ वन्दिष्येऽहं तव क्रमौ ॥ ६५ ॥
योग्यभाणीत्त्वया तत्र स्थातव्यं नाधिकं दिनम् । यदि स्थाताधिकं त्वं चेत् तदा मृतिस्तवानघ ! ॥ ६६ ॥
त्वदुक्तादधिकं स्थाता तत्राहं न क्षणं विभो ! । उक्त्वेति गुणराजोऽगाज् जनकस्यालये लघु ॥ ६७ ॥
मातापित्रोस्ततो भ्रातु-र्भ्रातृपत्न्याः क्रमौ क्रमात् । प्रणम्य विधिवन्मोदं गुणराजो व्यधात्तमाम् ॥ ६८ ॥
ततो द्वौ सोदरौ राम-लक्ष्मणाविव सन्ततम् । भेजाते प्रीतिमत्यन्तं रविचन्द्राविवाभितः ॥ ६९ ॥
लक्षमूल्यः स्वयं तार्क्ष्यो भूत्वा कुम्भी क्वचित्पुनः । गुणराजोऽपि विक्रीय स्थित्वान्यसदने स्वकम् ॥ ७० ॥
पितुर्गृहे श्रियं बह्वी-मानीयानीय तत्क्षणात् । स्वरूपं कुरुते माता-पित्रोः प्रमोदहेतवे ॥ ७१ ॥
महत्यां पुरि तस्यां तु कृत्वाऽश्वान् भूरिशस्तदा । गुणराजो निनायाऽऽशु पितुर्गेहे बहुश्रियम् ॥ ७२ ॥
गतेषु बहु-घस्रेषु, तस्य स्थाष्णोः पितुर्गृहे । रुष्टो योगी समायात-स्तमाकारयितुं द्रुतम् ॥ ७३ ॥
योगिनाऽऽकारितो नैति गुणराजो यदा वणिग् । योगी जज्ञौ तदा तं च तार्क्ष्यादिरूपकारकम् ॥ ७४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अश्वरूपधरं योगी गुणराजं मनोहरम् । धनाल्लात्वा रुरोहाऽऽशु कशाघातैरताडयत् ॥ ७५ ॥
ताडयंस्तुरगं योगी वक्तीति तं प्रति स्फुटम् । अवज्ञां मे कुरुष्व त्वं प्रतिज्ञाया विलोपनात् ॥ ७६ ॥
सायं यावत्तुरंगं तं प्रकुट्टयन् कशादिभिः । स्नानं कर्त्तुं ययौ योगी जलपूर्णे सरोवरे ॥ ७७ ॥
प्रविष्टे सवनं कर्त्तुं तस्मिन् योगिनि तत्क्षणात् । मत्स्यरूपधरो भूत्वा तार्क्ष्यः सरसि सोऽविशत् ॥ ७८ ॥
बकरूपधरो योगी मत्स्यं हन्तुं यदेहते । तदा मत्स्यो जलस्यान्त-र्विशते भयतो भृशम् ॥ ७९ ॥
ततो मत्स्योऽजनिष्टैण-रूपभृद् विपिने क्वचित् । ततो बकोऽभवत् सिंह-रूपस्तं हन्तुमुद्यतः ॥ ८० ॥
ततो मृगो व्यधात् कीर-रूपं माकन्दपादपे । ततो सिंहोऽभवत् श्येन रूपस्तं हन्तुमुद्यतः ॥ ८१ ॥
श्येनं निहन्तुमायान्तं दृष्ट्वा नंष्ट्वा तदा शुकः । गवाक्षस्थमहीपाल पत्न्या हस्ते ह्युपाविशत् ॥ ८२ ॥
श्येनोऽशक्तः शुकं हन्तु-मोतुरूपधरोऽजनि । ओतुः शुकस्य परितो बभ्राम वधवाञ्छया ॥ ८३ ॥
तत्र वृश्चिकसर्पादि-रूपाणि बहुशस्तदा । योगी कृत्वा शुकं हन्तुं राज्ञीहस्तस्थमीहते ॥ ८४ ॥
ततः एकावलीहार-रूपभृत् कीर एव सः । राज्ञीहस्ते समागत्याऽकस्मात्तस्थौ समाहितः ॥ ८५ ॥
अनालोक्य शुकं राज्ञी दुःखिता यावताऽजनि । तावद्धस्तागतं हारं वीक्ष्य राज्ञ्योऽजनिष्ट मुद् ॥ ८६ ॥
राज्ञ्या हृदि निजे हारे क्षिप्ते सति स योगिराट् । अशक्तो हिंसितुं चक्रे नर्त्तक्या रूपमद्भुतम् ॥ ८७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नृत्येन नर्त्तकी राज-राज्ञ्योश्चित्तं सुमोदभाग् । कुर्वाणा याचते हारं राज्ञीकण्ठस्थितं नृपम् ॥ ८८ ॥
राजाऽभाणीत् प्रिये ! देहि हारमस्यै स्त्रियै द्रुतम् । राज्ञी जगौ न दास्येऽह-मेकावल्यभिधंत्विमम् ॥ ८९ ॥
एकदा भूपतिर्यावद् हारं राज्ञीहृदि स्थितम् । लाति तावत् स तुत्रोट मणिकान्यपतन् भुवि ॥ ९० ॥
नर्त्तकी कर्कटो भूत्वा मणिकान् भक्षयन् क्रमात् । न जज्ञौ मणिकं तं च यत्रास्थात्तस्य जीवितम् ॥ ९१ ॥
गुणराजस्ततश्चोतु-रूपभृत् कर्कटं तकम् । तथाऽदशद्यथा योगी मृत्वा श्वभ्रं समीयिवान् ॥ ९२ ॥
योगिनाऽपहृतं पुत्रं ज्ञात्वा श्रेष्ठी प्रियायुतः । अभ्येत्य भूपतेः पार्श्वे जगादेत्युच्चनिःस्वनम् ॥ ९३ ॥
स्वामिन् ! वसति ते ग्रामे हृतो मे योगिना सुतः । दुःखितानामनाथानां शरणं त्वं महीपते ! ॥ ९४ ॥
राजाऽऽकार्यानुगान् प्राह दृष्ट्वा तं दुष्टयोगिनम् । हत्वाऽस्य तनयं दत्थ प्रजापो नृपतिर्यतः ॥ ९५ ॥
विलोक्य भूमिभुग्भृत्यैर्हृदृष्टे योगिनि ध्रुवम् । पुत्राप्राप्तौ सपत्नीकः श्रेष्ठी दुःख्यभवद् भृशम् ॥ ९६ ॥
दुःखितौ मातरं तातं मत्वा मार्जाररूपभृत् । ध्यातवान् गुणराजोऽथ पित्रोः स्नेहविचेष्टितम् ॥ ९७ ॥
त्यक्त्वौतुरूपमह्नाय गुणराजोऽभवद्यदा । तदोचतुर्नृपो राज्ञी कोऽयमत्रागतो नरः ? ॥ ९८ ॥
जननीजनकौ पुत्रं विलोक्य प्रोचतुर्मुदा । पुत्रः किमेष नौ अत्र समेतोऽस्त्यन्य एव न ॥ ९९ ॥
उपलक्ष्य सुतं सम्यग् दोर्भ्यामालिङ्ग्य रङ्गतः । ताताम्बे प्रोचतुः पुत्र ! कुत्रास्थाः क्व गतोऽसि भोः ॥ १०० ॥

For Private and Personal Use Only

पुत्रो मातुः पितुः पादौ प्रणम्य भूपतेः पुनः । योगिनो विहितं सर्वं जगाद मरणान्तिकम् ॥ १०१ ॥
निशम्य गुणराजस्य योगिनो विहितं समम् । महीपतिरुवाचेति श्रृण्वत्सु नृषु भूरिषु ॥ १०२ ॥
गुरुभ्योऽप्यधिकः शिष्यः कोऽपि स्याद् गुणराजवत् । करभीतुरगेभादि-रूपैर्योऽवञ्चयद् गुरुम् ॥ १०३ ॥
परहिंसेच्छया जीवाः परद्रोहविधानतः । इहामुत्र च दुःखानि लभन्ते योगिराडिव ॥ १०४ ॥
ततः सन्मान्य भूपालः श्रेष्ठिनं सुतसंयुतम् । ददौ ग्रामशतं पञ्च पुराणि पृथुलानि च ॥ १०५ ॥
गुणराजं गजारूढं विधाय मेदिनीपतिः । प्रेषयामास मन्त्रीश-पार्श्वात्तस्य निकेतने ॥ १०६ ॥
ततः श्रेष्ठी तनूजाभ्यां समं क्षेत्रेषु सप्तसु । लक्ष्मीं व्ययन्न जानाति सङ्ख्यां श्रीणां गृहे मनाग् ॥ १०७ ॥
गुणराजो विशेषेण दर्शयन् सकलाः कलाः । मान्योऽजनि महीशस्य लोकानामपि सन्ततम् ॥ १०८ ॥
महेभ्यकन्यके पित्रा नन्दनौ परिणायितौ । धर्म्मानुरोधतोऽर्थं तु तृतीयं चक्रतुः सदा ॥ १०९ ॥
※ यतः त्रिवर्गसंसाधनमन्तरेण पशोरिवायुर्विफलं नरस्य । तत्रापि धर्म्मं प्रवरं वदन्ति न तं विना यद्भवतोऽर्थकामौ卐
श्रेष्ठ्यन्यदा सुतद्वन्द्व-युक्तो ज्ञान्यन्तिके गतः । धर्म्मं श्रुत्वाऽऽह पुत्राभ्यां प्राग्भवे किं कृतं वृषम् ? ॥ १११ ॥
गुरुराह रमापुर्यां श्रीदस्य श्रेष्ठिनो गृहे । भीमसोमाभिधौ भृत्यौ गेहे कर्म्म वितन्वतः ॥ ११२ ॥
श्रेष्ठी देवगृहे देव-मानर्च प्रवरैः सुमैः । अर्जयामास भूयिष्ठं पुण्यं मुक्तिगमोचितम् ॥ ११३ ॥

श्रीदः श्रेष्ठयन्यदा चन्द्रसूनोः पाणिग्रहोत्सवे । कारयामास पक्कान्न मुखां रसवतीं वराम् ॥ ११४ ॥
मध्याह्ने श्रेष्ठिनस्तस्य गृहे संयतयामलम् । विहर्तुमागमद्यावत्तावच्चन्द्रो व्यचिन्तयत् ॥ ११५ ॥
अद्य मे जायमानेऽस्मि-न्नुद्वाहे सदने पितुः । मोदकादिकरोचिष्णुर्जाता रसवती वरा ॥ ११६ ॥
यद्येतयोर्लसत्साध्वोर्दीयतेऽन्नं च किञ्चन । तदा मे जायते वर्यं जनुश्च पाणिपीडनम् ॥ ११७ ॥
* यतः–"पश्चाद्दत्तं परैर्दत्तं लभ्यते वा न लभ्यते । स्वहस्तेन च यद्दत्तं लभ्यते तन्न संशयः ॥ ११८ ॥" 卐
निर्भाग्यविभवैर्वप्तुं सप्तक्षेत्र्यां न लभ्यते । यत्र पात्रादयोप्युप्ताः फलं यच्छंति वाञ्छितम् ॥ ११९ ॥
ध्यात्वेति चन्द्र उत्थाय स्थालं मोदकपूरितम् । प्रवृत्तो ददितुं साधुयुग्मं गृह्णाति तन्न हि ॥ १२० ॥
बलेन मोदकान् पञ्च चन्द्रः साध्वोर्वितीर्णवान् । विशुद्धमन्यमन्नं च पानं च वरभावतः ॥ १२१ ॥
तदाऽऽहाग्रेतनः साधु-रत्रैयुः सोमसूरयः । परिवारो बहुस्तेषां विद्यते चन्द्र ! सम्प्रति ॥ १२२ ॥
यस्य कल्पिष्यते साधोर्मोदकादि विशुद्धिभाग् । दास्यते च मया तस्मै पुण्यं तव भविष्यति ॥ १२३ ॥
तदा तत्र स्थितो भीमो भृत्यो दृष्ट्वा व्यचिन्तयत् । मोदकादि ददौ चन्द्रः साधोरेष वरस्ततः ॥ १२४ ॥ ॥ १७० ॥
मोदकाद्यस्ति मे चेद्धि तदा दास्येऽहमप्यहो ! । किं कुर्वे किं करोम्यत्र श्रेष्ठिनः तुच्छपुण्यवान् ॥ १२५ ॥
* यतः-यदुपात्तमन्यजन्मनि शुभमशुभं वा स्वकर्म्मपरिणत्या । तच्छक्यमन्यथा नैव कर्त्तुं देवासुरैरपि ॥ १२६ ॥ 卐

उदयंमि सहस्सकरे सलोअणो पिच्छइ सयललोअं। जन्न उलूओ पिच्छइ सहस्सकिरणस्स को दोसो ? ॥ १२७ ॥
एवं भावयतः शुद्धां भावनां तस्य तत्र तु । पुण्यं बभूव कल्याण-नगरीगमनोचितम् ॥ १२८ ॥
श्रेष्ठिना शिक्षितः सोमः प्रवरैः कुसुमैः प्रभोः । शरीरेऽङ्गीं तथा चक्रे यथाऽन्येषां बभूव मुद् ॥ १२९ ॥
क्रमात् सोमो मृतो जातो गुणराजः सुतस्तव । मृत्वा भीमोऽभवद्वत्स-राजेत्याह्वोऽङ्गजोऽपरः ॥ १३० ॥
जिनाङ्गीकरणात् प्राप नामरूपकरीं कलाम् । गुणराजः सुतस्ताव-कीनोऽयमिह संस्तुतौ ॥ १३१ ॥
चन्द्रदत्तं सुपात्राय दानं भीमोऽनुमोदयन् । वत्सराजः प्रगे प्राप दीनारशतपञ्चकम् ॥ १३२ ॥
चन्द्रो मृत्वा कलापुर्यां पञ्चमोदकदानतः । पञ्चकोटीसुवर्णस्या-भवद्दिभ्योऽधिपो धनः ॥ १३३ ॥
तस्माद्दानाद्धनो मुक्तिं गन्ता पञ्चमके भवे । तव सूनोर्भवे षष्ठे मोक्षो भावीति चिन्तय ॥ १३४ ॥
पुण्यक्रिया न मोक्तव्या दुष्कर्म्मक्षयहेतवे । पापे सति यतो मुक्तिर्नैव जायेत देहिनाम् ॥ १३५ ॥
श्रुत्वेति पुत्रयोः पूर्वं भवं निष्पादितं वृषम् । श्रीदः पुत्रयुतो धर्म्मं ललौ सम्यक्त्वसंयुतम् ॥ १३६ ॥
मातृपितृयुतौ धर्म्म-मार्हतं तौ सहोदरौ । कुर्वाणौ चक्रतुर्यात्रां सिद्धक्षेत्रादिषु क्रमात् ॥ १३७ ॥
श्रीदः पत्नीयुतो लात्वा संयमं गुरुसन्निधौ । पालयँस्त्रिदिवं षष्ठं जगामामलमानसः ॥ १३८ ॥
पूजादानप्रभावेण श्रीदश्रेष्ठितनूभवौ । ततश्च्युतौ शिवं स्तोकभवान्मुक्तिमिहैयतुः ॥ १३९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यादि-देशनां श्रुत्वा श्रीपार्श्वजिनसन्निधौ । बहवो भविनो भेजुः श्राद्ध-साधुव्रते तदा ॥ १४० ॥
तत्र श्रीपार्श्वनाथस्य शिष्याः शतत्रयं क्रमात् । प्राप्य ज्ञानं ययुर्मुक्तिं स्वस्यायुषः क्षये लघु ॥ १४१ ॥

श्री वीरजिनस्य शत्रुञ्जयागमनसम्बन्धः ।

पुरे क्षत्रियकुण्डाह्वे सिद्धार्थस्य नरेशितुः । असूत त्रिशला पत्नी पुत्रं सुस्वप्नसूचितम् ॥ १ ॥
वासवेन कृते जन्मोत्सवे जन्मोत्सवं पिता । कृत्वा सूनोर्ददौ वीर-कुमारेत्यभिधां तदा ॥ २ ॥
वर्धमानः क्रमाद्वीरो लात्वा दीक्षां शुभेऽहनि । क्षिप्त्वा कर्म्माखिलं ज्ञानं केवलं प्राप्तवान् क्रमात् ॥ ३ ॥

विस्तरोऽस्य चरित्रात् स्वयं ज्ञेयः—

श्रीवीरो बोधयन् भव्यान् गौतमादिसुसाधुयुग् । शत्रुञ्जये महातीर्थे शिवदे समवासरत् ॥ ४ ॥
तत्र सिद्धाद्रिमाहात्म्यं श्रीवीरः प्रोक्तवानिति । अस्मिँस्तीर्थे शिवं जग्मु-रनेके भविनः किल ॥ ५ ॥
※ यतः—"अन्यतीर्थेषु सद्ध्यान-शीलदानार्थ(र्च)नादिभिः । यत्फलं स्यात् ततोऽसङ्ख्यं शत्रुञ्जयकथाश्रुतेः ॥६॥ 卐
※ "विंशतिर्भवनस्येन्द्रा द्वात्रिंशद् व्यन्तराधिपाः । द्वौ ज्योतिर्वासवावूर्ध्व-लोकसंवासिनो दश ॥ ७ ॥" 卐

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चतुःषष्टिमिता एते इन्द्रा देवैर्वृता घनैः । शत्रुञ्जये जगन्नाथ-भूषितं नेमुरादरात् ॥ ८ ॥

* पापिनां शल्यरूपोऽयं धर्मिणां सर्वशर्मदः । कामिनां कामितं दाता विद्यतेऽयं गिरिर्वरः ॥ ९ ॥卐

* विना तपो विना दानं विनाऽर्चां शुभभावतः । केवलं स्पर्शनं सिद्ध-क्षेत्रस्याक्षयसौख्यदम् ॥ १० ॥卐

एवं प्रभोर्वचः श्रृण्वन् लेपः संयतपुङ्गवः । संप्राप केवलज्ञानं लोकालोकावलोककम् ॥ ११ ॥

तस्यर्षेः केवलज्ञानोत्सवं देवान् वितन्वतः । ज्ञात्वा भव्यप्रबोधाय वीरं प्रपच्छ गौतमः ॥ १२ ॥

भगवन् ! ज्ञानमभूद्यस्या–धुना कोऽसौ तपोधनः । लले तेन कथं दीक्षा कथ क्षिप्तं तमोऽखिलम् ? ॥ १३ ॥

* यतः–'भद्दो विणीअविणओ पढमगणहरो समत्तसुअनाणी । जाणंतोवि तमत्थं विम्हिअहियओ सुणइ सव्वं ' ॥१४॥卐

प्रभुः प्राहेन्द्रभूते ! त्वं श्रृणु सम्प्रति गौतम ! । पुरे राजगृहे लेप-श्रेष्ठि मिथ्येक्षणोऽभवत् ॥ १५ ॥

शिवभूतेर्गुरोः पार्श्वे लेपः श्रृण्वन् वृषं सदा । वापी-कूप-तडागादि-पुण्यस्थानान्यकारयत् ॥ १६ ॥

स्नानं कृत्वातिभुङ्क्तेस्म चक्रे रात्र्यदनं पुनः । बुभुजे कन्दमूलाद्य-भक्ष्याणि च निरन्तरम् ॥ १७ ॥

यदा यदा समायाति शिवभूतिस्तपोधनः । तदेत्यभिमुखं पञ्च योजनानि सुभक्तितः ॥ १८ ॥

अन्येद्युः शिवभूतौ तु गते चान्यत्र नीवृति । अहं तु समवासार्षं पुरोद्याने मनोहरे ॥ १९ ॥

श्रेणिकक्षोणिपालाद्या बहवो मानवास्तदा । ममोपान्ते वृषं श्रोतु-मीयुर्निजनिजालयात् ॥ २० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जिनदत्तेन मित्रेण समं लेपः स नैगमः । मनो विनापि सर्वज्ञं प्रणम्य मां समाविशत् ॥ २१ ॥
* "दो चेव जिणवरेणं जाइ जरामरणविप्पमुक्केणं । लोगम्मि पहा भणिआ सुसमण सुसावओ वावि ॥ २२ ॥" 卐
सम्यक्त्वमूलानि पञ्चाणुव्रतानि त्रयो गुणाः । शिक्षाव्रतानि चत्वारि एतानि पालयेद् ध्रुवम् ॥ २३ ॥
स एव लभते स्वर्गा-पवर्गादिसुखावलिम् । यतो जीवदया सम्यक् पालिता शिवशर्मदा ॥ २४ ॥
* यतः-'जयणा य धम्मजणणी जयणा धम्मस्स पालणी होइ । तव्वुड्ढिकरी जयणा एगंत सुहावहा जयणा ॥ २५ ॥' 卐
पुराणेऽप्युक्तम्-"यो दद्यात् काञ्चनं मेरुं कृत्स्नां चैव वसुंधराम् । एकस्य जीवितं दद्यान्न च तुल्यं युधिष्ठिर !"
पृथिव्यामप्यहं पार्थ ! वायावग्नौ जलेऽप्यहं । वनस्पतिगतश्चाहं सर्वभूतगतोऽप्यहम् ॥ २७ ॥
यो मां सर्वगतं ज्ञात्वा तं न हिंसेत् कदाचन । तस्याहं न प्रणश्यामि स च मां न प्रणश्यति ॥ २८ ॥
* अस्तं गते दिवानाथे आपो रुधिरमुच्यते । अन्नं मांससमं प्रोक्तं मार्कण्डेन महर्षिणा ॥ २९ ॥ 卐
इत्यादि मेऽन्तिके धर्म्मं श्रुत्वा लेपो वणिग्वरः । त्यक्त्वा मिथ्यात्वमह्नाय जैनं धर्म्ममलात्तदा ॥ ३० ॥
ततः कूपतटाकादि धर्म्मकृत्यं स नैगमः । न करोति न कारयति नै(त्यै)वानुमन्यते ध्रुवम् ॥ ३१ ॥
ततो मिथ्यात्विनो लोका वन्दन्त्येवं च तं प्रति । लेपोऽयं श्रेष्ठिराड् मूर्खो जैनधर्माश्रितोऽभवत् ॥ ३२ ॥
कुलक्रमागतं धर्म्मं यस्त्यक्त्वान्यवृषं श्रयेत् । स एव लभते पुत्र ! परत्र त्रिपदं पराम् ॥ ३३ ॥

For Private and Personal Use Only

प्रशंसां कुर्वते श्राद्धा लेपोऽयं पुण्यवान् धनी । इहामुत्र सुखश्रेणीं ललिष्यति न संशयः ॥ ३४ ॥
लेपो लोकोदितं नैव चित्ते धारयति ध्रुवम् । किन्तु धर्म्मं जिनैः प्रोक्तं कुरुते प्रतिवासरम् ॥ ३५ ॥
※ यत-"सर्वथा स्वहितमाचरणीयं, किं करिष्यति जनो बहुजल्पः ? । 卐
विद्यते स नहि कश्चिदुपायः, सर्वलोकपरितोषकरो यः ॥ ३६ ॥
शिवभूतिमितस्तत्रा-यान्तमाकर्ण्य दूरतः । संमुखं न समायातो लेपो नन्तु गुरुक्रमौ ॥ ३७ ॥
ततः स तापसो रुष्टो दध्यावेवं निजे हृदि । अयं पाप्यभवज्जैन धर्म्मस्याश्रयणाद् ध्रुवम् ॥ ३८ ॥
पुरमध्ये समायातः शिवभूतिः स तापसः । लेपमनागतं नन्तुं ज्ञात्वा रुष्टोऽभवद् भृशम् ॥ ३९ ॥
आहूतो न यदा लेपो गुरुणा(गतो) शिवभूतिना । तदा तत्र स्वयं गत्वा लेपं प्रति जगौ गुरुः ॥ ४० ॥
रे दुष्टात्मन् ! त्व(स)मुत्थान-नमनादिक आदरः । न त्वया विहितस्तेन दुर्गतिस्ते भविष्यति ॥ ४१ ॥
लेपः प्राह वितन्वानो धर्म्मं स्नानादिकं सदा । कारयन्ननुजानंश्च दुर्गतिं श्राग् गमिष्यति ॥ ४२ ॥
संवत्सरेण यत्पापं कैवर्त्तस्य च जायते । एकाह्नेन तदाऽऽप्नोति अपूतजलसङ्ग्रही ॥ ४३ ॥
चित्तमन्तर्गतं पापं तीर्थस्थाने न शुद्ध्यति । शतशोऽपि जलैर्धूतं सुराभाण्डमिवाशुचि ॥ ४४ ॥
ततः स तापसः प्राह वयं ते न भविष्यति । शापं दत्त्वेति लेपाय तपस्वी स्वाश्रयं ययौ ॥ ४५ ॥

ततो लेपो गुरूपान्ते श्रावकप्रतिमां सदा । कुर्वन्नर्जयति श्रेयो महोदयगमोचितम् ॥ ४६ ॥
* दंसण-वय-सामाइअ-पोसह-पडिमा-अबंभ-सचित्ते । आरंभ पेस-उद्दिट्ठवज्जए समणभूए अ ॥ ४७ ॥卐
इत्यादि प्रतिमां कृत्वा स्वर्णकोटीर्दश द्रुतम् । त्यक्त्वा ममान्तिके दीक्षां जग्राह शुभभावतः ॥ ४८ ॥
तस्य लेपयतेर्ज्ञानं केवलं शुभभावतः । बभूव साम्प्रतं गच्छभृद् ! गौतमगुणाकर ! ॥ ४९ ॥
श्रुत्वेति स्वामिनः पार्श्वे साधवो बहवस्तदा । संप्राप्तकेवलज्ञाना ययुः शत्रुञ्जये शिवम् ॥ ५० ॥
ततो वीरजिनोऽन्यत्र विहारं कृतवाँस्तदा । गौतमोऽपि गणाधीशो भव्यान् भूरीन् प्रबोधयन् ॥ ५१ ॥

श्री नेमिनाथस्य शत्रुञ्जयगिरेरूर्ध्वानारोहणस्वरूपम् ।

अन्यदा विहरन्नेमिनाथो विमलभूभृतः । उपत्यकाक्षितौ देव-सहितः समवासरत् ॥१॥
तत्र प्रबोध्य भूयिष्ठ-भव्यजीवान् जिनेश्वरः । अनारुह्य गिरेरूर्ध्वं व्यहार्षीदन्यनीवृति ॥२॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मणिरूप्पकणयपडिमं जत्थ रिसहचेइअं भरहविहिअं ।
सदुवीसजिणाययणं सो विमलगिरी जयउ तित्थं ॥ ११ ॥

व्याख्या–यत्र तीर्थे शत्रुञ्जयाख्ये 'ऋषभचैत्यं' नाभेयचैत्यं काञ्चनमयं भरतेन स्फारं कारितं, तस्य परितो हेममयानि द्वाविंशतिः जिनायतनानि-जिनालयानि देवकुलिकाः कारितानि, तत्र मुख्यप्रासादे मणिमयी श्रीऋषभजिनप्रतिमा पुण्डरीकप्रतिमा च कारिते, अन्येषु जिनगृहेषु नेमिनाथवर्जिता अजितादि-वीरजिन-पर्यन्ता मणिरूप्यकनकप्रतिमाः स्थापिताः, स विमलगिरिः पर्वतो जयतात्तीर्थम् ॥ अत्र विमल-वाहनादि-कुलकर, श्रीऋषभजिनजन्म, युगलधर्म्मनिवारणं, राज्यादिस्थापना, नन्दा-सुमङ्गलापत्नीद्वयपाणीग्रहः, शतपुत्रपुत्रीद्वयभवनं, भरतादिपुत्रराज्यार्पणं, संयमग्रहणं, केवलज्ञानप्राप्ति यावत् श्रीऋषभचरित्राद् वाच्यम्—

अयोध्याबहिरुद्याने विहरन्नादितीर्थकृत् । भूनिकोटियतिस्वर्गि-सेवितः समवासरत् ॥ १ ॥
तत्रादिमजिनाधीश-समीपे श्रोतुमागमम् । भरतश्चक्रिराट् सार-परिवारः समागमत् ॥ २ ॥
धर्म्मोपदेशोऽत्र–"धम्मिड्ढी भोगिड्ढी पाविड्ढी इय तिहा भवे इड्ढी ।
सा धम्मिड्ढी भन्नइ जा दिज्जइ धम्मकज्जेसु ॥ ३ ॥
सा भोगिड्ढी गिज्जइ सरीरभोगम्मि जीइ उवओगो । जा दाणभोगरहिया सा पाविड्ढी अणत्थफला ॥ ४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पाविड्ढी पाविज्जइ फलं पावस्स पुव्वविहिअस्स । पावेण पाविणा वा इत्थत्थे सुणह दिट्ठंता ॥ ५ ॥
धर्मोपदेशमाकर्ण्य चक्रयाचष्ट जिनं प्रति । भगवँस्तीर्थमुत्कृष्टं विद्यते किं महीतले ? ॥ ६ ॥
प्रभुः प्राहः भवत्पुत्रः पुण्डरीको गणाधिपः । यत्र तुङ्गे गिरौ मुक्तिं गमी भूरिसुसाधुयुग् ॥ ७ ॥
तत्र तुङ्गाभिधे शैले कल्याणसुखदायके । अतीतानागते काले वर्त्तमाने जिनाधिपाः ॥ ८ ॥
केचिद्ययुर्गमिष्यन्ति निर्वृतिं समवासरन् । संसरिष्यन्ति केचिच्च ज्ञानिनः साधवः पुनः ॥ ९ ॥ युग्मम् ।
इतश्चतुश्चतुर्विंशतिकायां जिननायकः । चन्द्रवेगो ययौ मुक्तिं भूरिसाधुसमन्वितः ॥ १० ॥
कल्याणनगरे चन्द्र–भूपतेः पद्माऽभवत् प्रिया । चन्द्रचूडः सुतश्चारु–गुणमाणिक्यसद्म च ॥ ११ ॥
पृष्टो राज्ञाऽन्यदा धर्म्म-घोषसूरीश्वरस्त्विति । भगवन् ! कानि रत्नानि वर्याणि सन्ति भूतले ॥ १२ ॥
गुरुराचष्ट रत्नानि द्रव्यभावविभेदतः । द्वेधा सन्ति नृप ! ह्यत्र परत्र सुखदानतः ॥ १३ ॥
द्रव्यरत्नानि पाषाण-मयानि भूरिशो भुवि । विद्यन्ते पुनराप्यन्ते धर्मादेव नरेश्वर ! ॥ १४ ॥
तानि न ददते स्वर्गापवर्गशर्म कर्हिचित् । ज्ञानदर्शनचारित्राणि रत्नानि तु सन्ततम् ॥ १५ ॥
य एतानि नरो भक्त्याऽऽराधयत्यनिशं ध्रुवम् । स एव लभते मुक्तिं स्वर्गशर्म न संशयः ॥ १६ ॥
तदा सम्यक्त्वमादाय गुरूपान्ते महीपतिः । चकार जिननाथोक्तं धर्म्मं जीवदयामयम् ॥ १७ ॥

॥ १७८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पश्चाऽन्यदा सुखं सुप्ता महास्वप्नान् चतुर्दश । समालोक्य जजागार मध्यरात्रे शुभे क्षणे ॥ १८ ॥
क्रमात्पुत्रं प्रसूते स्म शुभवेलासु सुन्दरम् । आदाविन्द्रो व्यधाज्जन्मोत्सवं निर्जरपर्वते ॥ १९ ॥
प्रातर्जन्मोत्सवं चक्रे पिता सूनोर्महत्तमम् । ततो नाम ददौ चन्द्र-वेगेति स्वजनान्वितः ॥ २० ॥
चन्द्रवेगः क्रमात् प्राप्त-यौवनो मेदिनीभुजा । भूपानां भूरिशः कन्याः सोत्सवं परिणायितः ॥ २१ ॥
जातेषु भूरि पुत्रेषु चन्द्रवेगो नृपाङ्गजः । विख्यातोऽजनि सर्वत्र विनयादिगुणसुन्दरः ॥ २२ ॥
ततः पित्रा ददे राज्यं चन्द्रवेगाय सूनवे । चन्द्रवेगश्च सर्वेषां भ्रातृणामभवन्मतः ॥ २३ ॥
पृथुदेशप्रदानेन चन्द्रवेगो नरेश्वरः । रञ्जयामास निःशेषान् भ्रातृन् सन्मानदानतः ॥ २४ ॥
पञ्चमात् स्वर्गतोऽभ्येत्य तदा सारस्वतैः सुरैः । प्रवर्त्तय प्रभो ! धर्म्म-तीर्थमित्युदितं स्फुटम् ॥ २५ ॥
चन्द्रवेगस्ततो राज्यं वितीर्य वृद्धसूनवे । धरानृणकृते दानं वर्षं यावद्ददौ वरम् ॥ २६ ॥
ला(त्वा) दीक्षामयं भूरि-कर्म्मक्षपणतोऽन्तिमम् । अवाप केवलज्ञानं लोकालोकप्रकाशकम् ॥ २७ ॥
बोधयन् भविनो भूरीन् ग्रामे ग्रामे पुरे पुरे । पाश्वस्तीर्थङ्करः शत्रुञ्जयाद्रौ समवासरत् ॥ २८ ॥
तदेति पुरतो भूरि-भव्यानां देहिनां स्फुटम् । उपदेशं ददौ तीर्थ-ङ्करो मधुरया गिरा ॥ २९ ॥
तावद् गर्जति हत्यादि-पातकानीह सर्वतः । यावत् शत्रुञ्जयेत्याख्या श्रूयते न गुरोर्मुखात् ॥ ३० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पदे पदे विलीयन्ते भवकोटिभवान्यपि । पापानि पुण्डरीकाद्रेर्यात्रां प्रति यियासताम् ॥ ३१ ॥
श्रुत्वेति तीर्थमाहात्म्यं भविनो भूरिशस्तदा । तीर्थङ्करान्तिके दीक्षां ललुः संसारतारिणीम् ॥ ३२ ॥
तदा तत्र प्रजापालो महीपालो जिनेशितुः । प्रासादं कारयामास भवपर्वतसोदरम् ॥ ३३ ॥
चन्द्रवेगजिनाधीशः साधुकोटिद्वयान्वितः । शत्रुञ्जये ययौ मुक्तिं सर्वकर्म्मव्रजक्षयात् ॥ ३४ ॥卐
शत्रुञ्जयावनिस्पर्शाज्ज् जीवा भव्याः शुभोदयाः । पुण्यपालनराधीशा इव गच्छन्ति निर्वृत्तिम् ॥ ३५ ॥

श्री पुण्यपाल कथा ।

तस्येदं कथानकं तथाहि—

पुण्यपुर्यां नृपः पुण्य-पालः पुण्यकरः सदा । पालयमास भूपीठं न्यायमार्गं प्रवर्त्तयन् ॥ ३६ ॥
तस्यासीत् कमला पत्नी शीलादिगुणशालिनी । पुत्रः पद्मरथो नाम्ना धाम्ना मन्मथसन्निभः ॥ ३७ ॥
राजान्यदा सभासीनो मन्त्रिसामन्तसंयुतः । स्वदेश परदेशादि-वार्त्तां पप्रच्छ मन्त्रिणः ॥ ३८ ॥
तदा वैदेशिको-मर्त्त्य एकस्तत्रागतो नटः । प्रणम्य भूपतिं तस्था-वग्रे पश्यन् नृपाननम् ॥ ३९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूपोऽप्राक्षीत् कुतः स्थानात् कुतो देशादिहागतः ? । किमर्थं ? किं त्वया दृष्टमपूर्वं ? किं श्रुतं ? वद ॥ ४० ॥
वैदेशिको जगौ पद्म-पुराद् भ्राम्यन्नहं भुवि । अगां कुन्दपुरोपान्ते नानोद्यानविराजिते ॥ ४१ ॥
तत्रासीन्मेदिनीपालः प्रजापालाभिधो नयी । तस्याभूच्छ्रीमती पत्नी सप्ताऽभूवंस्तनूभवाः ॥ ४२ ॥
बहूपयाचितैस्तेषां सुतानामुपरि क्रमात् । एकाऽभून्नदिनी नन्दा नाम्ना रूपजितामरी ॥ ४३ ॥
धर्म्मकर्म्मकला वर्या शिक्षिता धुरि नन्दनाः । पश्चाद् भूपतिनन्दिन्यः पित्रापि परिणायिताः ॥ ४४ ॥
पठन्ती नन्दिनी नन्दा बुधोपान्ते निरन्तरम् । भारतीवाभवद्वर्य-विद्याम्भोनिधिपारगा ॥ ४५ ॥
※ यतः-' जले तैलं खले गुह्यं पात्रे दानं मनागपि । प्राज्ञे शास्त्रं स्वयं याति विस्तारं वस्तुशक्तितः ' ॥ ४६ ॥卐
ज्वलनोत्पादिकां विद्यां तुष्टेन व्योमगामिना । प्रददे पुण्यपालाय धर्म्मात् किं किं भवेन्नहि ? ॥ ४७ ॥
※ यतः-' धनदो धनमिच्छूनां कामदः काममिच्छताम् । धर्म्म एवापवर्गस्य पारम्पर्येण साधकः ॥ ४८ ॥卐
ध्यातं राज्ञाऽन्यदा सर्व-वर्यविद्याविशारदा । विनीता विद्यते पुत्री मदीयेयं मनोहरा ॥ ४९ ॥
औदार्यसत्त्वधैर्यादि-मनोहरगुणान्वितः । भूपपुत्रो वरोऽनर्घो जायते स्यात् तदा वरम् ॥ ५० ॥
ध्यात्वेति भूपतिः पुर्या बहिः पीठं मणीमयम् । कारयित्वा प्रगे तत्रो-पवेशयति नन्दिनीम् ॥ ५१ ॥
भूपो वक्ष्य (क्ती)ति योऽत्रास्ति सात्त्विको मानवो नृपः । गृह्णातु मत्सुताहस्ता-द्वरमालां स एव तु ॥ ५२ ॥卐

For Private and Personal Use Only

ततः पुत्रीमहं तस्मै दास्ये ग्रामायुतान्विताम् । [illegible] च कुञ्जरान् वर्यान् अयुतं च तुरङ्गमान् ॥ ५३ ॥
यो भूपो भूपपुत्रो वा नरो वाऽन्यो विशारदः । स समायातु स्रग्मालां लातुं कन्या(मिमां) द्रुतम् ॥ ५४ ॥
तदाशु दहनज्वाला कन्यायाः परितो घना । परिखावद्भवन्त्येवं यमजिह्वासहोदरा ॥ ५५ ॥
तेन बिभ्यन्न को मर्त्यः कन्याहस्तस्थितां स्रजम् । लातुमभ्येति तत् कन्या विद्यते सा कुमारिका ॥ ५६ ॥
 श्रुत्वेति पुण्यपालः क्ष्मा-पालः सारपच्छिदः । ययौ कुन्दपुरे कन्यां वरीतुं तां शुभेऽहनि ॥ ५७ ॥
 अनेकभूमिपालेषु मिलितेषु कनीकृते । पुण्यपालोऽवलम्ब्यैव साहसं कन्यकान्तिके ॥ ५८ ॥
 ययौ यावत्तदाऽकस्माद्वह्निज्वाला महत्यपि । पुण्यपालकरस्पर्शाज्जगाम शान्तिमञ्जसा ॥ ५९ ॥ युग्मम् ।
ततो नृपः प्रजापालो नन्दां स्वां नन्दिनीं तदा । प्रददौ पुण्यपालाय वरोत्सवपुरस्सरम् ॥ ६० ॥
नानाभरणवस्त्रादि-भूषिता नृपनन्दिनी । तदा देवकुमारीव शोभते वररूपभृत् ॥ ६१ ॥
* स्नानं कर्णवतंसिका च कबरी पुष्पान्विता साञ्जनं, नेत्रं गात्रविभूषणं सुतिलकं ताम्बूलमेवालकम् ।卐
वासश्चन्दनलेप कञ्चुकमथो लीलासरोजं लसद्दन्ताभा नखशुक्त्यलक्तरचना शृङ्गारकाः षोडश ॥ ६२ ॥
प्रजापालाङ्गजां नन्दां परिणीय सदुत्सवम् । लब्धग्रामशतः पुण्य-पालः स्वपुरमीयिवान् ॥ ६३ ॥
ततो दशसु वर्षेषु नन्दाऽसूत सुतं वरम् । पिता सूनोर्ददौ नाम रामाह्वं रुचिरोत्सवम् ॥ ६४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वर्षाष्टप्रमितः पुत्रो रामो यावदजायत । तावत्तस्य तनौ कुष्ठं निन्द्यमासीत् कुकर्मतः ॥ ६५ ॥
अनेकेषूपचारेषु कृतेषु तनुजन्मनः । नाभूद्यदा गुणो देहे तदा दुःखी नृपोऽभवत् ॥ ६६ ॥
इतस्तत्र पुरे पुण्य-धर्म्मः श्रावकपुङ्गवः । वन्दमानो जिनान् ग्रामे ग्रामे नन्तुं समागमत् ॥ ६७ ॥
पूजयित्वाऽर्हतो देव-गृहेषु श्रावकः स च । राज्ञो गेहे ययौ देव-देवं पूजयितुं क्रमात् ॥ ६८ ॥
अर्चयित्वा जिनं श्राद्धः पप्रच्छेति महीपतिम् । तवाऽऽस्यं वीक्ष्यते श्यामं किमिदानीं नरेश्वर ! ॥ ६९ ॥
राजाऽवग् मम पुत्रस्य कुष्ठं तीव्रं समागतम् । औषधैर्बहुभिर्नैव गतं दुःखं ततो मम ॥ ७० ॥
* यत–अनाज्यं भोज्यमप्राज्यं विप्रयोगः प्रियैः सह । अप्रियैः संप्रयोगश्च सर्वं पापविजृम्भितम् ॥ ७१ ॥卐
पुण्यधर्मो जगौ राजन् ! सुराष्ट्राविषये वरे । अस्ति शत्रुञ्जयोपान्ते नदी शत्रुञ्जया वरा ॥ ७२ ॥
तस्या नीरेण नाभेयार्हतः स्नात्रं विधाय च । निजाङ्गं स्नपयामास स स्याद् दिव्यतनुर्नरः ॥ ७३ ॥
श्रुत्वेति भूधरो भूरि-संघलोकसमन्वितः । पुत्रं नीत्वा ययौ शत्रुञ्जये यात्राकृते लघु ॥ ७४ ॥
शत्रुञ्जयापयो नीत्वा कृत्वा स्नात्रं प्रभोर्नृपः । तन्नीरेण सुतस्याङ्ग-मभ्यषिञ्चत भावतः ॥ ७५ ॥
तदा कुष्ठं गतं देहात् सूनोर्भूमीभुजोऽचिरात् । ततो राजा विशेषेण जिनभक्तिं व्यधान्मुदा ॥ ७६ ॥
राजा स्फारं जिनागारं शत्रुञ्जयनदीतटे । कारयित्वाऽऽदिदेवस्य बिम्बं न्यवीविशन्मुदा ॥ ७७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकं कैलासशैलानु-कारि सर्वज्ञमन्दिरम् । कारयित्वा नृपः शान्ति प्रतिमामस्थापयत्तदा ॥ ७८ ॥
पुण्यपालः स्वपुत्राय राज्यं दत्त्वा सदुत्सवम् । गृहीत्वा संयमं चक्रे तपो मुक्तिसुखप्रदम् ॥ ७९ ॥
तपः कुर्वन् सदा पुण्य-पालो ध्यानान्मनागपि । न चचाल मरुद्भूमी-धरवत् हृष्टमानसः ॥ ८० ॥
* यतः–सन्तः सन्तोऽपि संसारे न मुञ्चन्ति निजां स्थितिम् । मिष्ट एव समुद्रेऽपि महीरावणवाहकः ॥ ८१ ॥卐
क्रमाच्छत्रुञ्जये गत्वा पुण्यपालस्तपःपरः । पुण्यपापक्षये मुक्तिं भूरिसाधुयुतो ययौ ॥ ८२ ॥

* * *

श्री महाबाहुभूपत्रिविक्रमराजर्षिमुक्तिगमनसम्बन्धः ।

अतो गतचतुर्विंशतिकायां कमले पुरे । सुमतेर्वणिजो जाता पत्नी पद्माभिधा वरा ॥ १ ॥
पुत्रः पद्माभिधो वर्यरूपः शास्त्राण्यनेकशः । तथाऽपाठीद् बुधोपान्ते यथाऽभूद् गुरुसन्निभः ॥ २ ॥
व्यवसायपरस्यास्य सुमतेर्वणिजः क्रमात् । तुत्रोट कमला कृष्ण-पक्षचन्द्रमरीचिवत् ॥ ३ ॥
लक्ष्म्यभावान्न सन्मानं लभते सुमतिः क्वचित् । ततोऽतीव स्वयं धत्ते दुःखं चेतसि सन्ततम् ॥ ४ ॥
* यतः-' यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः । यस्यार्थाः स पुमान् लोके यस्यार्थाः स च पूज्यते' ।५卐

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* तथा—जीवन्तो मृतकाः पञ्च श्रूयन्ते किल भारते। दरिद्रो व्याधितो मूर्खः प्रवासी नित्यसेवकः ॥ ६ ॥

इहलोकेऽपि धनिनः परोऽपि स्वजनायते । स्वजनोऽपि दरिद्राणां तत्क्षणाद् दुर्जनायते ॥ ७ ॥

ततः क्रमात् समानीय तृणकाष्ठानि सन्ततम् । विक्रीय निर्जनिर्वाहं चकार सुमतिः सदा ॥ ८ ॥

* यतः—"बुभुक्षितः किं न करोति पापं, क्षीणा नरा निष्करुणा भवन्ति ।

किं नीचकर्मादि रमावियुक्ताः, कुर्वन्ति लोकाः कुलजा अपीह" ॥ ९ ॥

ततः पद्मो विदेशं तु गत्वा भूरि धनं क्रमात् । अर्जयित्वा समायातो हायनैर्दशभिर्ध्रुवम् ॥ १० ॥

ततोऽखिलैर्जनैः शश्वत् सुमतिर्मान्यते मुदा । यतः श्रीः पूज्यते लोके न दारिद्र्यं कदाचन ॥ ११ ॥

ततः सुमतिरुद्याने धर्माचार्यान्तिकेऽन्यदा । धर्मं जीवदयामूलं शुश्रावेति कृतादरम् ॥ १२ ॥

* 'स्वर्गस्तस्य गृहाङ्गणे सहचरी साम्राज्यलक्ष्मीः शुभा, सौभाग्यादिगुणावलिर्विलसति स्वैरं वपुर्वेश्मनि ।

संसारः सुतरः शिवं करतलक्रोडे लुठत्यञ्जसा, यः श्रद्धाभरभाजनं जिनपतेः पूजां विधत्ते जनः' ॥ १३ ॥

* "दिवसनिसा घडिमालं आउं सलिलं जणस्स चित्तूणं । चंदाइच्चबइल्ला कालरहट्टं भमाडंति" ॥ १४ ॥

* कम्मह वरेइ रुडपडउ धम्मह मंदी देह । आपण सरिसी चोरडी तइं किमुं साख्या एह ॥ १५ ॥

* जीव कडेवर इम भणइ मइं हुतइं करि धम्मु । हुं माटी तू रयणमय हारि म माणुसजम्मु ॥ १६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* हिअडा सकुडि मरिअ जिम मन पसरंत निवारि । जेतूं पहुंचइ पुंगरण तलिअ पाय पसारि ॥ १७ ॥卐
यः सिद्धपर्वते भूमेः स्पर्शं वितनुते नरः । स एव लभते स्वर्गापवर्गसुखसन्ततिम् ॥ १८ ॥
श्रुत्वेति सुमतिः श्रेष्ठी गत्वा तुङ्गमहीधरे । ननामादौ जिनान् पश्चात् पूजयामास सादरम् ॥ १९ ॥
तत्र संस्मरतस्तस्य जिनान् भावेन चेतसि । लोकालोकस्वरूपज्ञं ज्ञानमासीत्तमःक्षयात् ॥ २० ॥
तथा स सुमतिर्ज्ञानी धर्मोपदेशनां व्यधात् । तुङ्गे गिरौ मुक्तिपुर्यां भव्या जग्मुश्च भूरिशः ॥ २१ ॥
श्रुत्वैवं भरतश्चक्री प्राहेति पुरतः प्रभोः । तत्र तीर्थे मया यावन्न नम्येत जिनेश्वरः ॥ २२ ॥
तावद्भोज्यं मया वार-द्वयमेव जिनाधिप ! । एकैव विकृतिर्ग्राह्या वासरं प्रति सन्ततम् ॥ २३ ॥
अयोध्यातोऽन्यदा वर्ये वासरे भरतो नृपः । देशान् साधयितुं भूरि-कटकश्चलितः स्फुटम् ॥ २४ ॥
आयातं भरतं प्रौढ सैन्यं श्रुत्वा रमापुरे । सहस्रमल्लभूपालो योद्धुं सम्मुखमीयिवान् ॥ २५ ॥
भरतेन समं मासमेकं कुर्वन् रणं भृशम् । भग्नोऽभ्येत्य नृपँ भक्त्या सिषेवे दण्डदानतः ॥ २६ ॥
ततः—मागधादिरिपून् सर्वान् जित्वाऽथ भरतो नृपः । वैताढ्यस्य गुहोपान्ते ययौ सर्वबलेन तु ॥ २७ ॥
भरतभूमिपादेशात् सैन्यपो बलसंयुतः । ततोऽचलच्च वैताढ्य-गुहायाः सन्निधौ नृपः ॥ २८ ॥
तत्सुरस्याष्टमं चक्रे पौषधेन युतं तदा । अश्वारूढो गुहां वज्र-दण्डघातादताडयत् ॥ २९ ॥

For Private and Personal Use Only

गुहामुद्घटितां ज्ञात्वा भरतो(भूपो) द्वादशयोजनीम् । पश्चाद्यदाश्वमारूढो ययौ पवनवेगतः ॥ ३० ॥
गुहाज्वालां गतां पश्चाज्ज्ञात्वा भरतभूपतिः । गुहायामविशद्दीप-तुल्यमण्डलतेजसा ॥ ३१ ॥
उन्मग्नां निमग्नां कूल-ङ्कषामुत्तीर्य वेगतः । वैताढ्यात् पुरतो यातो भरतो मेदिनीपतिः ॥ ३२ ॥
आगतं सबलं भूपं म्लेच्छास्तत्र स्थिता रुषा । युद्धं कर्त्तुं समाजग्मुर्यमा इव दृढौजसः ॥ ३३ ॥
योधं योधं भृशं म्लेच्छा भग्ना दुर्गेऽतिदुर्गमे । गत्वाशु साधयामासुर्विद्यां रोगविधायिकाम् ॥ ३४ ॥
अशक्ताः समरं कर्त्तुं म्लेच्छा मत्सरधारिणः । रोगमुत्पादयामासुर्भरतक्ष्मापतेर्बले ॥ ३५ ॥
रोगेण पीडितं च सैन्यं ज्ञात्वा चक्री तदा भृशम् । उपायान् भूरिशश्चक्रे मन्त्रतन्त्रादिभिः खलु ॥ ३६ ॥
सुबुद्धिर्मन्त्रिराड् नत्वा भरतेशं व्यजिज्ञपत् । आत्मसैन्येऽभवद्रोगोऽशक्यो हन्तुं तु भैषजैः ॥ ३७ ॥
नायं त्रिदोषजो रोगो विद्यते स्वबले नृपः । आगन्तुकोऽभिचारादि-दोषादुत्पादितः परैः ॥ ३८ ॥
एवं जल्पति मन्त्रीशे द्वौ खगौ विमलद्युती । व्योम्नोऽभ्येत्य नतिं भूमि पतेश्चक्रतुरादरात् ॥ ३९ ॥
भूपो जगौ कुतः स्थानात् किमर्थमिह वां खगौ । आगतौ ? प्रोचतुस्तौ तु खगावाऽऽवां महीपते ! ॥ ४० ॥
वायुवेगमनोवेगौ खगावावां नभोऽध्वना । अगच्छाव युगादीशं वन्दितुं भवतः पितुः ॥ ४१ ॥
तत्र श्री ऋषभेनेति शत्रुञ्जयमहीभृतः । माहात्म्यं जल्पताऽश्रावि प्रियालमहिमाऽद्भुतः ॥ ४२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शत्रुञ्जये गिरौ राजा-दनीवृक्षोऽस्ति योऽधुना । स एव शाश्वोऽनेक-देवदानवसेवितः ॥ ४३ ॥
वैताल-शाकिनी-भूत-दुष्टदेवादिदोषहृत् । तत्प्रभावो युगादीशा-दावाभ्यां बहुशः श्रुतः ॥ ४४ ॥
ततस्तम्बमृत्तिकाशाखा-पत्राद्यं विद्यतेऽत्र च । तच्चूर्णसेवनात् सर्वे भवन्ति नीरुजो जनाः ॥ ४५ ॥
चक्रिणोक्तौ च तौ व्योम चारिणौ चक्रिणो बलम् । नीरोगं चक्रतू राजा-दनीमृत्पत्रयोगतः ॥ ४६ ॥
नीरोगं स्वबलं राजादनीपत्राम्बुयोगतः । ज्ञात्वा चक्री जगौ शत्रुञ्जयोऽयं विद्यते वरः ॥ ४७ ॥
यत्र राजादनी पत्र-पुष्पादिरोगहृन्नृणाम् । अधस्तस्यास्तरोर्मर्त्या असङ्ख्याश्च शिवं ययुः ॥ ४८ ॥
मया दिग्विजयप्रान्ते भूरिसङ्घयुतेन हि । यात्रां करिष्यते शत्रुञ्जये सद्गतिहेतवे ॥ ४९ ॥
करिष्यते यदा यात्रा मया शत्रुञ्जयाचले । तदा द्वितीयवारं तु भोक्तव्यं नान्यथा पुनः ॥ ५० ॥
भरतः साधयन् पृथ्वीं तीर्थे प्रभाससञ्ज्ञिके । दिव्यबाणाद् वशीचक्रे प्रभासेशं क्षणादपि ॥ ५१ ॥
ददौ चूडामणिं वक्षोमणिं हारं मनोहरम् । कटकानि कटीसूत्रं भरताय प्रभासराट् ॥ ५२ ॥
तद्धस्ते स्वर्णकुम्भस्थं नीरं दृष्ट्वा जगौ नृपः । प्रभासेशाऽत्र किं तिष्ठेद् गोपितं जीववत्त्वया ? ॥ ५३ ॥ ॥ १८८ ॥
अथ प्रभासराट् प्राह सुराष्ट्रमण्डले वरे । शत्रुञ्जयाभिधं तीर्थं विद्यते शिवशर्मदम् ॥ ५४ ॥
* अनन्तमहिमापूर्ण-मनन्तसुकृताऽऽस्पदम् । नानारत्नौषधिकुण्ड-रसकूपीमहर्द्धिमत् ॥ ५५ ॥卐

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वीक्षणात् कीर्त्तनात् स्पर्शा-च्छ्रवणादपि पापहृत् । स्वर्गापवर्गसातानि दत्ते यत् प्राणिनां क्षणात् ॥ ५६ ॥ युग्मम् ॥
उक्तश्च–' तीर्थभूतपुराराम-नगदेशादिभूमिषु । शत्रुञ्जयसमं तीर्थं नास्ति त्रैलोक्यपावकम् ॥ ५७ ॥
अन्यतीर्थेषु यद्यात्रा-शतैः पुण्यं भवेन्नृणाम् । तदेकयात्रया पुण्यं शत्रुञ्जयमहागिरौ ॥ ५८ ॥
तस्य तीर्थस्य पार्श्वेऽस्ति नदी शत्रुञ्जयाभिधा । सत्प्रभावपयःपूर्णा याऽर्हच्चैत्यविभूषिता ॥ ५९ ॥
शत्रुञ्जयी पवित्रेयं विशेषात्तीर्थसङ्गमात् । गङ्गासिन्धुनदीदिव्य-जलाधिकफलप्रदा ॥ ६० ॥
या पूर्ववाहिनी गङ्गा या पूर्वसुकृतैकभूः । नानाहृद्प्रभावाढ्या बहुचित्रकरा नदी ॥ ६१ ॥
शत्रुञ्जया जाह्नवीव पवित्रजलपूरिता । प्रक्षालयति पापानि शत्रुञ्जयाद्रिसङ्गता ॥ ६२ ॥
कादम्ब-पुण्डरीकाद्रि शीर्षयोरन्तरा ह्रदः । तस्यामुच्चप्रभावाढ्यो विद्यते कमलाभिधः ॥ ६३ ॥
ह्रदस्यास्य मृदं लात्वा पिण्डीकृत्य च तज्जलैः । बद्ध्वा चक्षुषि तद्रोगान् हन्ति दोषान्धतादिकान् ॥ ६४ ॥
तस्य ह्रदस्य पानीयं कान्तिकीर्त्तिमतिप्रदम् । शाकिनी-भूत-वेताल-वातपित्तादिदोषहृत् ॥ ६५ ॥
उपसर्गा घनास्ते ते तत्पयःस्पर्शनाद् ध्रुवम् । यान्ति दूरं तमोव्रातं सूर्यस्येवोदयात् किल ॥ ६६ ॥
प्रत्यब्दं पुण्डरीकाद्रि–तीर्थं नन्तुं व्रजाम्यहम् । अर्हत्स्नात्रकृते नीरं ह्रदान्नेष्याम्यहं वरम् ॥ ६७ ॥
निःशेषविघ्ननाशाय रक्षितं नीरमप्यदः । मया तु स्वामिने तुभ्यं देयं प्रीतिकरं पुनः ॥ ६८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ढौकितं मयका ह्येतद्वारि शत्रुञ्जयोद्भवम् । दिग्जयं कुर्वतः सर्व-विघ्नहृत् भावि ते प्रभो ! ॥ ६९ ॥
प्रभासेशकृतस्फार-विमानारोहणात्ततः । सिद्धाद्रौ भरतो गत्वा ननाम तीर्थमादरात् ॥ ७० ॥
स्नात्वा शत्रुञ्जयायां तु स्पृष्ट्वा तत्तीर्थमुत्तमम् । स्मरन् शत्रुञ्जयं राजा स्वसेनामीयिवान् स्वयम् ॥ ७१ ॥
साधर्मिकोऽसि मित्र ! त्वं तीर्थप्रभावदर्शनात् । सन्मान्य भरतस्तं च ददौ देशाननेकान् ॥ ७२ ॥
इति शत्रुञ्जयनदीहृद-प्रभाववर्णनम् ।
साधयित्वाऽखिलान् देशान् भरतो मेदिनीपतिः । कारयामास चक्रीशा-भिषेकं भूपपार्श्वतः ॥ ७३ ॥
एकदा भरतो यावत् सभायां समुपाविशत् । तावदेको नरोऽभ्येत्य जगादेति कृतादरम् ॥ ७४ ॥
स्वामिँस्तव सुतः पुण्ड-रीको गणाधिपो वरः । प्रथमः प्रथमेशस्य तुङ्गक्षोणीधरोपरि ॥ ७५ ॥
साधुभिः पञ्चकोटया तु सार्द्धं सर्वतमःक्षयात् । चैत्रस्य पूर्णिमारात्रौ मुक्तिपुर्यां समीयिवान् ॥ ७६ ॥
आकर्ण्यैतत्तदा चक्री दानं भूरितरं द्रुतम् । तस्मै दत्त्वा स्वचित्ते तु दध्यावेवं पुनः पुनः ॥ ७७ ॥
समस्तक्लेशसङ्घातान्निर्गतोऽसौ गणाधिपः । पुण्यवान् पुण्डरीकस्तु मुक्तिपुर्यां समीयिवान् ॥ ७८ ॥
मोहपाशैरहं बद्धः क्लिश्यमानः पदे पदे । रागादिवैरिभिर्दुःखं सहिष्ये करवे किमु ? ॥ ७९ ॥
ततस्तुङ्गगिरौ चक्री प्रासादं रैमयं पृथुम् । कारयामास नाभेय देवस्य भूरिभावतः ॥ ८० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्र रत्नमये बिम्बे नाभेय-पुण्डरीकयोः । अस्थापयत् शुभे लग्ने चक्री वृषभनन्दनः ॥ ८१ ॥
नेमिवर्ज्या जिना अन्ये द्वाविंशतिः सुरार्चिताः । शत्रुञ्जये समेष्यन्ति पावयन्तो महीं क्रमात् ॥ ८२ ॥
श्रुत्वेति चक्रिराट् तेषां द्वाविंशतिं जिनालयान् स्वर्णरूप्यमयान् भूरि-लक्ष्मीव्ययादचीकरत् ॥ ८३ ॥
तेषु देवालयेष्वेव नेमिवर्जान् जिनेश्वरान् । द्वाविंशतिं मणिस्वर्ण-मयान् न्यवीविशन् मुदा ॥ ८४ ॥
तेषां जिनेन्द्रबिम्बानां चन्द्रगच्छाधिपान्तिकात् । प्रतिष्ठां कारयामास भूरिसङ्घसमन्वितः ॥ ८५ ॥
एकदा वृषमात् श्रुत्वा माहात्म्यं सिद्धभूभृतः । सङ्घाधिपपदं वाञ्छन् जगादेति कृताञ्जलिः ॥ ८६ ॥
स्वामिन् ! सङ्घाधिपपदं कथं सम्प्राप्यते जनैः ? । स्वामी जगाद भरत ! शृणु सम्प्रति भूधव ! ॥ ८७ ॥
न प्राप्यते विना भाग्यं सङ्घाधिपपदं जनैः । प्राप्यते भाग्यतः सङ्घ-नाथस्य पदवी खलु ॥ ८८ ॥
ऐन्द्रं पदं चक्रिपदं श्लाघ्यं श्लाघ्यतरं पुनः । लभ्यते प्राणिभिर्भाग्यात् सङ्घनाथपदं पुनः ॥ ८९ ॥
तीर्थङ्करनामगोत्र-मर्जयत्यतिदुर्लभम् । भूत्वा सङ्घपतिर्भव्य जीवो विशदमानसः ॥ ९० ॥
चतुर्विधेन सङ्घेन सहितः शुभवासनः । अधिरोप्य रथे सार्व बिम्बानि लसदुत्सवम् ॥ ९१ ॥
* यतः–यच्छन् पञ्चविधं दान-मुद्धरन् दीनसञ्चयम् । पुरे पुरे जिनागारे कुर्वाणो ध्वजरोपणम् ॥ ९२ ॥卐
शत्रुञ्जयादितीर्थेषु यो गत्वा श्री जिनार्चनम् । करोति लभते मुक्ति-सातं स एव वेगतः ॥ ९३ ॥ त्रिभिर्विशेषकम् ॥

For Private and Personal Use Only

श्रुत्वेति स्वामिनो वक्त्रात् चक्री प्रोल्लासिताशयः । आजुहाव बहुं सङ्घं प्रेष्य कुङ्कुमपत्रिकाः ॥ ९४ ॥
अष्टाह्निका महः सार्व प्रासादेषु पृथक् पृथग् । यदा चक्री व्यधाच्छक्र-स्तदागात्तत्र ताविषात् ॥ ९५ ॥
बिम्बं रत्नमयं स्वर्ण-देवमन्दिरमध्यगम् । वासवः सार्वभौमाय दत्तवान् स्नेहपूर्वकम् ॥ ९६ ॥
मणिमयैः स्वर्णमयै-र्वर्यकाष्ठमयै पुनः । सहस्रप्रमितैर्देवा लयैर्मध्यगतीर्थपैः ॥ ९७ ॥
रथस्थैश्चामरैर्वीज्य-मानैश्छत्रविराजितैः । चक्री गुरुयुतोऽचालीत् शत्रुञ्जयं गिरिं प्रति ॥ ९८ ॥ युग्मम् ॥
तस्मिन् सङ्घेऽभवन् सङ्घा-धिपाश्चत्वार एव च । महीधराश्च बहवो राजानो धनिनो वराः ॥ ९९ ॥
सङ्घेन तिलकं भाले भरतस्य सदुत्सवम् । चक्रे शक्रस्ततोऽन्येषां सङ्घेशानां पृथक् पृथग् ॥ १०० ॥
ग्रामे ग्रामे जिनेन्द्रार्चां कुर्वाणश्च पुरे पुरे । सुराष्ट्रासु ययौ चक्री यावत् कुर्वन् महोत्सवम् ॥ १०१ ॥
तावद्भरतभूपस्य भ्रातृव्यो विशदाशयः । सुराष्ट्रस्य सुतः शक्ति-सिंहः सन्मुखमागमम् ॥ १०२ ॥
भरतस्यानमत्पादौ शक्तिसिंहो महीपतिः । ततस्तस्य व्यधाच्चक्री दोर्भ्यामालिङ्गनं दृढम् ॥ १०३ ॥
चक्री जगौ भवान् धन्यः पुण्यवान् प्रवराशयः । यतः शत्रुञ्जयं तीर्थं विद्यते त्वद्दृशोः सदा ॥ १०४ ॥
धन्याः सौराष्ट्रका लोका एते सुकृतिनः खलु । ये नित्यं पुण्डरीकाद्रिं निकषा निवसन्ति हि ॥ १०५ ॥
अस्य तीर्थस्य सच्छाया स्पृष्टाऽपि प्राणिनां सदा । हरते भूरिपापानि ददते सुखसन्ततिम् ॥ १०६ ॥

ये पुण्डरीकमीक्षन्ते पुण्डरीकमिवोज्ज्वलम् । ते त्यजन्त्येनसां पुञ्जं पुण्यामृतपवित्रिताः ॥ १०७ ॥
इत्युक्त्वा कुसुमैर्लाजैर्वर्यैः शत्रुञ्जयाचलम् । वर्द्धयित्वाऽऽरुरोहाशु कुर्वन् महोत्सवं नृपः ॥ १०८ ॥
शत्रुञ्जयादितीर्थेभ्यः पय आनीय सुन्दरम् । स्नात्रं कृत्वाऽर्हतश्चक्री पुष्पैरभ्यर्चयन् मुदा ॥ १०९ ॥
* मालायाः परिधानस्य क्षणेऽवग् भरतं हरिः । त्वं श्रीवृषभपुत्रोऽसि मुक्तिं गन्ता भवेऽत्र हि ॥ ११० ॥卐
* अतो मे दीयतां माला वृषभस्य जिनेशितुः । अत्याग्रहात्तदा चक्री मालां शक्राय दत्तवान् ॥ १११ ॥卐
* ततो यदा हरिर्मालां परिधत्ते स्म भावतः । तदोचे मनुजैरिन्द्र-मालां परिदधे हरिः ॥ ११२ ॥卐
* ततस्तस्याश्च मालाया इन्द्रमालाभिधा जनैः । विश्राणिता ततोऽद्यापि शक्रमाला निगद्यते ॥ ११३ ॥卐
आरात्रिकं च मङ्गल-प्रदीपं विधिवत्तदा । चक्री कृत्वा व्यधाच्चार्चां स्तुतिं स्फारतरैः स्तवैः ॥ ११४ ॥
जीवाभिगमेऽप्युक्तं–' वरपुप्फगंधअक्खयपईवफलधूवनीरपत्तेहिं । नेविज्जविहाणेहिं अ जिणपूआ अट्ठहा होइ ॥११५॥
गंधोदएण ह्लवणं पूआ अट्ठविह मंगलाइं च । आरत्तिगाइमाई कायव्वं सव्वमणुदिअहं ॥ ११६ ॥ "
एवं यात्रां विधायाथ चक्र्यागत्य निजे पुरे । पपाल पृथिवीं न्याय-मार्गेण जनताहितः ॥ ११७ ॥
पुनः सङ्घं महान्तं तु कृत्वा प्रथमचक्रिराट् शत्रुञ्जये ययौ नन्तुं युगादिजिनपुङ्गवम् ॥ ११८ ॥
पूजां य वरपयःपुष्पैः धूपोत्क्षेपनकैः पुनः । चक्रे प्रथमचक्रीशः प्रथमस्य प्रभोर्यदा ॥ ११९ ॥

तदादिमद्वितीयस्वः–शक्रौ च चमरो बलिः । नत्वाऽऽदिमं जिनं सार्व–भौमं नेमुः कृताऽऽदराः ॥ १२० ॥
उक्तश्च–चमरेन्द्रबलीन्द्राद्याः सर्वे भवनवासिनः । सेवन्ते यं सदा तीर्थराजं सद्भक्तिभाविताः ॥ १२१ ॥
अणपन्नी पणपन्नी–मुख्या व्यन्तरनायकाः । सेवन्ते यं सदा तीर्थराजं सद्भक्ति भाविताः ॥ १२२ ॥
ज्योतिषां वासवौ चन्द्र-सूर्यावन्येऽपि खेचराः । सेवन्ते यं सदा तीर्थराजं सद्भक्ति भाविताः ॥ १२३ ॥
मनुष्यलोकसंस्थाना वासुदेवाश्च चक्रिणः । सेवन्ते यं सदा तीर्थराजं सद्भक्ति भाविताः ॥१२४॥
इन्द्रोपेन्द्रादयोऽप्येते सिद्धा विद्याधराधिपाः । सेवन्ते यं सदा तीर्थराजं सद्भक्ति भाविताः ॥ १२५ ॥
ग्रैवेयकानुत्तरस्था मनसा त्रिदिवौकसः । सेवन्ते यं सदा तीर्थराजं सद्भक्ति भाविताः ॥ १२६ ॥
एवं त्रैलोक्यसंस्थाना ह्येते नरसुरासुराः । सेवन्ते यं सदा तीर्थ–राजं सद्भक्ति भविताः ॥ १२७ ॥
वापीकूपतडागानि दीर्घिकापल्वलानि च । जलस्थानानि भान्ति स्म यत्रोद्यानानि चोच्चकैः ॥ १२८ ॥
आरोहति गिरिं सङ्घे नन्तुं जिनेश्वरान् द्रुतम् । सुधर्मगणभृच्छिष्यः चिल्लणो नाम सत्तमः ॥ १२९ ॥
पश्चिमेनाध्वना भूरि-साधुलोकसमन्वितः । अर्द्धमार्गे ययौ यावत् सङ्घोऽभूत्तृषितस्तदा ॥ १३० ॥
तदाऽतितृषितः सङ्घ-श्चिल्लणं मुनिमूचिवान् । विनाऽम्बु साम्प्रतं प्राणा यास्यन्ति नो मुनीश्वर ! ॥ १३१ ॥
भवत्पादप्रसादेन जीवितं जायते यदि । तदाऽस्माभिर्जिनाधीशो वन्द्यते शिवशर्मदः ॥ १३२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* ततश्चिल्लणमुनिना वीक्ष्य लाभं सुविद्यया । प्रादुश्चक्रे सरो वारि-पूर्णं सद्योगतस्तदा ॥ १३३ ॥卐

* स्वादं स्वादं जलं तत्र सद्यो वितृषिस्तदा । सुस्थितोऽजनि सर्वज्ञ-मतं प्रशंसति स्म च ॥ १३४ ॥卐

* श्रीसङ्घस्य हितायाशु चिल्लणो यत् सरो व्यधात् । चिल्लणाख्यमभूत् ख्यातं तदद्यापि जनेऽभितः ॥१३५॥卐

चिल्लणः सुमुनिस्तत्र तीर्थे ईर्यापथं स्फुटम् । प्रतिक्रमन् पुनर्नीर-जीवानक्षामयद् बहु ॥ १३६ ॥

निन्दन् स्वयं कृतं पापं पयो-विकुर्वणादिकम् । चूर्णीचक्रेऽखिलं कर्म-पुञ्जं पूर्वभवार्जितम् ॥ १३७ ॥

अष्टकर्म्मक्षयात्तस्य चिल्लणस्य मुनेः क्षणात् । उत्पन्नं केवलज्ञानं मुक्तिस्तत्राभवत्क्रमात् ॥ १३८ ॥

यत्रागात् स मुनिर्मुक्तिं तत्राद्यश्चक्रिराड् मुदा । चिल्लणाख्यं विहारं तु कारयामास सुन्दरम् ॥ १३९ ॥

भृङ्गारस्थालकलश-च्छत्रचामरदीपकान् । विभूषणारात्रिकाणि जिनार्चायै मुमोच सः ॥ १४० ॥

यतः-कारयन्ति जिनानां ये तृणावासानपि स्फुटम् । अखण्डितविमानानि ते लभन्ते त्रिविष्टपे ॥ १४१ ॥

काष्ठादीनां जिनावासे यावन्तः परमाणवः । तावन्ति पल्यलक्षाणि तत्कर्त्ता स्वर्गभाग्भवेत् ॥ १४२ ॥

ततः प्रथममालां तु इन्द्रमालाभिधां वराम् । चक्री परिदधाति स्म नानोत्सवपुरस्सरम् ॥ १४३ ॥

* तुष्टो यस्यास्त्वयं शैलः कामधेनु-सुरद्रुमाः । चिन्तामण्यादयस्तस्य सर्वे तुष्टाः समन्ततः ॥ १४४ ॥卐

सिद्धाद्रि-सर्वशृङ्गेषु प्रासादा निखिलार्हताम् । चक्रिणा कारिता भूरि रैव्ययान्मुक्तिहेतवे ॥ १४५ ॥

॥१९५॥

For Private and Personal Use Only

परिधाप्याम्बरैर्वर्यैः श्रीगुरुं सङ्घसंयुतम् । अयोध्यायामियायाऽऽद्य-चक्री भरतभूपतिः ॥ १४६ ॥
अन्येद्युरादिदेवस्य प्रासादे विपुले स्फुटम् । अष्टोत्तरशतं चक्री सन्मण्डपानकारयत् ॥ १४७ ॥
भरतो भूधवोऽन्ये-द्युर्ज्ञानिपार्श्वे जगावदः । भूरिपापा अपि प्राण-भाजो येऽत्र शिवं ययुः ॥ १४८ ॥
तेषां सम्प्रति सम्बन्धं श्रावय त्वं मम प्रभो ! । ततो ज्ञानी जगौ पूर्वं श्रावस्त्यां सुन्दरश्रियि ॥ १४९ ॥
त्रिशङ्कोर्भूपतेः पुत्र-स्त्रिविक्रमाभिधोऽजनि । शास्त्राणि भूरिशोऽपाठि पित्राद्यैर्बुधसन्निधौ ॥१५०॥ त्रिभिर्विशेषकम्
गुरोः पार्श्वेनिशम्या-र्हद्धर्मं न्यस्य सुतं निजम् । राज्ये जग्राह चारित्रं पापध्वान्तरविप्रभम् ॥ १५१ ॥
त्रिविक्रमोऽन्यदोद्याने यावत्तरोरधः स्थितः । तावत्पक्षी कुतोऽभ्येत्य तच्छीर्षोद्ध्वं व्यधाद् रवम् ॥ १५२ ॥
उड्डापितोऽपि भूपेन पक्ष्युड्डीनो यदा न हि । तदा राज्ञेषुणा विद्धो रटन् पञ्चत्वमासवान् ॥ १५३ ॥
मृतं पक्षिणमालोक्य पश्चात्तापपरो नृपः । आगतः स्वगृहे भूयो भूयः सस्मार पक्षिणम् ॥ १५४ ॥
आर्त्त्या मृत्वा तदा पक्षी भिल्लो भीमवनेऽभवत् । तत्र भिल्लो व्यधात् पापं भूरिजीवादिहिंसनात् ॥ १५५ ॥
यतः—"जीवान् निःशूकतायोगाद् यो हिनस्ति निरंतरम् । नरकेषु स च सर्वेषु वेदनां लभते दृढम् ॥ १५६ ॥
हसन्तो हेलया कर्म्म यत् कुर्वन्ति प्रमादिनः । जन्मान्तरशतैरेते शोचन्त्यनुभवन्ति च ॥ १५७ ॥
इतो धर्म्मरुचेः पार्श्वे गत्वा नत्वा तमादरात् । त्रिविक्रमोऽशृणोद् धर्म्मं जैनं जीवदयामयम् ॥ १५८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जीवान् रक्षन् सदा जीवो लभतेऽव्ययसम्पदम् । यतो जीवोऽस्ति जीवानां सर्वेषां वल्लभः खलु ॥ १५९ ॥
यतः–हेम–धेनु–धरादीनां दातारः सुलभा भुवि । दुर्लभः पुरुषो लोके यः प्राणेष्वभयप्रदः ॥ १६० ॥
वृथा दानं वृथा विद्या वृथा निर्ग्रन्थताऽपि च । अनिन्द्ययोगचर्याऽपि विना जीवदयां किल ॥ १६१ ॥
एवं धर्म्मं समाकर्ण्य भूपालः करुणापरः । स्मरन् पक्षिवधं चित्ते दध्यावेवं पुनः पुनः ॥ १६२ ॥
अहो ! मया कृतं पापं प्रत्यक्षं पक्षि-हिंसनात् । तेन पापेन मे श्वभ्रे पात एव भविष्यति ॥ १६३ ॥
किं जीवितेनाप्यमुना किं राज्येनामुना पुनः । ययोः सतोरपि श्वभ्र-पातो भवति मेऽग्रतः ॥ १६४ ॥
असारादेव संसारात् सारं देहाद् व्रतं स्मृतम् । तेन पङ्कादिवाम्भोजं धर्म्मं गृह्णामि शर्मदम् ॥ १६५ ॥
ततो राज्येऽङ्गजं न्यस्य लात्वा त्रिविक्रमो व्रतम् । पठन् शास्त्राण्यभूत सर्व-तत्त्वविद् यतनापरः ॥ १६६ ॥
श्रीगुर्वनुज्ञया साधु-रेकाकी विहरन् सदा । भीमे वने स्थितः कायो-त्सर्गेण ध्यानतत्परः ॥ १६७ ॥
यतिं प्रेक्ष्य समुत्पन्न–वैरो भिल्लो रुषं दधौ । यष्टि–मुष्ट्यादिभिर्गाढ-मताडयच्च निर्दयम् ॥ १६८ ॥
प्रशान्तात्मापि स यति–र्जात-क्रोधस्त्रिविक्रमः । भस्म्यकार्षीद् द्रुतं भिल्लं तेजोलेश्याविमोचनात् ॥ १६९ ॥
विपद्य भिल्लजीवोऽथ तत्रैव कानने हरिः । अजनिष्ट यतिः सोऽपि विहृत्येयाय तत्र च ॥ १७० ॥
प्राग्वैरात्तं यतिं वीक्ष्य जातरोषो हरिर्भृशम् । हन्तुं जगाम तत्पृष्ठौ नष्टः स संयतः क्वचित् ॥ १७१ ॥

॥१९७॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पश्यन् यतो यतो याति यतिस्तत्र स केसरी । हन्तुं तं समगात् क्रूर-कर्म्मा रोषाऽरुणेक्षणः ॥ १७२ ॥
हरिणा खेदितः साधुः प्रशान्तात्मा रुषारुणः । अग्निसाद्विदधे तेजो-लेश्यया मृगशात्रवम् ॥ १७३ ॥
त्यक्तप्राणस्तदा पञ्चा-ननो द्वीप्यभवद्वने । अतिक्रूरः स हन्ति स्म जीवान् नित्यमनेकशः ॥ १७४ ॥
साधुस्त्रिविक्रमोऽन्येद्यु र्विहरंस्तत्र कानने । समेतो द्वीपिना दृष्टः प्राग्वैरात् क्रूरचेतसा ॥ १७५ ॥
द्वीपी हन्तुं यतिं यावद्धाव तावता यतिः । नष्टो यत्र व्रजत्येव द्वीपी तत्रैति हिंसितुम् ॥ १७६ ॥
कषायाणां फलं साधु-र्जानन्नायतिदारुणम् । अग्निसाद् द्वीपिनं चक्रे तेजोलेश्याविमोचनात् ॥ १७७ ॥
ततो द्वीपी मृतः कक्षे भैरवेऽर्त्तिवशात्तदा । अभवद् गवयः पीनस्कन्ध उन्मत्तशण्डभः ॥ १७८ ॥
तपस्यन्तं तपस्तीव्रं तत्रायान्तं मुनिं च तम् । दृष्ट्वा स गवयो हन्तुं चेता आसीद् रुषारुणः ॥ १७९ ॥
गवयेन यदा तीव्रसङ्कटे मरणप्रदे । पातितः स तदा हन्तु-कामोऽभूत्तं त्रिविक्रमः ॥ १८० ॥
मृत्वा स गवयजीवः उज्जयिन्या बहिर्वने । आशीविषो विषोदग्र आसीत् कर्म्मनियोगतः ॥ १८१ ॥
विहरन्ननिशं ग्रामाद् ग्रामं त्रिविक्रमो यतिः । उज्जयिन्या बहिरुद्याने ययौ यत्रास्त्यहिः स च ॥ १८२ ॥
दृष्ट्वाऽहिः संयतं पूर्व-वैरादुत्पन्नतीव्ररुट् । दंष्टुं यावदगात्ताव-दन्यत्र स यतिर्ययौ ॥ १८३ ॥
तत्रापि भुजगः सोऽपि दंष्टुं तं यतिमीयिवान् । सोऽपि नंष्ट्वा यतिर्यातोऽन्यत्र स्थाने यतीश्वरः ॥ १८४ ॥

For Private and Personal Use Only

तत्राप्यायान्तमालोक्य सर्पं यतिस्त्रिविक्रमः । रुष्टो ज्वलनसाच्चक्रे तेजोलेश्याप्रयोगतः ॥ १८५ ॥
* यतः–अपूर्वः कोऽपि कोपाग्निः सज्जनस्य खलस्य च । एकस्य शाम्यति स्नेहाद् वर्द्धतेऽन्यस्य वारितः ॥१८६॥卐
* "तं नत्थि घरं तं नत्थि राउलं देउलंपि तं नत्थि । जत्थ अकारणकुविआ दो तिन्नि खला न दीसंति ॥ १८७ ॥"卐
अकामनिर्जरायोगात् क्षिपन् कर्म्म पुरार्जितम् । अहिजीवो द्विजो रोरोऽभवद्राजगृहे पुरे ॥ १८८ ॥
यतः–"संसारबीजभूतानां कर्म्मणां जरणादिह । निर्जरा सा स्मृता द्वेधा सकामा कामवर्जिता ॥ १८९ ॥"
ज्ञेया सकामा यमिना–मकामास्त्वन्यदेहिनाम् कर्म्मणां फलवत्पाको यदुपायात्स्वतोऽपि च ॥ १९० ॥ इत्यादि
पर्यटन्नन्यदा ग्रामाद् ग्रामं यतिस्त्रिविक्रमः । मध्येराजगृहं भिक्षा-कृते बभ्राम सद्मसु ॥ १९१ ॥
कर्म्मयोगाद् भ्रमन् गेहे गेहे शुद्धान्नहेतवे । अहिजीवस्य विप्रस्य दृग्गोचरं समीयिवान् ॥ १९२ ॥
स द्विजो जातरुड् हन्तुं तं साधुमीहतेतराम् । ग्राममध्ये न शक्नोति हन्तुं भूपतिभीतितः ॥ १९३ ॥
* यतः–"राजदण्डभयात्पापं नाचरत्यधमो जनः । परलोकभयान्मध्यः स्वभावादेव नोत्तमः ॥ १९४ ॥卐
भिक्षां लात्वा बहिर्यातं तं पुर्याः साधुशेखरम् । निहन्तुं स द्विजस्तत्र ययौ यष्टिसखा रुषा ॥ १९५ ॥
तत्रादौ बहुशो विप्रः क्रूरजल्पनतः परम् । कृत्वोपसर्गमादाय तस्य हन्तुमधावत ॥ १९६ ॥
भिक्षयन्तं यतिं यष्टि-मुष्टिभिः स द्विजाधमः । यदा न व्यरमद् हिंसन् तदा क्रुद्धोऽभवद्यतिः ॥ १९७ ॥

तेजोलेश्याप्रयोगेण कोपाविष्टस्त्रिविक्रमः । द्विजं तं घ्नन्तमह्वाया-नैपीत् सद्यो यमालयम् ॥ १९८ ॥
अकामनिर्जरायोगात् क्षिप्त्वा कर्म्माशुभोदयम् । वाणारस्यां महाबाहुर्भूपो जातः स वाडवः ॥ १९९ ॥
मेलयित्वा बलं भूरि महाबाहुर्नरेश्वरः । साधयामास भूयिष्ठ प्रत्यर्थिपार्थिवान् क्रमात् ॥ २०० ॥
पालयन् न्यायतः पृथ्वीं भोगान् भुञ्जन् यथेप्सितान् । हृष्टचित्तो महाबाहु-र्बहुं समयमत्यगात् ॥ २०१ ॥
वातायनस्थितोऽन्येद्यु-र्महाबाहुर्यतीश्वरम् । आलोक्य ध्यातवानेवं भूयो भूयः स्वचेतसि ॥ २०२ ॥
पुराऽप्येवंविधं साधुं महनीयं मनीषिणाम् । अपश्यम् क्वाप्यहं शान्त-दान्तचित्तं जितेन्द्रियम् ॥ २०३ ॥
ध्यायन्नेवं नृपः प्राप्तो जातिस्मृतिं रजःक्षयात् । जन्मसप्तकमस्मार्षीद् निष्पादितवधात्मकम् ॥ २०४ ॥
राजा दध्यौ निहन्ता मे प्राग् योऽभूद् भवसप्तके । स हि चेद् ज्ञायते मिथ्या-दुष्कृतं दीयते तदा ॥ २०५ ॥
न मिथ्यादुष्कृतमृते वैराभावो भवेन्नृणाम् । मिथ्यादुष्कृततो ज्ञानं चन्दनाया अजायत ॥ २०६ ॥
ध्यात्वेति भूपतिः स्वीय-वधकज्ञप्तिहेतवे । समस्यायोः पदद्वन्द्वं कृत्वा नृभ्यो ददाविति ॥ २०७ ॥
पक्षी भिल्लो हरिर्द्वीपी शण्डः फणी द्विजोरयः । .... ॥ २०८ ॥
सचेता जन एतेषां समस्यां पूरयिष्यति । तस्मै दास्यामि दीनार-लक्षं सन्मानदानतः ॥ २०९ ॥
समस्यायाः पदद्वन्द्वं सर्वो लोकः पुरे वने । पपाठोच्चैर्धनप्राप्ति-लिप्सयो निशि वासरे ॥ २१० ॥

For Private and Personal Use Only

सञ्चरिष्णुरितः साधुर्दिक्षु सर्वासु सन्ततम् । तत्रोद्याने समस्यायाः पदद्वन्द्वमथाश्रृणोत् ॥ २११ ॥
पामरोक्तां समस्यां तां श्रुत्वा त्रिविक्रमो जगौ । 'येनामी निहताः सप्त सोऽहं भावी कथं हहा'? ॥ २१२ ॥
समस्यां पूरितां वाचं-यमेन पामरस्तदा । समेत्य नृपतेरग्रे पपाठ मुदिताशयः ॥ २१३ ॥
राजा जगौ त्वयाऽपूरि समस्या वाऽन्येन केनचित् । पामरोऽवक् पुरोद्याने स्थितेन साधुना ननु ॥ २१४ ॥
ततोऽभ्येत्य नृपस्तत्र प्रणम्य तं मुनिं जगौ । समस्या पूरितेदानीं कथं साधो ! त्वया वद ? ॥ २१५ ॥
यतिर्जगौ मया ज्ञानाज्-ज्ञातमेतन्नरेश्वर ! । दध्यौ भूपो ह्ययं साधुः कुत्रापि वीक्षितो मया ॥ २१६ ॥
एवं संस्मरतो भूमी-पतेर्जातिस्मृतिस्तदा । अजायत ततो ज्ञातो यतिर्हन्ता निजात्मनः ॥ २१७ ॥
यतिः प्राह मया पूर्व-भवेषु सप्तसु ध्रुवम् । कोपाविष्टेन निहत-स्तपोऽपि गमितं स मे ॥ २१८ ॥
राजाऽऽचष्ट मयाऽपि त्वं भवेषु तेषु तेष्वपि । खेदितोऽभूस्तथा पापं तीव्रं मेऽजनि संयत ! ॥ २१९ ॥
उत्थाय नृपतिः साधोः प्रणम्य चरणद्वयम् । क्षमयामास तं साधुं संयतोऽपि क्षमापतिम् ॥ २२० ॥
यति-भूपौ मिथो यावत् क्षमयित्वोचतुर्मुदा । तावद्दुन्दुभिनिर्ह्रादोऽजनिष्ट मरुतां पथि ॥ २२१ ॥
किमेतदिति जल्पन्तौ यतिक्ष्मापौ सुरोक्तितः । अज्ञासिष्टां मुनेर्ज्ञानोत्पत्तिं सुन्दरकानने ॥ २२२ ॥
साधुक्ष्मापौ ततस्तत्र वने गत्वा प्रमोदतः । नत्वा केवलिनं जैनं धर्म्म-मित्यश्रृणोत्तदा ॥ २२३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्यग्रोधे दुर्लभं पुष्पं दुर्लभं स्वातिजं पयः । दुर्लभं मानुषं जन्म दुर्लभं देवदर्शनम् ॥ २२४ ॥

अनर्घ्याण्यपि रत्नानि लभ्यन्ते विभवैः सुखम् । दुर्लभो रत्नकोट्याऽपि क्षणोऽपि मनुजायुषः ॥ २२५ ॥

ताभ्यामुक्तं कृतं पापं तीव्रं दुःखशतप्रदम् । तस्मान्मे छुट्टनं पापात् कथं ज्ञानिन् ! भविष्यति ? ॥ २२६ ॥

ज्ञानी जगौ विना शत्रुञ्जयं तीर्थं मनोहरम् । भविष्यति न पापेभ्यो विमुक्तिर्भवतो द्रुतम् ॥ २२७ ॥

इमं यतिं पुरस्कृत्य भूप ! त्वं सङ्घसंयुतम् । सिद्धक्षेत्रादितीर्थेषु कुरु यात्रां समाहितः ॥ २२८ ॥

तत्र तीर्थे यतेस्ते च सर्वेषां कर्म्मणां क्षयात् । महोदयसुखं सद्यो भविष्यति न संशयः ॥ २२९ ॥

* यतः-“ टंकणेन यथा हेम जलेन लवणं यथा । तथा शत्रुञ्जयस्मृत्या याति कर्म्म पुरा कृतम् ॥ २३० ॥ ”卐

श्रुत्वेति भूपतिर्वाचं–यमेन तेन संयुतः । शत्रुञ्जये ययौ देवान्नन्तुं कुर्वन् महोत्सवम् ॥ २३१ ॥

तत्र विस्तरतः पूजां कुर्वतो मेदिनीपतेः । उत्पन्नं केवलज्ञानं मुक्तिरप्यभवत् क्रमात् ॥ २३२ ॥

* त्रिविक्रमयतीशस्य कुर्वतो ध्यानमादरात् । सर्वकर्म्मक्षयात् सद्यो मुक्तिसातमजायत ॥ २३३ ॥卐

तदा वाचंयमास्तत्र बहवः सिद्धपर्वते । कर्म्मणां क्षयतो मुक्तिं प्रापुः स्वर्गं गता पुनः ॥ २३४ ॥

श्रुत्वेति भरतः शत्रुञ्जये गत्वा जिनेश्वरान् । नत्वा च पूजयित्वा च सफलं स्वजनुर्व्यधात् ॥ २३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ सर्प्प–जीवसम्बन्धः ।

षट्खण्डां मेदिनीं नाभि-पौत्रो भरतभूपतिः । साधयित्वा मरुत्कूलङ्कषाकूले स्थितोऽन्यदा ॥ १ ॥
चारणश्रमणौ साधू धर्म्ममूर्त्ती दयापरौ । उत्तीर्य व्योमतोऽन्येद्युर्भरतस्यान्तिके स्थितौ ॥ २ ॥
अकस्मादागतौ साधू दृष्ट्वा भरतचक्रिराट् । तिस्रः प्रदक्षिणाः कृत्वाऽनंसीत्पादौ तयोर्मुदा ॥ ३ ॥
दत्त्वा धर्म्माशिषं तस्मै भरतायाऽऽदिमो यतिः । धर्मोपदेशमादातुं प्रावर्त्तत शिवप्रदम् ॥ ४ ॥
मैत्रीचतुष्कमष्टाङ्ग-योगाभ्यासरतिर्धृतिः । परीषहोपसर्गाणां सहिष्णुत्वमथार्जवम् ॥ ५ ॥
कषायविषयारम्भ-परिहारोऽप्रमत्तता । प्रसत्तिर्मृदुता साम्यं मुक्तिमार्गा भवन्त्यमी ॥ ६ ॥
मैत्री-प्रमोद-कारुण्य–माध्यस्थ्यानि नियोजयेत् । धर्म्मध्यानमुपस्कर्त्तुं तद्धि तस्य रसायनम् ॥ ७ ॥
मा कार्षीत् कोऽपि पापानि मा च भूत् कोऽपि दुःखितः । मुच्यतां जगदप्येषा मतिर्मैत्री निगद्यते ॥ ८ ॥
अपास्ताऽशेषदोषाणां वस्तुतत्त्वावलोकिनाम् । गुणेषु पक्षपातो यः स प्रमोदः प्रकीर्त्तितः ॥ ९ ॥
दीनेष्वार्त्तेषु भीतेषु याचमानेषु जीवितम् । प्रतीकारपरा बुद्धिः कारुण्यमभिधीयते ॥ १० ॥
क्रूरकर्म्मसु निःशङ्कं देवता–गुरुनिन्दिषु । आत्मशंसिषु योपेक्षा तन्माध्यस्थ्यमुदीरितम् ॥ ११ ॥
सबलो दुर्बलस्यापि हन्ति यो यस्य सोऽत्र वा । सहेत वेदनां घोरा-ममुत्र तत्कृतां ध्रुवम् ? ॥ १२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुरुषः कुरुते पापं बन्धुनिमित्तं वपुर्निमित्तं च । वेदयते तत् सर्वं नरकादौ पुनरसावेकः ॥ १३ ॥
परद्रव्यापहारेण लभते वधबन्धनम् । घोरदुःखमिहामुत्र परस्वं त्यज सर्पवत् ॥ १४ ॥
परस्त्रीसङ्गमासक्ता येऽधमा नष्टबुद्धयः । वधबन्धादिकं प्राप्य श्वभ्रे ते यान्ति सप्तमे ॥ १५ ॥
अष्टम्यामुपवासं यो विधत्ते भावपूर्वकम् । हत्वा कर्म्माष्टकं सोऽपि याति मुक्तिपदं ध्रुवम् ॥ १६ ॥
पौषधं नियमेनाऽपि यः कुर्यादष्टमीदिने । स्वर्गं राज्यादिकं प्राप्य सोऽपि याति परं पदम् ॥ १७ ॥
उपवासं विधत्ते य-श्चतुर्दश्यां स ना व्रजेत् । चतुर्दशगुणस्थाना-न्युल्लङ्घ्याहो ! परं पदम् ॥ १८ ॥
मासे मासे विधातव्य-श्चतुःपर्वसु पौषधम् । प्राणान्तेऽपि न मोक्तव्यो बुधैः स्वर्मुक्तिकारणम् ॥ १९ ॥
देशनान्ते नृपोऽप्राक्षी-च्चतुर्दश्यष्टमीदिने । उपवासो मया कार्यः पूर्वपातकपिष्टये ॥ २० ॥
निर्ममौ तु युवां देहे दृश्येथां साम्प्रतं कथम् । ततोऽवक् प्रथमः साधुर्भरतक्ष्मापतेः पुरः ॥ २१ ॥
युगादीशं जिनं नन्तुं गतावावां यदैकदा । तदा जगौ प्रभुः शत्रुञ्जयमाहात्म्यमद्भुतम् ॥ २२ ॥
तावत्तिष्ठन्ति हत्यादि-पातकानि तनूमताम् । यावच्छत्रुञ्जयं तीर्थं श्रूयते नहि कर्णयोः ॥ २३ ॥
एकैकस्मिन् पदे दत्ते पुण्डरीकगिरिं प्रति । भवकोटिकृतेभ्योऽपि पातकेभ्यः प्रमुच्यते ॥ २४ ॥
दृष्टः श्रुतोऽपि सिद्धाद्रि-र्दृष्टिकर्णैः सुभक्तितः । येन स जायते मुक्ति-कन्याभर्त्ता न संशयः ॥ २५ ॥

For Private and Personal Use Only

श्रुत्वेत्यावां जिनेन्द्राऽऽस्याद् गतौ शत्रुञ्जयाचले । अनमाव तदा तीर्थं कल्याणकमलाप्रदम् ॥ २६ ॥
तत्रैतो भूरिगीर्वाणैः सेवितः स्वर्गनायकः । नमस्तीर्थं पप्रच्छे स आवाभ्यामिति सादरम् ॥ २७ ॥
कुतस्त्वमीदृग्रूपश्रीः समागा जल्प साम्प्रतम् । स प्राह श्रूयतामत्रा-गमहेतुं ममाधुना ॥ २८ ॥
विदेहेषु पशुग्रामे सुशर्माऽभून्महीसुरः । दारिद्र्यभाजनं मूर्ख-शिरोरत्नं जडाशयः ॥ २९ ॥
ग्रामे न्यक्षेऽन्यदा भ्रान्त्वा कणानऽप्राप्य पञ्चषान् । द्विजो यावदगाद् गेहे तावत्पत्नी जगाविति ॥ ३० ॥
त्वं मूर्खो निःकृपः पुण्य-रहितो सहितो श्रिया । लात्वाऽन्यत्र सुखं गच्छ निर्धनेन त्वया किमु ॥ ३१ ॥
※ यतः-" यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ते ॥ १ ॥ "卐
" जाई रूवं विज्जा तिन्निवि निवडंतु कंदरे विवरे । अत्थच्चिअ परिवड्ढउ जेण गुणा पायड़ा हुंति ॥ २ ॥ "
इत्याक्रोशं ददाना सा पत्नी मुशलमुल्वणम् । उत्पाट्याशूत्थिता यावद् हन्तुं कान्तं दुराशया ॥ ३२ ॥
तावद् द्विजस्तथा स्फारं पाषाणं गृहिणीं प्रति । प्राक्षिपद् बलतः प्राणैर्मुमुचे सा यथाऽबला ॥ ३३ ॥
ततः पुत्रो जगौ पापिन् ! पितः किं दुःकृतं कृतम् । अनेन तमसा पातो दुर्गतौ ते भविष्यति ॥ ३४ ॥
ततः क्रुद्धो द्विजः पुत्रं जल्पन्तं हतवान् हठात् । ततोऽपि तनयां स्वीयां जघान वाडवः क्रुधा ॥ ३५ ॥

ततः—सभीर्व्रजन् विप्रः सौरभ्या–स्खलितोऽध्वनि । तामप्यहन् स गां स्फार-पाषाणेन दुराशयः ॥ ३६ ॥
हत्वैतानि द्विजो गच्छं स्तलारक्षैर्धृतः करे । छलान्नंष्ट्वा व्रजन् कूपे न्यपतन् नरकोपमे ॥ ३७ ॥
स पतन् खण्डशो जात-स्तथा यातो मृतिं यथा । नरकं सप्तमं प्राप दुःखलक्षप्रदायकम् ॥ ३८ ॥
* यतः–" पुरुषः कुरुते पापं बन्धुनिमित्तं वपुर्निमित्तं च । वेदयते तत् सर्वं नरकादौ पुनरसावेकः ॥ १ ॥
यत्नेन पापानि समाचरन्ति, धर्मं प्रसङ्गादपि नाचरन्ति ।
आश्चर्यमेतद्धि मनुष्यलोके, क्षीरं परित्यज्य विषं पिबन्ति ॥ २ ॥ "
सहित्वा तत्र दुःखानि स द्विजो निर्गतस्ततः । सिंहोऽजनिष्ट दुष्टात्मा जन्तून् हन्ति स्म निर्दयम् ॥ १ ॥
ततो मृत्वा गतः श्वभ्रे चतुर्थे स द्विजासुमान् । ततो निर्गत्य चाण्डालोऽजनि ग्रामे रमाभिधे ॥ ३९ ॥
तत्र कृत्वा तमो भूरिचाण्डालः क्रूरकर्म्मकृत् । मृत्वा च सप्तमे श्वभ्रे जगामासुखदायके ॥ ४० ॥
तीव्रदुःखानि सम्भोज्य तत्रैव नरकेऽनिशम् । वने भीमेऽभवद् दृष्टिविषोऽहिर्दुष्टमानसः ॥ ४१ ॥
सोऽन्यदाहिर्बिलाऽऽसन्नं मुनिं शान्तात्ममानसम् । निरीक्ष्य फूत्कृतिं कुर्वन् दधाव दशनेच्छया ॥ ४२ ॥
तदाऽपश्यन्नहिः साधुं शान्तं सुस्थितमानसम् । शत्रुञ्जयस्य माहात्म्यं वरविद्याभृतां पुरः ॥ ४३ ॥
शत्रुञ्जयस्य तीर्थस्य स्मरणात् स्पर्शनात् पुनः । दर्शनान्निर्वृतिर्हस्त-गता नृणां भविष्यति ॥ ४४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उक्तं च—"पल्योपमसहस्रं तु ध्यानाल्लक्षमभिग्रहात् । दुष्कर्म्म क्षीयते मार्गे सागरोपमसञ्चितम् ॥ १ ॥"
लाघवात् कर्म्मणां शत्रुञ्जयमाहात्म्यसंभृतेः । जातजातिस्मृतिः सर्प्पोऽस्मार्षीत् पूर्वान् भवान् निजान् ॥ ४५ ॥
मया पत्नी सुतः पुत्री सैरभिर्निहता पुरा । तेनाहं नरके पातं भूरि प्रापमशर्म च ॥ ४६ ॥
ततो बिलाद् विनिर्गत्य स सर्पः कुण्डलीभवन् । ननामांह्री मुनेर्हेतुं स्वस्य कल्याणसम्पदः ॥ ४७ ॥
तदा तत्रागतानां स्व-गामिनां पुरतो मुनिः । श्रीशत्रुञ्जयतीर्थस्य नमस्कृतिफलं जगौ ॥ ४८ ॥
शत्रुञ्जयस्य तीर्थस्य स्मरणात् स्पर्शनान्नतेः । दर्शनाज्जायते नृणां कल्याणकमला करे ॥ ४९ ॥
पल्योपमसहस्रंतु ध्यानाल्लक्षमभिग्रहात् । दुःकर्म्म क्षीयते मार्गे सागरोपमसञ्चितम् ॥ ५० ॥
शत्रुञ्जयं स्मरन् सर्प्पो मुनेर्वन्दनतस्तदा । ललावनशनं विद्या—धराणां पश्यतां पुरः ॥ ५१ ॥
स सर्पस्तैः खरौर्नीतः पुण्डरीकाभिधेऽचले । श्रावितश्च नमस्कारं मृतोऽभून्निर्जरेश्वरः ॥ ५२ ॥
* यतः—कृत्वा पापसहस्राणि हत्वा जन्तुशतानि च । इदं तीर्थं समासाद्य तिर्यञ्चोऽपि दिवं गताः ॥ ५३ ॥卐
एतन्मेऽङ्गमहिभवं सर्प्पजीवोऽस्म्यहं पुनः । अस्य तीर्थस्य माहात्म्यात् शक्रोऽहमभवं किल ॥ ५४ ॥
ततः शक्रो निजं सर्प्पदेहं शत्रुञ्जये गिरौ । लसचन्दनकर्पूर-काष्ठैर्दहनसाद् व्यधात् ॥ ५५ ॥
सर्प्पदाहावनौ रत्नमयं पीठं सुरेश्वरः । विधाय तीर्थमानम्य ययौ शक्रो निजास्पदम् ॥ ५६ ॥

For Private and Personal Use Only

इत्थं विज्ञाय सर्पस्य चरितं शक्रजल्पितम् । आवां गत्वा तु वैताढ्ये प्रपन्नचैत्य जैनकाम्बिके ॥ ५७ ॥
दीक्षां श्रीवृषभोपान्ते लात्वा शास्त्राणि भूरिशः । पठित्वा वृषभादेशा-दागताविह साम्प्रतम् ॥ ५८ ॥ युग्मम् ॥
शत्रुञ्जयस्य माहात्म्य-माकर्ण्य भरतेश्वरः । नन्तुं शत्रुञ्जयं चक्रे स्वान्तं कल्याणशर्मणे ॥ ५९ ॥
सर्पजीवः क्रमाच्छक्र भवाद्भवे त्रयोदशे । सर्वकर्म्मक्षयान्मुक्ति-पुर्यां यास्यति निश्चितम् ॥ ६० ॥

श्री सुधासेन-भूपकथा ।

एकदा वृषभोपान्ते भरतः प्रोक्तवान् प्रभो ! । कोऽधुनाऽगात् शिवं सिद्ध शैले स्वामी जगौ ततः ॥ १ ॥
पद्मपुरे धरापालो भूपतिः पालयन् प्रजाः । ययौ शत्रुञ्जये शैले कुर्वन् क्रीडां वनेऽनघे ॥ २ ॥
तत्र साधुं सुधासेनं तपस्यन्तं तपो बहु । दृष्ट्वोत्पन्नरुषो हन्तु-मुत्पाट्याधात् करं निजम् ॥ ३ ॥
शिलातले सुधासेनं भूयो भूयो महीपतिः । यदैवं स्फालयामास तदा दध्याविदं यतिः ॥ ४ ॥
रे जीव ! भवता भूरि पापं जीववधात्पुरा । यच्चक्रे तत् समायात-मधुनैतत ताडनात्तत्र ॥ ५ ॥
रे जीव ! न त्वया क्रोधः कार्यः कस्योपरि ध्रुवम् । यतः स्याद् भ्रमणं भूरि संसारे विषमे क्रुधः ॥ ६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* यतः—सन्तापं तनुते भिनत्ति विनयं सौहार्दमुच्छादय-त्युद्वेगं जनयत्यवद्यवचनं ब्रूते विधत्ते कलिम् ।
कीर्तिं कृन्तति दुर्गतिं वितरति व्याहन्ति पुण्योदयं, धत्ते यः कुगतिं स हातुमुचितो रोषः सदोषः सताम् ॥७॥
एवं तस्य यतेर्ध्यानं कुर्वतः करुणात्मनः । उत्पन्ने केवलज्ञाने देवाश्चक्रुर्महोत्सवम् ॥ ८ ॥
प्रजापालः सुरान् ज्ञानोत्पत्त्युत्सवं वितन्वतः । दृष्ट्वा विस्मितचेतस्कः पप्रच्छ निर्जराननिति ॥ ९ ॥
किमर्थं क्रियते साधो-रस्योत्सवो मनोहरः । देवाः प्रोचुरयं साधुः पूज्योऽस्ति मरुतामपि ॥ १० ॥
ततो भूपः समुत्थाय प्रणम्य तं यतिं जगौ । मया ते विहितं विघ्नं जीवितव्यान्तकृद् ननु ॥ ११ ॥
केवल्यवग् मया त्वं तु हतो दण्डाभिघाततः । तेनाहं भवता राजन् ! निहतः साम्प्रतं दृढम् ॥ १२ ॥
राजाऽवग् भवता कुत्र भवेऽत्र परत्र च । हतोऽहं श्रावयेदानीं ततः प्राह स केवली ॥ १३ ॥
चन्द्राह्वनगरे चन्द्रः क्षत्रियोऽजनि सुन्दरः । नैगमः कमलाह्वोऽभूत् कुन्तलाभिधपत्तने ॥ १४ ॥
चन्द्रेण कमलोऽन्येद्युर्निहतो यष्टिना मुधा । कमलोऽवग् मुधा मा त्वं कथं हंसि दुराशय ! ॥ १५ ॥
क्षत्रियो धर्म्मघोषान्ते श्रुत्वा धर्म्मं जिनोदितम् । चकार जिननाथस्य पूजां पुष्पैर्मनोहरैः ॥ १६ ॥
मृत्वाऽथ क्षत्रियो वीर-पुरे वीरवणिक्सुतः । सुधासेनाभिधो जातः कलासु कुशलः क्रमात् ॥ १७ ॥
श्रुत्वा धर्म्मं जिनेन्द्रोक्तं लात्वा संयममादरात् । तपः कुर्वन्निहायातः स एवाहं नरेश्वर ! ॥ १८ ॥

For Private and Personal Use Only

कमलः पञ्चतां प्राप्तो धरापालो नरेश्वरः । त्वमभूः सुपात्रदानेन भूरिलक्ष्मीसमन्वितः ॥ १९ ॥
मया त्वं निहतः पूर्व-भवे भूमीपते ! ननु । तेनाहं न त्वयाऽत्रैव भवे हतस्तपोधनः ? ॥ २० ॥
तीर्थमाहात्म्यतः सर्वं क्षीणं कर्म्म ममाधुना । सम्प्राप्तं केवलज्ञानं मया तव प्रसादतः ॥ २१ ॥
* ततो राजाऽपि सन्त्यज्य राज्यं लात्वा व्रतं क्षणात् । शत्रुञ्जये ययौ मुक्तिं क्षिप्त्वा कर्म्माखिलं क्रमात् ॥२२॥
तदाऽनेके नरा वर्ये लात्वा दीक्षां शिवाचले । सर्वकर्म्मक्षयान्मुक्ति-पुरीशर्म प्रलेभिरे ॥ २३ ॥
श्रुत्वेति भरतः शत्रुञ्जये भूयिष्ठसङ्घयुग् । गत्वा विस्तरतः सर्वान् जिनानानर्च भावतः ॥ २४ ॥

श्री शत्रुञ्जये धरापाल-भूपादीनां मुक्तिगमनस्वरूपम् ।

उज्जयन्तगिरेः पार्श्वे गिरिदुर्गाभिधे पुरे । वर्ये ऐक्ष्वाकुवंशेऽभू-द्रविमल्लाभिधो नृपः ॥ १ ॥
तस्य सर्वज्ञभक्तस्य रक्षतः पृथिवीं नयात् । शशिलेखाभिधा पत्नी बभूवाऽनघरूपभृत् ॥ २ ॥
अन्यदा यज्ञयात्रायां भूपे याते च तत्प्रिया । महेभ्य गेहिनीं पुत्रं लालयंतीं ददर्श सा ॥ ३ ॥
ततो राज्ञी सुताभावं स्वस्मिन्नालोक्य तत्क्षणात् । शुशोचेत्यहकं भाग्य-हीनाऽस्मि जगतितले ॥ ४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हसतो जल्पतो भूमौ लुठतो रुदतः सुतान् । या पालयति वामाक्षी सैव धन्या सुभाग्यभाग् ॥ ५ ॥
* यतः—उत्पतन्निपतद् रिंखन् हसन् लालावलीं वमन् । कस्याश्चिदेव धन्यायाः क्रोडमायाति नन्दनः ॥ ६ ॥
स एव पुत्रः पुत्रो यः कुलमेव न केवलम् । पितुः कीर्त्तिं च धर्म्मं च गुणांश्चापि विवर्द्धयेत् ॥ ७ ॥
ततो राज्ञ्या जिनेन्द्रार्चां कुर्वत्याः प्रतिवासरम् । सुरपाल-धरापालौ सुतौ जातौ मनोहरौ ॥ ८ ॥
समस्तनृकलादक्षौ समरूपौ सहोदरौ । द्वावपि प्रीतिसंयुक्तौ जातौ कुशलवाविव ॥ ९ ॥
गुरुपार्श्वे सदा तौ तु शस्त्रशास्त्रकलाः कलाः । अधीयानौ पितुर्मातु-र्जातौ प्रमोददायकौ ॥ १० ॥
* यतः—"विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन । स्वदेशे निधनं यान्ति काकाः कापुरुषा नराः ॥ १ ॥"
बह्वीर्भूपाङ्गजाः पित्रा रुचिरोत्सवपूर्वकम् । सुरपाल-धरापालौ क्रमेण परिणायितौ ॥ ११ ॥
मानी यशस्वी तेजस्वी विनीतो नीतिरीतिविद् । सर्वैर्गुणैर्धरापालः सुरपालादभूद्वरः ॥ १२ ॥
निशाशेषेऽन्यदोन्निद्रो धरापालो नृपाङ्गजः । ददर्श काननं घोरं नानाश्वापदसङ्कुलम् ॥ १३ ॥
क्वचित् शूकरवृन्दानि मातङ्गानां घटाः क्वचित् । क्वचित् मृगारिसञ्चारं स तत्रापश्यदुन्मनाः ॥ १४ ॥
क्वचिच्चन्द्राश्म-सूर्याश्म-मयान् सुधवलालयान् । मणिहेमौघसम्पूर्णान् धरापालो ददर्श च ॥ १५ ॥
विलोकयन् वनं हेम-मये धवलसद्मनि । अद्राक्षीद्योगिनं पद्मा-सनासीनं नृपाङ्गभूः ॥ १६ ॥

For Private and Personal Use Only

धरापालोऽनमद्यावद्योगिनां तावता स च । ध्यानं मुक्त्वा जगौ वत्स ! स्वागतं तव विद्यते ॥ १७ ॥
विद्या दातुं मया तुभ्यं त्वमानीत इहाधुना । अभोजयत्ततो योगी सारां रसवतीं च तम् ॥ १८ ॥
मत्वा तमुत्तमं खड्ग-सिद्धिविद्यां स योगिराट् । धरापालाय भूपाल पुत्राय प्रददौ मुदा ॥ १९ ॥
ततो वपू रयात्त्यक्त्वा योगी विशदमानसः । सुरलोकं ययौ यावत्तावत् स विस्मितोऽजनि ॥ २० ॥
तदा सोऽपि धरापालो ददर्श न च योगिनम् । वनं पश्यन् ययौ द्रष्टुमग्रे कौतुकमादरात् ॥ २१ ॥
ततो गच्छन् पुरः कूप-मन्तर्वर्ति बकस्थलम् । ददर्श च नरं तत्र जलस्थं रुचिराकृतिम् ॥ २२ ॥
स च प्राह धरापाल ! यद्यस्तीच्छा तव श्रिये । तदाऽत्राऽऽगच्छ दास्यामि तुभ्यं सिद्धिं गरुत्मनः ॥ २३ ॥
कृत्वा साहसं यावद् झम्पां कूपे ददौ रयात् । तावत्कूपोऽभवद् हेम-मयपीठं महत्तमम् ॥ २४ ॥
ततोऽभूत् विस्मितो भूप-सुतो यावत् स्वचेतसि । तावत्तत्रागतो देवो जगादेति च तं प्रति ॥ २५ ॥
त्वत्साहसेन तुष्टोऽस्मि वरं वृणु यथेप्सितम् । कुमारः प्राह कल्याण-सिद्धिं देहि ममाधुना ॥ २६ ॥
ततस्तुष्टेन देवेन स्वर्णसिद्धिर्मनोहरा । ददे तस्मै धरापाल कुमाराय महात्मने ॥ २७ ॥
ततोऽभ्येत्य धरापालो गिरिदुर्गपुरे भ्रमन् । ननामाम्बापितृभ्रातृ-पादान् विनयपूर्वकम् ॥ २८ ॥
सम्प्राप्तहेमविद्यादि–सम्बन्धं निखिलं तदा । प्रोक्त्वा प्रमोदयामास पित्रादीन् स्वजनानपि ॥ २९ ॥

॥ २१२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भाग्यवन्तं धरापालं मत्वा तातः सदुत्सवम् । राज्यं वितीर्य जग्राह संयमं गुरुसन्निधौ ॥ ३० ॥
पालयन् संयमं भूप-यतिः शत्रुञ्जये गतः । क्षिप्त्वा कर्म्माखिलं मुक्ति-नगर्यां समुपेयिवान् ॥ ३१ ॥
खड्गविद्याप्रभावेन साधयन् पृथिवीं क्रमात् । धरापालः ससाधाऽऽशु भुवः खण्डत्रयं स्फुटम् ॥ ३२ ॥
एकदा तस्य देहेऽभूद् गलत्कुष्ठाभिधाऽऽमयः । ततः सो विदधे नाना-प्रकारान्यौषधानि च ॥ ३३ ॥
नाभूद् गुणस्ततः प्राणांस्त्यक्तुं चितां महत्तराम् । विधाय विशति-स्माग्नौ कुमारो मारसन्निभः ॥ ३४ ॥
तदाऽकस्मात् खगस्तत्रा-भ्येत्य प्राहेति तं प्रति । त्वं किं प्राणांस्त्यजेदानीं प्रविश्य ज्वलने वद ॥ ३५ ॥
स्वस्मिन् रोगस्वरूपे तु प्रोक्ते तेन खगो जगौ । शत्रुञ्जये जिनस्नात्र-वारि यद्विद्यते वरम् ॥ ३६ ॥
तेन कुष्ठं मदीयाङ्गाद् गतं तमो रवेरिव । तदम्बुना वपुस्त्वं वाऽभिषिञ्चाभ्येत्य तत्र च ॥ ३७ ॥
त्वदीयो विग्रहो रोग-रहितः सहितः श्रिया । भविष्यत्यचिरात्तीर्थ-प्रभावात् सिद्धपर्वते ॥ ३८ ॥
* यतः-"टङ्कणेन यथा हेम जलेन लवणं यथा । तथा शत्रुञ्जयस्मृत्या कर्म्मपङ्को गलत्यहो ? ॥ १ ॥卐
* तमो यथोष्णरुचिना पुण्येन च दरिद्रता । तथा शत्रुञ्जयस्मृत्या विनश्यति कुकर्म्म तत् ॥ ३९ ॥卐
* कुशिलेन यथा शैलः सिंहनेव कुरङ्गकः । तथा शत्रुञ्जयस्मृत्या भिद्यते पूर्वकर्म्म तत् ॥ ४० ॥卐
आकर्ण्यैतत् खगप्रोक्तं धरापालः ससोदरः । मेलयित्वा बहुं सङ्घं चचाल शोभनेऽहनि ॥ ४१ ॥

For Private and Personal Use Only

शत्रुञ्जय कल्पवृ० ॥ २१४ ॥

दिनानां दशकं तत्र स्थित्वा कुर्वन् महोत्सवम् । प्रासादं कारयामास धरापालो महत्तमम् ॥ ४२ ॥
धरापालो जिनं नाभि नन्दनं शोभनेऽहनि । स्थापयामास तत्रैव प्रासादे भूरिरैव्ययात् ॥ ४३ ॥
प्रभोः कृत्वाऽर्चनां पुष्पैः प्रवरैर्बरभङ्गिभिः । ध्यानं कर्त्तुं महीपाल उपविष्टो वरोदयः ॥ ४४ ॥
तत्रैव ध्यायतस्तस्य भूपस्य नाभिनन्दनम् । केवलज्ञानमुत्पन्नं लोकालोकावलोककम् ॥ ४५ ॥
तत्राभ्येत्याऽमराधीशै-र्विहिते स्वर्णवारिजे । धरापालो गृहीत्वाऽत्र साधुवेषं ह्युपाविशत् ॥ ४६ ॥
उपविष्टेषु भूयिष्ठ-श्राद्धेषु स च केवली । धर्म्मोपदेशमादातुं प्राववर्ते कृपापरः ॥ ४७ ॥
* तथाहि—धर्म्मादाऽऽसाद्यते राज्यं धर्म्माद् देवत्वमाप्यते । धर्म्मादेव शिवप्राप्तिः धर्म्मः सेव्यस्ततो बुधैः ॥४८॥卐
* धर्म्मो मङ्गलमुत्कृष्टं धर्म्मः स्वर्गापवर्गदः । धर्म्मः संसारकान्तारो-ल्लङ्घने मार्गदेशकः ॥ ४९ ॥卐
* धर्मो मातेव पुष्णाति धर्म्मः पाति पितेव सः । प्रीणाति पुत्रवद् धर्म्मः धर्म्मः स्निह्यति बन्धुवत् ॥ ५० ॥卐
* धर्म्मस्य जननी जीव-दया मान्या सुरासुरैः । तस्मात्तद्वैरिणीं हिंसां नाद्रियेत सुधीर्नरः ॥ ५१ ॥卐
* दानं तपो देवपूजा शीलं सत्यं जपः पुनः । सर्वमप्यफलं तस्य यो हिंसां न परित्यजेत् ॥ ५२ ॥卐
* कण्टकेनापि संविद्धो देहो दूयेत निश्चितम् । तत्कथं शस्त्रसङ्घातैर्हन्यते हि परो जनः ॥ ५३ ॥卐
* दयां विनापि मन्यन्ते ये धर्म्मं मूर्खशेखराः । वन्ध्यायां तनयं तेऽपि जनयन्ति विसंस्थुलाः ॥ ५४ ॥卐

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* दयैव हि परो धर्मो दयैव हि परं श्रुतम् । दयां विनाऽखिलो धर्मो भवेन्निःफल एव तु ॥ ५५ ॥卐
* नाद्रियेत कृतघ्नत्व-माद्रियेत कृतज्ञताम् । स्वोपकारिणि धर्म्मे तदादरं कुरुते भवी ॥ ५६ ॥卐
इत्यादि धर्म्म-माकर्ण्य बहवो भव्यमानवाः । जगृहुः संयमं स्वर्गा-पवर्गसुखदायकम् ॥ ५७ ॥
केचिच्च मानवाः श्राद्ध-धर्म्मं द्वादशधा मुदा । आदद्युर्जीवरक्षाद्य-तिथिदानादिकं व्रतम् ॥ ५८ ॥
तेन केवलिना भव्या बोधिता बहवः क्रमात् । शत्रुञ्जयाचले क्षिप्त्वा कर्म्माऽशेषं शिवं ययुः ॥ ५९ ॥
धरापालसुतश्चन्द्रोऽमात्यै राज्ये निवेशितः । मेदिनीं पालयामास न्यायमार्गेण सन्ततम् ॥ ६० ॥
इतः प्रबोध्य भूयिष्ठ-भव्यान् धर्म्मे जिनोदिते । धरापालः शिवं प्राप शत्रुञ्जय-शिलोच्चये ॥ ६१ ॥
धरापालोऽगमद्यत्र मुक्तिं शत्रुञ्जये गिरौ । तत्र चन्द्रो जिनागारं शान्तिनेतुरकारयत् ॥ ६२ ॥
तस्मिन् जिनालये मूर्त्तिं शान्तेर्हेममयीं वराम् । सूत्सवं स्थापयामास धरापालसुतः क्रमात् ॥ ६३ ॥
चन्द्रोऽन्यदा गुरूपान्ते सम्यक्त्वस्य फलं वरम् । शुश्रावेति शिवश्रीः स्यात् सम्यक्त्वादेव देहिनाम् ॥ ६४ ॥
* सम्यग्दर्शनसंशुद्धः सत्पुमानुच्यते बुधैः । सम्यक्त्वेन विना जीवः पशुरेव न संशयः ॥ ६५ ॥卐
* सम्यक्त्वं यस्य जीवस्य हस्ते चिन्तामणिर्भवेत् । कल्पवृक्षो गृहे तस्य कामगव्यनुगामिनी ॥ ६६ ॥卐
* सम्यक्त्वालङ्क-कृतो यस्तु मुक्तिश्रीस्तं वरिष्यति । स्वर्गश्रीः स्वयमायाति राज्यलक्ष्मीः सखी भवेत् ॥६७॥卐

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं सम्यक्त्वमाहात्म्यं श्रुत्वा चन्द्रमहीपतिः । मुक्तिगमोचितं पुण्य-मर्जयामास वेगतः ॥ ६८ ॥
मृत्वाऽऽद्यताविषे गत्वा लक्ष्मीपुर्यां महीपतेः । भीमस्य मदनः पुत्रोऽजनिष्ट जिनधर्म्मकृत् ॥ ६९ ॥
क्रमाच्छत्रुञ्जये गत्वा श्रीनाभेयार्हतः पुरः । ध्यानं कुर्वन् ययौ मुक्तिं सर्वकर्म्मायुषां क्षयात् ॥ ७० ॥

※ ※ ※

श्री नीलपुत्र-सम्बन्धः ।

राजादन्या अधः स्वामी वृषभः सुरसेवितः । पावयन् पृथिवीं सिद्ध-पर्वते समवासरत् ॥ १ ॥
द्वितीयो गणभृच् चन्द्र-सेनो भूयिष्ठसाधुयुग् । तत्र तीर्थे समायातो नन्तुं तीर्थं जिनान् पुनः ॥ २ ॥
व्रतिन्यः सुन्दरीमुख्या बह्वयो भासुरभावतः । तीर्थं नन्तुं समायाताः भूरिसाध्वीनिसेविताः ॥ ३ ॥
एकदा वृषभं नत्वा चन्द्रसेनो गणी जगौ । अस्य तीर्थस्य माहात्म्यं जल्पतां भगवन् ! ध्रुवम् ॥ ४ ॥
प्रभुर्योजनगामिन्या वाण्या मधुरया तदा । जगाद तीर्थमाहात्म्य-मेवं गणभृतः पुरः ॥ ५ ॥
※ प्राणिभिर्यं समारूढै-र्लोकाग्रमतिदुर्लभम् । अवाप्यते स तीर्थेशः शाश्वतोऽयं गिरिर्वरः ॥ ६ ॥卐
※ अनादितीर्थमेतद्धि सिद्धास्तीर्थकृतोऽत्र च । अनन्ता मुनयश्चापि क्षिप्त्वा स्वं कर्म्मसञ्चयम् ॥७॥卐

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

※ ये चात्र पक्षिणः सन्ति क्षुद्रा अन्येऽपि जन्तवः । हिंसका अपि सेत्स्यन्ति ते भवैस्त्रिभिरुत्तमाः ॥ ८ ॥卐
※ अभव्याः पापिनो जीवा नामुं पश्यन्ति पर्वतम् । लभ्यते चापि राज्यादि नेदं तीर्थं हि लभ्यते ॥ ९ ॥卐
※ मुक्तेषु तीर्थनाथेषु गते ज्ञाने महीतले । लोकानां तारकः सोऽयं श्रवणात् कीर्त्तनादपि ॥ १० ॥卐
※ दुःषमाख्येऽपि समये गते ज्ञानेऽपि केवले । धर्म्मे विसंस्थूले जाते तीर्थमेतज्जगद्धितम् ॥ ११ ॥卐
※ अत्रार्हतां कृता पूजा स्तुतिपुष्पाक्षतादिभिः । आसंसारं कृतं पापं प्राणिनां हि व्यपोहति ॥ १२ ॥卐
※ यतः—पूजाऽर्हतो गुरोर्भक्तिः श्रीशत्रुञ्जयसेवनम् । चतुर्विधस्य सङ्घस्य सङ्गमः सुकृतैर्भवेत् ॥ १३ ॥卐
※ येनात्र गुरवो वस्त्र-भक्तदानादिभिर्मुदा । सन्मानिता लभिष्यन्ते ते स्वर्गशिवसम्पदः ॥ १४ ॥卐
※ यतः—वस्त्रान्नजलदानेन गुरोः शत्रुञ्जये गिरौ । इहापि परलोकेऽपि जनाः सुखजुषोऽभवन् ॥ १५ ॥卐
※ सङ्घपादरजो यस्य शिरः स्पृशति देहिनः । तीर्थसेवाफलं तस्य पवित्रस्य भवत्यहो ! ॥ १६ ॥卐
※ शत्रुञ्जयादितीर्थेषु प्रासादान् प्रतिमाश्च ये । कारयन्ति हि तत्पुण्यं ज्ञानिनो एव जानते ॥ १७ ॥卐
※ कारयन्ति जिनानां ये तृणावासानपि स्फुटम् । अखण्डितविमानानि लभन्ते ते त्रिविष्टपे ॥ १८ ॥卐
श्रुत्वेति गणभृन्मुखाजनास्तत्र जिनान्तिके । जगुस्तीर्थमिदं वर्षं वर्षं प्रति नमस्यते ॥ १९ ॥
तदा तत्र महीशान-पुराधीशो धनो नृपः । भूरिसङ्घयुतो नन्तुं तीर्थदेवान् समागमत् ॥ २० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सोऽपि भूमीपतिर्मुख्य-प्रासादे प्रथमं जिनम् । पूजयित्वा सुमैर्वर्यै-स्तुतिं चक्रे मनोहराम् ॥ २१ ॥

ततो गत्वा जिनोपान्ते धर्म्मं श्रोतुं नरेश्वरः । उपाविशद्यदा ताव-ज्जिनाधीशो जगावदः ॥ २२ ॥

* निद्रान्ते परमेष्ठिसंस्मृतिरथो देवार्चनव्यापृतिः, साधुभ्यः प्रणतिः प्रमादविरतिः सिद्धान्ततत्त्वश्रुतिः ।卐

सर्वस्योपकृतिः शुचिव्यवहृतिः सत्पात्रदाने रतिः, श्रेयो निर्मलधर्म्मकर्म्मनिरतिः श्लाघ्या नराणां स्थितिः ॥२३॥

पादमायान्निधिं कुर्यात् पादं वित्ताय घट्टयेत् । धर्म्मोपभोगयोः पादं पादं भर्त्तव्यपोषणे ॥ २४ ॥

दिने दिने मङ्गलमञ्जुलाली सुसंपदः सौख्यपरम्परा च । इष्टार्थसिद्धिर्बहुला च बुद्धिः सर्वत्र वृद्धिः सृजतां च धर्म्मं ॥

* कृत्वा पापसहस्राणि हत्वा जन्तुशतानि च । इदं तीर्थं समासाद्य तिर्यञ्चोऽपि दिवं गताः ॥ २६ ॥卐

* शत्रुञ्जये जिने दृष्टे दुर्गतिद्वितयं क्षिपेत् । सागराणां सहस्रं च पूजास्नात्रविधानतः ॥ २७ ॥卐

* "छट्ठेणं भत्तेणं अपाणएणं तु सत्त जत्ताओ । जो कुणइ सित्तुंजे सो तइयभवे लहइ मोक्खं ॥ १ ॥卐

* जो गुणइ लक्खमेगं पूयइ विहिइं च जिणनमुक्कारं । तित्थयरनामगोयं सो बंधइ नत्थि संदेहो ॥ २ ॥卐"

श्रुत्वेति भूरि भव्यानां षष्ठादिकं तपोऽनिशम् । कुर्वतामभवज्ज्ञानं पञ्चमं च शिवं ततः ॥ २८ ॥

केचिद्भवान्तरे गत्वा सर्वार्थसिद्धिमन्दिरे । प्राप्य मर्त्त्यजनिं मुक्तिं गमिष्यन्ति न संशयः ॥ २९ ॥

राजादन्या अधोऽस्याश्च ध्यायन्तः परमं पदम् । असङ्ख्याता ययुर्यान्ति यास्यन्ति शिवपत्तने ॥ ३० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुत्वेति धनभूपस्तां लाजैर्यावदवर्द्धयत् । तावद् ववर्ष दुग्धं सा सङ्घेशस्योपरि स्फुटम् ॥ ३१ ॥

यतिन्योऽपि तदा बह्व्यः सम्प्राप्य ज्ञानमन्तिमम् ! अलभ्वन्कुः शिवं क्षेत्र-मनन्तसुखदायकम् ॥ ३२ ॥

ततोऽन्यत्र युगादीशो भव्यान् बोधयितुं जनान् । विहारं विदधे भूरि वाचंयमसुराश्रितः ॥ ३३ ॥

अन्यदा चक्रिराडाद्यः कमलाचार्य-सन्निधौ । सुश्रावेति जिनप्रोक्तं धर्म्मं जीवदयामयम् ॥ ३४ ॥

तथाहि–शत्रुमर्दनभूपस्य पुरतोऽन्येद्युरादरात् । श्रुतशेखरसूरीशाः प्रददुर्धर्म्मदेशनाम् ॥ ३५ ॥

※ यो दृष्टो दुरितं हन्ति प्रणतो दुर्गतिद्वयम् । सङ्घेशार्हन्त्यपदकृत् स जीयात् विमलाचलः ॥ ३६ ॥卐

※ यस्मिन्नदीपयोमृत्स्ना-वृक्षाद्यौषधयोऽखिलाः । रोगादिव्याधिहन्त्र्यः स्युः श्रियो दात्र्यः पदे पदे ॥ ३७ ॥卐

※ यतः-शत्रुञ्जयनदीमृत्स्नाः स्पृष्टा रोगापहाः स्मृताः । कादम्बौषधिभिर्ध्माताः प्राप्नुवन्ति च हेमताम् ॥३८॥卐

※ तस्यास्तीरद्रुमफला-न्यास्वदन्ति नराश्च ये । एतत्पयोऽपि नियमा दामासावधि ये पपुः ॥ ३९ ॥卐

※ ते वातपित्तकुष्ठादि-रोगान् जित्वैव हेलया । स्वं वपुस्तप्तहेमाभं प्राप्नुवन्ति सुकान्तिमत् ॥४०॥ युग्मम् ॥卐

※ यज्जलस्नानतो यान्ति पापान्यपि शरीरतः । का कथा वातपित्तादे र्यद-साध्यस्यागदैरपि ॥ ४१ ॥卐

※ सर्वतीर्थफलावाप्ति-प्रतिभूरियमङ्गिनाम् । सर्वपापहरा स्पर्शादपि शत्रुञ्जया नदी ॥ ४२ ॥卐

※ यस्या नद्याः पयःस्पर्शाद् गदनाश चाम्बुपानतः । लेभिरे सुखसङ्घातं शान्तनक्ष्मापसूनुवत् ॥ ४३ ॥卐

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीपुरे शान्तनक्षोणि-पतेः शीलश्रिया प्रिया । स्वप्नेऽद्य धूसरं वह्निं वीक्ष्याह प्रत्युषग्रतः ॥ ४४ ॥
तस्याऽसावि सुतो नील-नामा यदा शितिद्युतिः । तदा च भूपतेः कुम्भि-सैन्यं क्षयमुपाययौ ॥ ४५ ॥
महानीलाभिधः कालो महाकालाह्वयोऽपरः । दुःस्वप्नसूचिता एते यदाऽभूवन् सुताः क्रमात् ॥ ४६ ॥
तदाश्वाङ्ग धनं मन्त्रि-मुख्याश्च निधनं ययुः । ततोऽकस्मात् परबलैर्वेष्टितं नगरं हि तत् ॥ ४७ ॥
प्रक्षीणकोशदण्डः सन् निशायां शान्तनो नृपः । पत्नीपुत्रयुतो नंष्ट्वा ययौ क्वापि पुरे रहः ॥ ४८ ॥
चत्वारस्तनयाः सप्त व्यसनग्रस्तचेतसः । कुर्वन्ति न मनाग् धर्म्मं पापं च कुर्वते सदा ॥ ४९ ॥
* यतः-" द्यूतं मांसं सुरा वेश्या चौर्यं पापर्द्धिसेवनम् । परस्त्रीषु रतिः सप्तव्यसनी दुःखदा ह्यसौ ॥ १ ॥" 卐
द्यूतात् सर्वाणि जायन्ते व्यसनानि पराण्यपि । लोकद्वयाहितकरं तस्माद् द्यूतं त्यजेद्बुधः ॥ ५० ॥
द्यूतेनापयशो धर्म-बन्धुवर्गकुलक्षयः । भवेत् तैरश्चनरक-गतिर्दुःखौघदायिनी ॥ ५१ ॥
गोमायुश्च पिशाचास्ते ज्ञेया नरकगामिनः । जिह्वास्वादरसान्मांसं ये यदश्नन्ति दुर्धियः ॥ ५२ ॥
ते गत्वा नरके छेद-भेदकुम्भ्यादिपाकजाम् । वेदनां दुःशकां बाढं सहन्ते बहुकालतः ॥ ५३ ॥
कुरूपाः क्रूरधिषणाः कुसंसर्गपराश्च ते । राजानं मुमुचुर्नैव कुग्रहा इव वक्रगाः ॥ ५४ ॥
तैः कुपुत्रैः समं भूपो भ्रमन् पुरात् पुरं प्रति ! लभन्ते स्थानकं नैव कुत्रापि विषये मनाग् ॥ ५५ ॥

For Private and Personal Use Only

विप्रतार्य कुतोऽप्येनं पत्नीं पुत्रसमन्विताम् । करिष्याम्यहकं स्वायुःशेषमद्यात्मनो वधात् ॥ ५६ ॥
ध्यात्वेति भृगुपाताय महाशैलाभिधं गिरिम् । आरूढः शान्तनोऽपश्यद् जिनायतनमुत्तमम् ॥ ५७ ॥
प्राणप्रयाणके वाञ्छन् शम्बलं सुखहेतवे । कुटुम्बयुग् ययौ चैत्ये सम्प्रतेरर्हतस्तदा ॥ ५८ ॥
नत्वाऽर्हच्चरणौ भक्त्या नमस्यन्तं जनं वरम् । ददर्श शान्तनः क्ष्मापः सर्वकुटुम्बसंयुतः ॥ ५९ ॥
तस्येक्षणाद्धरानाथः समुत्पन्नसुवासनः । अनंसीत् जिनपं तत्त्वा-दैक्यं कुर्वन् जिनात्मनोः ॥ ६० ॥
* यतः–अल्पापि मनःशुद्ध्या जिनभक्तिर्विनिर्मिता । इहलोकेऽपि यत् सातदायिनी परलोकवत् ॥ ६१ ॥卐
पूर्वायातो नरः प्राह शेषोऽहं जिनसेवकः । तुष्टोऽस्मि जिनभक्त्या ते वरं ब्रूहि यथेप्सितम् ॥ ६२ ॥
ततो भूपो जगौ हृष्टोऽस्म्यहं शेष ! तवेक्षणात् । सम्पदो निखिला हस्ते मामके समुपागताः ॥ ६३ ॥
मम पुत्रेषु जातेषु गजादिसर्वसम्पदाम् । आदौ नाशः कथं जातः प्रसद्य त्वं निवेदय ॥ ६४ ॥
धरणेन्द्रो जगौ पल्यां भिल्लोऽभूत् कमलाभिधः । क्रूराशयोऽशुभध्याना-धारो ध्वस्ताङ्गिसश्चयः ॥ ६५ ॥
हिंसन् जीवान् वनेऽन्येद्युः कायोत्सर्गस्थितं मुनिम् । दृष्ट्वाऽप्राक्षीत् मृगो गच्छन् दृष्टोऽत्र भवता नवा ॥ ६६ ॥
कृपात्मा स मुनिः प्राह या पश्यति न वक्ति सा । यच्च वक्ति न पश्येत्तत् कथं वच्म्यहकं वद ? ॥ ६७ ॥
ततो रुष्टेन भिल्लेन मार्गणैर्निहतो मुनिः । स्मरन्नमस्कृतिं सद्यः परलोकमसाधयत् ॥ ६८ ॥

For Private and Personal Use Only

ततो भिल्लो व्रजन्नग्रे दृष्ट्वा धावन् हरिं प्रति । सिंहेन निहतः पृथ्व्यां पपात गिरिकूटवत् ॥ ६९ ॥
मयाद्याऽघाति निःपापो निरागा मुनिपुङ्गवः । इदं तत्फलमायातं दध्यौ भिल्लः स्वचेतसि ॥ ७० ॥
स मृत्वा सप्तमीं भूमिं साधुघातजपातकात् । ययौ सेहे च दुःखानि त्रयस्त्रिंशत् पयोनिधीन् ॥ ७१ ॥
ततो निर्गत्य सिंहादि-भवान् भूरीन् भ्रमन् क्रमात् । भिल्लजीवो ययौ श्वभ्रे तीव्र-दुःखौघमन्दिरे ॥ ७२ ॥
प्रान्तस्मृतमुनिवध-कृतदुःकृतगर्हणः । निर्गत्य नरकात्पुत्रो नीलाह्वस्तेऽभवत् सुतः ॥ ७३ ॥
* यतः-स्वयं कृतस्य पापस्य निन्दया गर्हणात् पुनः । जीवा भवन्ति निःपापाः स्वर्गभाजो भवन्ति च ॥७४॥ 卐
तवासौ तनयो भिल्ल-भवे मुनेर्वधात्तमः । अर्जयत् यत् तदेवान्ते निनिन्द स्वयमञ्जसा ॥ ७५ ॥
यत्पुण्यात्ते सुतो जातः कुले नीलाभिधो नृप ! । अवशिष्टेन पापेन सूनोर्दुस्थं समागमत् ॥ ७६ ॥

श्री महानीलस्य द्वितीयपुत्रस्य सम्बन्धः ।

कङ्कापुर्यामभूद्भीम-भूपस्य सेवको धनः । सो प्राप्नुवन्निजं ग्रामं सचिवान् हन्तुमिच्छति ॥ १ ॥
दारि-द्र्योपहतोऽन्येद्यु-र्जिमन् धनोऽन्नमध्यतः । असारं प्रत्यजन् दृष्ट्वा पत्न्या प्रोक्तमिदं तदा ॥ २ ॥

त्वया तु यादृशं धान्यमानीयेत पते ! गृहे । तादृशं पक्वमेवास्ति नक्तं किं मोद्यते त्वया ? ॥ ३ ॥
आकर्ण्यैतद् धनः क्रुद्धो महता लेष्टुना तथा । जघान गेहिनीं मृत्यु–मगमन्मूर्च्छिता यथा ॥ ४ ॥
धनेन निहतां पत्नीं ज्ञात्वा तं राजसेवकाः । बद्ध्वा भूपान्तिके निन्युः जगुश्च गेहिनीवधम् ॥ ५ ॥
राजादेशात्तलारेण शूलायां रोपितो धनः । मुनिदत्तं नमस्कारं सस्मारैकाग्रमानसः ॥ ६ ॥
पूर्वबद्धकुकर्म्मत्वात् षष्ठीं पृथ्वीं समेत्य सः । नमस्कारस्मृतेर्जातो महानीलाभिधाङ्गजः ॥ ७ ॥
* यतः-" निःशरण्या सदाभीरु घातनीयापि नाबला । यतः सा कुपिता लोक-द्वयघाताय जायते ॥ ८ ॥卐

श्री कालपुत्र सम्बन्धः ।

धर्म्माह्वनगरे धीर-महेभ्य नन्दनो हरः । कामान्धः सेवते नारीर्बलाद् द्रव्येण वा क्वचित् ॥ १ ॥
द्रव्ययौवनगर्वेण गुरुदेवाभिनिन्दकः । धर्म्मघातकरः पित्रो-राज्ञां न मन्यते मनाग् ॥ २ ॥
गुरुदेवादिपितॄणां कुर्वन्निन्दां निरन्तरम् । हरः क्रूराशयो मृत्वा चाण्डालोऽजनि पापतः ॥ ३ ॥
ततो मृत्वाऽगमत् श्वभ्रे ततो व्याघ्रोऽभवद्वने । ततश्च नारकी जातो भूरिदुःखौघभाजनम् ॥ ४ ॥

* यतः–न बोधिबीजं नो मुक्तिर्न स्वर्गः कुशलं न हि । शुक्लद्रव्यस्य नो लब्धि-र्देवनिन्दापरस्य तु ॥ १ ॥卐

मूकत्वम् काहलत्वम् च लूताकुष्ठादिदोषजाः । मुखरोगाः सप्तषष्टि-र्जायन्ते जिननिन्दया ॥ ५ ॥

अयशोऽकालमरणं दुःखं वक्त्रविगन्धता । लूतातन्तुमुखा दोषा जायन्ते गुरुनिन्दया ॥ ६ ॥

संसारी नरके तिर्यग्-भवे स्यात् स पुनः पुनः । धर्मिणां निन्दको नैव लभते मानुषं भवम् ॥ ७ ॥

त्रयाणामपि यस्तेषां निन्दको घोरपातकी । तस्य संसर्गमात्रेण मलिनाः स्युः परेऽपि हि ॥ ८ ॥

अस्मत्कुलकलङ्काय नन्दनोऽयं भविष्यति । ध्यात्वेतीभ्येन स त्यक्तो दूरे तस्करवद् गृहात् ॥ ९ ॥

स लूतामुखपाकेन प्रान्ते वेदनयाऽर्दितः । मृत्वा कालाभिधः पुत्र स्तवायमभवत् क्रमात् ॥ १० ॥

श्री महाकालसम्बन्धश्चतुर्थः ।

कुल्यपुर्यां मुकुन्दस्य द्विजयाऽभूद्धरिसुतः । भिक्षोपजीवितां याञ्चा–परो दुःखस्य भाजनम् ॥ १ ॥

देशाद्देशं भ्रमन् विप्रो दुःपूरोदरपूर्तये । सार्वार्चकस्य कस्यापि गेहे किङ्करतां श्रितः ॥ २ ॥

सोऽन्यदाऽऽदाय सर्वज्ञ-भूषणानि दिनात्यये । लात्वा विक्रीय वक्षस्वं (!) बभार वाडवाधमः ॥ ३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

साधोरप्युपकरणानि लात्वा विक्रीय वाडवः । वेश्याऽऽसक्तो ददौ तस्मै तद्धनं कामविह्वलः ॥ ४ ॥
तदैकेऽऽनार्हतेनोक्तं गुरु-देवधनाद्नात् । लभते नरकं घोरं जीवः संसारभाग् भवेत् ॥ ५ ॥
देवद्रव्यं गुरुद्रव्यं दहेदाऽऽसप्तमं कुलम् । विषं वा तैलसम्मिश्रं भोज्यं देवधनं न तु ॥ ६ ॥
देवद्रव्यविनाशेन प्रथमं नरकं व्रजेत् । सप्तवारान्नरस्तीव्रं दुःखलक्षं व्यथार्दितः ॥ ७ ॥
यथान्ने विषसंसर्गो दुग्धे काञ्जिकसङ्गमः । तथाऽऽत्मनो धनेनोच्चैः संसर्गो गुरुसम्पदाम् ॥ ८ ॥
जीविताशाऽस्ति या देव-गुरुद्रव्येण देहिनः । धत्तूरकरमोन्मिश्र–विद्यास्वादोद्भवा हि सा ॥ ९ ॥
"भक्खणे देवदव्वस्स, परत्थीगमणेण य । सत्तमं नरयं जंति, सत्तवारा य गोयमा !" ॥ १० ॥
वारितोऽपि द्विजोऽन्येन देवगुर्वोर्धनं हरन् । न तस्थौ नरके तस्मात् पापान्मृत्वाऽगमत् क्रमात् ॥ ११ ॥
ततो निर्गत्य चाण्डालो भूत्वा कृत्वा तमो बहु । पुनः श्वभ्रे ययौ विप्र-जीवोऽहिरभवत्ततः ॥ १२ ॥
सोऽप्येकदा मुनेरास्यान् म्रियन् श्रुत्वा नमस्कृतिम् । महाकालाभिधः पुत्र स्तत्राजनिष्ट साम्प्रतम् ॥ १३ ॥

For Private and Personal Use Only

श्री शत्रुञ्जयानदीप्रभावे शान्तनभूपकथा ।

एतेषां तव पुत्राणामवशिष्टेन साधुना । श्रितं राज्यं ततः कुर्या मा चिन्तां मरणेऽधमे ॥ १ ॥
शान्तनोऽवक् कथं तस्मात् पापात् स्यान् मम छुट्टनम् । पुत्राणां च कथं तेभ्यः पापेभ्यः छुट्टनं पुनः ॥ २ ॥
गुरुराचष्ट सिद्धाद्रौ गच्छ सार्धं तनूभवैः । गच्छतश्च तनूजानां पापमुक्तिर्भविष्यति ॥ ३ ॥
शत्रुञ्जया नदी वरा स्नात्वा तत्पयसा पुनः । स्नात्रं कुरु प्रभोर्भक्त्या सर्वपातकपिष्टये ॥ ४ ॥
तत्तटस्थजिनागारप्रासादे प्रथमं जिनम् । स्थापितं सूर्यभूपेन त्वं प्रपूजय सन्ततम् ॥ ५ ॥
तदेनःशान्तये तत्र विधिवज्जिनचर्चनम् । विधेहि त्वं त्रिधा शुद्ध्या रक्षणीयाश्च जन्तवः ॥ ६ ॥
षष्ठाष्टमादि ते पुत्राः कुर्वन्तो जिनचर्चनम् । भवन्ति लघुकर्म्माणो मुक्तिभाजो भवन्ति च ॥ ७ ॥
शत्रुञ्जयाम्बुना स्नात्वा स्नात्वा तद्वारिणा प्रभुम् । षण्मासैः स्युर्नरा रोग–रिक्ता राज्यं श्रयन्ति च ॥ ८ ॥
स्नानात् कुकर्मनिर्मुक्ताः सुरोपमशरीरिणः । स्वराज्यस्य तु भोक्तारः स्वाराज्यस्यापि भाविनः ॥ ९ ॥
शत्रुञ्जयाम्बुना स्नानं कुर्वंश्च कारयन् जिनम् । षण्मासान्ते च वः पाप–मुक्तिरेव भविष्यति ॥ १० ॥
शेषेनोक्तं निशम्येति नत्वाऽहीनक्रमौ मुदा । भूपः पुत्रप्रियायुक्तो ययौ शत्रुञ्जये गिरौ ॥ ११ ॥
शत्रुञ्जयानदीतीरे कृत्वा तृणकुटीरकान् । स्वकृतेनऽछिदे तस्थौ भूपः कुटुम्बसंयुतः ॥ १२ ॥

For Private and Personal Use Only

अर्हत्स्नात्रं त्रिसन्ध्यं ते कुर्वतस्तज्जलैः सदा । नेमुःभक्त्या जिनाधीशं तत्तीरद्रुफलादनाः ॥ १३ ॥
मासान्ते तनया जाता नीरोगा निखिलास्तदा । ततः शेषोदितो राजा षण्मासीं तत्र तस्थिवान् ॥ १४ ॥
षण्मासान्ते स्मृतः शेषोऽभ्येत्य शान्तनभूपतिम् । विमानारूढमाधाय चचाल तत्पुरं प्रति ॥ १५ ॥
शेषसान्निध्यतो राजा निर्घाट्य निखिलान् रिपून् । उपविष्टो निजे राज्ये जिनेन्द्रार्चनपूर्वकम् ॥ १६ ॥
शान्तनो भूपतिः सङ्घं मेलयित्वा बहुं क्रमात् । यात्रां शत्रुञ्जये चक्रे भूयिष्ठद्रविणव्ययात् ॥ १७ ॥
कारयित्वा जिनागारं स्फारं शत्रुञ्जयाचले । जिनौकोलंकृतां पृथ्वीं कारयामास शान्तनः ॥ १८ ॥
चतुःषष्टिशरल्लक्षा-ण्यास्वाद्य विभुतासुखं । राज्यं दत्त्वा च नीलाय राजा संयममाददौ ॥ १९ ॥
त्रिभिः पुत्रैश्च गेहिन्या भूपपृष्ठौ व्रतं लले । ततो नीलः पपालोर्वी न्यायमार्गेण नित्यशः ॥ २० ॥
शान्तनः पुत्रपत्नीयुक् पालयंश्चरणं सुखम् । शत्रुञ्जये ययौ वर्ष-लक्षप्रान्ते तपःपरः ॥
तत्रानशनमादाय पालयन्तो नृपादयः । क्षीणनिःशेषकर्म्माणः कल्याणनगरीं ययुः ॥ २१ ॥
नीलोऽपि भूपतिर्दत्त्वा राज्यं स्वकीयसूनवे । आत्तव्रतो ययौ शत्रुञ्जये तीर्थे तमश्छिदे ॥ २२ ॥
सोऽपि कुर्वंस्तपस्तीव्रं ज्ञानमासाद्य केवलम् । शिवपुर्यां ययौ सर्व-क्षीणकर्म्मा नरेश्वरः ॥ २३ ॥
उक्तंच-शत्रुञ्जयमहातीर्थे श्रिता शत्रुञ्जया नदी । राज्यभ्रष्टस्य राज्यानि सुखभ्रष्टस्य शर्म च ॥ २४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विद्याभ्रष्टस्य सद्विद्यां कान्तिं कीर्तिं मतिं श्रियम् । स्वर्गसौख्यानि दत्ते च सेविता हेलया ननु ॥ २५ ॥
शत्रुञ्जयाश्रिया ये ये नदीहृदद्रुमादयः । तेषां मृत्स्ना जलं पत्रं फलं पुष्पं प्रभावभृत् ॥ २६ ॥ युग्मम् ॥

श्री चन्द्रप्रभास-तीर्थसम्बन्धः ।

आकर्ण्यैतन्नृपश्चक्री शत्रुञ्जयशिलोच्चये । पुनर्यात्रां व्यधाद् भूरिश्रीव्ययाद् बहुसङ्घयुग् ॥ १ ॥
अन्येद्युस्तापसा भीम-मुख्याः प्रोचुः प्रभोः पुरः । कुत्राऽस्माकं शिवं भावि ततः स्वामी जगाविति ॥ २ ॥
शत्रुञ्जये गिरौ देव-शृङ्गे वो निर्वृतिः क्रमात् । कुर्वतां सत्तपो नूनं भविष्यति न संशयम् ॥ ३ ॥
ततस्ते तापसाः शत्रुञ्जये गत्वा प्रभूदिते । स्थाने चक्रुस्तदा तीव्रं तपःसुध्यानमानसाः ॥ ४ ॥
यथा तेषामशेषाणां कर्म्मणां क्षयतोऽभवत् । ज्ञानं मुक्तिः गतिश्चासीत् तदाऽन्येषां च देहिनाम् ॥ ५ ॥
तत्र स्थानेऽर्हतो गेहं स्फारमादिजिनेशितुः । कारयित्वाऽऽदिमश्चक्री तापसाह्वं व्यधात्तदा ॥ ६ ॥
एकदा भरतश्चक्री चन्द्रप्रभजिने-शितुः । कारयित्वाऽऽलयं मूर्त्तिं तत्र तस्य व्यधात् वराम् ॥ ७ ॥
तत्तीर्थमधुना लोके ख्यातं प्रभासनामतः । अद्यापि तस्य तीर्थस्य माहात्म्यं विद्यते महत् ॥ ८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्मिँश्चन्द्रप्रभासाह्वे तीर्थे तीव्रतरं तपः । कुर्वाणा बहवो वाचं-यमा मुक्तिपुरीं ययुः ॥ ९ ॥
बहवस्तापसास्तत्रा–भ्येत्य जैनं व्रतं क्रमात् । प्राप्य क्षिप्त्वाऽखिलं कर्म्म मुक्तिपुर्यां समागमन् ॥ १० ॥

श्री नेमिस्थापनासम्बन्धः ।

उज्जयन्ताभिधे शृङ्गे नेमेर्भविष्यतोऽर्हतः । दीक्षा-ज्ञान-शिवप्राप्ति ऋषभस्यार्हतः पुरः ॥ १ ॥
आकर्ण्य प्रथमश्चक्री कल्याणकत्रिकाभिधम् । प्रासादं प्रवरशिल्पि–पार्श्वादकारयत्तदा ॥ २ ॥
राजते तत् प्रतिदिश-मेकादशसुमण्डपैः । चतुर्द्वारो महानन्य–नाम्ना यः सुरसुन्दरः ॥ ३ ॥
बलानकैर्गवाक्षैश्च तोरणैश्च मनोहरैः । प्रासादो भासतेऽत्यन्तं सर्वत्रोद्यानमण्डितः ॥ ४ ॥
तत्र तीर्थे तु नागेन्द्र मोरादिकुण्डसप्तकम् । विद्यते यत्र पानीयं सुधायूषसहोदरम् ॥ ५ ॥
वनानि तत्र शोभन्ते नानावृक्षैर्मनोहरैः । शृङ्गाणि शतशः सन्ति यत्र हेमादिधातवः ॥ ६ ॥
तत्रानेकास्तु विद्यन्ते स्वर्णरेखादयो वराः । सरितोऽमृतदेशीय-पानीयपूरिताः सदा ॥ ७ ॥
हंस-कारण्ड-हारीत-शुक-सारसपक्षिणः । तत्र तीर्थे स्थिता भेजुः सुखं स्वर्गसुखोपमम् ॥ ८ ॥

For Private and Personal Use Only

अथाभ्येत्य परामोद-पूरपूर्णहृदन्तराः । अपूजयन्नेमिजिनं देवाः शक्त्याहृतैः सुमैः ॥ ९ ॥
शृङ्गे तत्र जिना एयु रनन्ताः सुरसेविताः । आयास्यन्ति पुनः सङ्ख्या-व्यतीता ज्ञानशालिनः ॥ १० ॥
तदानीं भूभुजोऽन्येऽपि प्रासादान्नेमिनोऽर्हतः । कारयामासु रम्यांश्च भूरिलक्ष्मीव्ययात् क्रमात् ॥ ११ ॥
तेषु तेषु च सर्वज्ञा-गारेषु ध्यायतां नृणाम् । जिनं येषामभूज्ज्ञानमन्यूनं चाभवच्छिवम् ॥ १२ ॥
तेषां न ज्ञायते सङ्ख्या विनाऽव्ययविदं क्वचित् । अतस्तीर्थमिदं पूज्यं नृपाणां मरुतामपि ॥ १३ ॥
तत्र नेमिजिनं भक्त्या संस्मृत्य भरतेश्वरः । पूजयित्वा प्रभुं तस्थौ विलोकयन् मुखं प्रभोः ॥ १४ ॥
इतः पञ्चमकल्पेशो ब्रह्मेन्द्रोऽमरकोटियुग् । आगतो नेमिनं नन्तुं पञ्चमात् कल्पतस्तदा । ॥ १५ ॥
प्रभुं प्रणम्य भरतं वन्दित्वा च प्रमोदयुग् । ब्रह्मेन्द्रः प्रोक्तवान् चक्रिन् ! जय त्वं चिरकालतः ॥ १६ ॥
यथा श्रीऋषभस्वामी प्रथमस्तीर्थनायकः । तथा त्वं प्रथमसङ्घ-पतिस्तीर्थप्रकाशकः ॥ १७ ॥
भरतोऽवक् कुतः स्थानादत्राऽऽगाः किंकृते वद । स प्राह ब्रह्मकल्पेशोऽहमस्मि धरणीधव ॥ १८ ॥
भवता कारिते नेमि-चैत्ये नेमिजिनेशितुः । बिम्बं नन्तुमगां ज्ञात्वाऽवधिज्ञानात् नरेश्वर ! ॥ १९ ॥
उत्सर्प्पिण्यामतीतायां सागरस्यार्हतोऽन्तिके । ब्रह्मकल्पाधिपोऽप्राक्षीत् कदाऽहं निर्वृतिं गमी ॥ २० ॥
जिनोऽवगवसर्प्पिण्यां भाविनो नेमिनोऽर्हतः । द्वाविंशस्य गणाधीशो भूत्वाऽथो मुक्तिमेष्यसि ॥ २१ ॥

॥ २३० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स च शक्रो निजे कल्पे या मूर्तिं नेमिनो व्यधात् । अपूजयत् चिरं भक्त्या दिव्यपुष्पैर्मनोहरैः ॥ २२ ॥
गिरिनारगिरेरन्तः कृत्वा स्वर्णबलानकं । अस्थापि प्रतिमा रत्न-मयीन्द्रेण च्युतिक्षणे ॥ २३ ॥
रैरूप्याश्ममया अन्या भूपस्य प्रतिमा दृढाः । स्थापितास्तत्र शक्रेण स्वश्रेयोऽर्थं शिवेच्छुना ॥ २४ ॥
साऽद्यापि मूर्त्तिरस्माभिः पूज्यतेऽन्यैश्च वासवैः । कल्याणत्रयमत्रैव भविष्यत्येव नेमिनः ॥ २५ ॥

॥ श्री भरतचक्रि संक्षेपतः सम्बन्धः ॥

सुराष्ट्रां रक्षतः शक्ति-सिंहस्य मेदिनीपतेः । छत्रत्रयं वितीर्याथ भरतश्चक्रिराड् जगौ ॥ १ ॥
सुराष्ट्रायां त्वया राज्यं कुर्वता तीर्थयोर्द्वयोः । विघ्नापसारतो रक्षा विधातव्या दिवानिशम् ॥ २ ॥
हारादिभिरलङ्कारै-र्गजवाजिरथैर्धनैः । रत्नैर्द्रव्यैः स सन्मान्य शक्तिसिंहं व्यसर्जयत् ॥ ३ ॥
पुण्यानुबन्धिपुण्यं तु कुर्वाणः शक्तिसिंहराट् । आराधयन् जिनं सर्वाः प्रजाः पालयति स्म सः ॥ ४ ॥
पश्चाच्चक्री समागच्छ न्नर्बुदे धरणीधरे । प्रासादानर्हतां चक्रय-चीकरत् पुण्यहेतवे ॥ ५ ॥
प्रतिमास्तेषु सर्वज्ञ-गेहेषु भरताधिपः । स्थापयामास तीर्थेश-युगादीशार्हतां वराः ॥ ६ ॥

For Private and Personal Use Only

ततो भरतचक्रीशः कारयन्नुत्सवं सदा । अयोध्यायां समायातः प्रवेशोत्सवपूर्वकम् ॥ ७ ॥
तथाहि—भट्टैर्जयजयाराव-मुच्चरद्भिः पुरोगतैः । गायद्भिर्गायनैर्ग्राम-रागरङ्गपवित्रितम् ॥ ८ ॥
उच्चारिणीभिर्धवलान् कुलस्त्रीभिश्च पृष्ठितः । गणभृद्भिः पुरस्ताच्च सङ्गतः सुकृतैरिव ॥ ९ ॥
अनुव्रजन् सर्वशोभा सङ्गतेऽमी देवतालयम् । प्रविवेश पुरीं चक्री समं सङ्घसुरासुरैः ॥ १० ॥ त्रिभिर्विशेषकम् ॥
पुरान्तर्मुख्यतीर्थेषु नत्वा श्रीप्रथमं प्रभुम् । नरेशोऽगान्निजावासं परिधाप्य गुरूनपि ॥ ११ ॥
हायनानां शतप्रान्ते पुनर्भरतभूपतिः । मेलयित्वा बहुं सङ्घं यात्राहेतुं चचाल सः ॥ १२ ॥
मार्गे पुरे पुरे ग्रामे-ग्रामे तीर्थकृतं पुनः । पूजयन् प्रददद् दानं ददानोऽचलदादरात् ॥ १३ ॥
श्रीसिद्धाद्रेरधो भूमौ गत्वाऽऽदिमजिनेशितुः । विस्तरादर्चनां कृत्वा ध्वजादानं व्यधात् पुनः ॥ १४ ॥
शोभने वासरे सङ्घ-नायकस्तिलकं वरम् । कारयामास भूयिष्ठ-विभवव्ययतः खलु ॥ १५ ॥
तत्र श्रीआदिदेवस्य प्रासादं प्रवरं तदा । कारयित्वाऽऽदिमं देव-मस्थापयन्नरेश्वरः ॥ १६ ॥
याचकेभ्यो ददन् दानं मुखमार्गितमादरात् । ऊर्ध्वंसिद्धमहीध्रस्य ययौ भरतसङ्घराट् ॥ १७ ॥
स्नात्र-पूजाध्वजारोप–मुख्यकृत्यान्यनेकशः । कृत्वादिजिननाथस्य भावनां नृपतिर्व्यधात् ॥ १८ ॥
विधाय विस्तराद्यात्रां चक्री शृङ्गेषु तेषु च । सदुत्सवमयोध्यायां समागात् सङ्घसंयुतः ॥ १९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्येद्युश्चक्रिराड् भूयः पुण्डरीकमहीभृतः । उपत्यकावनावेत्य तस्थौ सङ्घसमन्वितः ॥ २० ॥
तत्र प्रौढं पुरं सौपा-रकपत्तनसञ्ज्ञितम् । स्थापयित्वाऽऽदिदेवस्य प्रासादं विपुलं व्यधात् ॥ २१ ॥
स्थापयित्वाऽऽदिदेवस्य प्रतिमां चक्रिराट् तदा । आरुरोह गिरेः शृङ्गं मुख्यं कुर्वन् महोत्सवम् ॥ २२ ॥
स्नात्र-पूजाध्वजारोप-मुख्यकृत्यान्यनेकशः । कृत्वा सङ्घपतिस्तत्र विनीतापुरमीयिवान् ॥ २३ ॥
एकदा चक्रिराड् भूयः श्रीसिद्धधरणीभृतः । उपत्यकावनावेत्य तस्थौ सङ्घसमन्वितः ॥ २४ ॥
तत्र स्फारं पुरं पार-कराह्वं स्वपुरोपमम् । स्थापयित्वाऽऽदिदेवस्य सदनं विपुलं व्यधात् ॥ २५ ॥
तत्रादिमजिनेशस्य प्रतिमां चक्रिपुङ्गवः । स्थापयित्वाऽऽरुरोहाशु शृङ्गं सिद्धमहीभृतः ॥ २६ ॥
पूजां विस्तरतः कृत्वा प्रभोरादिमचक्रिराट् । व्ययन् भूरिधनं स्वीय-नगरीं समुपेयिवान् ॥ २७ ॥
भूयः शत्रुञ्जयस्याधो गत्वा भाकपुराभिधम् । स्थापयित्वाऽऽदिदेवस्यावासं पृथुतरं व्यधात् ॥ २८ ॥
तत्र श्रीऋषभाप्तस्य विधाय विपुलं गृहम् । बिम्बमस्थापयत् चारूत्सवं भूरिधनव्ययात् ॥ २९ ॥
तत्र शत्रुञ्जयशृङ्गेऽधिरुह्य प्रथमप्रभोः । स्नात्रं विस्तरतश्चक्रे सार्वभौमः प्रमोदतः ॥ ३० ॥
तत आरात्रिकं दीप्रं कृत्वा मङ्गलदीपकम् । इन्द्रमालां परिधाय चक्रिराड् विदधेतराम् ॥ ३१ ॥
परिधाप्य गुरून् दानं दत्त्वाऽर्थिभ्यो मुखोदितम् । चक्री स्वपुरमायातो नानोत्सवपुरस्सरम् ॥ ३२ ॥

For Private and Personal Use Only

एकदा वासवोऽसङ्घय–देवश्रेणिसमन्वितः । एत्यायोध्यान्तिकेऽनंसीत श्रीनाभेयं प्रमोदतः ॥ ३३ ॥
तत्र शक्रावताराख्ये तीर्थे भरतचक्रिराट् । प्रासादं वृषभेशस्य विदधे बहुरैव्ययात् ॥ ३४ ॥
बिम्बं रत्नमयं तत्र स्थापयित्वाऽऽदिमप्रभोः । आदिमश्चक्रिराड् मोदा–दस्थापयत्सुभक्तितः ॥ ३५ ॥
एवं भरतचक्रीशो भूरिसङ्घयुतो मुदा । शत्रुञ्जये व्यधाद् बह्वीं यात्रां व्ययम् धनं बहु ॥ ३६ ॥
यत्राष्टापदभूमिध्रे श्रीआदिजिननायकः । मुक्तिं ययौ यतीनां तु सहस्रैर्बहुभिः समम् ॥ ३७ ॥
तत्र श्री भरतः सिंह-निषद्याकारमद्भुतम् । प्रासादं कारयामास चतुर्द्वारं च रैमयम् ॥ ३८ ॥
तत्रादिजिनवीरान्त–जिनानां प्रतिमा वराः । जिनमानप्रमाणाश्चा–स्थापयद् भरतो नृपः ॥ ३९ ॥
'उसभो पंचधणुसय नव पासो सत्त रयणीओ वीरो । सेसट्ठ पंच अट्ठय पन्ना दस पंच परिहाणी ॥ ४० ॥'
स्तूपानां च शतं भ्रातृ-शतसत्कं जिनान्वितम् । कारयामास चक्रीशः कल्याणप्राप्तिहेतवे ॥ ४१ ॥
अथ कालाज्जनान् लोभ-भाजो मत्वाऽऽदिचक्रिराट् । अष्टापदगिरौ तीर्थ-रक्षायै चक्रिवानिति ॥ ४२ ॥
योजनान्ते योजनान्ते दण्डरत्नेन चक्रिराट् । अष्टौ सोपानकान्येव चकार तीर्थभक्तितः ॥ ४३ ॥
भरतो भूरिशो यात्राः शत्रुञ्जयशिलोच्चये । भूरिसङ्घयुतोऽकार्षीद् भूयिष्ठविभवव्ययात् ॥ ४४ ॥
गच्छन् सुप्तः स्थितो भुञ्ज–मानो वार्त्तां कुर्वन्नपि । भरतो ध्यातवान् शत्रुञ्जयं तीर्थं पुनः पुनः ॥ ४५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्नानं कृत्वाऽन्यदा सर्व-भूषणानि स्वविग्रहे । परीधाय निजं देहं मुकुरे पश्यतिस्म सः ॥ ४६ ॥

दर्शं दर्शं तनुं रम्या-भरणै र्भूषितं वरम् । दध्यौ चक्री विभात्येत-दङ्गं सुपर्ववृक्षवत् ॥ ४७ ॥

※ तत उत्तारयन् देहान् मौलिप्रभृतिभूषणम् । दवदग्धमिवाङ्गं स्वं वीक्षते चक्रिराट् क्रमात् ॥४८॥ युग्मम् ॥

※ उक्तं च—मौलेर्मौलिमपाकरोत् श्रुतियुगात् सत्कुण्डलं कण्ठतो निष्कं हारमुरुस्थलाच्च सहसैवांसद्वयादङ्गदे ।卐
चक्री पाणियुगाच्च वीरवलये मुद्रावलीमङ्गुली वर्गाद्भारमिव प्रशान्तहृदयो वैराग्यभागित्थय ॥४९॥

※ फाल्गुने मासि निष्पत्र–फलपुष्पमिवांह्रिपम् । व्यलङ्कारं वपुर्वीक्ष्य सस्मारैवं स्वमानसे ॥ ५० ॥卐

※ कायभित्तिरियं भूषा–वर्यविच्छित्तिचित्रिता । अनित्यताजलक्लिन्ना पतत्यन्तरसारतः ॥ ५१ ॥卐

※ अहो शरीरिणां मोहः शरीरस्यास्य दुस्त्यजः । रुक् समीरचलत्पक्व-पत्रस्येव पतिष्यतः ॥ ५२ ॥卐

※ त्वगियं देहिनां सारं शरीरे साप्यहर्निशम् । लिप्तापि चन्दनरसैः पिच्छलत्वं न मुञ्चति ॥ ५३ ॥卐

※ यत्कृते कुरुते लोकः पापं दुष्कर्म्मणेरितः । तद्देहं नलिनी पत्र-स्थितबन्धचलाचलम् ॥ ५४ ॥卐

※ संसारखाले दुर्गंधे श्रृङ्गाररसपिच्छले । जानन्तोऽपि निमज्जन्ति गर्त्ताशूकरवज्जनाः ॥ ५५ ॥卐

षष्टिं वर्षसहस्राणि भ्रामं भ्रामं धरातले । कलेवरस्याऽस्य कृते धिगकृत्यं मया कृतम् ॥ ५६ ॥

धन्यो बाहुबलिर्वीरो धन्य अन्येऽपि बान्धवाः । यदि सारममी त्यक्त्वा संसारं मुक्तिमासदन् ॥ ५७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* राज्यं चलाचलं प्राज्यं यौवनं च पतापतम् । लक्ष्मीश्वराचरा यत्र भवे तत्र स्थिरं कथम् ॥ ५८ ॥ 卐

माता पिता कलत्राणि बान्धवाः पुत्रसम्पदः । जन्तूनां भवकूपान्तःपततां कोऽपि नाऽविता ॥ ५९ ॥

* अनित्यमारोग्यमनित्ययौवनं विभूतयो जीवितमप्यनित्यम् । 卐

अनित्यताभिप्रहतस्य जन्तोः कथं रतिः कामगुणेषु जायते ॥ ६० ॥

इत्यादि भावनाभावादनित्यं भावयन् हृदि । भरतः परविद्वारि-मग्नोऽजनि द्दढं तदा ॥ ६१ ॥

सुध्यानपारदं देह-भाजने न्यस्य चक्रिराट् । सुभावविह्निना पक्वं चक्रे कल्याणसिद्धये ॥ ६२ ॥

क्षपकश्रेणिमारूढः क्षपन् दुःकर्म्मसन्ततिम् । भरतः केवलज्ञानं प्रपेदे विश्वबोधकम् ॥ ६३ ॥

उपेत्य तत्क्षणात् देव-नाथेन कुर्वता महः । यतिलिङ्गे वितीर्णे तु रुचिरे हेमविष्टरे ॥ ६४ ॥

उपविश्यादिमश्चक्री दिदेश धर्म्मदेशनाम् । तथा यथाऽभवद्भूरि नृणां वैराग्यमञ्जसा ॥ ६५ ॥ युग्मम् ॥

नृपा दश सहस्राणि भरतस्यान्तिके व्रतम् । लात्वा तदा तपस्तेषु-रुग्रं भवतमश्छिदे ॥ ६६ ॥

धर्म्मं प्रबोधयन् भव्यान् पूर्वं लक्षं च वत्सरान् । भरतर्षिर्ययावष्टा-पदे तीर्थे शिवप्रदे ॥ ६७ ॥ ॥ २३६ ॥

कृत्वा चतुर्विधाहारं मासान्ते भरतो यतिः । अलञ्चक्रे शिवं क्षेत्रं सिद्धानन्तचतुष्टयः ॥ ६८ ॥

तदान्ये साधवो भूरि-लक्षाणि पातकक्षयात् । जग्मुरष्टापदे तीर्थे मुक्तिपुर्यां शिलोच्चये ॥ ६९ ॥

For Private and Personal Use Only

तस्मिन् गिरौ सुरा एत्य भरतादितपस्विनाम् । निर्वाणगमनाद्वैतो-त्सवं विदधिरे मुदा ॥ ७० ॥

उक्तं च—"भरतः पूर्वलक्षाणां कौमार्ये सप्त सप्ततिम् । सहस्रं शरदामेकं मण्डलीकत्वमाश्रयत् ॥ १ ॥

एकवर्षसहस्रोन-पूर्वलक्षाणि षट् तथा । स चक्रवर्त्तित्वमपात् पूर्वलक्षं च केवलम् ॥ २ ॥

पूर्वलक्षाणि चतुर-शीतिं सर्वायुरप्यथ । प्रपूर्य भरतो मुक्ति-पुर्यां तत्र समीयिवान् ॥ ३ ॥

गिरावष्टापदे भूरि-सङ्ख्युग् भरताङ्गभूः । नृपः सूर्ययशा देवान् नत्वाऽऽनर्च सुमैर्वरैः ॥ ४ ॥

यानि श्री धर्म्मकृत्यानि भरतो विदधे नृपः । तेषां सङ्ख्यां गिरां देवो न वेत्ति न कविः पुनः ॥ ७१ ॥

॥ श्री श्रेयांसकुमारसम्बन्धः ॥

अन्येद्युर्विशन् स्वामी वृषभः प्रथमः प्रभुः । पुरे गजपुरे बाह्यो-द्याने तु समवासरत् ॥ १ ॥

तदा तत्राभवद् बाहुबलेः सोमयशाः सुतः । तस्य श्रेयांसनामा तु सुतो राज्यं नयाद् व्यधात् ॥ २ ॥

प्रभुं समागतं श्रुत्वा श्रेयांसो मेदिनीपतिः । गत्वा तत्र जिनं नत्वा धर्ममित्यभृणोन्मुदा ॥ ३ ॥

राज्यं सुसम्पदो भोगाः कुले जन्म सुरूपता । पाण्डित्यमायुरारोग्यं धर्म्मस्यैतत्फलं (विदुः) ॥ ४ ॥

* भवन्ति भूरिभिर्भाग्यैः धर्म्मकर्म्ममनोरथाः । फलन्ति यत्पुनस्ते तुं तत् सुवर्णस्य सौरभम् ॥ ५ ॥卐

For Private and Personal Use Only

* चत्वारः प्रहरा यान्ति देहिनां गृहचेष्टितैः । तेषां पादं तदर्द्धं वा कर्त्तव्यो धर्मसङ्ग्रहः ॥ ६ ॥

श्रुत्वेति स्वं सुतं राज्ये न्यस्य श्रेयांसभूपतिः । चारित्रं लातवान् मुक्ति-सातसन्ततिदायकम् ॥ ७ ॥

श्रेयांसं स्वामिनो भक्तं दृष्ट्वाऽऽदिचक्रिराट् पुनः । पप्रच्छाऽयं कथं भक्त-स्त्वयि स्वामिन् ! विलोक्यते ॥८॥

प्रभुः प्राहाऽस्य पूर्वस्य भवस्य मम विद्यते । सम्बन्धोऽतो विशेषेण भक्तो मयि तु वीक्ष्यते ॥ ९ ॥

शत्रुञ्जय कल्पवृ० ॥ २३८ ॥

तथाहि वसुदेवहिण्डौ—" जया ईसाणे देवलोए सिरिप्पहे विमाणे अहयं ललितांगो देवो जाओ । ताहे सिज्जंसो सयंप्पहा देवी पुव्वभवणिण्णामिअभिहाणा ते जाया " तओ पुव्वविदेहे पुक्खलावती विजए लोहग्गले नयरे । अहयं वयरजंघो आसी सिज्जंसो सिरिमई भज्जा ॥ तओ उत्तरकुरुए अहयं जुम्मी जाओ तत्थ सिज्जंसो जुगलिणी जाया ॥ तओ अहयं सिज्जंसजीव सोहम्मे कप्पे देवा ॥ तओ अहयं अवरविदेहे विज्जपुत्तो सिज्जंसो पुण जुण्णसिट्ठिपुत्तो केसवाभिहाणो छट्ठो मित्तो ॥ तओ दुवे अच्चुए सग्गे देवा ॥ तओ अहयं पुंडरिकिणीए नयरीए वयरणाभोचक्की सिज्जंसो तत्थ ममं सारही ॥ तओ सव्वट्ठसिद्धिविमाणे दुवे देवा मित्ते ॥ तओ अहयं रिसह नामा नाभिकुलकर पुत्तो सिज्जंसजीवो पुण बाहुबलिपुत्तस्स सोमयसस्स पुत्तो सिज्जंसो जाओ ॥ ॥ २३८ ॥

श्रेयांसेनाऽमुना पूर्वं दृष्ट्वा पूर्वभवानिति । अर्हं पारणकं चेक्षुरसेन कारितो ध्रुवम् ॥ १० ॥

तदेति बहवो भव्य-जीवाः श्रुत्वा प्रभूदितम् । विशुद्धसंयतश्राद्ध-धर्मं प्रपेदिरे मुदा ॥ ११ ॥
भरतोऽपि प्रभोर्वाणीं श्रुत्वा दध्याविदं हृदि । कदा ममाऽत्र वैराग्यं भविष्यति शिवप्रदम् ॥ १२ ॥
बहवश्च प्रभोः पार्श्वे लात्वा श्री संयमं वरम् । सेवां वितन्वते वैया-वृत्यादिकरणाद् दृढम् ॥ १३ ॥
श्रेयांसः प्रभुणा सार्द्धं विहारं भुवि नित्यशः । कुर्वन् शत्रुञ्जये तीर्थे जगामानघमानसः ॥ १४ ॥
तत्र वितन्वतो ध्यानं शुक्लं श्रेयांसभूपतेः । उत्पन्नं केवलज्ञानं विश्वत्रयप्रकाशकम् ॥ १५ ॥
तत्रैत्य कमलो नामा श्रेयांसस्य तनूभवः । श्रेयांसाह्वं विहारं तु कारयामास रैव्ययात् ॥ १६ ॥
तत्र प्रथमदेवस्य बिम्बं रत्नमयं वरम् । अतिष्ठिपत् मुदा पुत्रः श्रेयांसस्य शुभेऽहनि ॥ १७ ॥
श्रेयांसः केवली भूरि-साधुश्रेणिसमन्वितः । शत्रुञ्जये समायातो बोधयन् भविनो बहून् ॥ १८ ॥
श्रेयांसः केवली भूरीन् भव्यान् प्रबोध्य सद्गिरा । अप्रेषयत् शिवावासं सर्वकर्म्मविमोचनात् ॥ १९ ॥
क्षीणकर्म्मा क्रमात् मुक्तिं यदा श्रेयांस ईयिवान् । तदा शतत्रयं वाचं-यमाः शिवपुरीं ययुः ॥ २० ॥
श्रेयांसनन्दनाः पञ्च प्राप्य दीक्षां जिनान्तिके । शत्रुञ्जये ययुर्मुक्ति-नगर्यां तमसां क्षयात् ॥ २१ ॥
श्रेयांसपुत्रपुत्राश्च विंशतिर्मदनादयः । तीर्थे शत्रुञ्जये यात्रां चक्रुर्विस्तरतः क्रमात् ॥ २२ ॥
तेषां मध्ये शिवं जग्मुर्दश सिद्धमहीधरे सर्वार्थाह्वे विमाने तु दशापि प्रययुस्ततः ॥ २३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री पुण्डरीकसिद्धिगमनसम्बन्धः ॥

ओसप्पिणीइ पढमं, सिद्धो इह पढमचक्कि-पढम सुओ ।
पढमजिणस्स य पढमो, गणहारी जत्थ पुंडरीओ ॥ १२ ॥
चित्तस्स पुण्णिमाए, समणाणं पंचकोडिपरिवरिओ ।
णिम्मलजसपुंडरीअं, जयउ तं पुंडरीय तित्थं ॥ १३ ॥

अनयोः व्याख्या—अवसर्पिण्यामस्यां 'प्रथमं' आदौ 'प्रथमचक्री' भरतस्तस्य प्रथमः पुत्रः पुण्डरीकाभिधः ऋषभसेनापरनामभृत् प्रथमजिनस्य प्रथमो गणधरः सिद्ध इह शत्रुञ्जये सिद्धिं ययौ, तदा शिष्यः प्राह—कस्यां तिथौ कतिभिः साधुभिः सह मुक्तिं गतः ? गुरुःप्राह—"चित्तस्स पुण्णिमाए ॥१॥" यत्र चैत्रमासस्य पूर्णिमायां-राकायां पञ्चकोटिमितैः श्रमणैः परिवृतः—सहितो निषेवितो गृहीतानशनोऽर्थात् पुण्डरीको गणी सिद्धः इति पश्चाद्गाथायाः सम्बन्धः । जयतात् 'तं' तत् 'पुण्डरीकं तीर्थं' शत्रुञ्जयाख्यं किं विशिष्टं ? 'निम्मलं' निर्मलं यश एव पुण्डरीकं-कमलविशेषो यस्य तत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकदा ऋषभोपान्ते पुण्डरीको गणाधिपः । पप्रच्छ भगवन् ! कुत्र मम मुक्तिर्भविष्यति ? ॥ १ ॥
प्रभुः प्राह सुराष्ट्रासु तुङ्गाह्वो विद्यते गिरिः । विस्तरो योजनानां तु पञ्चाशच्छिवदायकः ॥ २ ॥
तत्र यातस्य ते मुक्तिर्भविष्यति गणाधिप ! । अन्येषामपि साधूनां बहूनां तमसः क्षयात् ॥ ३ ॥
श्रुत्वेति वृषभस्योक्तं पुण्डरीको गणाधिपः । पञ्चकोटिमितै र्वाचं-यमैर्युक्तोऽचलत्ततः ॥ ४ ॥
ध्यानमौनपरः शत्रुञ्जये गत्वा गणाधिपः । पञ्चकोटिमितैर्वाचं-यमैर्युक्तोऽभवद्भृशम् ॥ ५ ॥
तदा तत्र स्थितश्चाद्यो गणधारी सुसाधुयुग् । शत्रुञ्जयस्य माहात्म्य-मित्यवग् भविनां पुरः ॥ ६ ॥
जिनेन्द्रभवनं भव्या ये कारयन्ति मानवाः । तेषां भवति कल्याण-कमला भीमसेनवत् ॥ ७ ॥
चन्द्रोदयपुरे भीमसेनश्रेष्ठी वराशयः । अर्जयामास लक्षार्द्धं दीनाराणां क्रमात् किल ॥ ८ ॥
गुरूपान्ते गतोऽन्येद्यु-र्भीमसेनो वणिग्वरः । प्रासादकरणे पुण्यं शुश्रावेति कृतादरम् ॥ ९ ॥
※ यतः—" अङ्गुष्ठमात्रमपि यः प्रकरोति बिम्बं, वीरावसानऋषभादिजिनेश्वराणाम् । 卐
स्वर्गप्रधानविपुलर्द्धिसुखानि भुक्त्वा पश्चादनुत्तरगतिं समुपैति धीरः ॥ १० ॥
इत्यादि धर्ममाकर्ण्य भीमसेनो वणिग्वरः । यात्रां शत्रुञ्जये कृत्वाऽचीकरद् वृषभालयम् ॥ ११ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* ध्यानमेकाग्रचित्तस्य कुर्वतस्तस्य तत्र तु । उत्पन्नं केवलज्ञानं सिद्धिरासीत् क्रमात् पुनः ॥ १२ ॥卐
श्रुन्वेति सिद्धशैलस्य माहात्म्यं बहवो जनाः । आदाय संयमं मुक्ति-नगरीं समुपागमन् ॥ १३ ॥
गृहीतानशनश्चैत्रराकायां भरताङ्गजः । सर्वकर्म्मक्षयान्मुक्ति नगरीं समुपेयिवान् ॥ १४ ॥
तदा वाचंयमा पञ्चकोट्योऽनशनग्रहात् । क्षिप्त्वा कर्म्माखिलं मुक्ति-पुर्यां समागमत् किल ॥ १५ ॥
तदा तत्र समागत्य पञ्चकोटिः यतीन् वरान् । दृष्ट्वा मुक्ति गतान् शक्र-श्चक्रे मुक्तिगमोत्सवम् ॥ १६ ॥
पुण्डरीको गणाधीशः प्रथमः प्रथमार्हतः । महोदयपुरीमैयुः ! (माप) पञ्चकोटियतिश्रितः ॥ १७ ॥
अतोऽस्य तुङ्गशैलस्य पुण्डरीकाभिधां तदा । ददौ सुरपतिर्भूरि-सुरसेव्यः सदुत्सवम् ॥ १८ ॥
ततः श्रीपुण्डरीकेति नाम ध्यायन् जनो बहु । स्वर्गापवर्गसौख्यानि लभतेस्म लभिष्यते ॥ १९ ॥
पुण्डरीको गणाधीशो यत्र स्थाने मनोहरे (निर्वाणं) । तत्र श्रीभरतचक्री जिनागारमकारयत् ॥ २० ॥
प्रतिमां पुण्डरीकस्य सिद्धस्य गणधारिणः । अतिष्ठिपद् युगादीश-प्रथमो नन्दनो मुदा ॥ २१ ॥
तामपि प्रतिमां भव्य-जनानां पश्यतां सताम् । मुक्तिर्बभूव भवति भविष्यति क्रमात् पुनः ॥ २२ ॥
चैत्रे मासे च सिद्धाद्रौ गत्वा भव्यजना मुदा । पूजां श्रीपुण्डरीकस्य कुर्वन्ते कुसुमैर्वरैः ॥ २३ ॥
स्तोकेनैव तु कालेन ते क्षिप्त्वा निखिलं तमः । अलंकुर्वन्ति कल्याण-पुरीमशिश्रयन् क्रमात् ॥ २४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकविंशतितमाधिकारे पुण्डरीकसम्बन्धः प्रोक्तोऽस्ति, पुनरत्र गाथाया अधिकारादुक्तो मया ।

श्री बाहुबलिकारितश्रीमरुदेवीभवनसम्बन्धः ।

बाहुबलिणा उ रम्मं सिरिमरुदेवाइ कारिअं भवणं ।
जत्थ समोसरणजुअं सो विमलगिरी जयउ तित्थं ॥ १४ ॥

'यत्र' सिद्धशैले "बाहुबलिना" श्रीऋषभदेवद्वितीयपुत्रेण "श्रीमरुदेवाया" श्रीनाभिकुलकरपत्न्याः कारितं-कारापितं भवनं-सदनं प्रासादः "रम्यं" मनोहरं "समवसरणयुतं" चतुःप्रतिमायुतं मरुदेवी-प्रतिमां गजाधिरूढां तत्र च स्थापयामास बाहुबलिः, स विमलगिरिर्जयतात् ।

पुण्डरीको गणी कुर्वन् विहारं वसुधातले । तक्षशिलापुरोद्याने रुचिरे समवासरत् ॥ १ ॥
तदा बाहुबलिस्तत्रा-गतो धर्म्मं जिनोदितम् । शुश्रावेति मुदा स्वर्गा-पवर्गसातदायकम् ॥ २ ॥
※ जिनेन्द्रभवनं भव्या ये कारयन्ति मानवाः । तेषां भवति कल्याण कमला भीमसेनवत् ॥ ३ ॥卐
तथाहि-चन्द्रोदयपुरे भीमसेनः श्रेष्ठी वराशयः । अर्जयामास लक्षार्द्धं दीनाराणां क्रमात् किल ॥ ४ ॥
गुरूपान्ते गतोऽन्येद्यु-र्भीमसेनो वणिग्वरः । प्रासादकरणे पुण्यं शुश्रावेति कृतादरम् ॥ ५ ॥

For Private and Personal Use Only

* यतः—"अङ्गुष्ठमात्रमपि यः प्रकरोति बिम्बं, वीरावसानवृषभादिजिनेश्वराणाम् । 卐
स्वर्गप्रधानविपुलर्द्धिसुखानि भुक्त्वा, पश्चादनुत्तरगतिं समुपैति धीरः" ॥ १ ॥
* "धर्म्मज्ञो धर्म्मकर्त्ता च सदा धर्म्मप्रवर्त्तकः । सत्त्वेभ्यो धर्म्मशास्त्रार्थ-देशको गुरुरुच्यते" ॥ २ ॥ 卐
इत्यादि धर्म्ममाकर्ण्य सम्यग्बाहुबलिर्नृपः । ययौ शत्रुञ्जये तीर्थे भूरिश्रीसङ्घसंयुतः ॥ ६ ॥
तत्र श्री सङ्घकृत्यानि कृत्वा बाहुबलिर्नृपः । प्रासादं कारयामास कैलासाचलसोदरम् ॥ ७ ॥
समवसृतियुग् बिम्बं मरुदेव्याः शिवप्रदम् । अतिष्ठपन् मुदा शत्रुञ्जये बाहुबलिर्नृपः ॥ ८ ॥
उक्तं च—"माघस्य पूर्णिमास्यां तु जननी वृषभप्रभोः । मुक्तिं ययावतो बाहुबलिनाऽऽद्यात्मसूनुना ॥ १ ॥
तद्दिने ये नरा नार्यः पूजयन्त्यादियोगिनीम् । ते सर्वे सर्वसाम्राज्यं सुभगाः स्युर्मुमुक्षवः ॥ ९ ॥
नार्योऽद्य विधवाः पुत्र-वत्यःसौभाग्यभाजनम् । चक्रि-शक्रगृहे भूत्वा क्रमान्मुक्तिं व्रजन्त्यपि ॥ १० ॥
बाहुबल्यादयः सर्वे सोदरा यत्र निर्वृताः । तत्र सार्वगृहं बाहुबल्याह्वं भरतो व्यधात् ॥ ११ ॥
तीर्थेऽत्र वह्निसंस्कारः कार्यो नृणां कदापि न । यतस्तत्तीर्थलोपः स्याद् जिनाज्ञायाश्च खण्डनम् ॥ १२ ॥
मुख्यशृङ्गादधो मुक्त्वा सर्वतोऽपि द्वियोजनीम् । गिरौ सार्वाभिधे कार्या देहिनामग्निसंस्कृतिः ॥ १३ ॥
तत्र तेषां च कर्त्तव्या मूर्तिः शैलमयी वरा । अन्येषामपि तत् कृत्य-निर्देशाय महीभुजा ॥ १४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जीवहिंसां विधायापि खगा वैताढ्यवासिनः । तत्पातकच्छिदे तीर्थं निसेवन्ते निरन्तरम् ॥ १५ ॥
तदानीं तत्र वज्रश्री-र्विद्याधरशिरोमणिः । लक्षविद्याधराऽऽसेव्यो नन्तुं श्री वृषभं जिनम् ॥ १६ ॥
स्नात्रपूजा-ध्वजारोप-कृत्यानि जिनसद्मनि । विधाय वन्दते सर्वान् प्रत्येकं जिनसद्मसु ॥ १७ ॥
ततो विद्याधरः शत्रुञ्जयमाहात्म्यमादरात् । शुश्रावेति गुरूपान्ते भूरिजनसमन्वितः ॥ १८ ॥
यः शत्रुञ्जये तीर्थे कारयेज्जिनमन्दिरम् । तस्य स्वर्गापवर्गश्री-र्दुलभा नैव जायते ॥ १९ ॥
यश्च दानं सुभावेन दत्तेऽत्र सिद्धपर्वते । स एव लभते स्वर्गा-पवर्गश्रियमञ्जसा ॥ २० ॥
* यतः—"शत्रुञ्जये जिने दृष्टे दुर्गतिद्वितयं क्षिपेत् । सागरोपमसहस्रं तु पूजास्नात्रविधानतः" ॥ १ ॥卐
श्रुत्वेति श्रीजिनागारं स्फाटिकैरश्मभिर्वरैः । कारयित्वाऽऽदिदेवस्य बिम्बमस्थापयत् स च ॥ २१ ॥
तस्य सार्वगृहस्याऽऽह्वा वज्रश्रीरिति मानवैः । व्यश्राणि विदधुर्विद्या-धराद्याः पूजनं ततः ॥ २२ ॥
* क्रमात्तत्र स विद्याभृद् लात्वा चारित्रसम्पदम् । सर्वकर्म्मक्षयात् सिद्धो लक्षत्रययतिश्रितः ॥ २३ ॥

——————*

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री नमिविनमिमुक्तिगमनसम्बन्धः ।

णमि-विणमीखयरिंदा सह मुणि-कोडीहिं दोहिं संजाया ।
जहिं सिद्धसेहरा सइ जयउ तयं पुण्डरी तित्थं ॥ १५ ॥

नमि–विनमिखेचरेन्द्रौ द्विकोटिमित–साधुभ्यां सह-सार्द्धं जहिं-यत्र 'सिद्धशेखराः' सिद्धमुकुटाः 'सञ्जाताः' बभूवुः जयतात् पुण्डरीकाह्वं तीर्थं ।

वृषभस्य सुतौ कच्छ-महाकच्छौ मनोहरौ । अभूतां सबलौ स्वामि-भक्तौ रुचिरमानसौ ॥ १ ॥
कच्छस्याऽभूदपि (न्नमि) पुत्रो विनीतो विशदाशयः । महाकच्छस्य पुत्रोऽभू-द्विनमिर्हितकृत् पितुः ॥ २ ॥
प्रभोः कच्छमहाकच्छौ स्वस्वसूनुसमन्वितौ । सेवां वितनुतेऽभीक्ष्णं भक्तिभावितमानसौ ॥ ३ ॥
दानं सांवत्सरं दत्त्वा याचकेभ्यो मुखोदितम् । वृषभाह्वं व्यधाद्वर्षे वृषभस्तीर्थकृत्तदा ॥ ४ ॥
* यत—"एगा हिरण्णकोडी अट्ठेव य अणूणगा सयसहस्सा । सूरोदयमाइयं दिज्जइ जा पायरासाओ ॥१॥卐
तिण्णेव य कोडिसया अट्ठासीई उ हुंति कोडीओ । असीयं च सयसहस्सा एयं संवच्छरे दिण्णं ॥ २ ॥"
देशान् सर्वांस्तनूजेभ्यो विभज्य च पृथग् पृथक् । अर्प्पयन् भरतायादा-दयोध्यां वृषभध्वजः ॥ ५ ॥

For Private and Personal Use Only

बाहुबलितनूजाय ददौ तक्षशिलां पुरीम् । प्रभुस्ततो ललौ दीक्षां संसारार्णवतारिणीम् ॥ ६ ॥
तदा कच्छमहाकच्छ-मुख्याः श्रीवृषभानुगाः । सहस्राणि तु चत्वारः प्रभूणाऽमा व्रतं ललुः ॥ ७ ॥
चतुर्मुष्ट्या कृते लोचे प्रभुणाऽऽचष्ट वासवः । तिष्ठतात् पञ्चमी मुष्टिर्यतो भाति तव शिरः ॥ ८ ॥
ततः कच्छादयः सर्वे चतुर्भिर्मुष्टिभिस्तदा । लोचं चक्रुश्चतुर्मुष्ट्या स्वस्वामिभक्तितः खलु ॥ ९ ॥
विहारे प्रभुणाऽन्यत्र कृते कच्छादिशालिना । विदेशादागतौ तत्र नमिश्च विनमिर्द्रुतम् ॥ १० ॥
मातृभ्यां गदितौ वत्सौ हे नमे विनमे ! लघु । याचेथां भरतं राज्यं सेवेथां तत्पदौ सदा ॥ ११ ॥
जल्पतस्तौ न वाचा तु भरतं वृषभाङ्गजम् । याचेवहि प्रभुं किन्तु राज्यं याचिष्यते किल ॥ १२ ॥
एवं प्रोक्त्वाऽऽदिदेवस्य पार्श्वे गत्वोचतुस्तदा । राज्यं देहि प्रभो ! त्वं च यतः आवां तवानुगौ ॥ १३ ॥
प्रभोर्यातोऽध्वनि द्वौ तु भृत्यौ कण्टापसारतः । उपास्ति चक्रतुः सायं यावच्चाखिन्नमानसौ ॥ १४ ॥
सायं यत्र प्रभुस्तस्थौ पार्श्वयोरुभयोः प्रभोः । आसीनावनुगौ रात्रौ तिष्ठतः स्मावितुं प्रभुम् ॥ १५ ॥
प्रातस्तौ प्रोचतू राज्यं देहि स्वामिन् ! प्रसद्य वाम् । एवं गतेषु घस्रेषु बहुष्वागाद् भुजङ्गराट् ॥ १६ ॥
प्रभुं प्रणम्य शेषाहि-राचष्ट तौ प्रति स्फुटम् । अयं मौनी प्रभुः पुंसो राज्यं दत्ते न कस्यचित् ॥ १७ ॥
तेन गत्वा युवां पार्श्वे भरतस्य महीभुजः । राज्यं याचेयाथां हे सद्यः स वां तु प्रदास्यति ॥ १८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवमुक्तेऽपि शक्रेण सेवातः स्वामिनस्तदा । यदा च विरमतो नैव शेषो हृष्टोऽभवत्तदा ॥ १९ ॥
प्रभोरास्येऽवतीर्येति जगौ शेषोऽपि तौ प्रति । युवामागच्छतं पृष्ठौ मे वां राज्यं वितीर्यते ॥ २० ॥
इत्युक्त्वा सर्प्पराट् कृत्वा प्रभो रूपं मनोहरम् । वैताढ्यपर्वतेऽनैपीन्नमिं च विनमिं समम् ॥ २१ ॥
रोहिणी-प्रज्ञप्त्याद्या विद्या वर्याः सहस्रशः । आदौ तयोरदाच्छेषः प्रभुरूपधरस्तदा ॥ २२ ॥
नमेः षष्टि पुराण्येव पञ्चाशद्विनमेस्तदा । दत्त्वाऽहिपो निजं रूपं प्रादुःकृत्य जगावदः ॥ २३ ॥
प्रभो रूपं मया कृत्वा भवतोर्भक्तयोः प्रभोः । एता विद्या वरा दत्ता ध्येयोऽतः प्रभुरन्वहम् ॥ २४ ॥
उक्त्वेति धरणे याते स्वस्थाने प्रभुसेवकौ । साधयित्वा च ता विद्या जातौ विद्याधरौ क्रमात् ॥ २५ ॥
"णमि-विणमीणं जायण णागिंदो विज्जदाण वेयड्ढे । उत्तर-दाहिणसेढी सट्ठी पण्णास णगराइं ॥ २६ ॥
विद्याभिस्ताभिर्हृद्याभिर्दुर्जयौ तौ खगेश्वरौ । अभूतां भरतस्यापि त्रिखण्डाधिपतेस्तदा ॥ २७ ॥
पुरे पुरे जिनावासाः कैलासाचलसोदराः । कारिता रैव्ययात् ताभ्यां खगाभ्यां बिम्बशोभिताः ॥ २८ ॥
शत्रुञ्जयादितीर्थेषु यात्रा भूरिधनव्ययात् । ताभ्यां विरचिता विद्या-धराभ्यां शिवशर्मदाः ॥ २९ ॥
शेषप्रदत्तविद्याभि-र्नानारूपाणि सन्ततम् । तयोर्वितन्वतोर्विद्या-धरवंशोऽभवत्तदा ॥ ३० ॥
उक्तं च-' इक्ष्वाकादिमहावंशा-श्चत्वारो विदिता भुवि । येष्वभवन् जिनाधीशाः पुण्यवन्तो जना अपि ' ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथाहि–'इक्खागवंसपढमो बीओ सोमो अ होइ णायव्वो। विज्जाहराण तइओ हवइ चउत्थो उ हरिवंसो'॥
भरतस्याऽऽदिमः पुत्रः नाम्नाऽऽदित्ययशा अभूत् । ततः सिंहयशः पुत्रो बलभद्रस्ततोऽभवत् ॥ ३१ ॥
आवश्यके उक्तम्—"राया आइच्चजसे महाजसे अइबले अचलभद्दे ।
बलविरई कीत्तिवीरिय जलवीरिए दंडवीरिए अ ॥ १ ॥"
अभूद्बाहुबलेः पट्टे सोमनामा नरेश्वरः । ततः सोम इति ख्यातो वंशो वरनरेन्द्रभाग् ॥ ३२ ॥
नमेश्च विनमेश्चासीद् वंशो विद्याधराभिधः । हरिवर्षागताद् युग्माद् हरिवंशोऽभवत् क्रमात् ॥ ३३ ॥
अन्येद्युरादिदेवस्य समीपे द्वौ खगाधिपौ । धर्म्मस्य देशनामेवं शृणुतःस्म कृतादरौ ॥ ३४ ॥
तथाहि-भव्वा भवारहट्टे कम्मजलं गहिअ अविरईघडिहिं । दुहविसवल्लिं रोवीय मा सिंचह जीवमंडवए ॥३५॥
"लद्धूणवि जिणदिक्खं पुणो पुणो जे भमंति संसारे । अमुणंता परमत्थं ते णाणावरणदोसेणं ॥ १ ॥
आसण्णसिद्धिआणं विहिबहुमाणो अ होइ णायव्वो । विहिचाओ अविहिभत्ती अभव्वजियदूरभव्वाणं ॥ २ ॥
धण्णाणं विहिजोगो विहिपक्खाराहगा सया धण्णा । विहिबहुमाणा धण्णा विहिपक्ख अदूसया धण्णा" ॥३॥
इत्यादि देशनां श्रुत्वा नमिश्च विनमिस्तथा । पुत्रौ राज्येऽभिषिच्याथ ललतुः संयमं तदा ॥ ३६ ॥
आदिनाथक्रमौ सेव-मानौ तौ श्रमणोत्तमौ । अभूतां कोविदोत्तंसौ पठनादागमस्य हि ॥ ३७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पालयन्तौ व्रतं शुद्धं नमिश्च विनमिश्च तौ । प्राप्य सूरिपदं भव्यान् बोधयामासतुर्बहून् ॥ ३८ ॥
साधुकोटीद्वयान्वितौ तौ नमिर्विनमीर्यती । सिद्धाद्रौ जग्मतुर्ज्ञानं केवलं श्रयतःस्म तौ ॥ ३९ ॥
ऋषिकोटियुगायुक्तौ क्रमादायुःक्षयात्तदा । सिद्धाद्रौ जग्मतुर्मुक्ति-नगरीं तौ यतीश्वरौ ॥ ४० ॥

॥ श्री नमितत्पुत्रीमुक्तिगमनस्वरूपम् ॥

अथवा एवम्-अन्यदा भरतः शत्रुञ्जये नत्वा जिनेश्वरान् । उज्जयन्ते गिरौ नन्तुं चचाल यावता मुदा ॥१॥
मुनीन्द्रौ नमिविनमी प्रोचतुर्नृपतिं प्रति । स्थास्यावोऽत्र धरेशाऽऽवां मुनिकोटिद्वयान्वितौ ॥ २ ॥
तेषामप्यावयोर्मुक्ति र्भविता सिद्धपर्वते । ततस्तान् संयतान्नत्वा भरतो रैवते ययौ ॥ ३ ॥
फाल्गुने मासि शुक्लायां दशम्यां तौ मुनीश्वरौ । साधुकोटिद्वयीसेव्यौ शुक्लध्यानपरायणौ ॥ ४ ॥
सम्प्राप्य केवलज्ञानं लोकालोकप्रकाशकम् । आदौ च नमिविनमी मुक्तिपुर्यां समीयतुः ॥ ५ ॥
ततोऽन्येऽपि क्रमान्मुक्ति-पुर्यां वाचंयमा ययुः । अतः सा दशमी शुक्ला सेव्या तपोविधानतः ॥ ६ ॥
उक्तं च–" तद्दिनेऽल्पमपि कृतं सत्तपस्तप्तमत्र च । कालोप्तमिव सद्बीजं भवेद्भूरिफलप्रदम् ॥ ७ ॥
फाल्गुनीसितदशम्यां सिद्धशैलं स्पृशन्ति ये । निक्षिप्याऽखिलपापानि भवन्ति शिवभाजिनः ॥ ८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यत्र नम्यादयो वाचं-यमा सिद्धिमगुः पदे । प्रासादं विपुलं तत्राचीकरँस्तत्तनुभवाः ॥ ९ ॥
तत्र रत्नमयीं नाभि पुत्रमूर्तिं मनोहराम् । स्थापयित्वोभयोः पार्श्वे नमेश्च विनमेः पुनः ॥ १० ॥
रत्नमूर्ती जगल्हादकारिण्यौ रुचिराकृती । स्थापयामास नाभेय-सूनुरादिमचक्रिराट् ॥ ११ ॥ युग्मम् ॥
व्रतिन्यो नमिपुत्र्योऽथ चतुःषष्ट्यङ्कसम्मिताः । चर्चाद्या सिद्धशैले तु यस्मिन् शृङ्गे शिवं ययुः ॥ १२ ॥
कृष्णचैत्रचतुर्दश्यां निशीथे तत्र ताः समम् । अतः शृङ्गस्य तस्यासीत् चर्चाऽऽख्यं लोकविश्रुतम् ॥ १३ ॥

॥ श्री आदित्यशोमुख्यभूपानां सम्बन्धः ॥

सव्वट्ठसिद्धपत्थड अंतरीया पण्णकोडिलक्खुदही ।
सेढीहिं असंखाहिं चउदस लक्खाहिं संखाहिं ॥ १६ ॥
जत्थाइच्चजसाई सगरंता रिसहवंसजनरिंदा ।
सिद्धिं गया असंखा जयउ तयं पुंडरीतित्थं ॥ १७ ॥

सर्वार्थसिद्धप्रस्तटे मुक्तौ च अन्तरान्तरा पञ्चाशल्लक्षकोट्युदधयः-पञ्चाशत् कोटिसागरास्तेषां श्रेणि-

For Private and Personal Use Only

भिरसङ्ख्याताभिः चतुर्दशलक्षैः सङ्ख्याश्च मिथः तत्र आदित्ययशआदिभूपाः सगरचक्रवर्तिपर्यन्ताः श्रीऋषभ-वंशजाता नरेन्द्रा-राजानः असङ्ख्याताः सिद्धिं गताः, स विमलगिरिर्जययात् ‘ तित्थं ’ तीर्थम् ।

जं उसहकेवलाओ अन्तमुहुत्तेण सिवगमो भणिओ ।
जा पुरिसजुग असंखा तत्थ इमा सिद्धदंडीओ ॥ १ ॥ इत्यादि ।

(१) सिद्धिगतलक्षा असङ्ख्यातवारा अनुलोमसिद्धदण्डिकाः—

सिद्धिगताः	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४	असङ्ख्येयवाराः
सर्वार्थगताः	१	२	३	४	५	६	७	८	९	१०	५०	असङ्ख्येयवाराः

(२) सर्वार्थसिद्धिगता विलोमसिद्धदण्डिकाः—

सिद्धिगताः	१	२	३	४	५	६	७	८	९	१०	५०	असङ्ख्येयवाराः
सर्वार्थगताः	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४	१४	असङ्ख्येयवाराः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

(३) [सिद्धिगतः सर्वार्थसिद्धिगतः] समसङ्ख्यसिद्धदण्डिकाः—

सिद्धिगताः	२	३	४	५	६	७	८	९	१०	११	१२	एवं यावदसङ्ख्येलक्षाः
सर्वार्थगताः	२	३	४	५	६	७	८	९	१०	११	१२	एवं यावदसङ्ख्येलक्षाः

(४) [सर्वार्थसिद्धिगतः] एकोत्तरसिद्धदण्डिकाः—

सिद्धिगताः	१	३	५	७	९	११	१३	१५	१७	१९	२१	एवं यावदसङ्ख्याः
सर्वार्थगताः	२	४	६	८	१०	१२	१४	१६	१८	२०	२२	एवं यावदसङ्ख्याः

(५) सिद्धिगतः सर्वार्थसिद्धिगतः एवं जाव असंखा एवं जाव असंखा द्व्युत्तरसिद्धदण्डिकाः—

सिद्धिगताः	१	५	९	१३	१७	२१	२५	२९	३३	३७	एवं यावदसङ्ख्याः
सर्वार्थगताः	३	७	११	१५	१९	२३	२७	३१	३५	३९	एवं यावदसङ्ख्याः

For Private and Personal Use Only

(६) सिद्धिगतः सर्वार्थ सिद्धिगतः एवं जाव असंखा एवं जाव असंखा प्रथमाविषमोत्तर सिद्धदण्डिकाः—

सिद्धिगताः	३	८	१६	२५	११	१७	२९	१४	५०	८०	५	७४	७२	४९	२९	एवं यावदसङ्ख्याः
सर्वार्थगताः	५	१२	२०	९	१५	३५	२८	२६	७३	४	९०	६५	२७	१०३	०	एवं यावदसङ्ख्याः

(७) सिद्धिगतः सर्वार्थसिद्धिगतः द्वितीयविषमोत्तरसिद्धदण्डिकाः—

सर्वार्थगताः	२९	३४	४२	५१	३७	४३	५५	४०	७६	१०६	३१	१००	९८	७५	५५	एवं यावदसङ्ख्याः
सिद्धिगताः	३१	१८	४६	३५	४१	५७	५४	५२	९९	३०	११६	९१	५३	१२०	०	एवं यावदसङ्ख्याः

एवं तृतीय जाव असंखा सर्वार्थ० एवं जाव असंखा ।

आदित्ययशसा यत्र प्राप्ता मुक्तिपुरी तदा । महायशा व्यधात्तत्र प्रासादं तत्तनूभवः ॥ १ ॥

अपि सोमयशाः स्वस्य बन्धूनां जनकस्य च । प्रासादान् कारयामास तत्र वार्द्धकिना मुदा ॥ २ ॥

महायशाः स्वपुत्राय राज्यं दत्त्वा सदुत्सवम् । लात्वा दीक्षां ययौ मुक्तिं तीर्थे शत्रुञ्जयाह्वये ॥ ३ ॥

एवं श्रीआर्षभे वंशे असङ्ख्याता नराधिपाः । दीक्षां लात्वा ययुर्मुक्तिं तीर्थे सिद्धाचलाभिधे ॥ ४ ॥

अन्येऽपि तत्र ये मुक्तिं तस्मिन् काले ययुस्तदा । तेषां सङ्ख्यां तु सर्वज्ञो वेत्ति नान्यश्च मानवः ॥ ५ ॥

अथ सगरस्य सम्बन्धः प्रोच्यते

तथाहि ।—नृपः सूर्ययशा राज्यं कुर्वन् न्यायाध्वनाऽन्यदा । प्रासादमर्हतो नाभि-नृपसूनोरकारयत् ॥ ६ ॥
अखण्डशासनो दुष्ट-प्रत्यर्थीन् खण्डयन् क्रमात् । त्रिखण्डां मेदिनीं सूर्य-यशाः शशास नीतितः ॥ ७ ॥
शक्रेण ढौकितं वर्यं मुकुटं धारयन् स्वयम् । नृपः सूर्ययशा राज्यं कुरुतेस्म सुरेन्द्रवत् ॥ ८ ॥
कनकाह्वखगेशस्य पुत्रीं जयश्रियं वराम् । राधावेधं विधायैव परिणिन्ये स भूपतिः ॥ ९ ॥
द्वाविंशतिसहस्राणि खगक्षोणिपजान्यपि । कलत्राण्यभवंस्तस्य पवित्राण्यपराण्यपि ॥ १० ॥
अष्टभ्यां च चतुर्दश्यां गृह्णानः पौषधं सदा । चकार क्षपणं सूर्ययशा भरतनन्दनः ॥ ११ ॥
इतो धर्म्मे स्थिरं भूपं भरतक्षोणिभुक्सुतम् । ज्ञात्वा शक्रो जगौ देव-देवीनां पुरतस्तदा ॥ १२ ॥
[प्राहोर्वशी हरे ! यद्यत् प्रोच्यते स्वामिना स्वयम् । तत्र वर्यमवर्यं चापत्याङ्गीक्रियते सुखम् ॥ १३ ॥]
स चाष्टमीचतुर्दश्योः पर्वणोस्तपसः क्वचित् । चाल्यते निश्चयान्नैव कृतयत्नैः सुरैरपि ॥ १४ ॥
* यतः—“ पूर्वां काष्ठामतिक्रम्य भानुश्चेदभ्युदेत्यहो ? । मेरुर्वा कम्पते वातैर्मर्यादां चाम्बुधिस्त्यजेत् ॥ १ ॥” 卐
* सुरद्रूर्वाक्केशी स्यात् तथाऽप्येष स्वनिश्चयम् । अपि प्राणैः कण्ठगतै-र्जिनाज्ञां नैव मुञ्चते ॥ १५ ॥ 卐

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततः प्राहोर्वशी देवी गीर्वाणनायकं प्रति । स्वामी जल्पति यच्चात्र सत्यं तदपि विद्यते ॥ १६ ॥
सप्तधातुमयाङ्गो य-श्चर्म्मदेहोऽन्नभक्षकः । सोऽपि देवैरचाल्यो यत् श्रद्दधाति हि कोऽपि तत् ॥ १७ ॥
एवं प्रोक्त्वोर्वशी रम्भा-सहिता स्वर्गतस्तदा । अयोध्यानगरीपार्श्वे समियाय कृतत्वरा ॥ १८ ॥
रम्भायुतोर्वशी पाणौ वीणां विदधती स्वयम् । अयोध्यासन्निधौ चागात् प्रथमार्हन्निकेतने ॥ १९ ॥
गायन्ती मधुरं गीतं मोहयंती च पक्षिणः । उर्वशी विदधे चित्र-लिखितानिव सन्ततम् ॥ २० ॥
तस्या गीतं वरं गोधा-नकुलानिलभुग्मुखाः । शृण्वानाश्चित्र लिखिता इवासंस्तत्र कानने ॥ २१ ॥
इतः सूर्ययशा वाह-केल्यर्थं निर्गतः पुरात् । तयोर्गीतरवान् वर्यान् शुश्राव भरताङ्गजः ॥ २२ ॥
तद्गीतं मधुरं तत्र शृण्वानाः स्वतुरङ्गमाः । चलितं शेकिरे नैकं पदं गन्तुं तदाग्रतः ॥ २३ ॥
असमर्थं बलं स्वीयं चलितुं च तदग्रतः । निरीक्ष्य धरणीनाथो-ऽपश्यद्देवाङ्गनाद्वयम् ॥ २४ ॥
अनयोर्नादतः सर्वे पशवोऽपि वनेऽभितः । आलेख्यलिखिता जाता अन्येषां का कथा पुनः ? ॥ २५ ॥
※ यतः–" देवा नादेन तुष्यन्ति धर्म्मो नादात् प्रजायते । नादान्महीपतेरर्थो नादान्नार्योऽपि वश्यगाः ॥ १ ॥ 卐
गायन्त्यौ ते युगादीश-गेहेऽभ्येत्य मनोहरम् । चक्रतुर्नर्त्तनं यद्वद् यथा भूपश्चमत्कृतः ॥ २६ ॥
प्रणम्य वृषभं देवं गच्छन्त्यौ ते सुराङ्गने । वीक्ष्य मारेषुविद्धोऽभूद् नृप आलेख्यचित्रवत् ॥ २७ ॥

॥ २५६ ॥

For Private and Personal Use Only

तयोः सक्तं नृपं ज्ञात्वा सचिवः प्राह ते प्रति । के भवन्त्यौ कुतः स्थाना-दायाते ! वदतं युवाम् ॥ २८ ॥
प्रोचतुस्ते सुते आवां भीमस्य व्योमगामिनः । नन्तुं युगादितीर्थेश-मायाते संघतः किल ॥ २९ ॥
मन्त्री जगौ समस्त्येष नृपः सूर्ययशा वरः । भोगमीष्टे भवन्तीभ्यां सह पाणिग्रहान्ननु ॥ ३० ॥
पौत्रोऽसौ वृषभेशस्य भरतक्ष्मापनन्दनः । चञ्चत्कलौघरोचिष्णुः सौम्यः सद्गुणवान् बली ॥ ३१ ॥
सन्तुष्टो वृषभस्वामी भवत्योरिह साम्प्रतम् । यदि सूर्ययशा भूपं वव्रे च गुणसागरः ॥ ३२ ॥
यथा भातः शशाङ्केन कौमुदीक्षणदे अपि । युवां श्री सूर्ययशसा तथा भातं नरेश्वरः ॥ ३३ ॥
ताभ्यां सन्मानिते नाभि-पुत्रसूनोश्च साक्षिकम् । भरताङ्गभुवा चक्रे तयोः पाणिग्रहस्तदा ॥ ३४ ॥
तयोः प्रीतिरसाकृष्टो भरतक्ष्मापनन्दनः । अनुमेने सुखं स्वर्ग-नाथवद् धरणीस्थितः ॥ ३५ ॥
सेवमानो नृपः कामं धर्माऽर्थाबाधयाधिकं । पुमर्थरथमेकेन चक्रेणाचालयद् बलाद् ॥ ३६ ॥
अन्यदा नृपतिः पत्नी-द्वययुक्तः स्मरोपमः । पृष्टो गवाक्षगस्ताभ्यां पत्नीभ्यामिति सादरम् ॥ ३७ ॥
पटहोद्घोषणा पुर्यां कार्यतेऽत्र कथं जनैः । जगौ भूपश्चतुर्दश्यष्टमी पर्वद्वयं वरम् ॥ ३८ ॥
अष्टाह्निकाद्वयं पर्व चतुर्मासीत्रयं तथा । पर्व पर्युषणाख्यं च पर्वाण्येतान्यवक् प्रभुः ॥ ३९ ॥ युग्मम् ॥
ज्ञानं हि प्रथमं रत्नं जायते शिवशर्मदम् । तस्याराधनमाप्तेन पञ्चमीपर्व जल्पितम् ॥ ४० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पर्वाण्येतानि सत्पुण्य-कारणानि जिनाज्ञया । आराधितानि कल्याणकमलायै भवन्ति हि ॥ ४१ ॥
उक्तश्च–" न पर्वदिवसे स्नानं न स्त्रीसेवा कलिर्न च । न द्यूतं परहास्यादि न मात्सर्यं न च क्रुधम् ॥ १ ॥
मनाक् कषायसङ्गो न ममता न प्रियेष्वपि । यथारुचि न च क्रीडा प्रमादश्च न किंचन ॥ २ ॥
विधेयं धर्म्मरुचिना पुंसा यतनताजुषा । शुभध्यानवता भाव्यं परमेष्ठिस्मृतिः पुनः " ॥ ३ ॥ त्रिभिर्विशेषकम्
सामायिकं पौषधं च षष्ठाष्टममुखं तपः । कृत्वा जनो जिनस्यार्चां पर्व शस्या च पञ्चमी ॥ ४२ ॥
गुरुपादसमीपस्थः परमेष्ठिस्मृतिं स्मरन् । जनोऽर्जयति पुण्यानि क्षिप्त्वा कर्म्माष्टकं दृढम् ॥ ४३ ॥
त्रयोदश्यां च सप्तम्यां लोकबोधकृतेस्तदा । अयं पटहोद्घोषो मदादेशात् प्रवर्त्तते ॥ ४४ ॥
चतुर्दश्यष्टमी पर्व त्रैलोक्येऽप्यस्ति दुर्लभम् । सेवते यो जनो भक्त्या स याति परमं पदम् ॥ ४५ ॥
श्रुत्वैतदुर्वशी प्राह कथं नाथ ! त्वयाऽधुना । कार्यते मानुषं जन्म विना भोगसुखं खलु ॥ ४६ ॥
श्रुत्वैतन्नृपतिः प्राह रे ! रे ! त्वं धर्म्मनिन्दके ! अधर्मवचनं प्रोक्तं दुःखदुर्गतिदायकम् ॥ ४७ ॥
धिक् चतुरतां धिग् धिग् रूपं कुलं बलं यशः । विना धर्म्मेण कल्याण-कमला शर्मदायिना ॥ ४८ ॥
अष्टम्यां पाक्षिके पक्षि-मृगसिंहादिशावकाः । अप्याहारं न गृह्णन्ति कथं गृह्णाम्यहं प्रिये ! ॥ ४९ ॥
युगादीशेन यत्पूर्वं प्रोक्तं कल्याणहेतुकम् । अहं कण्ठगतप्राण-स्तत्त्यजामि न कर्हिचित् ॥ ५० ॥

॥ २५८॥

For Private and Personal Use Only

श्रुत्वेति उर्वशी प्राह चतुर्दश्यष्टमीदिने । रतसौख्यं न मेऽदास्यः तदाहं च मृता ध्रुवम् ॥ ५१ ॥
नृपः सूर्ययशाः प्राह पूर्वां त्यक्त्वाऽर्यमा यदि । उदेति पश्चिमायां तु तदा धर्म्माच्चलामि न ॥ ५२ ॥
* यतः—" वरं प्रयातु मे राज्यं वरं प्राणक्षयोऽत्र हि । न पुनः पर्वतपसो भ्रष्टो लोके भवाम्यहम् ॥ १ ॥" 卐
प्राहोर्वश्यधुना प्राप्तं वयो भोगसुखं विना । गमिष्यत्यावयोः काक-नाशं जीवितमप्यहो ! ॥ ५३ ॥
एवं प्रोक्त्वा तदा ताभ्यां निश्चेष्टकाष्टवत् स्थितम् । तथापि तपसो भ्रष्टो न भूमीशो मनागपि ॥ ५४ ॥
क्षणान्निःश्वस्य ताभ्यां वा स्थितं प्रोक्तमिति ध्रुवम् । निष्ठुरोऽसि कृपारिक्तो विद्यते त्वं नरेश्वर ! ॥ ५५ ॥
आवयोर्हत्यया श्वभ्र-पातस्तत्र भविष्यति । तेनाऽऽवयोर्दस्व त्वं सद्यो भोगसुखं खलु ॥ ५६ ॥ युग्मम् ॥
निषिद्धोऽपि नृपस्ताभ्यां प्रातरादाय पौषधम् । यदा तस्थौ तदा ताभ्यां विदारितं वपुर्निजम् ॥ ५७ ॥
एतयोश्चेष्टितमाकर्ण्य नाचलन्नृपतिर्यदा । तदा ताभ्यां महासेना समानीता पुराद्बहिः ॥ ५८ ॥
लुण्टयमाने पुरे च स्व-भृत्यैः प्रोक्ते नृपो जगौ । लुण्टिष्यते न मे पुण्यं वैरिभिः प्रबलैरपि ॥ ५९ ॥
* यतः—" बाह्या श्रीर्वैरिभिर्बाह्यैर्ह्रियते नान्तरा पुनः । न चान्तरं वृषं द्विड्भिर्बाह्यैर्वा हन्यते क्वचित् ॥ १ ॥" 卐
ततो द्विषो यमाकाराः पार्श्वेऽभ्येत्य महीपतेः । हन्तुं लग्ना यदा नैव तदापि क्षुब्धवान् नृपः ॥ ६० ॥
महायशोमुखा पुत्राः पुत्र्यो बद्ध्वा दृढं तदा । आनीता भूपतेरग्रे हन्तुं तैर्वैरिभिर्द्रुतम् ॥ ६१ ॥

For Private and Personal Use Only

हन्यमानान् सुतान् पुत्री-द्विड्भिर्वीक्ष्य महीपतिः । धर्म्मध्यानान्मनाग् नैव चचालाचलमानसः ॥ ६२ ॥
ततस्ते मानुषीं रूपां त्यक्त्वा कृत्वा निजाकृतिम् । देवाङ्गने लसद्रूप-धरे प्रोचतुरादरात् ॥ ६३ ॥
जय त्वं वृषभस्वामि-कुलसागरचन्द्रमाः । जय सत्त्ववतां धुर्य ! जय चक्रीशनन्दन ! ॥ ६४ ॥
स्वर्गे संसदि शक्रेण सत्त्ववान् गदितोऽथवा । आवाभ्यां तु तथा ज्ञातो भवान् धर्मणि निश्चलः ॥ ६५ ॥
रुध्यतेऽब्धि मेरुश्चैलः चाल्यते बध्यते मरुत् । यदि पुंसा तदा धर्म्म-ध्यानात्त्वं चाल्यते न हि ॥ ६६ ॥
स्तुवत्योस्तं तयोरेवं शक्रोऽभ्येत्य मणीमयीम् । वृष्टिं कृत्वा प्रशंस्येति जय त्वं भूपते ! चिरम् ॥ ६७ ॥
मुकुटं कुण्डलाहार-मङ्गदं वरमुद्रिकाम् । तस्मै दत्त्वा प्रणम्याङ्घ्री भक्त्या स्वर्गालये ययौ ॥ ६८ ॥
कुरु धर्म्मं चिरं जैनं चिरं पालय भूतलम् । उपकारं चिरं कुर्याः यशःसश्चयमञ्जुलम् ॥ ६९ ॥
ताभ्यां प्रशंस्य भूपालं क्षमयित्वा मणीन् बहून् । वितीर्य नर्त्तनं कृत्वा गतं गीर्वाणसद्मनि ॥ ७० ॥
चतुर्दश्यष्टमीपर्व-मुख्येष्वहःसु सन्ततम् । तपः कुर्वन् नृपो नैव चाल्यते सुरदानवैः ॥ ७१ ॥
ज्ञानदर्शनचारित्र-धारिणः श्रावकोत्तमाः । स्थापिताश्चक्रिणा येन ये ये भोजनदानतः ॥ ७२ ॥
तेभ्यः पृथक् पृथक् स्वर्णोपवीतं रुचिराकृतिम् । वितीर्य ददते भूपः स्वन्नं स्वीयनिकेतने ॥ ७३ ॥
सिद्धाद्रौ विस्तराद् यात्रां कृत्वा सूर्ययशा नृपः । उद्धारं चक्रवान् श्रीमद्युगादिजिनसद्मनः ॥ ७४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आदर्शे स्वं मुखं पश्यन् नृपः सूर्ययशा नृपः । भरतेश इव प्राप ज्ञानं केवलसंज्ञकम् ॥ ७५ ॥
लिङ्गं प्राप्येन्द्रतः सूर्य-यशाः सुविहरन् क्षितौ । बोधयामास भूयिष्ठ-भव्यान् सर्वज्ञधर्मणि ॥ ७६ ॥
क्रमाच्छत्रुञ्जये शैले गत्वा सूर्ययशा मुनिः । सर्वकर्म्मक्षयान्मुक्तिसातमापायुषः क्षये ॥ ७७ ॥
भरतेश इवादित्य-यशोमुख्या महीधराः । यात्रां विस्तरतश्चक्रुः शत्रुञ्जये शिलोच्चये ॥ ७८ ॥
भरतेश इवादित्य-यशोमुख्या महीधराः । अष्टौ पश्यन्त आदर्शे मुखं ज्ञानजुषोऽभूवन् ॥ ७९ ॥
यतः–"राया आइच्चजसे महाजसे अ बलभद्दे । बलवीरिय कित्तिवीरिए जलविरिए दण्डविरिए अ ॥"
एभिर्भूपैश्च बुभुजे भरतार्द्धं समन्ततः । भगवन्मुकुटः शक्रो-पनीतो मूर्ध्न्यधारि च ॥ ८० ॥
भरतादनुसन्ताने सर्वे भरतवंशजाः । अजितस्वामिनं यावद् मुक्त्यनुत्तरगामिनः ॥ ८१ ॥
सर्वे सङ्घपतीभूय तीर्थे शत्रुञ्जयादिके । यात्रां व्यधुर्गृहान् तुङ्गा-नवीकरन् जिनेशितुः ॥ ८२ ॥
एभिरष्टभिरूर्वीशैः श्रीआदित्ययशोमुखैः । उद्धारांश्चक्रिरे शत्रुञ्जय आदिजिनालये ॥ ८३ ॥

॥ श्री ईशानेन्द्रोद्धारः ॥

क्षेत्रे महाविदेहाख्ये ईशानस्त्रिदशेश्वरः । सुव्रतस्यार्हतः पार्श्वे शुश्रावेति कृतादरः ॥ १ ॥

For Private and Personal Use Only

यथा भवेषु मानुष्यो ग्रहेष्विव दिवाकरः । तथा द्वीपेषु जम्ब्वाख्यो द्वीपः सर्वोत्तरैर्गुणैः ॥ २ ॥
तस्य दक्षिणदिग्भागे गिरिः शत्रुञ्जयाभिधः । सर्वतीर्थेषु विद्येत प्रकृष्टः शिवशर्मदः ॥ ३ ॥
साम्यत्वं सर्वतत्त्वेषु दैवतेषु यथा जिनः । दुर्लभः सर्वतीर्थेषु तथा शत्रुञ्जयो गिरिः ॥ ४ ॥
शत्रुञ्जयसमं तीर्थं जम्बूगं भारतं विना । विद्यतेऽन्यत्र कुत्रापि नैव मुक्तिसुखप्रदम् ॥ ५ ॥
श्रुत्वेत्यादि वचो जैन-मीशानेन्द्रो मरुद्युतः । एत्य शत्रुञ्जये चक्रेऽष्टाह्निकामहमादरात् ॥ ६ ॥
किञ्चिज्जर्जरितान् जैनालयान् वीक्ष्य सुराधिपः । दिव्यशक्त्या नवी चक्रे भरतावनिनाथवत् ॥ ७ ॥

॥ श्री प्रथमनाकीन—वीर्यसारनृपोद्धारसम्बन्धः ॥

वंशे वृषभदेवस्य वीर्यसारोऽवनीपतिः । सप्त कोटिनृयुग् नन्तुं जिनान् शत्रुञ्जयेऽचलत् ॥
मार्गे बहून् गिरीन् शत्रु-ञ्जयतुल्यान् मनोहरान् । प्रासादप्रतिमाद्यैश्च ददर्श सङ्घनायकः ॥ १ ॥
वीर्यसारो नृपो दध्यावेकः शत्रुञ्जयो गिरिः । सुराष्ट्रासु श्रुतो मुक्ति-शर्म्मसन्ततिदायकः ॥ २ ॥
अधुनैते कुतः शत्रु-ञ्जयाः स्फारा महीधराः । दृश्यन्तेऽतो मया कस्मिन् गम्यते धरणीधरे ॥ ३ ॥
विषमत्वान् महीध्रेषु तेष्वारोढुं महीपतिः । न शशाक यदा चक्रे-ऽभिग्रहं त्विति दुष्करम् ॥ ४ ॥

यावन्न ज्ञायते सम्यग् गिरिः शत्रुञ्जयाभिधः । न पूज्यते जिनस्तावन्न भोक्तव्यं मया क्वचित् ॥ ५ ॥
मासान्ते न यदा राजा वेद शत्रुञ्जयं गिरिम् । तदा सङ्घोऽभवद् बाढं व्याकुलो मानसे भृशम् ॥ ६ ॥
ततः शस्त्र्या नृपश्छेत्तुं शिरो लग्नोऽतिदुःखितः । तदा तत्रैत्य शक्रोऽवक् साहसं कुरु मा नृप ॥ ७ ॥
अहं प्रथमनाकेशः साहसं तव वीक्षितुम् । समागामिह भूमिध्रा मया विकुर्विता घनाः ॥ ८ ॥
त्वं तु धर्म्मान्मनाग् नैव चलितो मेदिनीपते ! । प्रादुःकरोम्यहं मुख्यं गिरिं वन्दस्व बोधिदम् ॥ ९ ॥
ततो शेषेषु शैलेषु संहृतेष्वसुरारिणा । शत्रुञ्जयं समारूढो वीर्यसारो महीपतिः ॥ १० ॥
स्नात्र-पूजा-ध्वजादानैर्मुख्यैः कृत्यैर्महीपतिः । स्वजन्म सफली कृत्वा ययौ राजादनीतले ॥ ११ ॥
तत्र राजादनीं लाजै-र्वर्द्धयित्वा प्रभुक्रमौ । पूजयामास भूपालो भूरिसङ्घजनान्वितः ॥ १२ ॥
तदा सुधर्म्मदेवेशः पतितान् श्रीजिनालयान् । उद्दध्रे दिव्यशक्त्या च वीर्यसारो नृपोऽपि च ॥ १३ ॥
एवं शत्रुञ्जये यात्रां कृत्वा विस्तरतो नृपः । समेत्य स्वपुरे धर्म्मं कुरुते स्म दिवानिशम् ॥ १४ ॥
क्रमाद्वीर्यनृपो राज्ये न्यस्य पुत्रं निजं मुदा । लात्वा दीक्षां तपस्तीव्रं कुरुते स्म निरन्तरम् ॥ १५ ॥
वीर्यसारो नृपः कोटि-मितैः साधुभिरन्वितः । शत्रुञ्जये ययौ कर्म्म-क्षयाय मासि फाल्गुने ॥ १६ ॥
तत्र तीव्रं तपः कृत्वा क्षिप्त्वा शेषतमश्चयम् । सम्प्राप्य केवलज्ञानं साधुभिस्तैर्युतो नृपः ॥ १७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रबोध्य भविनो भूरीन् वीर्यसारो मुनीश्वरः । कोटिसाधुयुतो मुक्तिं ययौ निजायुषः क्षये ॥ १८ ॥

एवं तृतीय-चतुर्थ-पंचमस्वर्गस्वामिनामुद्धारा अत्र शत्रुञ्जये ज्ञेयाः । एवं चमरेन्द्रादिभिरिन्द्रैः उद्धाराः कृता उक्तश्च—

कोटिलक्षार्णवे जाते ब्रह्मेन्द्रोद्धारतो गते । भवनेन्द्रसमुद्धारो बभूव विमलाचले ॥

अन्तरा अन्तराप्येवं तीर्थे शत्रुञ्जयाभिधे । पुण्योद्धारा इवोद्धारा बभूवुर्नृसुरैः कृताः ॥ १ ॥

भरतक्षोणिनाथस्यो-द्धाराल्लक्षमिताः क्रमात् । उद्धारा येऽभवँस्तेषां सङ्ख्यां कर्तुं क्षमोऽस्ति कः ? ॥ २ ॥

भरतप्रमुखा भूपाः सङ्ख्यातीता सुभावतः । सङ्घेशीभूय सिद्धाद्रौ यात्रां विस्तरतो व्यधुः ॥ ३ ॥

यैरन्यैरपि भूदेव-महेभ्यादिभिरादरात् । यात्रां शत्रुञ्जये चक्रे सङ्ख्या तेषां न जायते ॥ ४ ॥

॥ श्री सगरचक्रिसम्बन्ध उच्यते ॥

जम्बूद्वीपेऽस्ति भरते या चायोध्याऽरिभिः सदा । सा चायोध्येति विख्याता गतातङ्का रमाश्रिता ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आगता रिपवो यत्र मणिशालिषु बिम्बितान् । स्वदेहानेव संवीक्ष्य नेशुर्वैरिभयाद् द्रुतम् ॥ २ ॥
अर्हच्चैत्येषु घण्टानां यत्र नादैरहर्निशम् । धर्म्मभूपवपु(वदत्)तूर्यैं-रिव पापनृपोऽनशत् ॥ ३ ॥
मुक्तिं शिवं च भूपाला असङ्ख्याता समागमन् । श्रीमया तेष्वसङ्ख्येषु चैकः सर्वार्थसिद्धिगः ॥ ४ ॥
.... । श्रीमदाद्यविभोर्वंशे द्वैतीयीयजिनावधि ॥ ५ ॥
तस्यां पुर्यां जिताऽरातें-र्जितशत्रोर्महीपतेः । राज्यभूद्विजया नाम्नी शीलादिगुणशालिनी ॥ ६ ॥
जितशत्रोरभूद् भ्राताऽनुजः सुमित्रनामभृत् । युवराजपदं सोऽपि पपाल न्यायतत्परः ॥ ७ ॥
प्रिया यशोमती तस्य लसच्छीलगुणश्रिता । अभूच्छचीव शक्रस्य कमलेव पुरद्विषः ॥ ८ ॥
पक्षद्वयविशुद्धा या हंसीव सुविवेकिनी । निर्मलं मानसे पत्यु-र्वासस्थानमसूत्रयत् ॥ ९ ॥
अन्यदा विजया राज्ञी सुखसुप्ता दिनात्यये । चतुर्दश महास्वप्नान् ददर्श कुञ्जरादिकान् ॥ १० ॥
यतः–" गजः सिंहो वृषोऽम्भोज-वासा दाम शशी रविः । ध्वजः कुम्भः सरो वार्धि-र्विमानमणिवह्नयः ॥ ११ ॥
राधशुक्लत्रयोदश्यां रोहिण्यां मृगलाञ्छने । विमानाद्विजया देवो-ऽनुत्तराद् भवसंक्षयात् ॥ १२ ॥
च्युत्वा निशीथे तत्कुक्षा-वततार समाधिना । उद्योतश्च महान् जज्ञे सुखं नारकिणामपि ॥ १३ ॥ युग्मम् ॥
यतः–" नारका अपि मोदन्ते यस्य कल्याणपर्वसु । पवित्रं तस्य चारित्रं को वा वर्णयितुं क्षमः ? " ॥१४॥

For Private and Personal Use Only

इतो यशोमती रात्रौ महास्वप्नान् चतुर्दश । ददर्श च ततः पत्नी पत्युः पार्श्वे न्यवेदयत् ॥ १५ ॥
पूर्णेषु मात्सु नवसु सार्द्धाष्टमदिनेष्वथ । माघशुक्लाष्टमीरात्रौ शशाङ्के रोहिणीस्थिते ॥ १६ ॥
असूत विजया पुत्रं स्वर्णवर्णं गजध्वजम् । तदाऽजनि क्षणं सौख्यं नारकाणामपि ध्रुवम् ॥ १७ ॥ युग्मम् ॥
षट्पञ्चाशद्दिक्कुमार्यादि-केन्द्रपितृभिः क्रमात् । जन्मोत्सवो मनोहारी विदधे सुखकृन्नृणाम् ॥ १८ ॥
अत्र विस्तरः स्वयं वाच्यः । यशोमती वरे घस्रे प्रासूत तनयं वरम् । यदा तदा पिता चक्रे विस्तराज्जननोत्सवम् ॥
तयोः सून्वोरभून्नामाऽजितश्च सगरः क्रमात् । वर्धमानौ मुदं पित्रो-र्ददातेस्म निरन्तरम् ॥ २० ॥
केकीभूय हयीभूय गजीभूय च केचन । अजितं रमयामासुः सुराः शक्रनिदेशतः ॥ २१ ॥
अर्द्धपञ्चमकोदण्ड-शतान्युच्चुङ्गविग्रहौ । अजितः सगरोऽभूतां रूपलावण्यशालिनौ ॥ २२ ॥
पित्रोर्मोदकृते कन्यां रूपसेनाभिधां वराम् । मत्वा भोगफलं स्वामी परिणिन्ये सदुत्सवम् ॥ २३ ॥
सगरो भूरिकन्यानां पितृमातृनिदेशतः । उद्वोढाऽजनि सत्कर्म्मयोगान् मञ्जुलवासरे ॥ २४ ॥
गतेषु पूर्वलक्षेष्व-ष्टादशसु प्रभोः क्रमात् । जितशत्रुः पिता राज्य-मजिताय मुदा ददौ ॥ २५ ॥
युवराजः सुमित्रोऽपि जितशत्रोर्निदेशतः । स्वपट्टे सगरं सूनुं न्यवेशयद्वरोत्सवम् ॥ २६ ॥
यतः -"वीरं अरिट्ठ नेमिं पासं मल्लिं च वासुपुज्जं च । एए मोत्तूण जिणे अवसेसा आसि रायाणो ॥ १ ॥"

जितशत्रुः सुमित्रश्च सोदरौ रुचिरोत्सवम् । धर्म्मघोषगुरोः पार्श्वे ललतुः संयमं सुखम् ॥ २७ ॥

अजितः क्षोणिभुग् भ्रात्रा समं राज्यं नयाध्वना । जनताः पालयामास जीवरक्षापरः सदा ॥ २८ ॥

जितशत्रुः सुमित्रश्च तीव्रं तपो निरन्तरम् । कुर्वाणौ कुरुतः स्मा-ऽलं विहारं पृथिवीतले ॥ २९ ॥

जितशत्रुर्यतिः कुर्वं-स्तपस्तीव्रं निरन्तरम् । ईशाने ताविषे देवो बभूवाऽमलविग्रहः ॥ ३० ॥

* यतः—"उसभपिआ नागेसु सेसाणं सत्त हुंति ईसाणे । अट्ठ य सणंकुमारे माहिंदे अट्ठ बोधव्वा ॥ १ ॥卐

* अट्ठण्हं जणणीओ तित्थयराणं हुंति सिद्धिओ । अट्ठ य सणंकुमारे माहिंदे अट्ठ बोधव्वा ॥ २ ॥"卐

अजितभ्रातुरादेशं प्राप्य सगरसोदरः । साधयामास भूयिष्ठ-देशान् वैरिनिकृन्तनात् ॥ ३१ ॥

वसन्तेऽजितभूपालः सगरभ्रातृसंयुतः । पुष्पैः फलैश्चिरं क्रीडां चक्रतुः सरसीष्वपि ॥ ३२ ॥

तदैको हरिणोऽकस्मात् पीनदेहोऽद्रिश्रृङ्गवत् । पतितो मरणं प्राप्तस्तं-चाऽपश्यन्महीपतिः ॥ ३३ ॥

ततो दध्यौ नृपोऽसार-संसारो विद्यते खलु । यतो विनश्वरं विश्वं दृश्यते ससुरासुरम् ॥ ३४ ॥

* यतः—"स्वैरिणो वैरिणो लोके विषया भवचत्वरे । छलाद् हरन्ति पुण्यैक चैतन्यं हि जडात्मनाम् ॥३५॥卐

* पुत्र-पितृ-कलत्रादि-पाशैर्बद्धो भवे भवे । पक्षिवत् स्वेच्छया धर्म्मे रन्तुं न लभते जनः ॥ ३६ ॥卐

* यत्तुच्छसुखलोभेन पुण्यं स्वं द्रावयन्ति हि । तेषां पीयूषमंहीणां क्षालनाय भवत्यपि ॥ ३७ ॥卐

तदेवं ध्यायति स्वामि-न्याऽऽजग्मुस्त्रिदिवात् सुराः । लोकान्ता जयजयेत्यु-च्चरन्तश्च तदग्रतः ॥ ३८ ॥
अनेके प्रोच्यन्ते–' सारस्सयमाइच्चा वह्नी वरुणा य गद्दतोआ य । तुसिआ अव्वाबाहा अग्गिच्चा चेव रिट्ठा य ॥१॥'
तीर्थं प्रवर्त्तय स्वामिन् ! भवकूपे महत्यपि । पततो भविनो वाणी-वेडयोद्धर साम्प्रतम् ॥ ३९ ॥
स्वयंबुद्धोऽपि सर्वज्ञः श्रुत्वा देवगिरं तदा । आरंभे वार्षिकं दानं दातुं द्वितीयवासरे ॥ ४० ॥
वर्षं यावत् प्रभुर्दायं दायं दानमनर्गलम् । दीक्षां लातुमना राज्यं सगराय वितीर्णवान् ॥ ४१ ॥
वर्षेण यद्ददौ दान-मर्थिभ्यः प्रभुरादरात् । तस्य किञ्चिन्निगद्येत सङ्ख्यामिति–जिनागमे ॥ ४२ ॥
" एगा हिरण्णकोडी अट्ठेव य अणूणगा सयसहस्सा । सूरोदयमाईयं दिज्जइ जा पायरासाओ ॥ १ ॥
तिन्नेव य कोडि सया अट्ठासीयं च हुंति कोडीओ । असिअं च सयसहस्सा एअं संवच्छरे दिन्नं ॥ २ ॥"
गज-वाजि-हयोर्वीणां रत्न-माणिक्य-वाससाम् । दाने संवत्सरे सङ्ख्यां वेत्ति नो ज्ञानिनं विना ॥ ४३ ॥
ततः सगरभूपालः सौधर्मेशानवासवैः । क्रियमाणोत्सवे स्वामी शिबिकायां स्थितः प्रभुः ॥ ४४ ॥
सहस्रपर्वतेऽभ्येत्यावतीर्य किल यानतः । पञ्च मुष्टया व्यधाल्लोचं नृपालसुरसाक्षिकम् ॥ ४५ ॥
विधायाथ नमस्कारं सिद्धानामजितस्तदा । दीक्षां स्वयं ललौ शक्र-भूपयोः कुर्वतोर्महम् ॥ ४६ ॥
माघशुक्लनवम्यां तु शशाङ्के रोहिणी-स्थिते । उत्तराह्ने प्रभोर्ज्ञानं चतुर्थं समजायत ॥ ४७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यतः–तिहिं नाणेहिं समग्गा तित्थयरा जाव हुंति गिहिवासे । पडिवन्नम्मि चरित्ते चउनाणी जाव छउमत्था ॥
तदा च संयमं भूपाः सहस्रं प्रभुणा समम् । अङ्गीचक्रुर्गृहवासं-श्रियं प्रोज्झय्यसुभावतः ॥ ४८ ॥
यतः–" एगो भयवं वीरो पासो मल्ली अ तिहितिहि सएहिं । भयवंपि वासुपुज्जो छहिं पुरिससएहिं निक्खंतो ॥१॥
उग्गाणं भोगाणं रायन्नाणं च खत्तियाणं च । सहस्सेहुसभो सेसा य सहस्सपरिवारा ॥ २ ॥"
द्वितीयेऽह्नि त्वयोध्यायां ब्रह्मदत्ताऽऽलयं प्रभोः । पारणं परमान्नेन बभूव भवतारणम् ॥ ४९ ॥
निष्काणां कोट्यः सार्द्धा द्वादश ब्रह्मसद्मनि । निपेतुः सुरनिर्मुक्ता-श्चञ्चज्जयजयारवम् ॥ ५० ॥
यतः–" सव्वेहिं जिणिंदेहिं जहि अ लद्धाओ पढमभिक्खाओ । तहिअं वसुहाराओ वुट्ठाओ पुप्फवुट्ठीओ ॥ १ ॥
अद्ध य तेरस कोडी उक्कोसा होइ तत्थ वसुहारा । अद्धतेरस लक्खा जहन्निया होइ वसुहारा ॥ २ ॥
सव्वेसिंपि जिणाणं जेहिं दिन्नाउ पढमभिक्खाउ । ते पयणुपिज्जदोसा दिव्ववरपरकमा जाया ॥ ३ ॥"
प्रभोः पारणकस्थाने ब्रह्मदत्तः प्रमोदतः । धर्म्मचक्रं व्यधाद् विश्व विश्ववन्द्यः सुशर्मणे ॥ ५१ ॥
आर्यानार्येषु देशेषु विहरन्निर्ममः प्रभुः । घात्यानि सर्वकर्म्माणि ध्यानाग्निनाऽदहत् क्षणात् ॥ ५२ ॥
अहौ हारे मणौ लोष्टे तृणे स्त्रैणेऽरियौ रिपौ । काञ्चने काचसङ्घाते समदृक् समभूत्प्रभुः ॥ ५३ ॥
सुखे दुःखे भवे मोक्षे निर्जने जनसङ्कुले । दिवा रात्रौ च सन्ध्यायां समभावोऽभवज्जिनः ॥ ५४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शीते स्फीते तथा तापे समेऽपि विषमे पुनः । मानापमानयोस्तुल्य-स्वान्तोऽजनि जिनस्तदा ॥ ५५ ॥
वायुवद् विहरन् स्वामी नानादेशेषु सन्ततम् । अयोध्यामीयिवान् प्रान्ते छद्मस्थस्य शुभाशयः ॥ ५६ ॥
रोहिणीस्थे विधौ पौष-शुक्लद्वादशमीदिने । पश्चिमाह्नि प्रभोर्ज्ञान-मुत्पन्नं पञ्चमं क्षणात् ॥ ५७ ॥
वप्रत्रये कृते तत्र देवैः श्रीअजितः प्रभुः । तीर्थायाऽस्तु नमश्चादौ जगादाचारहेतुतः ॥ ५८ ॥
मरुत्कृतबृहद्धेम-विष्टरे अजितः प्रभुः । उपविष्टः प्रबोधाय भव्यानां प्राणिनां तदा ॥ ५९ ॥
इतः सगरभूपस्या-ऽऽयुधसद्मनि सुन्दरे । चक्ररत्नं समुत्पन्नं स्फुरद्भाभासिताम्बरम् ॥ ६० ॥
(प्रभोरजितनाथस्य) ज्ञानोत्पत्तिं महीपतेः । उद्यानपो जगौ यात्र-त्तावद्दध्यौ क्षमापतिः ॥ ६१ ॥
चक्रं प्रपूजयित्वाऽऽदा-वर्चयिष्ये ततो जिनम् । क्षणाद्दध्यौ नृपो धिग् मां निर्विवेकजनाग्रणीम् ॥ ६२ ॥
प्रभौ प्रपूजिते चक्रं पूजितं सुलभं भवेत् । यतः प्रभुः शिवस्वर्ग-चक्र्यादिकमलाप्रदः ॥ ६३ ॥
मिथ्यादुःकृतमादाय सगरस्तत्क्षणात्तदा । लात्वा बलिं प्रभुं नन्तुं स्वामिनः सन्निधौ ययौ ॥ ६४ ॥
बलिमुच्छालयन् कुर्वन् सगरस्त्रिःप्रदक्षिणाम् । बलिमादात्तदा स्वीयो-चितां रोगाद्यहन्तृकां ॥ ६५ ॥
उक्तं च–' राया व रायमच्चो तस्सासई पउरजणवओ वावि । दुब्बलिखंडिअबलि-छड्डिअ तंदुलाणाढयं कलमा ॥१॥
भाइअ पुणाणिआणं अखंडफुडीआण फलगसरियाणं । कीरइ बली सुरावि अ तत्थेव छुहंति गंधाइं ॥ २ ॥

For Private and Personal Use Only

बलिपविसण समकालं पुव्वद्दारेण ठाइ परिकहणा । तिगुणं पुरओ पाडण तस्सद्धं अवडियं देवा ॥ ३ ॥
अद्धद्धं अहिवइणो अवसेसं होइ पगयजणस्स । सव्वामयप्पसमणी कुप्पइ नन्नो अ छम्मासे' ॥ ४ ॥
वन्दित्वाऽथ प्रभुं पृथ्वी-प्रभुः स्वस्योचिते पदे । धर्म्मं श्रोतुमुपाविष्टः प्रमोदभरभासुरः ॥ ६६ ॥

अत्र धर्मोपदेशो वाच्यः ।

देशनान्ते प्रभुर्गच्छ-नायकान् निजपाणिना । स्थापयामास ते सर्वेऽभूवन् विद्याब्धिपारगाः ॥ ६७ ॥
सङ्घं चतुर्विधं तत्र श्रीमानजितबोधितः । स्थापयामास नाकीन-महीनायकसाक्षिकम् ॥ ६८ ॥
श्राद्धधर्म्मं समादाय चक्री स्वगृहमीयिवान् । विजहाराऽजितस्वाम्य-न्यत्र बोद्धुं जनान् बहून् ॥ ६९ ॥
अन्येद्युरजितस्वामी विहरन् वसुधातले । आदिनाथाश्रितं शत्रु-ञ्जयं प्रत्यचलत् स्वयम् ॥ ७० ॥
यावच्छत्रुञ्जयोपान्ते गत्वा स्वाम्यजितः क्रमात् । कायोत्सर्गे स्थितस्तावत् केकिवृन्दं समागतम् ॥ ७१ ॥
एकेन केकिना स्वामि-शीर्षस्योपरि भक्तितः । स्वकलापः कृतश्छत्रा-कारेण तमसः छिदे ॥ ७२ ॥
ध्यानान्ते केकिनो धर्म्मं बोधिताः प्रभुणा गिरा । पशवोऽपि तदा भद्र-स्वभावा अभवन् किल ॥ ७३ ॥
यतः—देवा दैवीं नरा नारीं शबराश्चापि शाबरीम् । तिर्यञ्चोऽपि हि तैरश्चीं मेनिने भगवद्गिरम् ॥ ७४ ॥
तैः केकिभिः समं स्वामी शैलमारुह्य यत्नतः । मुख्यशृङ्गे स्थितो राजा-दन्या अधो दिनत्रयम् ॥ ७५ ॥

For Private and Personal Use Only

तदा ते केकिनः स्वामि-मुखालोकनतत्पराः । आलेख्यलिखिता आस-न्निव स्वीयतमश्छिदे ॥ ७६ ॥
तदैकं केकिनां वृद्ध-मासन्नमरणं ध्रुवम् । ज्ञात्वा संलेखनां स्वामी कारयामास सद्गिरा ॥ ७७ ॥
मृत्वा केकी गतस्तुर्य-स्वर्गे भासुरभूतिमान् । ज्ञात्वोपकारिणं स्वस्य प्रभूपान्ते समागमत् ॥ ७८ ॥
वर्यं समवसरणं कृत्वा नृत्यन् प्रभोः पुरः । सौधर्म्मस्वामिना पृष्टः स्वामीत्येष सुरोऽस्ति कः ? ॥ ७९ ॥
स्वाम्यवक् तस्य देवस्य यथाऽभूत् स्वर्गतिस्तथा । इदं च विद्यते देहं केकिनोऽस्य सुरस्य हि ॥ ८० ॥
ततः केकिसुरो हृष्टः स्वमृत्युस्थानके तदा । स्वरूपं व्यलिखत् स्वामि-पादुकान्तेऽन्यबोधकृत ॥ ८१ ॥
स केकीनिर्जरः प्राप्य मानुषं भवमद्भुतम् । मुक्तिं गमिष्यति क्षिप्रं शैले सिद्धाभिधे क्रमात् ॥ ८२ ॥
तदाऽनेके मयूराद्या जीवा जैनं वृषं वरम् । प्रपद्य त्रिदिवं जग्मु-स्ततो यास्यन्ति निर्वृतिम् ॥ ८३ ॥
यतः—नगः शत्रुञ्जयाख्योऽयं शाश्वतः सर्वदा स्थिरः । भवाब्धौ मज्जतां पुंसां तारणाय तरीनिभः ॥ ८४ ॥
तीर्थेऽस्मिन् यानि कर्म्माणि विधीयन्ते सुमेधसा । तानि कर्म्मक्षयाय स्यु र्भवेऽत्र च परत्र च ॥ ८५ ॥
शत्रुञ्जयेऽत्र ये सिद्धाः सेत्स्यन्त्यपि च सर्वदा । तांश्च केवलिनं मुक्त्वा न वेत्त्यऽन्यो जनो मनाग् ॥ ८६ ॥
इतश्चक्री विधायाऽर्चां चक्रस्य पृष्टितस्तदा । चचाल साधितुं पृथ्वीं षट्खण्डां भूरिसैनिकः ॥ ८७ ॥
दण्डपाणि-गज-छत्र-मणि-काकिणि-वर्द्धकान् । पुरोधा गृहचक्राणि चर्मरत्नमुखान्यपि ॥ ८८ ॥

रत्नान्यादाय भूमीशो यक्षलक्षैरधिष्ठितः ।ससैन्यैश्चालयन् विश्वं चचालाऽचलविक्रमः ॥ ८९ ॥ युग्मम् ॥
पूर्वाऽब्धौ मागधाधीशं वायव्यां वरदामकम् । प्रतीच्यब्धौ प्रभासेशं बलेन बलिनं भृशम् ॥ ९० ॥
कृत्वाऽष्टमं तपः साध-यित्वा सगरभूपतिः । ययौ सिन्धुमहासिन्धो रोधसि क्रमतस्तदा ॥ ९१ ॥
जित्वा सिन्धुपतिं भूपः वैताढ्यव्योमगानपि । स्ववशान् विदधे भूमी-पतिनन्यानपि क्रमात् ॥ ९२ ॥
एवं चक्रानुगो भूपः षट्खण्डां वसुधां समाम् । साधयामास निःशेष-प्रत्यर्थिभूमिभुग्जयात् ॥ ९३ ॥
स लक्षैश्चतुरशीत्या कुम्भि-स्यन्दन-वाजिनाम् । सपादकोटिभिः खड्गैः सगरोऽलङ्कृतः क्रमात् ॥ ९४ ॥
षट्खण्डां मेदिनीं भूपः साधयित्वा निजौजसा । स्वाह्वां लिलेख ऋषभ-कूटे कुर्वन् महोत्सवम् ॥ ९५ ॥
विस्तराद्देशसाधन-वैताढ्यपर्वतगुहागमन-गंगानदीतटनवनिधानघटनादिसम्बन्धश्चरित्रात् ज्ञेयः ।
सगरश्चक्रिराट् स्वीयपुरेऽभ्येत्य चमूयुतः । राज्याभिषिञ्चनविधिं व्यधाद् द्वादशवत्सरीम् ॥ ९६ ॥
विहरन्नन्यदा स्वामी शृङ्गेसुभद्रसंज्ञिके । चतुर्मासीं स्थितो वर्ष-त्यब्दे सिद्धमहीभृतः ॥ ९७ ॥
अन्येऽपि यतयः शृङ्गे पृथक् पृथग् गुहासु च । तस्थुः कर्तुं तपस्तीव्रं संसारोच्छेदहेतवे ॥ ९८ ॥
तत्रस्थे स्वामिनि व्याघ्रा-दयोऽपि श्वापदास्तदा । प्रभोर्वाणीं निशम्याशु वैरं तत्यजुरात्मना ॥ ९९ ॥
व्याघ्रादयोऽपि जीवास्तु लात्वाऽनशनमादरात् । शृण्वन्तः स्वामिनो वाणीं ययुः स्वर्गं शुभाशयाः ॥ १०० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततश्च्युत्वा भवैरेक-द्वित्र्यादिभिर्मनोहरैः । सम्प्राप्य मानुषं जन्म ते प्रयास्यन्ति निर्वृतिम् ॥ १०१ ॥
इतः श्री सुव्रताचार्य-स्तन्दुलोदकभाजनः । ग्लानत्वात् प्रथमे शृङ्गे समागान्मुनिसेवितः ॥ १०२ ॥
कस्यचित् पादपस्याधो विमुच्य जलभाजनम् । यावत् सूरिः स्थितस्तावत् काको व्यलुठयच्च तत् ॥ १०३ ॥
काकेन गमितं नीरं दृष्ट्वा शुष्यन्मुखाम्बुजः । चुकोप मुनिपः काकं प्रतीदं प्रोक्तवान् पुनः ॥ १०४ ॥
* यतः—यत् काण ! भवता प्राण-रक्षणं क्षणतः पयः । अलोठि तदकृत्येन नात्र त्वत्सन्ततेर्गतिः ॥ १०५ ॥卐
अशेषमुनितोषाय निर्जन्तु-प्रासुकं पयः । अत्रैव सततं भावि प्रभावात्तपसो मम ॥ १०६ ॥
यत्तदैव ययुः काकाः काकुकोलाहताऽऽकुलाः । तत्तदादि सिद्धशैले काकानामाऽऽगतिर्नहि ॥ १०७ ॥
दुर्भिक्षं विड्वरानर्थ-समर्थनपरोऽत्र चेत् । अत्रैति काकस्तत्कार्यं शान्तिकं विघ्ननाशनम् ॥ १०८ ॥
उक्तंच—"श्रीयुगादिजिनस्याग्रे राजादन्याश्च शान्तिकम् । पुरतो जैनमुनिभिः क्रियतेऽरिष्टनाशकृत् ॥ १ ॥"
यच्छैलसन्धौ तत्तोयं प्रवृत्तं तपसो बलात् । नैरुत्यां दिशि विद्येत विघ्नोपशमकारकम् ॥ १०९ ॥
रोगशोकार्त्तवैताल-ग्रहदुःखानि कोटिशः । तस्यैव वारिणःस्पर्शाद्-गच्छन्त्येव न संशयः ॥ ११० ॥
पुनः क्षणाद् गणाधीशो दध्यावेवं स्वचेतसि । मयैव चिन्तितं ध्यानं पापात्मकं दुःखहेतवे ॥ १११ ॥
एवं तस्य गणेशस्य ध्यायतः परमं महः । प्राप्य ज्ञानं ययौ मुक्तिं सर्वपापक्षयात्तदा ॥ ११२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्र चक्री समेत्यैव सुव्रताचार्यनामकम् । प्रासादं कारयामास नाभेयप्रतिमान्वितम् ॥ ११३ ॥
इतस्तत्राजितस्वामि-वचः श्रुत्वा मनोहरम् । बहवो यतयः सिद्धिं जग्मुः सर्वतमःक्षयात् ॥ ११४ ॥
ततः श्री अजितस्वामी प्रबोध्य भूरिशो जनान् । विजहार महीपीठं बोधितुं भविकाङ्क्षिनः ॥ ११५ ॥
एकदासगरक्ष्मापादेशं लब्ध्वा तनूभवाः यात्रां कर्तुं मणीन् लात्वा भगीरथ्यादयो (नारीरत्नमृते)ऽचलन् ॥
वन्दमानो जिनान् ग्रामे ग्रामे ग्रामे पुरे नगे । ययौ भागीरथो भ्रातृ-युतोऽष्टापदपर्वते ॥ ११७ ॥
आरुह्याऽष्टापदं शैलं भरतक्ष्मापकारिते । जिनागारे जिनानादि-नाथादीन् सोऽनमन्मुदा ॥ ११८ ॥
" चत्तारि अट्ठ दस दो य वंदिया जिणवरा चउवीसं । परमट्ठ निट्ठिअट्ठा सिद्धा सिद्धिं मम दिसंतु ॥ १ ॥"
स्नात्रपूजा-ध्वजादान-कृत्यानि रुचिरोत्सवम् । कृत्वा भगीरथश्चक्रे गीतनृत्यादि भावतः ॥ ११९ ॥
भरतेनात्मनः पूर्वं जातेनादिजिनालयम् । रैमयं कारितं ज्ञात्वा भ्रातॄन् भगीरथो जगौ ॥ १२० ॥
लोभिनो भाविनो लोकाः प्रासादं रैमयं किल । पातयित्वा गृहीष्यन्ति हेम सर्वं न संशयः ॥ १२१ ॥
तेनाऽस्य तीर्थराजस्य रक्षा धुरि विधीयते । परिखाया विधानेन परितोऽत्रानुजाः खलु ॥ १२२ ॥
तदा सर्वेऽनुजाः प्रोचु-र्वर्यं भ्रातस्त्वयोदितम् । क्रियतां परिखाऽस्यैव तीर्थस्य परितो लघु ॥ १२३ ॥
ततो दण्डेन रत्नेन ते सर्वे सगराङ्गजाः । अष्टापदस्य परितः खातिकां कर्तुमुद्यताः ॥ १२४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खनतां खातिकां तेषां परितोऽष्टापदेऽचले । अणपन्नि-प्रमुखाणां व्यन्तराणां गृहेषु तु ॥ १२५ ॥
बह्वीं धूलीं पतन्तीं तु दृष्ट्वा ते व्यन्तराः जगुः । कोऽयं दुराशयो धूलीं क्षिपत्यत्रात्मनो गृहे ॥ १२६ ॥ युग्मम् ॥
अवधिज्ञानतो ज्ञात्वा सगरस्याङ्गजा जगुः । सगरक्षोणिभुक्पुत्रा यूयं स्थ करुणापराः ॥ १२७ ॥
किं यूयं क्षिपथास्माकं शीर्षेषु धूलिपद्धतिम् । कृपापि विद्यते नैव जीवेष्वास्मादृशेष्वहो ? ॥ १२८ ॥
* यतः–अहिंसासम्भवो धर्म्मः स हिंसातः कथं भवेत् । न तोयजानि पद्मानि जायन्ते जातवेदसः ॥ १२९ ॥
कृपानदी-महातीरे. सर्वधर्म्मास्तृणाङ्कुराः । तस्यां शोषमुपेतायां कियन्नन्दन्ति ते पुनः ॥ १३० ॥
निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः । न हि संहरति ज्योत्स्नां चन्द्रश्चाण्डालवेश्मसु ॥ १३१ ॥
'इक्कह जीवह कारणेहिं मरि म जीवसयाइं । अज्ज वि कल्ल त्रि मरणं पामिसि दुक्खसयाइं' ॥ १३२ ॥
तैरेवं व्यन्तरैः प्रोक्ते भ्रातृयुक्तो भगीरथः । खातिकां स्वर्नदीनीरै-र्भर्तुं यत्नं व्यधात्तदा ॥ १३३ ॥
दण्डरत्नेन गंगायाः प्रवाहेन च खातिकाम् । यावद् बिभर्ति सगर-पुत्रः सोदरसंयुतः ॥ १३४ ॥
तावत् कर्दमपातेन ज्वलनो व्यन्तरो जगौ । पङ्कस्य पाततो नाग-लोकोऽद्य पूर्यतेतराम् ॥ १३५ ॥
गङ्गाप्रवाहनयनं तदा भगीरथादिभिः । विज्ञाय ज्वलनो नाग-नाथः प्रोवाच तान् प्रति ॥ १३६ ॥
यूयं पश्चात् कुरुध्वं स्व-र्नद्याः प्रवाहमञ्जसा । नो चेच्छिक्षां द्रुतं दास्ये युष्माकं पापकारिणाम् ॥ १३७ ॥

For Private and Personal Use Only

※ यतः–" अत्युग्रपुण्यपापाना-मिहैव फलमाप्यते । त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्वर्षैस्त्रिभिर्दिनैः ॥ १ ॥" 卐

तेष्वतिष्ठत्सु चक्रीश-पुत्रेषु ज्वलनोरगः । जह्नु-भीमौ विना षष्टिं सहस्राण्यदहत् सुतान् ॥ १३८ ॥

दग्धान् (ग्ध्वा) चक्रिसुतान् सद्यो ज्वलनो रुष्टमानसः । स्वं स्थानमगमत् कोपो भवेद्रिपुवधावधि ॥ १३९ ॥

दग्धान् चक्रिसुतान् दृष्ट्वा भृत्या रोदनतत्पराः । जह्नुभीमयुता वृक्षा–नपि चारोदयन् भृशम् ॥ १४० ॥

वियोगाच्चक्रिपुत्राणां कुर्वे भृत्याश्रितां पृथुम् । काष्ठैर्व्यरचयन् प्राणां-स्त्यक्तुकामास्तदा द्रुतम् ॥ १४१ ॥

यावत्ते वह्निना भृत्या ज्वालयन्ति चितां स्वयम् । ज्ञात्वा चाऽवधिना तावद् विप्ररूपधरो हरिः ॥ १४२ ॥

समेत्य प्रोक्तवान् भृत्याः ! मा म्रियध्वं मुधाऽधुना । जीवद्भिर्लभ्यते सर्वं राज्यादि न मृतैः पुनः ॥ युग्मम् ॥

भृत्या प्रोचुर्द्विजाऽस्माकं पश्यतां चक्रिसूनवः । स्वस्वामिनो हृता वह्नि-दानेन ज्वलनाहिना ॥ १४४ ॥

तेन किं जीव्यतेऽस्माभि-र्विना स्वेशान् द्विजाऽधुना । विधीयन्तेऽनुगा भूपैः स्वरक्षायै यतोऽनघाः ॥ १४५ ॥

तैरेव स्वामिनः पृष्ठौ म्रियते न हि चेद्यदि । तदा स्वस्वामिभावो हि निरर्थोऽजनि सर्वतः ॥ १४६ ॥

विप्रोऽवग् वचनं ह्येतत् भवतां न वरं पुनः । एवं चेन्म्रियते भृत्यै-स्तदा विश्वं प्रलीयते ॥ १४७ ॥

स्वामिपृष्ठौ म्रियन्ते यद् भृत्याः पत्यौ मृते सति । म्रियन्ति योषितस्तच्च मोहस्यैव विजृम्भितम् ॥ १४८ ॥

मोह एव बली विश्वे सर्वेषां दृश्यतेऽङ्गिनाम् । यतो मोहो नयत्येव श्वभ्रे जीवान् बहून् हठात् ॥ १४९ ॥

* 'यतः—पुत्रो मे भ्राता मे स्वजनो मे गृहकलत्रवर्गो मे । इति कृत मे मे शब्दं पशुमिव मृत्युर्जनं हरति ॥ १ ॥卐
* दाराः परिभवकारा बन्धुजनो बन्धनं विषं विषयाः । कोऽयं जनस्य मोहो ये रिपवस्तेषु सुहृदाशा' ॥२॥卐
आकर्ण्यैतत्तदा सर्वे चक्रिपुत्रानुगाः समे । निवृत्ता मरणात् शोकं दधुरात्यन्तिकं हृदि ॥ १५० ॥
ततो विप्रो जगौ शोकः क्रियते नोत्तमै र्जनैः । शोकेन जायतेऽमुत्र परत्राऽसुखसन्ततिः ॥ १५१ ॥
* यतः—" धर्म्म-शोक-भया-हारा-निद्रा-काम-कलि-क्रुधः । यावन्मात्रा विधीयन्ते तावन्मात्रा भवन्त्यमी ॥१॥ "卐
इत्यादि जल्पिताश्चक्रि—भृत्या जहुः शुचं तदा । ततो विप्रो गतोऽन्यत्र विद्युद् पुञ्ज इवाचिरात् ॥ १५२ ॥
विप्रवेषधरः शक्रो वृद्धीभूय सुतं मृतम् । उत्पाट्य सगरस्याग्रे विमुच्य च रुदन् जगौ ॥ १५३ ॥
सर्वसहाऽसि भूमे ! त्वं कठिनाऽसि दृढं पुनः । भरतं भरताधीशं नानुयाताऽसि रे जडे ! ॥ १५४ ॥
दिग्पाला निखिला यूयं कथं स्थ मेऽवनीतले ! यतो न रक्ष्यते दीनो निर्नाथो मरणात्त्वया ॥ १५५ ॥
प्रजापालो निगद्येत जनैस्त्वं सर्वतः सदा । मृतं मम सुतं तेन किं नात्र जीवयिष्यसि ? ॥ १५६ ॥
वार्द्धक्ये मे सुतो नीतो यमेनाऽयं निजालयम् । तेनाऽहं दुःखितोऽत्यन्तं जातोऽस्मि भूप ! सम्प्रति ॥ १५७ ॥
* यतः—वृद्धस्य मृतभार्यस्य मृतपुत्रस्य निश्रियः । जीवितान्मरणं श्रेयो न स्थातुं युक्तमत्र हि ॥ १५८ ॥卐
विप्रवाणीं समाकर्ण्य चक्रयाकार्य भिषग् वरान् । औषधं दापयामास तस्य जीवितहेतवे ॥ १५९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

औषधैर्भूरिभिर्दत्तैर्न जिजीव यदा स च । तदा शक्रो भिषग् रूप-धरोऽभ्येत्य जगावदः ॥ १६० ॥
यस्यालये न कः पूर्वं मृतोऽस्ति मानवः खलु । भूतिर्महानसात् तस्या-नीयतां भृत्यपार्श्वतः ॥ १६१ ॥
तेनैव भस्मना विप्र-पुत्रोऽवगुण्ड्यते यदि । तदा जीवति चक्रीश ! नान्यथा कर्हिचित्तदा ॥ १६२ ॥
ततो यस्य गृहे यान्ति भस्म लातुं नृपानुगाः । तदा तद्गेहनेतारः प्रोचुरेवं जनान् प्रति ॥ १६३ ॥
अस्माकं सदने पित्रादयः पूर्वं मृताः किल । ततो भूपानुगा लोकप्रोक्तं प्रोचुर्नृपाग्रतः ॥ १६४ ॥
ततो जगाद चक्रीशो मारिहीनाद् गृहान्मम । महानसोद्भवं भस्म भृत्या आनय तं द्रुतम् ॥ १६५ ॥
चक्रिभृत्येषु गृह्णत्सु भस्म चक्रिनिकेतने । चक्रिपत्न्यो जगुर्मृत्युं प्रययुः पूर्वजो घनाः ॥ १६६ ॥
ज्ञात्वैतच्चक्रिराट् प्राह समस्तलोकसद्मसु । पश्चत्वं पूर्वजा जग्मुः क्रियतेऽत्र किमौषधम् ? ॥ १६७ ॥
ततो रुदति भूदेवे-ऽत्यन्तं चक्रिसुतानुगाः । तत्रेत्योचुर्मृतिं स्वीय-स्वामिनां ज्वलनाहितः ॥ १६८ ॥
श्रुत्वैतत् सगरोऽत्यन्तं रुदन् दीनस्वरं भृशम् । रोदयामास पार्श्वस्थान् मानवान् पक्षिणोऽपि च ॥ १६९ ॥
रुदन् बाढं न चक्रेशो यदा तस्थौ मनागपि । तदा स वाडवः प्राह रुद्यते किं त्वया नृप ! ॥ १७० ॥
ममैको नन्दनो मृत्यु-गतोऽभूवमहं हतः । निराधारस्य मे सारं कः करिष्यति सम्प्रति ? ॥ १७१ ॥
यदा जीविष्यति मे पुत्रस्तदा जीवाम्यहं ननु । मृते पुत्रे मयाऽवश्यं हत्या देया तवाधुना ॥ १७२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदा चक्री जगौ विप्र ! जीवो मृत्युं व्रजन् क्वचित् । न रक्ष्यते सुरैर्भूपै-र्मातृ-पितृ-सहोदरैः ॥ १७३ ॥
ततो विप्रोऽगदद् राज-न्नहं निर्नन्दनोऽभवम् । द्वौ पुत्रौ तिष्ठेतां तेन किं रुद्यते त्वयाऽधुना ? ॥ १७४ ॥
ततश्चक्री जगौ विप्र ! मृता मे निखिलाः सुताः । तेनाहं त्वरितं प्राणां-स्त्यक्ष्यामि वह्नियोगतः ॥ १७५ ॥
ततश्चक्री चितां स्फारां निष्पाद्य नगराद्बहिः । प्रविश्याग्निं ददौ यावद्बलात् सज्जनसाक्षिकम् ॥ १७६ ॥
तदा द्विजन्मनो रूपं त्यक्त्वा शक्रो जगौ नृपम् । मया ते नन्दनौ द्वौ तु रक्षितावनुगाः पुनः ॥ १७७ ॥
विप्ररूपं मया कृत्वा शक्रेण रक्षिता मृतेः । एतौ तौ नन्दनावत्राऽऽनीतौ सम्प्रति वीक्ष्यताम् ॥ १७८ ॥
संसारो विद्यतेऽनित्यः पुत्रपौत्रादयः पुनः । सर्वं विनश्वरं वस्तु तेन शुच् क्रियते न हि ॥ १७९ ॥
इतोऽभ्येत्य नरः कश्चिन् नृपोपान्ते जगावदः । त्वत्सुतैः स्वर्नदी नीता क्ष्मां प्लावयति स्फुटम् ॥ १८० ॥
तां पश्चान्नय मार्गे त्वं नो चेद्भावी प्रजाक्षयः । ततः सगरचक्रेश-श्चितातो निरगात् क्षणात् ॥ १८१ ॥
दण्डरत्नेन गङ्गायाः प्रवाहं तं च दुःशकम् । निन्ये चक्री मरुन्नद्या मध्ये वैताढ्यशैलतः ॥ १८२ ॥
अत्रान्तरे मुकुन्दाह्वाः सूरयो ज्ञानशालिनः । अजितस्वामिनः शिष्या स्तत्राजग्मुः पुरान्तिके ॥ १८३ ॥
तत्र द्वितीयचक्रेशो गत्वा नत्वा गुरूत्तमान् । धर्म्मं श्रोतुमुपाविष्टः स्वकुटुम्बसमन्वितः ॥ १८४ ॥

अत्र धर्मोपदेशो वाच्यः ।

For Private and Personal Use Only

देशनान्ते जगौ चक्री पुत्रा मम कथं समम् । मृतिं प्रापुस्ततः पापं विहितं किं निगद्यताम् ? ॥ १८५ ॥
ज्ञानी प्राह धरापल्ल्यां ग्रामे श्रीपुरसञ्ज्ञके । वसन्तो बहवो भिल्लाः स्तैन्यं चक्रुर्निरन्तरम् ॥ १८६ ॥
श्रीभद्दिलपुरात् सङ्घो-ऽगच्छच्छत्रुञ्जयं प्रति । यदाऽगाच्छ्रीपुरे भिल्लाः प्रोचुरेवं मिथस्तदा ॥ १८७ ॥
अस्मिन् सङ्घे धनं भूरि विद्यते कनकादिकम् । लुण्टयित्वा ततोऽस्माभिः सुखेन भुज्यते सदा ॥ १८८ ॥
भिल्लैः षष्ट्या सहस्रैस्तु द्वाभ्यामूनैः प्रजल्पितम् । गृह्यते धनमेतेषां निर्वाहोऽस्ति सुखेन च ॥ १८९ ॥
तदोचतुः कुलालौ द्वौ तेषामग्रे शुभाशयौ । परस्वं नैव गृह्णेत यात्रिकाणां विशेषतः ॥ १९० ॥
एते श्राद्धा वपन्ति स्वं क्षेत्रेषु सप्तसु ध्रुवम् । यात्रां कुर्वन्ति तीर्थेषु व्ययन्तो विभवं निजम् ॥ १९१ ॥
प्राप्मभिः प्राक्कृतैरेवा-धुनाऽस्माकं कुजन्मना । दुर्भरं विद्यते वक्षा-दुःस्थत्वात् सन्ततं पुनः ॥ १९२ ॥
पुण्यानुबन्धिभिः पुण्यैः श्रावका दानिनोऽप्यमी । कुर्वाणाः सन्ततं पुण्य-मर्जयन्ति वृषं बहु ॥ १९३ ॥
आत्मभिः क्रियते पापं जनानां धनलुण्टनैः । भविष्यति ततः पातो दुर्गतावात्मनः खलु ॥ १९४ ॥
जल्पन्ताविति तौ कुम्भ-कारौ भद्रकभावकौ । निराकृत्य च तं सङ्घ-मलुण्टयन्मलिम्लुचाः ॥ १९५ ॥
षष्टिरेव सहस्राणि द्वाभ्या-मूनानि भिल्लकाः । लुण्टयित्वा च तं सङ्घं निर्वाहं स्वं व्यधुस्तदा ॥ १९६ ॥
इतश्च श्रीपुराधीशो-ऽभ्येत्य तत्र नृपो धनः । अवेष्टयत् पुरं तच्च भिल्लैः पूर्णं समन्ततः ॥ १९७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदा तौ निर्गतौ कुम्भ-कारौ ग्रामात्ततो बहिः । भिल्लास्ते कुर्वते युद्धं धनेन भूभुजा समम् ॥ १९८ ॥
ग्रामे ज्वालिते तस्मिन् तेन भिल्लास्तके तदा । अस्माभिर्यत् कृतं पापं तत्प्रादुरभवच्च नः ॥ १९९ ॥
ततः कुध्यानयोगात्ते दग्धाः कृपीटयोनिना । मृत्वा श्वभ्रे ययुः सर्वे पापिनां गतिरीदृशी ॥ २०० ॥
* यतः–" अनाज्यं भोज्यमप्राज्यं विप्रयोगः प्रियैः सह । अप्रियैः संप्रयोगश्च सर्वं पापविजृम्भितम् ॥ १ ॥卐
* मांचइ मांकुण घरु चूअइ चिल्लकडां बहू आइं । अक्कुबालणि जव तउणि नरगह एह फलाइं ॥ २ ॥ "卐
यः सङ्घोऽप्यर्हतां पूज्य-स्तीर्थङ्करैर्निवेदितः । तस्यापि प्रत्यनीकं ये कुर्वन्ते नारका हि ते ॥ २०१ ॥
आराध्यः सर्वथा सङ्घो न विराध्यः कदापि सः । सङ्घाराधनतो मुक्ति-र्नरकस्तद्विराधनात् ॥ २०२ ॥
वर्त्तमानांस्तीर्थमार्गे यात्रिकान् पीडयन्ति ये । सगोत्रास्ते विनश्यन्ति कुगतिं यान्ति च ध्रुवम् ॥ २०३ ॥
ते निर्गत्य ततः श्वभ्रान् मत्स्या जाता महाम्बुधौ । क्रमाच्च धीवरैर्बद्धाः प्रययुर्मरणं ध्रुवम् ॥ २०४ ॥
कर्णशृगाल्य आसंस्ते ततः केसरिणोऽभवन् । ततो मत्स्या महाम्भोधौ बभूवुः पातकोदयात् ॥ २०५ ॥
ततो मृत्वाऽभवन् भिल्ला वने त्त्रापि दुराशयाः । पापर्द्धितत्पराः साधु मपश्यन् शान्तचेतसा ॥ २०६ ॥
धर्म्मोपदेशमाकर्ण्य ते भिल्लाः साधुसन्निधौ । लेभिरे भद्रकं भावं सदयत्वं च तत्क्षणात ॥ २०७ ॥
चतुर्मासीं च भिल्लानां तेषां बोधकृते स्थितः । तत्र साधुस्ततस्ते तु-त्यजन् व्यसनसप्तकम् ॥ २०८ ॥

For Private and Personal Use Only

ततो मृत्वा क्रमाच्चक्रि-स्ते ते भूवंस्तनूभवाः । सङ्घलुण्टनपापेनाधुनाऽपि मरणं ययुः ॥ २०९ ॥

* यतः–“ अल्पायुर्निर्धनो रोगी किङ्करो मुखरोगयुग् । जायते तनुमान् श्वभ्रेऽनन्तानन्तासुखः क्रमात् ॥ १ ॥ 卐

* दीर्घमायुः परं रूप-मारोग्यं श्लाघनीयता । अहिंसायाः फलं सर्वं किमन्यत् कामदेव सा ॥ २ ॥ ” 卐

भीमो भगीरथः कुम्भ-कारजीवौ तु पुण्यतः । जिजीवतुर्यतः सङ्घं तदाऽलुण्टयतां न हि ॥ २१० ॥

* यतः–“ मनसापि च सङ्घस्य ये भक्तिं कुर्वते जनाः । तेषां स्वर्गापवर्गादि-सुखं भवति निश्चितम् ॥ १ ॥ ” 卐

* यतः–“ ये तीर्थयात्रिनो लोकान् वस्त्रान्नाम्बुविसर्जनैः । प्रीणयन्ति भवेत्तेषां तीर्थयात्राफलं महत् ॥ १ ॥ ” 卐

श्रीसङ्घः प्रथमं तीर्थं सोऽपि तीर्थपथे व्रजन् । पूज्यते हि विशेषेण श्रेयः कामयताऽऽत्मनि ॥ २११ ॥

एभिस्तव सुतैः पापं यत्कृतं सङ्घलुण्टनात् । तस्योदयान्मृताः सर्वे समकालं नरेश्वर ! ॥ २१२ ॥

अतः शोको न कर्त्तव्यः पुत्राणां मरणे सति । अनित्यं विद्यते सर्वं वस्तु पुत्रादिकं पुनः ॥ २१३ ॥

यः करोति तमःपुण्ये स एव तनुमान् पुनः । दुःखं सुखं च लभते परत्राऽत्र न संशयः ॥ २१४ ॥

राज्ये पुत्रे कलत्रेऽपि मा मोहं कुरु भूपते ! । स्वहितं श्रय सौख्याय क्व पुनर्मानवो भवः ॥ २१५ ॥

इति ज्ञानिमुखाज्ज्ञात्वा पुत्राणां पूर्वजान् भवान् । मुक्तशोकोऽभवच्चक्री वैराग्यं प्राप्तवान् पुनः ॥ २१६ ॥

इन्द्रोऽपि क्षमयित्वा स्व-मपराधं चक्रिसन्निधौ । वन्दित्वा ज्ञानिनं स्वर्गे जगामाऽनघमानसः ॥ २१७ ॥

सगरोऽपि प्रणम्याथ ज्ञानिनं तं सुभक्तितः । निजावासमलञ्चक्रे पुत्रद्वयसमन्वितः ॥ २१८ ॥

अन्येद्युश्चक्रिराड् गत्वाऽजितस्य स्वामिनोऽन्तिके । शत्रुञ्जयस्य माहात्म्यं शुश्रावेति कृतादरः ॥ २१९ ॥

* ये शत्रुञ्जयतीर्थे तु यात्रां कुर्वन्ति मानवाः । तेषां स्वर्गापवर्गादि-सुखाली जायते चिरम् ॥ २२० ॥ 卐

* "यतः—प्राणिभिर्य समारूढैः लोकाग्रमतिदुर्लभम् । प्राप्यते स च सिद्धाद्रि-दुर्लभो देहिनामिह ॥ १ ॥" 卐

* अभव्या पापिनो जीवा सिद्धाद्रिं भावतो न हि । पश्यन्ति न नमस्यन्ति पूजयन्ति च नो पुनः ॥ २२१ ॥卐

* सिद्धाद्रौ मणिरत्नाद्यै हैंमरुप्यदृषच्चयैः । काष्ठैर्वा जिननाथस्य प्रासादः प्रवितन्यते ॥ २२२ ॥卐

* कारयन्ति जिनानां ये तृणावासानपि स्फुटम् । अखण्डितसुखान्येत्र लभन्ते ते त्रिविष्टपे ॥ २२३ ॥卐

* काष्ठादीनां जिनावासे यावन्तः परमाणवः । तावन्ति पल्यलक्षाणि तत् कर्त्ता स्वर्गभाग् भवेत् ॥ २२४ ॥卐

* नूतनार्हद्गृहावास-विधाने यत्फलं भवेत् । तस्मादष्टगुणं पुण्यं जीर्णोद्धारे विवेकिनाम् ॥ २२५ ॥卐

* शत्रुञ्जयादितीर्थेषु प्रासादाः (न्) प्रतिमाश्च ये । कारयन्ति हि तत्पुण्यं ज्ञानिनो यदि जानते ॥ २२६ ॥卐

* बिम्बानि जिननाथानां मणिरत्नैश्च हेमभिः । रूप्यैः काष्ठैर्दृषद्भिर्वा मृदा वा भावशुद्धितः ॥ २२७ ॥卐

* एकाङ्गुष्ठादिसत्सप्त-शताङ्गुष्ठावधि प्रभोः । यः कारयति भव्यात्मा मुक्तिश्रीस्तस्य वश्यगा ॥२२८॥ युग्मम् ॥卐

* प्रतिष्ठामर्हतो यो हि कारयेत् सूरिमन्त्रतः । सोऽर्हत् प्रतिष्ठां लभते यथा वापस्तथा फलम् ॥ २२९ ॥卐

यावद्वर्षसहस्राणि पूजयन्ति जिनं जनाः । तावत्कालं बिम्बकर्त्ता लभते तत्फलांशकम् ॥ २३० ॥
श्रुत्वेति सगरश्चक्री हेम्नो देवालयान् वरान् । शतान्यष्टौ व्यधान्मन्त्रि-पार्श्वाद् भूरिधनव्ययात् ॥ २३१ ॥
सहस्रं सप्तकं काष्ठ-मयान् देवालयान् पुनः । कारयामास चक्रेश-स्तीर्थयात्राकृते तदा ॥ २३२ ॥
आकारितस्तदा सङ्घ-स्त्रिशत् कोटिनरप्रमः । मिलितश्चक्रिणः सङ्घे आचार्या बहवः पुनः ॥ २३३ ॥
द्वात्रिंशत् सहस्राणि नृपा मुकुटबद्धनाः । आगताश्चक्रिणस्तस्य सङ्घे यात्राकृते तदा ॥ २३४ ॥
इत्यादि भूरिभिः श्राद्धैः श्राविकाभिश्च भूरिशः । महाधरैर्महोभिश्च सहितश्चक्रनायकः ॥ २३५ ॥
गायत्सु मागधाद्येषु नृत्यत्सु नर्त्तकेषु च । धवलेषु दीयमानेषु पुरन्ध्रीभिश्च सोऽचलत् ॥ २३६ ॥
प्रपूजयन् पुरे ग्रामे जिनाधीशान् सदुत्सवम् । नमन्मुनीन् ददद्दानं चक्री सिद्धाचले ययौ ॥ २३७ ॥
तत्रानन्दपुरे नाम्ना वृद्धनगरसञ्ज्ञके । कारिते भरतेनाऽऽदि-जिनौकस्यनमज्जिनम् ॥ २३८ ॥
आनन्दाह्वपुरे देव-पूजां कृत्वा सुविस्तरात् । चक्री चकार साधर्म्य-वात्सल्यं विपुलं तदा ॥ २३९ ॥
त्रिःप्रदक्षिणयंस्तीर्थं भूपः सङ्घेन शालितः । आरुरोह गिरिं दानं ददन्नुत्सवपूर्वकम् ॥ २४० ॥
आदौ श्रीवृषभं पुष्पै-रर्चयित्वा च चक्रिराट् । राजादनीतले पादौ प्रभोरपूजयन्मुदा ॥ २४१ ॥
तदा तत्राऽऽगतः शक्रः प्रणम्य वृषभं प्रभुम् । मिलितश्चक्रिणा राजा-दनीवृक्षतले मुदा ॥ २४२ ॥

ततो विस्तरतो मूल-नायकस्य पुरो नृपः । स्नात्रपूजा-ध्वजारोपा-ऽऽरात्रिकादिविधिं व्यधात् ॥ २४३ ॥
ततो देवाभिधे शृङ्गे बाहुबल्यभिधे पुनः । तालध्वजे च कादम्बे हस्तिसेनाह्वये पुनः ॥ २४४ ॥
लौहिताख्ये मुकुन्दाख्ये सुन्दरे च पुरन्दरे । इत्यादि सर्वशृङ्गेषु पूजां चक्रेऽर्हतां नृपः ॥ २४५ ॥ युग्मम् ॥
मृदङ्ग-झल्लरी-घण्टा-छत्र-चामरमोचनम् । प्रभोः पूजाकृते चक्री चकारामोदपूरितः ॥ २४६ ॥
इन्द्रोत्सवं हारपूजा छत्र-चामरमोक्षणम् । रथावन्यश्वदानानि व्यधाच्चक्री गुरोर्गिरा ॥ २४७ ॥
प्रासादान् कारितान् रूप्य-रत्नहेममयान् वरान् । अन्यैरपि नृपैर्दृष्ट्वा सगरो ध्यातवानिदम् ॥ २४८ ॥
विवेकविकला धर्म्म-रिक्ता लोभान्धचक्षुषः । कालमाहात्म्यतो लोका भविष्यन्त्यग्रतः खलुः ॥ २४९ ॥
ततो हेमादिलोभेन लोकाः पापमलीमसाः । करिष्यन्त्येव विध्वंसं प्रासाद-बिम्बयोरपि ॥ २५० ॥
तेनाहमस्य तीर्थस्या-म्भोधेर्वेलाधिकर्षतः । विधाय परिखां रक्षां करोम्येष प्रयत्नतः ॥ २५१ ॥
नयन्नब्धिप्रवाहं स सगरः परितो गिरेः । टंककान् कङ्कणान् स्वर्णान् बर्बरान् सिंहलानपि ॥ २५२ ॥
लाट-सुराष्ट्र-भाटादि-विषयान् विविधांस्तदा । प्लावयन् चक्रिराट् प्रोक्तः शक्रेणेति सुभक्तिकम् ॥ २५३ ॥ ॥ २८६ ॥
अधुना प्लावयन् पृथ्वीं वेलया वारिधिः खलु । शत्रुञ्जयस्य तीर्थस्य विध्वंसं त्वं करिष्यति (सि) ॥ २५४ ॥
याते तीर्थस्य विध्वंसे कस्मिन् भविकमानवाः । यात्रां कृत्वाऽर्जयिष्यन्ति मुक्तियोग्यं वृषं खलु ॥ २५५ ॥

यतः–" रविं विना यथा घस्रो विना पुत्रं यथा कुलम् । विना जीवं यथा देहं विना दीपं यथा गृहम् ॥ १ ॥
विना विद्यां यथा मर्त्यो विना चक्षुर्यथा मुखम् । विना छायां यथा वृक्षो यथा धर्मो दयां विना ॥ २ ॥
विना धर्म्मं यथा जीवो विना वारि यथा जगत् । विना तथा तीर्थमिदं भूतसृष्टिर्हि निःफला ॥ ३ ॥"
निरुद्धेऽस्मिन् महातीर्थे भवाब्धौ मज्जतां नृणाम् । तारणं विद्यते तीर्थ-मन्यन्नात्र महीतले ॥ २५६ ॥
* सर्वज्ञो न यदा देवो न धर्मो न सदागमः । तदाऽसौ सर्वलोकानां शैलः कामातिदायकः ॥२५७॥ 卐
इति शक्रगिरा चक्र-वर्त्यभिज्ञानहेतवे । तस्थौ वार्द्धिप्रवाहस्या-तीचलस्थापना कृता ॥ २५८ ॥
त्र्यम्बावती-सोपारक-द्वारवत्यादिसन्निधौ । अद्यापि दृश्यतेऽम्भोधि-र्वाहस्तालध्वजान्तिके ॥ २५९ ॥
शक्रमापृच्छ्य चक्रेशो मूर्त्ती रत्नमणीमयीः । रैगुहायां निनायाशु जिनगेहे स्वकारिते ॥ २६० ॥
तत्रस्थाः प्रतिमा जैनी रत्नस्वर्णमणिमयीः । पूजयन्ति सुरा यक्षा-श्चक्रीशक्रनिदेशतः ॥ २६१ ॥
चतुर्विंशतितीर्थेशां प्रासादांश्च पृथक् पृथग् । कारयित्वाऽर्हतां मूर्त्ती रतिष्ठिपत् स चक्रिराट् ॥ २६२ ॥
सगरः क्षोणिभुग् पुत्रै-रन्यैरपि महीधवैः । कारितास्तत्र सर्वज्ञा-ऽऽलयाः कैलाससोदराः ॥ २६३ ॥
यत उक्तं च–" प्रभोः पश्चिमदिग्भागे संस्थां स्वर्णगुहामधः । कूपिका-कल्पवृक्षादि-वनानि निर्जराधिपः ॥ २६४ ॥
कारयित्वा प्रयत्नेन तत्र मूर्त्तिजिनेशितुः । निदधावपि पूजायै यक्षान् चादिशदादरात् ॥ २६५ ॥ युग्मम् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिखरेऽथ सुभद्राऽऽख्ये द्वितीयस्य जिनेशितुः । अचीकरन् जिनागारं चक्री रूप्यमयं महत् ॥ २६६ ॥
सुचारित्रैर्गणाधीशैः सुश्राद्धैः सुसुरैरपि । चक्रे तत्र प्रतिष्ठाया महः पूजापुरस्सरम् ॥ २६७ ॥
प्रासादोद्धरणं कृत्वा सगरो विमलाचले । अचालीद्रैवतं शृङ्गं नन्तुं नृपनरैः समम् ॥ २६८ ॥
चन्द्रप्रभं जिनं तीर्थे वर्ये चन्द्रप्रभासके । नत्वा चक्री ययौ नन्तुं रैवतं शृङ्गमञ्जसा ॥ २६९ ॥
त्रिःप्रदक्षिणयन् शृङ्गं रैवतं सगरो नृपः । पूजां व्यधाज्जिनेशस्य विस्तरात् कुसुमादिभिः ॥ २७० ॥
एवमर्बुदभूमीध्रा-दिकतीर्थेषु शालिषु । अर्चयित्वा जिनानागा-दयोध्यां लसदुत्सवम् ॥ २७१ ॥
पावयन् धरणीं पद्भ्या-मजितस्तीर्थकृत् क्रमात् । अयोध्यानगरोद्याने सुरार्च्यः समवासरत् ॥ २७२ ॥
श्रुत्वा जिनागमं चक्री गत्वा नत्वा जिनक्रमौ । धर्म्मं श्रोतुमुपाविष्टो यथास्थानं च संसदि ॥ २७३ ॥
सार्वभौमप्रबोधाय जिनाधीशोऽजितस्तदा । धर्मोपदेशनां कर्त्तुं प्रववर्ते इति स्फुटम् ॥ २७४ ॥
तथाहि–" राज्यं पुत्रकलत्रबन्धुनगराण्यावासवित्तादिकं, देवर्द्धिश्च भवे भवेऽत्र सुलभान्यन्यानि रम्याण्यपि ।
मुक्ताविद्रुमरत्नवत्पुनरिदं चारित्रमुक्तं जिनै-श्चिन्तारत्नमिवातिदुर्लभतमं सर्वार्थसंसाधकम् ॥ १ ॥"
चारित्रादेकदिवस-पालितादपि मानवः । अवश्यं कर्म्मसङ्घातं क्षिप्त्वा याति परं पदम् ॥ २७५ ॥
न च राजभयं न च चौरभयं इहलोकसुखं परलोकहितम् । वरकीर्त्तिकरं नरदेवनतं श्रमणत्वमिदं रमणीयतरं ॥

For Private and Personal Use Only

मही रम्या शय्या विपुलमुपधानं भुजलता, चाकाशं व्यजनमनुकूलोऽयमनिलः ।
स्फुरद्दीपश्चन्द्रो विरतिवनितासङ्गमुदितः, सुखं शान्तः शेते मुनिरतनुभूतिर्नृप इव ॥ २७७ ॥
"दो तंबडाइं हत्थे वयणे धम्मक्खराणि चत्तारि । विउलं च भरहवासं को अम्ह पहुत्तणं हरइ ? ॥ १ ॥
आकर्ण्यैतज्जिनाधीश-वचः सगरचक्रिराट् । भगीरथसुतं स्वीय-पट्टे चास्थापयल्लघु ॥ २७८ ॥
अष्टाह्निकामहः सर्व-जिनागारेषु विस्तरात् । कृत्वा स्वयं धनं भूरि ददावर्थिभ्य आदरात् ॥ २७९ ॥
महीपालः सहस्रेण समं सगरचक्रिराट् ! अजितान्ते ललौ दीक्षां शक्र-सूनुकृतोत्सवः ॥ २८० ॥
तदा प्रभुर्जगावेवं सगरर्षे ! त्वयाऽधुना । पालनीयं व्रतं शुद्धं कल्याणसुखहेतवे ॥ २८१ ॥
* यतः-"सिंहत्ताए निक्खित्ताए सिंहत्ताए पालित्ता, सिंहत्ताए निक्खित्ता सीआलत्ताए पालित्ता, 卐
सीआलत्ताए निक्खित्ता सिंहत्ताए पालित्ता, सीआलत्ताए निक्खित्ता सीआलत्ताए पालित्ता ॥"
अजितस्वामिना सार्द्धं विहरन् सगरो यतिः । वैयावृत्त्यं वितन्वान-श्चकार विविधं तपः ॥ २८२ ॥
यतः-"अनशनमौनोदर्यं वृत्तेः संक्षेपणं तथा । रसत्यागस्तनुक्लेशो लीनतेति बहिस्तपः ॥ २८३ ॥
प्रायश्चित्तं वैयावृत्त्यं स्वाध्यायो विनयोऽपि च । व्युत्सर्गोऽथ शुभध्यानं षोढेत्याभ्यन्तरं तपः ॥ २८४ ॥
दीप्यमाने तपो वह्नौ बाह्ये चाभ्यन्तरेऽपि च । यमी जरति कर्म्माणि दुर्जराण्यपि तत्क्षणात् ॥ २८५ ॥

स्वामिनृसिंहसेनाद्या रुचिरा गणधारिणः । अभूवन् पञ्चनवति-प्रमाणा जिनभक्तिकाः ॥ २८६ ॥
शत्रुञ्जये बहून् वारान् गत्वा प्रबोध्य मानवान् । समेतशिखरेऽन्येद्यु-रजितस्तीर्थकृत् ययौ ॥ २८७ ॥
यतः—सहस्रत्रितयवारान् शत्रुञ्जयमहीधरे । अजितः समवासार्षीत् साधुसुरनृपाऽऽनतः ॥ १ ॥"
सहस्रसाधुसंयुक्त-स्त्यक्तमासाशनोद्यतः । चैत्रस्य शुक्लपञ्चम्यां जगाम परमं पदम् ॥ २८८ ॥
सगरोऽपि बहून् भव्यान् बोधयन्नजितेशवत् । घातिकर्म्म क्षयादाप केवलज्ञानमुज्ज्वलम् ॥ २८९ ॥
प्रबोध्य सुचिरं भव्य-जीवान् सुधर्म्मकर्म्मणि । श्रीमत्-सिद्धाभिधे शैले सगरर्षिः शिवं ययौ ॥ २९० ॥

॥ श्री व्यन्तरेशकृतोद्धारः ॥

जिनोऽभिनन्दनोऽन्येद्यु-र्विहरन् वसुधातले । ययौ शत्रुञ्जये शैले भवाब्धितारणे नृणाम् ॥ १ ॥
राजादनीतले देव-कोटाकोटि-निसेवितः । शत्रुञ्जयस्य माहात्म्यं जगादेत्यभिनन्दनः ॥ २ ॥
अयं शत्रुञ्जयक्ष्माध्र आन्तराऽरिनिषूदनः । सर्वपापहरो मुक्ति-सातसन्ततिदायकः ॥ ३ ॥
प्राप्तेषु मुक्तिमर्हत्सु नष्टे धर्मेऽपि केवले । सर्वकल्याणकृत्तीर्थ-मिदमेव भविष्यति ॥ ४ ॥

For Private and Personal Use Only

सिद्धाद्रौ ये जना देवं ध्यायन्ति पूजयन्ति च । अल्पकालादपि क्षिप्त्वा कर्म्म यास्यन्ति ते शिवम् ॥ ५ ॥
प्रासादप्रतिमायात्रा-पूजादानादि कुर्वते । सिद्धाद्रौ ये गमिष्यन्ति तेऽपि निर्वृतिमञ्जसा ॥ ६ ॥
श्रुत्वेति व्यन्तराधीशा-स्तदैवोत्पन्नभक्तिकाः । चक्रुः सिद्धाचले जीर्णो-द्धारान् नव्यान् जिनालयान् ॥ ७ ॥

॥ श्री चन्द्रयशःकृतो नवमोद्धारः ॥

चन्द्रप्रभुर्जिनाधीशो बोधयन् भव्यमानवान् । ययौ शत्रुञ्जये शैले सुरासुरनमस्कृते ॥ १ ॥
तत्र प्रबोध्य भव्याङ्गि-व्रातं भूरि जिनेश्वरः । सगरानीतपाथोधि-तीरे ब्राह्मयास्तटेऽगमत् ॥ २ ॥
शशिप्रभापुराधीश-शशिशेखरभूपतेः । राज्ञी चन्द्रप्रभाह्वाऽऽसीत् पुत्रश्चन्द्रयशोभिधः ॥ ३ ॥
राज्ञीपुत्रयुतो राजा नत्वा चन्द्रप्रभं जिनम् । धर्म्मं श्रोतुमुपाविष्टो भवाम्भोनिधितारकम् ॥ ४ ॥
* आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं, व्यापारैर्बहुकर्म्मभारगुरुभिः कालो न च ज्ञायते । 卐
दृष्ट्वा जन्मजराविपत्तिमरणत्रासश्च नोत्पद्यते, पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ ५ ॥
सेवितात् पुण्डरीकाद्रे-र्ध्यानाज्जिनपतेरपि । इह सम्पद्यते लक्ष्मीः परत्र निर्वृतिर्नृणाम् ॥ ६ ॥

For Private and Personal Use Only

* तीर्थेष्विदं मुख्यतीर्थं देवेष्विव जिनेश्वरम् । ध्यानेषु सुन्दरं ध्यानं ब्रह्मचर्यं व्रतेषु च ॥ ७ ॥卐
* श्रामण्यं सर्वधर्म्मेषु प्रथमं खलु कथ्यते । अतः शत्रुञ्जये तीर्थे ध्येयः सद्भिः जिनेश्वरः ॥ ८ ॥卐
प्रभोर्मुखाद् वृषं श्रुत्वा चन्द्रशेखरभूपतिः । सप्रियः स्वं सुतं राज्ये न्यस्य संयममाददौ ॥ ९ ॥
धरणेन्द्रः प्रभोः कायो-त्सर्गस्थानेऽम्बुधेस्तटे । चन्द्रकान्तमणीबिम्बं प्रासादेऽतिष्ठिपत्तदा ॥ १० ॥
ततश्चन्द्रप्रभो जीवान् बोधयन् भूरिशो भुवि । श्रीउज्जयन्तभूमिध्रे ययौ साधुसुरार्चितः ॥ ११ ॥
तत्र प्रभोर्गिरा प्राप्य संयमं बहवो जनाः । सर्वकर्म्मक्षयान्मुक्ति-नगरीमगमन् क्रमात् ॥ १२ ॥
बहु कालं बहून् भव्यान् प्रबोध्य जिनधर्म्मणि । चन्द्रप्रभो जिनाधीशो ययौ सम्मेतभूधरे ॥ १३ ॥
चन्द्रशेखरराजर्षि-र्गत्वा सम्मेतपर्वते । चन्द्रप्रभशिवस्थानं ननाम बहुसाधुयुग् ॥ १४ ॥
* यतः–"निक्खमणनाणनिव्वाण जम्मभूमीओ वंदइ जिणाणं ।卐
न य वसइ साहुविरहिअंमि देसेवि बहुगुणेवि ॥ १ ॥"
तदा तत्र समागत्य वैरिमर्दनभूपतिः । प्रासादं कारयित्वा श्री-चन्द्रप्रभमतिष्ठिपत् ॥ १५ ॥
मुनेरागमनं श्रुत्वा भूपश्चन्द्रयशास्तदा । तत्र गत्वा प्रणम्य श्री-धर्म्मं श्रोतुमुपाविशत् ॥ १६ ॥
देशनान्ते नृपोऽप्राक्षीत् केनेदं मेदिनीभुजा । 'चन्द्रप्रभास' नामेति तीर्थं प्रावर्तितं किल ॥ १७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चन्द्रशेखर आहाऽथ चन्द्रप्रभोऽत्र तीर्थकृत् । धर्म्मस्य देशनां चक्रे भव्येभ्यो हितकाम्यया ॥ १८ ॥
अतश्चन्द्रप्रभासाख्यं विख्यातमभवद् भुवि सेवया चास्य तीर्थस्य जायन्ते शिवसम्पदः ॥ १९ ॥
* यतः–" विभुर्यत्र जलध्यन्त-रस्थात् प्रतिमया स्थिरः। उद्वेलश्चाभवद् वार्द्धि-रुर्ध्वमूर्ध्वंच गतस्तदा ॥१॥ "卐
लवणाम्बुधिनाथेन लवणेन च भक्तितः । स एवारुन्धि जलधि-श्छत्रीभूतेन सर्वतः ॥ २० ॥
इह पूर्वं युगादीश-पौत्रेण शशिकीर्त्तिना । चन्द्रोद्यानान्तिके चन्द्र-प्रभस्य भाविनोऽर्हतः ॥ २१ ॥
शत्रुञ्जय कल्पवृ० ॥ २९३ ॥ प्रासाद-प्रतिमे वर्ये कारिते भूरि-रैव्ययात् । ततश्चेदं महत्तीर्थं पावनं जगतामभूत् ॥ २२ ॥ युग्मम् ॥
अभूत् समवसरणं योजनप्रमितं क्षितौ । चन्द्रप्रभस्य देवस्य वप्रत्रयविराजितम् ॥ २३ ॥
प्रायस्तत्र मृता जीवा गच्छन्ति त्रिदशालयम् । शुद्धभावाश्च कल्याण-कमलां वृण्वते किल ॥ २४ ॥
त्यक्त्वाऽत्र सर्वसावद्यं ये तपन्ति तपः सदा । सर्वकर्म्मक्षयं कृत्वा ते गच्छन्ति शिवालयम् ॥ २५ ॥
नरके न न तिर्यक्षु प्रयान्त्यत्र मृता जनाः । किन्तु नृत्रिदिवश्रेयः-सुखानि वृण्वते द्रुतम् ॥ २६ ॥
अस्य तीर्थस्य रक्षायै सगरः सागरं किल । अत्रानैषीज्जिनेन्द्रस्य वृषभस्य निषेवितुम् ॥ २७ ॥
जिनस्नात्रकृते ब्राह्मी नदी ब्रह्मविडौजसा । अत्रानीताऽभवन्नृणां क्रमात् पवित्रहेतवे ॥ २८ ॥ ॥२९३॥
श्रुत्वेति भूपतिश्चन्द्र-यशाश्चन्द्रमणीमयम् । प्रासादं च प्रभोर्बिम्ब-मिहैवातिष्ठिपन्मुदा ॥ २९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पितुर्भक्त्या पितुर्मूर्त्तिं चन्द्रकान्तमणीमयीम् । अस्थापयन्नृपस्तस्मिन् प्रासादे पुण्यहेतवे ॥ ३० ॥
चन्द्रशेखरराजर्षिः सर्वकर्म्मक्षयात् क्रमात् । अलञ्चकार कल्याण-नगरीं क्षीणपातकः ॥ ३१ ॥
नृपश्चन्द्रयशाः सङ्घं मेलयित्वा बहुं क्रमात् । सिद्धशैले ययौ नन्तुं जिनान् कुर्वन् महोत्सवम् ॥ ३२ ॥
सोऽपि भूपः क्वचित्तत्र वीक्ष्य जीर्णान् जिनालयान् । उद्धार व्ययँल्लक्ष्मीं नवीनांश्च व्यधाद् वरान् ॥३३॥
ततो रैवतसम्मेत-शिखरार्बुदसानुषु । यात्रां कृत्वा व्यधाद् भूपो नवीनान् श्रीजिनालयान् ॥ ३४ ॥
लक्षार्द्धं जिनसद्मानि बिम्बानि कोटिपञ्चकम् । कारयामास भूपालो भूयिष्ठविभवव्ययात् ॥ ३५ ॥
क्रमात् स्वं नन्दनं राज्ये न्यस्य चन्द्रयशा नृपः । गृहीत्वा संयमं कर्म्म-क्षयात् कल्याणमीयिवान् ॥३६॥

वासासु चउमासं जत्थ ठिया अजियसंतिजिणनाहा ।
बियसोलधम्मचक्की जयउ तयं पुंडरी तित्थं ॥ १८ ॥

शान्तिनाथस्य वर्णनत्वात् इयं गाथाऽत्र व्याख्येया, अजितजिनस्य पश्चाद् व्याख्या कृता, वर्षा चतुर्मासी यत्र तीर्थे अजित-शान्तिनाथौ द्वितीय-षोडशधर्म्मचक्रिणौ स्थितौ, तत् पुण्डरीकं तीर्थं जयतात् तथाहि—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री शान्तिनाथस्य चतुर्मासस्थितिः शत्रुञ्जयेऽभूदिति सम्बन्धः ।

हस्तिनागपुरे वर्ये विश्वसेन-नरेशितुः । अचिरागेहिनी पुत्रं प्रासूत रुचिरेऽहनि ॥१॥ तस्येन्द्रकृतोत्सवादि वाच्यम् ।
क्रमाच्चक्रिपदं प्राप्य षट्खण्डां मेदिनीं समाम् । पालयन् जनतां सुख्य-कार्षीत् शान्तिनृपोऽनघः ॥ २ ॥
सार्वभौमर्द्धिमह्वाय त्यक्त्वा लात्वा व्रतश्रियम् । क्रान्त्वा छद्मस्थतां प्राप ज्ञानं पञ्चममञ्जसा ॥ ३ ॥
शान्तिनाथोऽन्यदा कोटा-कोटिनिर्जरसेवितः । शत्रुञ्जयान्तिके सिंहो-द्यानं वर्यमशिश्रियत् ॥ ४ ॥
इतः पुरे प्रतिष्ठाने ब्राह्मणो मदनाभिधः । मिथ्यात्वी मण्डयामास यज्ञं शोभनवासरे ॥ ५ ॥
तत्र भिक्षार्थमन्येद्युः साधु-र्यावद्ययौ किल । तावत् स ब्राह्मणः साधुं हक्कयामास कर्कशम् ॥ ६ ॥
साधुः प्राह युगादीश-पुत्रो भरतभूपतिः । पठनाय द्विजानां यान् व्यधाद् वेदानहिंसकान् ॥ ७ ॥
लोभान्धैस्तैर्द्विजैः काल-क्रमादाजीविकाकृते । वेदा हिंसात्मकास्ते तु कृता दुर्गतिहेतवे ॥ ८ ॥
श्रुत्वेति ब्राह्मणो रुष्टः श्रवमुत्पाट्य वेगतः । धावन् हन्तुं मुनिं स्तम्भे स्खलितो न्यपतद् भुवि ॥ ९ ॥
मृत्वाऽऽर्त्तितो द्विजः सोऽपि सिद्धाद्रिगिरिपार्श्वगे । सिंहोद्यानेऽभवत्पञ्चा-ननः क्रूरतराशयः ॥ १० ॥
सोऽपि पञ्चानन-स्तत्र स्थितोऽनेकांस्तनूमतः । हन्ति कोपवशात्तेन कोऽपि नोपैति तत्र च ॥ ११ ॥
भ्रमन् पञ्चाननः शान्ति-नाथमालोक्य कोपतः । हन्तुमुत्पाट्य पाणिं स्व-मधावच्छोणितेक्षणः ॥ १२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

धावन् सिंहस्तरोः स्कन्धे आस्फाल्य लोष्टुवत् दृढम् । पश्चादपासरद्भूमौ न्यपतत् काष्ठवत् क्षणात् ॥ १३ ॥
उत्थायोत्थाय पश्चास्यो धावन् हन्तुं प्रभुं तदा । पपात लोष्टवद् भूमौ कुष्ठं देहे ततोऽभवत् ॥ १४ ॥
ततः पुनः पुनः पश्यन् प्रभुं दध्याविदं हृदि । एवंविधो मया साधुः कुत्रापि वीक्षितः पुरा ॥ १५ ॥
एवं ध्यायन् हरिर्जाति-स्मृतिं प्राप्य क्षणात्तदा । प्राग्भवं द्विजजं चित्ते सस्मार शान्तमानसः ॥ १६ ॥
तदोक्तं प्रभुणा पश्चा-द्भवं स्मर द्विजाधम ! । हिंसंस्त्वं श्रमणं मृत्वा जातो हरिरिहाधुना ॥ १७ ॥
ततः पश्चाननः शान्त-चेताः प्रभोः क्रमद्वयम् । नमन् निन्दति कर्म्म स्वं प्राग्भवोपार्जितं स्वयम् ॥ १८ ॥
सिद्धाद्रेरुपरि स्वामी यदागाद् विहरन् क्रमात् । तदा सोऽप्याययौ तत्र पश्चास्यः शान्तमानसः ॥ १९ ॥
गृहीत्वाऽनशनं तत्र प्रभोः पार्श्वे हरिः स च । द्वितीये ताविषे जातः सुरो भासुरदीप्तिमान् ॥ २० ॥
मरुदेवाभिधे शृङ्गे स्वामी साधु-सुरैर्वृतः । अजितस्वामिवन्मासां-श्चतुरोऽस्थात् क्षरागमे ॥ २१ ॥
तत्रैत्य हरिगीर्वाणः प्रणम्य प्रभुमुक्तवान् । त्वत्प्रसादादहं सिंहो मृत्वाऽभवं सुरो वरः ॥ २२ ॥
त्वं मे माता पिता त्वं मे त्वं चार्यो मे च सोदरः । त्वं सुहृत् त्वं मम स्वामी स्वर्गसौख्यप्रदानतः ॥ २३ ॥
विहृते शान्तितीर्थेशे-ऽन्यत्र पश्चाननः सुरः । तत्र शृङ्गे महच्चैत्यं व्यधाच्छान्तिजिनेशितुः ॥ २४ ॥
तस्मिँश्चैत्ये स्फुरद्रत्न-मयं बिम्बमनोहरम् । न्यवीविशत् शिवप्राप्त्यै स्वस्याऽन्यस्य च बोधकृत् ॥ २५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अध्युष्टकोटयो देवाः शान्तिसेवकतत्पराः । शान्त्याराधककर्तृभ्यो ददते नृभ्य ईप्सितम् ॥ २६ ॥
तत्र शृङ्गे सुरः सोऽपि प्रासादान् भूरिशोऽर्हताम् । चकार निर्वृतेः सौख्य प्राप्त्यै कैलाससोदरान् ॥ २७ ॥
विहृत्य शान्तिनाथोऽथ भगवान् पावयन् भुवम् । क्रमाद् गजपुरोद्याने सुन्दरे समवासरत् ॥ २८ ॥
श्रीशान्तितनयश्चक्र-धराह्वस्त्वरितं तदा । नत्वा प्रभुं वृषं श्रोतुं यथास्थानमुपाविशत् ॥ २९ ॥
ततः शान्तिजिनः प्राह धर्म्मं मुक्ति-सुखप्रदम् । दान-शील-तपो-भावं चतुर्धा भवभेदकम् ॥ ३० ॥
"पच्चक्खाणं पूआ पडिक्कमणं पोसहो परुवयारो अ । पंच पयारा जस्स य न पयारो तस्स संसारे ॥ १ ॥
सामायिका-ऽऽवश्यक-पौषधानि, देवार्चन-स्नान-विलेपनानि ।
ब्रह्मक्रिया-दान-दयामुखानि भव्याः सदा भावभरात् श्रयन्तु ॥ २ ॥"
शीलं शत्रुञ्जयः शैलः समत्वं सार्वसेवनम् । श्रीसङ्घाधिपतित्वं च शिवश्रीदायका अमी ॥ ३१ ॥
श्रुत्वा प्रभोर्वचश्चक्र-धरभूपो जगावदः । यात्रां शत्रुञ्जये कुर्वे विस्तराद्भरतेशवत् ॥ ३२ ॥
भव्यान् बोधयितुं शान्तिनाथेऽन्यत्र गते सति । चक्री चक्रे सदा धर्म्मं जैनेन्द्रं शिवशर्मदम् ॥ ३३ ॥
अन्येद्युश्चक्रिसूर्दध्यौ प्रातरेवं शिवाचले । गम्यते चेज्जिनान्नन्तुं तदा श्लाघ्यं जनुर्भवेत् ॥ ३४ ॥
विमृश्येति तदा चक्रधरो धरणिनायकः । सङ्घमाह्वातुमप्रैषीद् बह्वीः कुङ्कुमपत्रिकाः ॥ ३५ ॥

For Private and Personal Use Only

शत्रुञ्जय
कल्पवृ०
॥ २९८ ॥

आगते तु बहु सङ्घे सुलग्ने शान्तिनन्दनः । यात्रां कर्तुं चचालाऽथ कुलकृतमङ्गलः ॥ ३६ ॥
जाम्बूनदमया देवा-लया शतानि षोडश । चेलुः काष्ठमया वर्या-श्चतुःसहस्रसम्मिताः ॥ ३७ ॥
द्वात्रिंशच्च सहस्राणि भूपाश्चेलुर्मनोरमाः । इभ्या लक्षमिता कोटि-मिता अन्ये जनाः पुनः ॥ ३८ ॥
चलन् सङ्घः पुरे ग्रामे कुर्वन् स्नात्रमहोत्सवम् । सुराष्ट्राराष्ट्रमायातः शत्रुञ्जयस्य सन्निधौ ॥ ३९ ॥
देवालयपुरस्तस्य निषण्णस्य महीपतेः । एत्य कश्चित् खगो नत्वा कृताञ्जलिः स्थितो मुदा ॥ ४० ॥
भूपोऽप्राक्षीत् कुतः स्थानात् कस्त्वं किमर्थमागतः । दीनास्यो दृश्यसे कस्मा-च्चारुरूपधरोऽपि हि ? ॥ ४१ ॥
खेटद्रङ्गपते रत्न-प्रियस्य व्योमगामिनः । कलाप्रियाभिधः पुत्रोऽभूवं जनकवल्लभः ॥ ४२ ॥
क्रमाद्राज्ये निजे मां तु स्थापयित्वा वरोत्सवम् । जग्राह संयम सोम-देवाचार्यान्तिके पिता ॥ ४३ ॥
अधुना बलिभिर्गोत्रि-र्वेष्टितं नगरं बलात् । विहस्ता मनुजा जाता-स्ततोऽहं व्याकुलोऽभवम् ॥ ४४ ॥
आराधिता मया चक्रे-श्वरी देवी जगावदः । कार्यं राज्येन चेत्तेऽस्ति यदि कलाप्रियाऽधुना ॥ ४५ ॥
तदा चक्रधरं भूप-मिहानयाचिरात्त्वकम् । तस्य दृष्टौ रिपोश्चक्रं नंष्टा यास्यति दूरतः ॥ ४६ ॥
ततो वालयितुं राज्यं स्वकं वाञ्छंस्तवान्तिके । आगामिह कृपां कृत्वा मयि तत्राऽऽव्रज द्रुतम् ॥ ४७ ॥
त्वयि तत्रागते सर्वं रिपुसैन्यं गमिष्यति । तव तुल्योऽस्ति को लोके परोपकारकोऽधुना ? ॥ ४८ ॥

॥ २९८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

※ यतः–'दानं वित्ताद् ऋतं वाचः कीर्त्तिधर्मौ तथाऽऽयुषः। परोपकरणं काया-दसारात् सारमुद्धरेत् ॥४९॥卐
सङ्गमापृच्छय भूपालः कलाप्रियविराजितः। खेटद्रङ्गान्तिके यावत् समागान्नेत्रयोर्द्विषाम् ॥ ५० ॥
तावद्दिशोदिशं कम्प-माना लात्वा स्वजीवितम्। ययुर्द्विषोऽखिलाः सूर्यो-दयादिव तमश्चयाः ॥ ५१ ॥
गते वैरिबलेऽशेषे-कलाप्रियः खगेश्वरः। नत्वा चक्रधरस्याङ्घ्री जगादेति कृताञ्जलिः ॥ ५२ ॥
भ्राता माता सुहृत्तातः स्वामी पितृपिता त्वकम्। यतस्त्वया गतं राज्यं वालितं करुणात्मना ॥ ५३ ॥
गुणमालां स्वसारं मे त्वमुद्वाह्याधुना नृप!। निष्क्रयं मां कुरुष्वाशु मयि कृत्वा कृपां द्रुतम् ॥ ५४ ॥
भूपेन मानिते तत्र गुणमालां गुणाकराम्। कलाप्रियो ददौ तस्मै चारूत्सवपुरस्सरम् ॥ ५५ ॥
अन्या अपि तदा व्योम-गामिकन्याः सहस्रशः। वव्रुश्चक्रधरं भूपं गुणिनं सगुणा यथा ॥ ५६ ॥
कलाप्रियो जगावत्रो-द्यानमस्ति सुराभिधम्। तत्र क्रीडाकृते स्वामि-न्नवधारय साम्प्रतम् ॥ ५७ ॥
गत्वा तत्र वने कृत्वा क्रीडां सुधवलालये। गवाक्षस्थो द्रुमश्रेणी-र्विविधा दृष्टवान्नृपः ॥ ५८ ॥
यतः–पालीतालीद्रुमालीतलमिलितपथश्रान्तविश्रान्त पान्थ-व्रातप्रख्यातघर्मातपहरणचणकङ्कणश्रीर्धरित्र्याम् ॥
हेलोन्मीलन्नवीनामलबहुललुलल्लोलकल्लोलमाला लीलाखेलन्मरालीकुलकलविरुतैरुल्वणः पल्वलोऽयं ॥
ईषल्लोलोर्म्मिपातप्रभववरभवल्लास्यलीलाभिरुच्चै-रेष च्छेकश्च केकी कलयति विरुतान्यावहन्नृत्ववृत्तम्।

For Private and Personal Use Only

मद्रारावं प्रलुभ्यन्निजयुवतियुतश्चैष चक्रोऽपि चक्री-कृत्य ग्रीवानताम्भोरुहविशकवलावत्ति चात्यन्तहृष्टाः ॥
इत्यादि सरसी वृक्ष-चक्रादि शकुनव्रजम् । पश्यन् राजाऽग्रतश्चैत्य-मपश्यद् व्योममार्गगम् ॥ ६१ ॥
तत्र गत्वा नृपश्चैत्य-मध्ये वर्यमणीमयम् । बिम्बं श्रीआदिदेवस्य सभार्योऽपूजयत्तमम् ॥ ६२ ॥
वरपुष्पाक्षतस्तोत्रैः पूजयित्वाऽऽदिमं जिनम् । राजा चक्रधरो देव-गृहाद् बहिर्यदा ययौ ॥ ६३ ॥
तदैकां वानरीं वर्य—नारीभिरभितो वृताम् । तत्रायातां निरीक्ष्येति जगौ चक्रधरस्तदा ॥ ६४ ॥
भो ! नार्यो यूयं किं वर्य-रूपलावण्यसंयुताः । सेवध्वं वानरीं तिर्यग्-जातिजां—वदताऽधुना ॥ ६५ ॥
तत्राऽऽसन्नस्थितो विद्याधर एको जगाविति । वैताढ्यस्योत्तरश्रेण्यां भीमाह्वे नगरे वरे ॥ ६६ ॥
चन्द्रचूडाभिधो विद्या-धरोऽहमभवं किल । शृङ्गारसुन्दरी नाम्ना पुत्री मेऽभूत् सुरूपभृत् ॥ ६७ ॥
रन्तुं गताऽन्यदोद्याने नन्दिनी सा सखीयुता । रेमे परस्परं पुष्प-कोटीररचनादिभिः ॥ ६८ ॥
गृह्णन्ती स्वेच्छया पुष्प-फलानि तरुतस्तदा । हसन्ती तरुशाखासु पुत्री मे सुरसुन्दरी ॥ ६९ ॥
चापल्यत्वं वितन्वाना थूत्कृतिं च पदे पदे । वनदेवतया शप्ता वानरी समजायत ॥ ७० ॥
वानरी वनदेव्यास्तु पादौ नत्वा दृढं जगौ । अपराधो मया चक्रे यस्ते क्षन्तव्य एव सः ॥ ७१ ॥
वानरीत्वमपाकृत्य नारीरूपं ममाचिरात् । कुरु प्रसद्य देवी त्वं ततो देवी जगावदः ॥ ७२ ॥

यदा चक्रधरो राजा श्रीशान्तिजिननन्दनः । तव पाणिग्रहं नारि ! करिष्यति कलोत्सवम् ॥ ७३ ॥
तदा त्वं लभसे नारी-रूपं विद्याधराङ्गजे ! । ततस्त्वां वरितुं नित्य-मीहते मम नन्दिनी ॥ ७४ ॥
पृच्छं पृच्छं स्थितिं ताव-कीनां ग्रामे पुरे पुरे । ज्ञात्वाऽतो वानरीरूपां सुतान्तिके ऽहमानयम् ॥ ७५ ॥
एतस्याः किल वानर्या मम पुत्र्याः करग्रहात् । त्वं कुरुष्वाचिरात् राजन् ! पूर्वं रूपं मनोहरम् ॥ ७६ ॥
उपकारपरो राजा तस्या पाणिग्रहं यदा । कर्त्तुकामोऽभवत्ताव-न्मन्त्री प्राह नृपं प्रति ॥ ७७ ॥
वानर्याः कार्यते पाणि-ग्रहः केनापि कुत्रचित् । कदाचित् कपटं केन मण्डितं स्यान्न वरं तदा ॥ ७८ ॥
राजाऽवग् जीवितव्यस्य सारं तद् विद्यते खलु । यदेव क्रियतेऽन्येषा-मुपकारः सुखावहः ॥ ७९ ॥
वानर्या भूभुजा याव-च्चक्रे पाणिग्रह स्वयम् । तावन्नार्यभवद्दीव्य-रूपभृत् सुरसुन्दरी ॥ ८० ॥
कलाप्रियेण तुष्टेन विद्या बह्वीः खगादिमाः । तस्मै दत्ताः कनीतुल्या-श्चक्रधराय भूभुजे ॥ ८१ ॥
भ्रमँस्तस्मिन् वने दृष्ट्वा तापसान् कन्दभक्षकान् । जगौ चक्रधरो यूयं के ? किं किं क्रियते तपः ? ॥ ८२ ॥
जगदुस्ते वयं कच्छा-न्वये जातास्तपस्विनः । कन्दमूलफलाहारा वसामस्तटिनीतटे ॥ ८३ ॥
आह चक्रधरो भो भो ! तापसाः शुद्धमार्गतः । भ्रष्टा यूयं न कुर्वीध्व-मभक्ष्य-भक्षणं क्षणम् ॥ ८४ ॥
* यत—" गूढस्नसाशिछन्नरुहाः समभागाश्च पल्लवाः । मिथ्यादृशामविज्ञाता अखाद्या हि प्रकीर्तिताः ॥ ८५ ॥卐

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* तीक्ष्णसूचीमुखाक्रान्ति-भागेऽनन्ताः शरीरिणः । उत्पद्यन्ते विलीयन्ते यत्र तेऽनन्तकायिनः ॥ ८६ ॥卐

* उदुम्बरवटप्लक्ष-काकोदम्बरशाखिनाम् । अश्वत्थस्यापि न फल-मश्नीयात् कृमिसङ्कुलम् ॥ ८७ ॥卐

* त्याज्या महाविकृतय-श्चतस्रोऽनन्तदोषदाः । मद्यं मांसं नवनीतं मधु त्याज्यान्यमूनि हि ॥ ८८ ॥卐

* हिमं विषं च करकान् सर्वमज्ञातकं फलम् । रजनीभोजनानन्त-कायान् सन्धानकांस्तथा ॥ ८९ ॥卐

* वृन्ताकमूलकांश्चापि निखिलं पुष्पितौदनम् । बहुबीजामगोरस–सम्पृक्तद्विदलं त्यजेत् ॥ ९० ॥ युग्मम् ॥卐

इत्यादिसूपदेशेन प्रबोध्य ते तपस्विनः । मिथ्यात्वं त्याजिता चक्र-धरेण मेदिनीभुजा ॥ ९१ ॥

जगौ चक्रधरो भो भो ! तापसाः सिद्धपर्वते । गत्वा प्रणमताऽऽदीशं जिनं कल्याणहेतवे ॥ ९२ ॥

ततश्चक्रधरेणाऽमा तापसा हृष्टमानसाः । नन्तुं शत्रुञ्जये तीर्थे चेलुः श्रीवृषभं जिनम् ॥ ९३ ॥

भूरिभार्या-बहुव्योम-गामितापससंयुतम् । आयान्तं शान्तितीर्थेशपुत्रं चक्रधरं नृपम् ॥ ९४ ॥

दृष्ट्वा सङ्घजनो हृष्टः सन्मुखं समुपागमत् । ततश्चक्रधरः सङ्घं सन्मानयति भक्तितः ॥ ९५ ॥

नृपश्चक्रधरश्चारू-त्सवं दानं ददन् बहु । सङ्घमध्ये समायातोऽर्चयच्छ्रीनाभिनन्दनम् ॥ ९६ ॥

तापसास्तेऽपि सावद्या—हारं त्यक्त्वा जिनोदितम् । शुद्धमन्नं प्रगृह्णन्तो धर्म्मं कुर्वन्ति सादरम् ॥ ९७ ॥

देवपूजां सङ्घपूजा कृत्वा तत्र महीधवः । तीर्थे शत्रुञ्जये शीघ्र-मारुरोह कृतोत्सवम् ॥ ९८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विधिवत्तत्र तीर्थेशं स्नपयित्वा सुवारिभिः । पुष्पैश्च विदधे भूपो ध्वजदानादिकां क्रियाम् ॥ ९९ ॥
आरात्रिकं च मङ्गल-दीपकं विधिवत्तदा । कृत्वा प्रभोः पुरो भाव-स्तुतिं चक्रे धराधिपः ॥ १०० ॥
स्वामिनः पादुकाऽर्चां च कृत्वा राजादनीतरोः । प्रदक्षिणां महीपाल-श्चकार सङ्घसंयुतः ॥ १०१ ॥
इतस्तत्र सुरः सिंहोऽभ्येत्याऽवग् भूपतिं प्रति । तिर्यग्गतौ गतोऽथाहं तत्र तातेन शान्तिना ॥ १०२ ॥
प्रबोध्य ताविषे नीतो भूयिष्ठसुखमन्दिरे ! ततो मयाऽत्र ते तातसद्म स्फारं विधापितम् ॥ १०३ ॥ युग्मम् ॥
ततस्तत्रैत्य पूजां श्री-शान्तेः श्रीवृषभप्रभोः । कृत्वा पूजां निजं जन्म सफलं कुरु भूपते ! ॥ १०४ ॥
ततस्तत्र नृपो गत्वा कृत्वाऽर्चां श्रीजिनेशितुः । चक्रे चक्रधरः सङ्घ-युतः स्वं सफलं जनुः ॥ १०५ ॥
तापसास्तेऽपि सिद्धाद्रौ युगादीशं जिनेश्वरम् । प्रणम्य सफलं चक्रुर्निजं जन्म सुभावतः ॥ १०६ ॥
घातिकर्म्मक्षयात्तेषां तापसानां सुचेतसाम् । उत्पन्नं केवलज्ञानं लोकालोकावलोककम् ॥ १०७ ॥
यत्र ते तापसाः सिद्धा-स्तत्र चक्रधरो नृपः । व्यधात्तापससञ्ज्ञं श्री-सर्वज्ञसदनं महत् ॥ १०८ ॥
चक्रे चक्रधरो नव्यान् जिनावासान् बहून् क्रमात् । तत्र जीर्णजिनागारानुद्धार धनव्ययात् ॥ १०९ ॥
प्रभासे गिरिनाराद्रौ सम्मेतशिखरेऽर्बुदे । यात्रां कृत्वा व्यधाज्जीर्णोद्धारान् भूपो जिनौकसि ॥ ११० ॥
इत्थं बहुषु तीर्थेषु यात्रां कृत्वाऽतिविस्तरात् । अचीकरद् जिनागारान् नव्यान् जीर्णोद्धृतानपि ॥ १११ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रतिलाभ्य गुरून् वस्त्र-दानेन सङ्घमप्यथ । भोजयित्वा परीधाप्य विससर्ज धराधवः ॥ ११२ ॥
भूपः सदुत्सवं पुर्यां प्रवेशमकरोन्नृपः । ततो न्यायान्महीपीठं प्रशशास लसद्बलः ॥ ११३ ॥
इतः शान्तिजिनो गत्वा सम्मेतशिखरे गिरौ । सर्वकर्म्मक्षयान्मुक्ति-नगरीमगमद्द्रुतम् ॥ ११४ ॥
यत्र स्थाने ययौ मुक्तिं श्रीमान् शान्तिजिनेश्वरः । तत्र चक्रधरः शान्ति-नाथालयमकारयत् ॥ ११५ ॥
अन्येद्युर्ज्ञानचन्द्रस्य सूरीश्वरस्य सन्निधौ । धर्म्मं श्रोतुं गते चक्र-धरे गुरुर्जगाविति ॥ ११६ ॥
क्षमया निखिलकर्म्माणि शुभानि वाऽशुभानि च । लभते केवलज्ञानं संयतक्षोणिनाथवत् ॥ ११७ ॥
संखेटकाभिधे ग्रामे वणिग् हितकराभिधः । श्राद्धधर्म्मं समाराध्य ययौ त्रिदशमन्दिरम् ॥ ११८ ॥
ततश्च्युत्वा सुमापुर्यां वर्धमानाभिधो नृपः । बभूव न्यायमार्गेण पालयन् पृथिवीं सदा ॥ ११९ ॥
तत्रैव वाडवश्चन्द्रः कृत्वा बालतपः सदा । ज्योतिर्मध्ये समेत्याऽभूत् ब्राह्मणो ज्वलनाभिधः ॥ १२० ॥
तदा भूपस्य तस्याभूत् सत्यवादी पुरोहितः । मायया ज्वलनो लोकान् वञ्चयामास भूरिशः ॥ १२१ ॥
वणिजो नेमदत्तस्य वञ्चयित्वा धनं बहु । जग्राह ज्वलनो नेमदत्तो दुःखी ततोऽभवत् ॥ १२२ ॥
वञ्चयित्वा तदा तत्र ज्वलनं गणिकैकिका । वालयामास विभवं नेमदत्तस्य सद्धिया ॥ १२३ ॥
कुट्टयित्वा महीपालो ज्वलनं मायिनं तदा । स्वदेशात्स्वरितं निष्का-शयामास च दूरतः ॥ १२४ ॥

For Private and Personal Use Only

वैराग्यं ज्वलनः प्राप्त-स्तपः कुर्वन् निरन्तरम् । माहेन्द्रे ताविषे देवो-ऽजनि भासुरदेहभाग् ॥ १२५ ॥
ततो निर्गत्य वैताढ्य-शैलदक्षिणयाम्ययोः । श्रेण्योः स्वाम्यभवद् वज्र-दंष्ट्रोऽयं वाडवासुमान् ॥ १२६ ॥
श्रीवर्द्धनोऽपि भूपालो लात्वा दीक्षां तपःपरः । गत्वा स्वर्गे ततश्च्युत्वा संयतोऽहमिहाभवम् ॥ १२७ ॥
पाश्चात्यभवसंजातात् वैराद् वज्रदंष्ट्रकः । जघान दण्डघातेन मामत्रैव भवे भृशम् ॥ १२८ ॥
नेमदत्तासुमान् कृत्वा धर्म्मं जैनं निरन्तरम् । धरणेन्द्रोऽभवस्त्वं च सर्वनागकुमारराट् ॥ १२९ ॥
श्रुत्वेति वज्रदंष्ट्रोऽपि क्षमित्वा निजसूनवे । राज्यं दत्त्वा ललौ वृत्तं संसाराम्भोधितारकम् ॥ १३० ॥
वज्रदंष्ट्रस्तपस्तीव्रं कुर्वन् शत्रुञ्जयाचले । नत्वाऽऽदिमं जिनं शान्तिजिनं नन्तुं समीयिवान् ॥ १३१ ॥
शान्तितीर्थपतेरग्रे ध्यानं कुर्वन् स संयतः । अवाप केवलं ज्ञानं लक्षसाधुसमन्वितः ॥ १३२ ॥
सर्वकर्म्मक्षयाद्वज्र-दंष्ट्रर्षिः सिद्धपर्वते । शत्रुञ्जये ययौ मुक्ति-नगर्यां रुचिरश्रियि ॥ १३३ ॥
श्रुत्वेति स्वं सुतं राज्ये न्यस्य चक्रधरो नृपः । लात्वा व्रतं तपस्तीव्रं कृत्वा सम्मेतपर्वते ॥ १३४ ॥
सर्वकर्म्मक्षयान्मुक्ति-नगरीं समुपेयिवान् । तदाऽन्ये बहवो भूप-यतयोऽपि ययुः शिवम् ॥ १३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री द्राविडवालिखिल्लादि-भूपालर्षिमुक्तिगमनसम्बन्धः ॥

दसकोडिसाहुसहिआ जत्थ दविडवालिखिल्लपमुहनिवा ।
सिद्धा नगाहिराए जयउ तयं पुंडरी तित्थं ॥ १९ ॥

दशकोटिसाधुसहिता द्राविड-वालिखिल्लप्रमुखा नृपा इक्ष्वाकुवंशभवा यत्र शत्रुञ्जये शैले मुक्तिं ययुः, तत् शत्रुञ्जयाह्वं तीर्थं चिरं जयतात् । तथाहि—

ऋषभस्वामिनः सूनो-र्द्रविडस्य महीपतेः । द्रविडविषयोपान्ते द्वावभूतां तनूभवौ ॥ १ ॥
आद्योऽभूद् द्राविडो नाम्ना वालिखिल्लो द्वितीयकः । जयन्तौ रूपतश्चेतो-भवौ दानपरायणौ ॥ २ ॥
द्रविडो भूपतिः शत्रुञ्जये यात्रां सुविस्तरात् । विधाय कारयामास प्रासादं प्रथमप्रभोः ॥ ३ ॥
द्राविडाय सुतायाऽदा-न्मिथिलाराज्यमञ्जसा । ग्रामाल्लक्षं ददौ वालि-खिल्लाय द्रविडोऽन्यदा ॥ ४ ॥
भवद्भ्यां वैरवैरस्यं न कार्यं नन्दनोत्तमौ ! । इत्युक्त्वाऽलात् प्रभोः पार्श्वे द्रविडः संयमश्रियम् ॥ ५ ॥
राज्यश्रिया क्रमाद्वर्द्ध-मानं कीर्त्त्या च सन्ततम् । दृष्ट्वाऽनुजं दधौ द्वेषं तस्मिन् द्राविडभूपतिः ॥ ६ ॥
द्राविडो लोभतो वाली-खिल्लं स्वीयानुजं सदा । हन्तुमिच्छन् दिवा रात्रौ निद्रां न लभते मनाग् ॥ ७ ॥

For Private and Personal Use Only

* यतः–"पितरं मातरं बन्धुं मित्रं भार्यां सुतं गुरुम् । लोभेनाभिभूतः सँश्च हन्त्येव मानवः खलु ॥ ८ ॥
मेलयित्वा महासैन्यं द्वावपि भ्रातरौ तदा । रणं भरत-बाहुवत् चक्राते तौ परस्परम् ॥ ९ ॥
वालिखिल्लो धनं भूरि वितीर्य द्राविडानुगान् । लक्षशः स्ववशीचक्रे दानात् किं किं न जायते ? ॥ १० ॥
कोटयो दश पत्तीना-मभूवन् बलयोर्द्वयोः । प्रत्येकं दश लक्षाश्चा स्यन्दनानां च कुम्भिनाम् ॥ ११ ॥
पञ्चाशदशलक्षाश्च तथाऽन्येऽपि महीभुजः । अभूवन् सैन्ययोः साम्य-मेवं त्रैलोक्यभीतिकृत् ॥ १२ ॥
अहत्र्यहत्र्यम्बकानां नादैर्दिगन्तगामिभिः । आदिशूकरयूथानि त्रेसुर्जग्मुरधीरताम् ॥ १३ ॥
रणं सप्तमितान् मासान् यावदासीत् सुदुःसहम् । कोटयो दश मर्त्यानां तदा मृता बलद्वये ॥ १४ ॥
अत्रान्तरे पयोवाहो वर्षन्नेव दिवानिशम् । आगतः पृथिवीं शश्वत् प्रीणयामास सर्वतः ॥ १५ ॥
अभितः स्थलगर्त्तादीन् नदीह्रदतटाककान् । अपूरयद्रयान्नीरैः सञ्चरिष्णुभिरम्बुदः ॥ १६ ॥
सुबुद्धि सचिवः प्राह वनेऽत्र सुमतिर्गुरुः । विद्यते तत्र गम्येत धर्म्मं श्रोतुं नराधिप ! ॥ १७ ॥
श्रुत्वेति द्राविडो भूपः सुबुद्धिधीसखान्वितः । धर्म्मं श्रोतुं ययौ पार्श्वे सुमतेः सुमतेर्गुरोः ॥ १८ ॥
गुरुः प्राह महीपाल ! कषाया वैरिणः खलु । इहामुत्र च दुःखानि ददते देहिनां पुनः ॥ १९ ॥
* यतः–"जं अज्जिअं चरित्तं देसूणाए अ पुव्वकोडीए । तंपि कसाइय मित्तो हारेइ नरो मुहुत्तेण ॥१॥" 卐

शत्रुञ्जय
कल्पवृ०
॥ ३०८ ॥

न कश्चिच्चण्डकोपाभा-मात्मीयोऽस्तीह भूतले । होतारमपि जुह्वानं स्पृष्टो दहति पावकः ॥ २० ॥
क्रोधो नाम मनुष्याणां शरीरे जायते रिपुः । येन त्यजति मित्राणि धर्माच्च परिहीयते ॥ २१ ॥
सञ्चरन्तं शुभे मार्गे छलयन्ति जनं घनम् । पिशाचा इव दुःखौघ-दायिनो विषयाः समे ॥ २२ ॥
युगपत् पञ्चभिर्घातो विषयैर्विषसन्निभैः । हन्तुं जन्तुरयं किन्तु कल्याणमपि गच्छति ॥ २३ ॥
क्रोधेन ग्रसितो जीवो हिंसन् जीवान् बहून् भृशम् । नरके लभते दुःखं चन्द्रसेन इव क्षणात् ॥ २४ ॥
श्रीपुरे भीमसेनस्य चन्द्रसेनसुतोऽभवत् । वर्धमानः क्रमात्ताते द्वेषं करति सन्ततम् ॥ २५ ॥
विहत्य जनकं चन्द्र-सेनः प्राप्य बहुं श्रियम् । तृणप्रायं जगत् सर्वं मेनेऽहङ्कारमन्दिरम् ॥ २६ ॥
* यतः–“ इक्षुक्षेत्र-वंशजाली-कदली-विषपादपाः । फले जाते विनश्यन्ति दुःपुत्रेण कुलं यथा ॥ १ ॥ ” 卐
मृत्वा श्वभ्रे गतश्चन्द्र-सेनो दुःखं श्रयन् घनम् । निर्गत्य जलधौ मत्स्यो जातः स्फाति झषान् बहून् ॥ २७ ॥
जीवहिंसोद्यतः श्वभ्रे गत्वाऽतिदुःखसन्ततिम् । सहित्वाऽथ वने भिल्लो-ऽभवत् हिंसापरायणः ॥ २८ ॥
ततः श्वभ्रं गतो दुःखं सेहे भिल्लासुमान् स च । ततो निर्गत्य भीमाह्ववने पञ्चाननोऽभवत् ॥ २९ ॥
इत्यादि बहुशः श्वभ्र-मत्स्यव्याघ्रादिकान् भवान् । चन्द्रसेनासुमान् प्राप्य सेहे दुःखपरंपराम् ॥ ३० ॥
एवं कषायतो जीवाः संसारे दुःखसन्ततिम् । लभन्तेऽतो न कर्त्तव्याः कषाया दुःखलक्षदाः ॥ ३१ ॥

॥ ३०८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* यतः—" धर्म्मव्युच्छेदपरशु-र्बोधिकक्षदवानलः । परद्रोहोऽस्ति नरक-द्वारोद्घाटनकुञ्चिका ॥ ३२ ॥卐
मनसापि स्मृता हिंसा भवे दुःखौघदायिनी । सा पुनर्विहिता तन्वी नरकं नयते न कम् ? ॥ ३३ ॥
ये राज्यादिसुखेष्वार्त्ता घ्नन्तीभाश्वनरान् बहून् । ते दहन्ति निजं देह-मुद्योतकृतबुद्धयः ॥ ३४ ॥
नरकान्तस्य राज्यस्य हेतवे किं नरेश्वर ! । बन्धुना सह वैरेण हन्यन्ते जन्तुकोटयः ॥ ३५ ॥
* अनित्यानि शरीराणि लक्ष्मीर्बुद्बुदसन्निभा । तृणाग्नितुल्या यत्प्राणाः पापं मा कुरु तत्कृते ॥ ३६ ॥卐
* ये राज्यादिकृते बन्धून् निष्ठुरा घ्नन्ति कोपतः । ते स्वाङ्गानि स्वयं भित्त्वा भुञ्जते दुःखसंततिम् ॥ ३७ ॥卐
* "लोए अणाइनिहणे एवं अन्नाणमोहिआ जीवा । अणुहोंति कुजोणिगया दुःखं संसारकंतारे ॥ १ ॥卐
* धम्मो परभवबन्धू ताणं सरणं च होइ जीवस्स । धम्मो सुहाण मूलं धम्मो कामदुहा धेणू ॥ २ ॥卐
* सयलम्मि वि तेलुक्के जं दव्वं उत्तमं महग्घं च । तं सव्वं धम्मफलं लहइ नरो उत्तमतवेण ॥ ३ ॥ 卐
* जिणवरविहिए मग्गे धम्मं काऊण निच्छिअं पुरिसा । उम्मुक्ककम्मकलुसा जंति सिवं सासयं ठाणं ॥ ४ ॥卐
श्रुत्वेति श्रीगुरोर्वाणीं वैराग्यवासिताशयः । द्राविडो वालिखिल्लं स्वं बन्धुं क्षन्तुमना ययौ ॥ ३८ ॥
आयान्तं द्राविडं बन्धुं क्षन्तुं ज्ञात्वा तदा क्षणात् । वालिखिल्लोऽनमद् गत्वा-ऽभिमुखं सोदरं मुदा ॥ ३९ ॥
धरापीठे लुठित्वा स चरणौ पूर्वजन्मनः । अमार्जयद् रजोधूम्रान् दोषानिव शिरोरुहैः ॥ ४० ॥

For Private and Personal Use Only

शत्रुञ्जय कल्पवृ० ॥ ३१० ॥

द्राविडोऽवग् गृहाणेदं राज्यं झटिति सोदर ! । वालिखिल्लो जगौ भ्रात-स्त्वं राज्यं लाहि मे ध्रुवम् ॥ ४१ ॥
मम सृतं श्रिया भ्रातर्मया युद्धं वितन्वता । यत्पापमर्जितं तेन श्वभ्रपातो भवेन्मम ॥ ४२ ॥
वैरं मुक्त्वा मिथः क्षन्त्वा सोदरौ द्वौ तदा क्षणात् । मेलयित्वा बहु सङ्घं ययौ सिद्धाचले क्रमात् ॥ ४३ ॥
तत्र स्नात्रार्चनादीनि कृत्यानि द्वौ सहोदरौ । प्रासादौ प्रथमाप्तस्य कारयामासतुस्तदा ॥ ४४ ॥
तयोः प्रासादयोरष्टो-त्तरशत्या सुमण्डपैः । रेजुर्द्वाराणि चत्वारि सत्तोरणयुतानि च ॥ ४५ ॥
मुख्यार्हत्सदनस्याधो द्वारं सज्जविधानतः । कारयामासतुर्मोदात् सिद्धाद्रौ द्वौ सहोदरौ ॥ ४६ ॥
ततोऽभ्येत्य निजे राज्ये स्वं स्वं तनुभवं क्रमात् । न्यस्याकारयतां पूजां जिनानां जिनसद्मसु ॥ ४७ ॥
ततो महोत्सवं कुर्वन् द्राविडो वालिखिल्लयुग् । महोदयमुनेः पार्श्वे जग्राह संयमं मुदा ॥ ४८ ॥
महोदयमुनिर्विद्या-धरसंयतसन्निधौ । अमुचद्यतिसम्बन्धि क्रियां शिक्षयितुं तदा ॥ ४९ ॥
शिक्षयित्वा क्रियाः सम्यक् तपःकरणतत्परौ । पेठतुर्भूरिशास्त्राणि द्वावेव सोदरौ तदा ॥ ५० ॥
प्राप्ताचार्यपदौ द्वौ तु सोदरौ दशकोटिभिः । साधुभिः सहितौ सिद्ध-पर्वते ययतुः क्रमात् ॥ ५१ ॥ ॥ ३१० ॥
तत्राऽऽगतस्य भव्यस्य पुरतस्तौ सहोदरौ । शत्रुञ्जयस्य माहात्म्य-मेवं प्रजल्पतुस्तदा ॥ ५२ ॥
* तथाहि–“ अनन्तसुकृताधारः संसाराब्धितरण्डवत् । शत्रुञ्जयः सुराष्ट्रासु गिरिर्जयति शाश्वतः ॥ ५३ ॥卐

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* अत्र शत्रुञ्जये सिद्धा अनन्तास्तीर्थयोगतः । सेत्स्यन्त्यत्रैव बहवोऽर्हद्यतिप्रमुखा जनाः ॥ ५४ ॥卐

* सिद्धलक्ष्यो ह्ययं क्रीडा-शैलः शत्रुञ्जयोऽद्भुतः । अत्रायातान् नरान् सद्यः शिवस्थानं नयेत् द्रुतम् ॥ ५५ ॥卐

* इहायातै नरैर्मुक्ति-सुखास्वादोऽनुभूयते । मुक्तिभुक्तिप्रदो देवः प्रथमो विद्यतेऽत्र यत् ॥ ५६ ॥卐

* शैलं दुर्गस्थितं चात्र नरं नाभिभवन्त्यहो ? । कुकर्म्मरिपवः क्रूरा अप्यनन्त-भवानुगाः ॥ ५७ ॥卐

* अत्र हत्यादिपापानि विलयं यान्त्यपि क्षणात् । सूर्योदये तमिस्राणि सज्जने कुगुणा इव ॥ ५८ ॥卐

इतस्तत्र समायाता-स्तापसा बहवो गिरौ । शत्रुञ्जयस्य माहात्म्यं श्रुत्वा तेपुश्चिरं तपः ॥ ५९ ॥

तत्र शुद्धोपदेशेन तापसा अपि ते तदा । मिथ्यात्विकीं क्रियां मुक्त्वो-ररीचक्रुर्जिनव्रतम् ॥ ६० ॥

आलोचनां गृहीत्वाथ तयोः साध्वोश्च सन्निधौ । षष्ठाष्टममुखं तीव्रं तपस्तन्वन्ति संततम् ॥ ६१ ॥

प्रणम्य तौ प्रभुं राजा-दन्यास्ते तापसोत्तमाः । त्रिप्रदक्षिणयांचक्रु-र्भवाब्ध्युत्तारहेतवे ॥ ६२ ॥

मासक्षपणपर्यन्ते द्राविडो वालिखिल्लयुग् । दश कोटिमितान् साधू-न्नत्वाऽशिष्टेति सादरः ॥ ६३ ॥

भवद्भिर्नाशुभं ध्यानं कर्त्तव्यं नरकप्रदम् । कर्त्तव्यं तु शुभध्यानं मुक्तिसाततिप्रदम् ॥ ६४ ॥

* यतः—" प्रणिहन्ति क्षणार्द्धेन साम्यमालम्ब्य कर्म्म तत् । यन्न हन्यान्नरस्तीव्र-तपसा जन्मकोटिभिः ॥ ६५ ॥卐

अस्मिन्नेव महातीर्थे शुभध्यानस्य योगतः । आसाद्य केवलज्ञानं यूयं मुक्तिं गमिष्यथ ॥ ६६ ॥

For Private and Personal Use Only

द्राविडो वालिखिल्लाश्चा-कार्ष्टौ ध्यानं तथा तदा । यथाऽऽपतुर्द्रुतं ज्ञानं केवलं पातकक्षयात् ॥ ६७ ॥
तस्मिन् क्षणे मुमुक्षूणां दशकोटेः तमःक्षयात् । उत्पन्नं केवलज्ञानं लोकालोकप्रकाशकम् ॥ ६८ ॥
अन्तर्मुहूर्त्तान्ते सर्वे साधवो मासि कार्त्तिके । पूर्णिमास्यां स्थिते चन्द्रे कृत्तिकायां ययुः शिवम् ॥ ६९ ॥
समेत्य तत्क्षणात्तत्र देवः केवलितामहम् । विधाय हंस इत्याह्वं ददौ तीर्थस्य तस्य तु ॥ ७० ॥
* यतः उक्तंच-"कार्त्तिकके पूर्णिमास्यां कृतिकास्थे निशाकरे । मुनयः केवलेनैते सिद्धिं शत्रुञ्जये ययुः ॥ १ ॥ 卐
यथा चैत्रस्य राकायां पुण्डरीकोऽगमच्छिवम् । कार्त्तिकस्य तथैते तु ततो द्वे पर्वणी स्मृते ॥ ७१ ॥
चतुर्मासावधिः तुर्य-पूर्णिमास्यां भवेदपि । शिवलब्ध्युत्सवो तेषां तस्यामेव सुरैः कृतः ॥ ७२ ॥
यात्रया तपसा दानाद्-देवार्चनविधानतः । अन्यतीर्थाद् भवेत् पुण्य-मनन्तं तत्र पर्वणि ॥ ७३ ॥ युग्मम् ॥
कार्त्तिकमासि क्षपणात् तत् कर्म्म क्षपयत्यहो ? । नरकेऽब्धिशतेनापि यत्कर्म्म क्षिप्यते न हि ॥ ७४ ॥
एकेनाप्युपवासेन कार्त्तिक्यां विमलाचले । ब्रह्मयोषिद्भ्रूणहत्या-पातकान्मुच्यते नरः ॥ ७५ ॥
यः कुर्यात् कार्त्तिकीं राका-मत्रार्हद्ध्यानतत्परः । स भुक्त्वा चक्रिसौख्यानिनिर्वृतिं लभते द्रुतम् ॥ ७६ ॥ ॥ ३१२ ॥
वैशाखकार्त्तिकमधुप्रमुखेषु मात्सु, राकासु यत् समधिगम्य समं च सङ्घैः ।
श्रीपुण्डरीकगिरिमूर्द्धनि देवपूजां, कुर्वन्ति ते शिवसुखानि भजन्ति सद्यः ॥ ७७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यत्र स्थाने ययौ मुक्ति द्राविडो बहुसाधुयुग् । तत्र तत्तनयः स्फारं गेहमाद्यार्हतो व्यधात् ॥ ७८ ॥
पूर्वकोटौ गतायां श्री-भरतस्य शिवोदयात् । द्राविडवालिखिल्लश्च सिद्धाद्रौ जग्मतुः शिवम् ॥ ७९ ॥
सर्वे ते तापसाः क्षीण-कर्म्माणः सिद्धपर्वते । मुक्तिमैयुर्यदा देवा-स्तदा व्यधुर्महोत्सवम् ॥ ८० ॥
तेषामपि तापसानां महोदयमहोत्सवम् । द्राविडेस्तनयश्चक्रे व्ययन् भूरितरं धनम् ॥ ८१ ॥
द्राविडेर्वालिखिल्लस्य तनया बहवः क्रमात् । राज्यं प्राप्य च सन्त्यज्य जगृहुः संयमश्रियम् ॥ ८२ ॥
क्रमाच्छत्रुञ्जये गत्वा क्षिप्त्वा शेषतमस्ततिम् । महोदयपुरीसात-मलञ्चक्रुश्च ते पुनः ॥ ८३ ॥
यत्र शत्रुञ्जयोपान्ते द्राविडवालिखिल्लयुग् । दश कोट्या यतीनां तु समं मुक्तिपुरीं ययौ ॥ ८४ ॥
तद् स्थानं नृसुरैरर्चि तदानीं बहुभक्तितः । ततः क्रमाच्च मिथ्यात्व-भावेन जगृहे जनैः ॥ ८५ ॥
तत्राधुना पुरं सिद्धाह्वं विद्यते पुरं वरम् । मिथ्यात्वान्मुमुचे तीर्था-भावात् सम्यक्त्वधारिभिः ॥ ८६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री जैनगीतासम्बन्धः । (रामायणम्)

जहिं रामाइ तिकोडी इगनवई अ नारयाइ मुणिलक्खा ।
जाया उ सिद्धिराया जयउ तयं पुंडरी तित्थं ॥ २० ॥

यत्र तीर्थे श्रीरामः कोटित्रयसाधुयुतो मुक्तिं गतः, तथा नारदा एकनवतिःलक्षमुनियुता मुक्तिराजानोऽभूवन् जयतात् तत्तीर्थं, तथाहि—

आदित्ययश आद्येषु भूपेषु पुण्यशालिषु । असङ्ख्येषु प्रयातेष्व-योध्यायां पुरि सुश्रियि ॥ १ ॥
विजयस्य नृपस्याभूद्-हिमचूलाभिधा प्रिया । अभूतां नन्दनौ वर्यौ वज्रबाहुपुरन्दरौ ॥ २ ॥ युग्मम् ॥
धर्म्मं श्रुत्वा गुरूपान्ते लात्वा दीक्षां तमःक्षयात् । अवाप्य केवलज्ञानं विजयो मुक्तिमीयिवान् ॥ ३ ॥
ततः पुरन्दरो भूपोऽभवन् न्यायिशिरोमणिः । तत्पत्नी पृथिवी कीर्त्ति-धरं पुत्रमजीजनत् ॥ ४ ॥
कुशस्थलपुरे स्वामि-भूपस्य न्यायशालिनः । सहदेवीं सुतां कीर्त्ति-धरश्च परिणीतवान् ॥ ५ ॥
पुरन्दरोऽपि राज्यं स्वं कीर्तिधराय सूनवे । वितीर्यादाद् व्रतं क्षेमं—धरसूर्यन्तिके मुदा ॥ ६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राजा कीर्त्तिधरोऽन्येद्यु-र्निविष्टो विष्टरे वरे । राहुणा ग्रसितं सूर्य-बिम्बं व्योम्नि व्यलोकयत् ॥ ७ ॥
दध्यौ च नृपतिः सूर्यो राहुणा जगृहे यथा । तथा जीवोऽपि ममता-युक्तो यमेन लास्यते ॥ ८ ॥
तस्मादसारमेतद्धि राज्यं नरकदायकम् । लघु मुक्त्वा व्रतं लात्वा तपः कुर्वे शिवाप्तये ॥ ९ ॥
व्रतं लास्यामि भूपेन प्रोक्ते मन्त्रीश्वरा जगुः । विना त्वां पृथिवी सर्वा कस्याधारे भविष्यति ? ॥ १० ॥
अमात्याग्रहतस्तस्य पातः पृथ्वीं नयाध्वना । सहदेवी सुतं वर्य-मसूत शुभवासरे ॥ ११ ॥
जन्मोत्सवे कृते तस्य सुकोसलेति नाम च । दत्त्वा राज्यं वितीर्या-थ व्रतं कीर्त्तिधरो ललौ ॥ १२ ॥
गुरूक्त-विधिना तीव्रं तपः कुर्वन् निरन्तरम् । भिक्षार्थं नगरे तस्मि-न्नागात् कीर्तिधरो यतिः ॥ १३ ॥
* यतः–" घोरं तवं तप्पइ गिम्हकाले, मेहागमे चिट्ठइ रन्नठाणे ।
हिमंतमासेसु तवोवणत्थो झाणं पसत्थं विमलं धरेइ ॥ १ ॥
भिक्षायै यान्तमालोक्य सहदेवी पतिं निजम् । दध्यौ मे नन्दनस्यैष कान्त एष्यति चक्षुषोः ॥ १४ ॥
यदा तदा विहायाऽऽशु राज्यं लास्यति संयमम् । ततोऽधुना पुराद्बाह्य–देशे निःकाशयाम्यमुम् ॥ १५ ॥
ततः स्वसेवकोपान्तात् तं यतिं चान्यलिङ्गिनः । राज्ञी निःकाशयामास पुर्या बहिश्च निःकृपा ॥ १६ ॥
धात्री कीर्त्तिधरं साधुं कर्षितं नगराद्बहिः । सहदेव्या विलोक्यैव रुरोद करुणस्वरम् ॥ १७ ॥

For Private and Personal Use Only

रुदतीं धात्रिकीं वीक्ष्य सुकोसलो जगावदः । माता किं रुद्यतेऽथाऽवग् धात्री स्वं नन्दनं प्रति ॥ १८ ॥
वत्स ! मात्रा तवेदानीं पिता भिक्षाकृते स्फुटम् । प्रविष्टो नगरीमध्ये निरकासि पुराद्बहिः ॥ १९ ॥
अतो रुदाम्यहं बाढं सुकोसलाऽवधारय । यतस्ते जननी हन्ति यतिं कान्तमपि ध्रुवम् ॥ २० ॥
तव पित्रादयः पूर्वं सर्वे दीक्षां ललुर्ध्रुवम् । अतोऽधुना व्रतं मा मे पुत्रोऽसौ लास्यतु ध्रुवम् ॥ २१ ॥
ध्यात्वेति जननी ताव-कीना पतिं यतिं खलु । पुरान् निःकाशयामास जानीहीदं सुतोत्तम ! ॥ २२ ॥
ततः सुकोसलः सद्यो गत्वा पार्श्वे पितुः ध्रुवम् । वैराग्यवासितो जातः श्रुत्वा धर्म्मं जिनोदितम् ॥ २३ ॥
तृणवत् त्वरितं राज्यं त्यक्त्वा प्राज्यं सुकोसलः । दीक्षां लात्वा समं पित्रा विजहाराऽवनीतले ॥ २४ ॥
रत्नावल्यादि भूयांसि तपांसि सन्ततं करन् । सुकोसलयतिः कर्म्म क्षयति स्म क्षणे क्षणे (पुरार्जितम्) ॥ २५ ॥
"रयणावलि मुत्तावलि कणयावलि कुलिसमज्झ जवमज्झं ।
जियगुणसंपत्ती य विअविही य तह सव्वओभद्दा ॥ १ ॥
एत्तो तिलोयसारो मुइंगमज्झा पिवीलिआमज्झा । सीसं कारयलद्धी दंसणनाणस्स लद्धीय ॥ २ ॥
अह पंच मंदिरा वि अ केसरिकीला चरित्तलद्धी अ । परिसहजयाय पवयणमाया आइन्नसुहनामा ॥ ३ ॥
पंचनमुकारविहि तित्थयर सुया य सोक्खसंपत्ती । धम्मोवएसण लद्धी तहेव अणुवड्ढमाणा य ॥ ४ ॥

एआसु अन्नासु अ विहीसु दसमाइ पक्खमासेसु । बेमासिअ तिमासिअ खवेइ छम्मास जोएसु ॥ ५ ॥"
एवं तपःपरौ पुत्र-पितरौ विपुले वने । गच्छन्तौ निजकर्म्माणि क्षिपतः-स्मपुरार्जितम् ॥ २६ ॥
इतो मृत्वाऽऽर्त्तितो राज्ञी सहदेवी दुराशया । तत्रैव कानने व्याघ्री बभूव क्रूरमानसा ॥ २७ ॥
तत्र मेघागमे कृत्वा चतुर्मासीं च पारणे । गच्छन्तोऽतो पुरीं व्याघ्रया दृष्टः क्रूरतराशया ॥ २८ ॥
व्याघ्री सुकोसलं चादा-वाहत्यापातयद् भुवि । विदार्य खादितुं लग्ना मांसं च तस्य निर्दयम् ॥ २९ ॥
कल्याणखचितान् दन्तान् दृष्ट्वा व्याघ्री व्यचिन्तयत् । किमेतद् वदनं पूर्वं मया दृष्टं चिरं स्फुटम् ॥ ३० ॥
तदा तयेक्षितः पूर्व-भवो जातिस्मृतेर्द्रुतम् । यावत् सा व्यरमद् व्याघ्री तावत् सद्ध्यानमाश्रिता ॥ ३१ ॥
सुकोसलस्याभवज्ज्ञानं केवलं च शिवं पुनः । कृते ज्ञानोत्सवे कीर्त्ति-धरस्यापि च विद्वरा ॥ ३२ ॥
सा व्याघ्री स्वं कृतं कर्म्म निन्दति ज्ञानिसाक्षिकम् । गृहीतानशना स्वर्ग-लोके समगमत्तदा ॥ ३३ ॥
देवा ज्ञानोत्सवं कृत्वा तयोर्यत्योस्तदाऽऽदरात् । जग्मुः सुरालये लान्तो गुणांश्चारित्रिणोस्तदा ॥ ३४ ॥
सुकोसलस्य पट्टेऽभूद् हिरण्यगर्भभूपतिः । तस्य पट्टेऽभवद् वर्यो नघुषो मेदिनीपतिः ॥ ३५ ॥
नघुषे शात्रवान् जेतुं गते पूर्वदिशि स्फुटम् । आगतं वैरिणश्चक्रं जिगाय सिंहका प्रिया ॥ ३६ ॥
पश्चाद् भूपः समायातो राजा ज्ञात्वा प्रियाबलम् । दूनोऽजनि निजे चित्ते शीलभङ्गादिहेतुतः ॥ ३७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्यदा भूपतेरङ्गे रोगोऽसाध्योऽजनि स्फुटम् । तदा केनापि वैद्येन नास्फेटि तच्छरीरतः ॥ ३८ ॥
ततो राज्ञ्या सुशीलिन्या करस्पर्शान्महीपतेः । शान्तो रोगस्ततः सर्व-प्रजाभिर्मुदितं भृशम् ॥ ३९ ॥
स भूपस्त्वरितं त्यक्त्वा लात्वा गुर्वन्तिके व्रतम् । कर्म्मक्षयाद्ययौ मुक्ति पुर्यां भूयिष्ठसाधुयुग् ॥ ४० ॥
सोदासोऽथाऽभवत् सिंह-रथो विजितशात्रवः । ततो ब्रह्मरथो जात-श्चतुर्मुखोऽभवत्ततः ॥ ४१ ॥
ततो हेमरथशत-रथराजादयस्तथा । आदित्यरथमान्धातृ वैरासनस्ततः क्रमात् ॥ ४२ ॥
प्रतिमन्युनृपस्तत्र बन्धुभूमिपतिस्ततः । रविमन्युरभूद्राजा वसन्ततिलकस्ततः ॥ ४३ ॥
ततः कुबेरदत्तोऽभूत् श्रीकण्ठः शरभस्ततः । ततः सिंहो महासिंहो हिरण्यकसिपुस्ततः ॥ ४४ ॥
पुञ्जस्थलः ककुडोऽथ रघुभूमीपतिस्ततः । एतेषु निर्वृतिं केचिद् गताः केचित् सुरालयम् ॥ ४५ ॥
अनरणो नृपस्तस्मात् साकेतपत्तनेऽभवत् । ततोऽजयोऽभवद् पुत्रो रूपनिर्जितमन्मथः ॥ ४६ ॥
स शत्रुन् स्ववशान् कुर्वन् पूर्वोपार्जितकर्म्मणा । सप्तोत्तरशतेनैव व्याधिभिः पीडितोऽजनि ॥ ४७ ॥
एवं विधामयाग्रस्तो लसत्पौरुषशालिनः । साधयामास दुःसाधान् धराधीशान् परःशतान् ॥ ४८ ॥
जयन् शत्रुन् महीपालः सुराष्ट्रमण्डलं ययौ । नत्वा शत्रुञ्जये देवान् गतश्च देवपत्तने ॥ ४९ ॥
इतः सांयात्रिको रत्न-सारो विभवहेतवे आपूर्य वस्तुभिर्यानं चचालाऽम्भोधिवर्त्मनि ॥ ५० ॥

For Private and Personal Use Only

शुभवाताच्चलद्यानं घस्रांस्त्रिंशत् पयोनिधौ । एकत्रिंशत्तमे घस्रे रत्नसारो वणिक्पतिः ॥ ५१ ॥
द्वीपं निरीक्ष्य भूयिष्ठं दानं विश्राणयन् भृशम् । वादित्रनिनदैः पूर्ण्य-कार्षीत् सर्वं नभस्तलम् ॥ ५२ ॥ युग्मम् ॥
तदाऽकस्माद् घनो व्योम छादयन्नभ्रमण्डलैः । गर्जन् करटिवद् भीष्मा-कारस्तत्रागमत् क्षणात् ॥ ५३ ॥
वात्यावर्त्तभ्रमत्पोतं वीक्ष्य सांयात्रिका जनाः । जगुर्यानस्य भङ्गेन प्राणा यास्यन्ति वोऽधुना ॥ ५४ ॥
ततः सर्वे जनाः स्वं स्वं देवं स्मरत आदरात् । एकाग्रमानसा जाता ध्यानगाः संयता इव ॥ ५५ ॥
जीवन्ति येन मेघेन वर्षता मनुजाः खलु । स एव साम्प्रतं जीवान् घातयिष्यति शीघ्रतः ॥ ५६ ॥
लुलत्कन्दुकवत् पोतः प्रहतः परितोऽधुना । कल्लोलयष्टिभिः सद्यः शतखण्डो भविष्यति ॥ ५७ ॥
यावद्यानं न शीर्येत यावद् ब्रूडन्ति नो जनाः । तावन्निपत्य पाथोधौ प्राणान् त्यजाम्यहं स्वयम् ॥ ५८ ॥
ध्यात्वेति स यदा पोत-प्रान्ते त्यक्तुमसून् ययौ । तदाऽकस्मादभूद्वाणी तच्छ्रोतो(त्र)हर्षदायिनी ॥ ५९ ॥
मा म्रियस्व स्थिरं तिष्ठ हिताय तव साम्प्रतम् । इदं मया कृतं सर्वं रत्नसार वणिग्वर ! ॥ ६० ॥
अत्र नीरनिधेरन्तः कल्पद्रुसंपुटावृता । भाविनः श्रीजिनेन्द्रस्य पार्श्वस्य प्रतिमाऽस्ति हि ॥ ६१ ॥
धरणेनाऽर्चिता वर्ष-लक्षं सा बलिसद्मनि । षड्वर्षशतयुग् वर्ष-लक्षं वैश्रमणेन च ॥ ६२ ॥
वर्षलक्षाणि सप्ताथ वरुणेन निजालये । पूजिता प्रतिमैषा च कल्याणसुखहेतवे ॥ ६३ ॥

For Private and Personal Use Only

अधुना चाऽजयक्ष्माप-भाग्भाद् रोगच्छिदे पुनः । दातुमिच्छाम्यहं पार्श्व-बिम्बमीक्ष्वाकुजन्मनः ॥ ६४ ॥
स च जित्वा दिशः सर्वा द्वीपाख्ये पत्तने वरे । समेतोऽस्ति ततस्तस्मै देहि बिम्बं सुसम्पदे ॥ ६५ ॥
कुर्वतोऽजयपालस्य पूजां पार्श्वजिनेशितुः । यास्यन्ति निखिला रोगा भविष्यन्ति च सम्पदः ॥ ६६ ॥
तव पार्श्वजिनेशस्य तस्य पूजयतोऽनिशम् । सम्पदो राजमानत्व-मिह मुक्तिः परत्र च ॥ ६७ ॥
प्रतिमाया अहं तस्याः सेविकाऽस्मि प्रभावती । मयैतन्निखिलं चक्रे मेघविकुर्वणादिकम् ॥ ६८ ॥
आकर्ण्यैतद्वचस्तस्या रत्नसारोऽथ सेवकान् । प्रविश्य जलधौ पार्श्वं सम्पुटस्थमकर्षयत् ॥ ६९ ॥
सम्पुटं रत्नसारस्त-द्यावद्यानान्तरेऽनयत् । तावद् मेघो ययौ नाशं गम्भीरोऽभूत् पयोनिधिः ॥ ७० ॥
ततः पार्श्वस्थिते द्वीपे विक्रीय च क्रयाणकम् । त्रिगुणं चार्जयामास धनं तस्मात् क्रयाणकात् ॥ ७१ ॥
समर्घवस्तुना भृत्वा यानं सांयात्रिकः स च । वहनं चालयामास द्वीपं प्रति जिनं स्मरन् ॥ ७२ ॥
पार्श्वनाथप्रभावेण रत्न-सारः सुखं लघु । अनैषीद्वहनं द्वीप—पत्तनेऽतिमनोहरे ॥ ७३ ॥
प्रतिमां पार्श्वनाथस्य सप्रभावां नराननात् । आगतां नृपतिर्ज्ञात्वा-ऽदात्तस्मै पारितोषिकम् ॥ ७४ ॥
कुर्वन् महोत्सवं भूपः पादचारी प्रमोदतः । संमुखं पार्श्वनाथस्य ययौ पाथोनिधेस्तटे ॥ ७५ ॥
वाद्येषु वाद्यमानेषु नृत्यत्सु नर्त्तकेषु च । भट्टलोकेषु गायत्सु दीयमाने धनेऽर्थिने ॥ ७६ ॥

उत्सृजद्ध्वजसद्गन्धि-कर्पूरागरुधूपनैः । तत् सम्पुटं करे कृत्वा भूपस्तत्र समानयत् ॥ ७७ ॥ युग्मम् ॥
कृत्वा पूजोपहारादि सम्पुटं नृपतिः स्वयम् । उद्घाटयन् जिनं पार्श्वं ददर्श शेषसेवितम् ॥ ७८ ॥
फणीशसेवितं छत्र-त्रयी-भासितशीर्षकम् । पद्मासनस्थितं वीज्य-मानोभय(सु)चामरम् ॥ ७९ ॥
श्रीवत्सलाञ्छितोरस्कं कल्पद्रुमसहोदरम् । बिम्बं श्रीपार्श्वनाथस्य ददर्शाऽवनिनायकः ॥ ८० ॥
 निजनामाभिधं ग्राम-मजयाह्वं मनोहरम् । वासयित्वा जिनागारं महत्तममचीकरत् ॥ ८१ ॥
कारयित्वा जिनागारं स्फारं ग्रामान्तरे नृपः । तस्मिन्नतिष्ठिपत् पार्श्व-प्रतिमां रुचिरोत्सवम् ॥ ८२ ॥
 प्रभोः स्नात्राम्बुना राज्ञोऽन्येषां च देहिनां तदा । रोगा ययुः क्षयं ऋद्धि-र्वृद्धिश्च समजायत ॥ ८३ ॥
पार्श्वस्य प्रतिमां रत्न-सारस्यार्चयतः सतः । त्रिंशत्कोटिमितं हेम जातं गेहे वृषं पुनः ॥ ८४ ॥
शाकिनी-भूत-वैताल-रक्षो-यक्षोद्भवा अपि । उपसर्गाः क्षयं यान्ति श्रीपार्श्वस्मरणात् किल ॥ ८५ ॥
कालज्वर-विषोन्माद-सन्निपातमुखा अपि । आमया विलयं यान्ति श्रीपार्श्वस्मरणाद् नृणाम् ॥ ८६ ॥
विद्या-लक्ष्मी-प्रिया-पुत्र-पुत्री-कीर्त्त्यभिलाषिणाम् । विद्यादयो भविष्यन्ति श्रीपार्श्वस्मरणात् नृणाम् ॥ ८७ ॥
प्रतिमा बहुकालीना तीर्थमेवोच्यते बुधैः । इदं तीर्थमतः सेव्यं सुरासुरनरैरपि ॥ ८८ ॥ ॥ ३२१ ॥
* यतः-" पञ्चवर्षशतातीतं तद्बिम्बं तीर्थमेव हि । वर्षलक्षव्यतीतस्य बिम्बस्य तु किमुच्यते ॥ १ ॥ " 卐

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शत्रुञ्जयेऽजयो राजा स्फारं सर्वज्ञमन्दिरम् । कारयित्वाऽऽदिदेवस्य प्रतिमां तु न्यवीविशत् ॥ ८९ ॥
क्रमात् स्वराज्यमासाद्य कुर्वन् धर्म्मं जिनोदितम् । पूजां श्रीवृषभेशस्य चकार प्रतिवासरम् ॥ ९० ॥
प्रान्तेऽजयनृपोऽनन्त-रथं स्वं नन्दनं वरम् । स्वपट्टे न्यस्य जग्राह संयमं गुरुसन्निधौ ॥ ९१ ॥
अनन्तरथभूपस्य पुत्रो दशरथाभिधः । बभूव विक्रमाऽऽक्रान्त-वैरिवर्गो महाभुजः ॥ ९२ ॥
अन्यदा संसदि क्ष्मापे निविष्टे नारदो मुनिः । आगतो भूभुजा पृष्टो वार्त्तां विनयपूर्वकम् ॥ ९३ ॥
कुत आगास्त्वं किं दृष्टं ? ततो नारद ऊचिवान् । महाविदेहमध्येऽस्ति नगरी पुण्डरीकिणी ॥ ९४ ॥
तत्र सीमन्धरस्तीर्थ-करोऽलात् संयमश्रियम् । महोत्सवो महान् दृष्टः क्रियमाणः सुरेश्वरैः ॥ ९५ ॥
यतः-" अह अन्नया कयाइ सहाए मज्झम्मि दसरहो राया । चिट्ठइ सुखासणत्थो तावत्तिअ नारओ पत्तो ॥१॥
अब्भुट्ठिओ य सहसा नरवइणा आसणे पुह निसन्नो । परिपुच्छिओ य भयवं कुतोऽसि तुमं परिभमीओ ? ॥२॥
दाऊणं आसीसं भणइ तओ नारओ जिणहराणं । वंदणनिमित्तहेउं पुव्वविदेहे गओ अहयं ॥ ३ ॥
अहं पुंडरीगिणीए सीमंधरजिणवरनिक्खमणं दिट्ठं । मए महायस ! सुर-असुर-समाउलं तत्थ ॥ ४ ॥ ॥ ३२२ ॥
सीमंधरं भगवंतं नमिऊण चेइयाइं तत्थ पुणो । मंदरगिरिं गओऽहं पणमामि जिणालये उड्ढे ॥ ५ ॥ "
केचिदाहुः-" एवं इक्खागकुले समइक्कंतेसु नरवरिंदेसु । साएयपुरवरीए अणरणो पत्थिवो जाओ ॥ १ ॥

For Private and Personal Use Only

तस्स महादेवीए पुहईए दो सुआ समुप्पन्ना । पढमो अणंतरहो (अ) बीओ पुण दसरहो नाम ॥ २ ॥
अणरणो विअ नरवइ पुत्तं चिअ दसरह ठविअ रज्जे । निक्खमइ सुयसमग्गो पासे मुणि अभयसेणस्स ॥ ३ ॥
छट्ठट्ठमदसमदुवालसेहिं मासद्धमासखवणेहिं । काऊण तवं घोरं अणरणो गओ मोक्खं ॥ ४ ॥
साहूवि अणंतरहो अणंतबलवीरिअसत्तसंपन्नो । संजमतवनियमरओ संपत्तो सासयं ठाणं ॥ ५ ॥"
तस्य न्यायाध्वना पृथ्वी-पीठं पालयतः सदा । चतस्रो वल्लभा आसन् शीलरत्नविभूषिताः ॥ ९६ ॥
कौशल्या कैकेय्याह्वा च सुमित्रा सुप्रभा तथा । रूपनिर्जितकन्दर्पाःपत्न्यो नाम्ना क्रमादिमाः ॥ ९७ ॥युग्मम् ॥
कुम्भसिंहेभमार्त्तण्ड-स्वप्नाभिसूचितं सुतम् । कौशल्याऽसूत तनयं रामं पद्मं च नामतः ॥ ९८ ॥
सिंहार्केन्दुगजाग्निश्री-वार्द्धिस्वप्नोपसूचितम् । सुमित्रा लक्ष्मणं नारा-यणं सूते स्म नन्दनम् ॥ ९९ ॥
कैकेयी सुषुवे सुष्ठु-स्वप्नाढ्यं भरतं सुतम् । असूत सुप्रभा पुत्रं शत्रुघ्नाभिधमद्भुतम् ॥ १०० ॥
पद्मनारायणौ प्रीति-भाजौ जातौ क्रमान्मिथः । शत्रुघ्नभरतौ प्रेम-परौ परस्परं पुनः ॥ १०१ ॥
इतश्च मिथिलापुर्यां भूपोऽभूज्जनकाभिधः । हरिवंश्या विदेहेत्य-भिधा तस्याऽभवत् प्रिया ॥ १०२ ॥
पुत्रपुत्रीयुगं वर्यं विदेहा सुषुवे सुखम् । प्राग्जन्मवैरतोऽहार्षीत् पिङ्गलर्भुः सुतं रहः ॥ १०३ ॥
सञ्जातकरुणो देवो भूषणैः कुण्डलादिभिः । भूषयित्वाऽमुचत्तं तु वैताढ्यस्य वने क्वचित् ॥ १०४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रथनूपुरतः स्वामी खगश्चन्द्रगती रहः । तमासाद्यार्पयत् पुष्प-वत्याः पत्न्यास्ततो जगौ ॥ १०५ ॥
त्वयोच्यं तनयोऽसावि मयाऽथ गूढगर्भया । पत्योक्ते विहिते पत्न्या भूपो जन्मोत्सवं व्यधात् ॥ १०६ ॥
सन्मान्य सज्जनान् सूनोर्देहे भामण्डलेक्षणात् । भामण्डल इति क्ष्मापो नामाऽदात् सज्जनान्वितः ॥ १०७ ॥
लाल्यमानस्तदा पित्रा भामण्डलो दिने दिने । यौवनं युवतीमोह–करं प्राप स रूपभाग् ॥ १०८ ॥
इतो हृतं सुतं मत्वा विशोको जनको नृपः । सीताभिधां ददौ पुत्र्याः सर्वसज्जनसाक्षिकम् ॥ १०९ ॥
सम्प्राप्तयौवनां सीतां दृष्ट्वा जनकभूपतिः । वरचिन्तापयोराशौ पपाताऽतनुविक्रमः ॥ ११० ॥
तदाऽकस्मात् समागत्य म्लेच्छा दैत्या इवोद्धताः । जनकक्ष्मापतेर्देश-मुपाद्रोषुर्जनानपि ॥ १११ ॥
स्वदेशपीडनोदन्तं प्रेष्य स्वसेवकान् रहः । सौहार्दाद् ज्ञापयामास दशरथाय भूभुजे ॥ ११२ ॥
चलन्तं पितरं मित्र-सानिध्यहेतवे तदा । निषिध्य चलितो रामो गृहीत्वा शिबिरं कियत् ॥ ११३ ॥
रामो जनकभूपान्ते गत्वा नत्वा द्विषद्व्रजम् । नाशयामास मार्त्तण्डा इव ध्वान्तगणं क्षणात् ॥ ११४ ॥
प्रहृष्टो जनको राम-मानीयोत्सवपूर्वकम् । सदन्नपानदानेन गौरवं विदधेतराम् ॥ ११५ ॥
ध्यातवान् जनकः पुत्री रामाय दीयते यदि । तदा योगो भवेद्वर्यो हरिशच्योरिवानिशम् ॥ ११६ ॥
रामे स्वनगरे याते सीतादृग्गोचरे तदा । नारदश्छत्रिकाशोभी पिङ्गकेशः समागमत् ॥ ११७ ॥

For Private and Personal Use Only

तदा च बिभ्यती सीता यावन्नष्टा च तावता । नारदश्च गले धृत्वा तत् सख्या हक्कितो द्रुतम् ॥ ११८ ॥
रुष्टोऽथ नारदः सीता-रूपं चित्रपटस्थितम् । कृत्वा भामण्डलस्यैव दर्शयामास तत् क्षणात् ॥ ११९ ॥
सीतारूपं जगतश्लाघ्यं दृष्ट्वा भामण्डलस्तदा । मनोभूविह्वलो जात-स्तां वरीतुं च वाञ्छति ॥ १२० ॥
सीताया वरितुं वाञ्छां ज्ञात्वा भामण्डलस्य तु । खगश्चन्द्रगतिर्भृत्यं प्रति प्राहेति सादरम् ॥ १२१ ॥
 गच्छ त्वं जनकस्यान्ते जल्पेति मद्गिरा किल । खगश्चन्द्रगतिः सीतां भामण्डलाय वाञ्छति ॥ १२२ ॥
 तदा चन्द्रगतेर्भृत्यो गत्वा जनकसन्निधौ । स्वस्वामिगदितं यात्र-दाहाऽथ जनको जगौ ॥ १२३ ॥
 रामायाऽहं स वाञ्छामि सीतां दातुं पुरा ध्रुवम् । अधुनेच्छास्ति न दातुं भामण्डलाय निश्चितम् ॥ १२४ ॥
वज्रावर्त्तार्णवावर्त्ते द्वे चापे स्तो ममालये । देवताधिष्ठिते जीवा-सबले वज्रवद्दृढे ॥ १२५ ॥
यस्तयोश्चापयोर्मौर्व्या-रोपं किल करिष्यति । तस्मै सीतां प्रदास्यामि कन्यामन्यां च सुन्दराम् ॥ १२६ ॥
माघशुक्लाष्टमीघस्रे स स्वयंवरमण्डपे । भूपा आकारयिष्यन्ते सीतावरणहेतवे ॥ १२७ ॥
तत्रैकस्मिन्नपीष्वासे द्वयोर्वा यो नरो गुणम् । आरोपयिष्यति सोऽह्वाय सीतां परिणयिष्यति ॥ १२८ ॥
भामण्डलो दिने तस्मिँ-स्तत्रागच्छतु शीघ्रतः । चापोत्पाटनतः सीता-मङ्गीकुर्यात्तदा ध्रुवम् ॥ १२९ ॥
जल्पिते जनकेनेति भृत्यश्चन्द्रगतेस्तदा । गत्वा जनकभूपोक्तं सर्वं स्वामिपुरोऽवदत् ॥ १३० ॥

शत्रुञ्जय
कल्पवृ०
॥ ३२६ ॥

माघशुक्लाष्टमीघस्रे बहवोऽवनिपाः खगाः । आकारिताः समाजग्मु-स्तत्र सीताविहितवे ॥ १३१ ॥
भामण्डलोऽपि सीतायाः पाणिपीडनहेतवे । तस्मिन् समागतोऽनेक-विद्याधरनिषेवितः ॥ १३२ ॥
चश्चद्विमानमारूढा सुवेषा सुसखीवृता । दिनोदये दिने तस्मिन् सीता मण्डपमागमत् ॥ १३३ ॥
राज्ञां वंशावलीः चैवं वर्ण्यमाना सुगायनैः । उत्पाटयितुमुर्वीशा ववाञ्छुर्धनुषी तदा ॥ १३४ ॥
अङ्ग-बङ्ग तिलङ्गादि-भूपास्ते धनुषी तदा । उत्पाटयन्त आश्वाऽऽप्य मूर्च्छां पेतुश्च भूतले ॥ १३५ ॥
भामण्डलोऽपि ते चापे उत्पाटयन् करे करन् । कम्पमाप्य द्रुतं पश्चात् स्वस्थाने समुपाविशत् ॥ १३६ ॥
उत्थाय लीलया रामो धनुरुत्पाट्य चादिमम् । अधिज्यं विदधे चश्चत्-टणत्कारपुरस्सरम् ॥ १३७ ॥
पुष्पवृष्टौ कृतायां तु सुरैर्जयजयारवम् । सीता चिक्षेप रामस्य कण्ठे वरस्रजं तदा ॥ १३८ ॥
लक्ष्मणेन द्वितीये तु चापे आरोपते सति । उर्मिका कन्यकाऽक्षैप्सीत् तस्य कण्ठे वरस्रजम् ॥ १३९ ॥
अष्टादश तदा कन्या लक्ष्मणाय वरात्मने । खेचराः प्रददुश्चारु-महोत्सवपुरस्सरम् ॥ १४० ॥
अङ्गीचक्रेऽथ भरतो भद्रां कनकभूपजाम् । शत्रुघ्नाय ददौ कन्यां पुत्रीं नन्दाभिधां खग ॥ १४१ ॥
वस्त्रादिदानतः सर्वान् भूपान् सन्मान्य मोदतः । स्वं स्वं पुरं प्रति क्ष्मापो जनकोऽचालयत् क्रमात् ॥ १४२ ॥
अश्वादिदानतो भूमी-भुजा दशरथो नृपः । सन्मानितश्चतुःपुत्र-युतः स्वपुरमीयिवान् ॥ १४३ ॥

भामण्डलोऽपि रामेण सह प्रीतिं दधद् भृशम् । आगाद् दशरथेनाऽमा तत्रैव नगरे तदा ॥ १४४ ॥
रामेण मानितोऽत्यन्तं वस्त्रान्नादिप्रदानतः । भामण्डलौ ययौ स्वीये पुरे व्योमगसेवितः ॥ १४५ ॥
सर्वासां तु वधूटीनां वासावासान् पृथक् पृथग् । ददौ दशरथः क्ष्मापः सन्मानदानपूर्वकम् ॥ १४६ ॥
राजा दशरथो लात्वा बलमश्वेभशालिनम् । साधयामास भूपीठं सागरान्तिकमञ्जसा ॥ १४७ ॥
स्वकारिते जिनागारे-ऽन्यदा दशरथो नृपः । स्नात्रं विस्तरतश्चक्रे शान्तेस्तीर्थपतेर्मुदा ॥ १४८ ॥
मङ्गलार्थं जिनस्नात्र-पयः पृथक् पृथग् नृपः । राज्ञीभ्यः प्रेषयामास वधूटीभ्यश्च सादरम् ॥ १४९ ॥
भूपेन प्रेषितं स्नात्र-पयो राज्ञीभ्य आर्हतम् । स्वपार्श्वे नागतं मत्वा सुमित्रा मर्त्तुमिच्छति ॥ १५० ॥
मर्त्तुं पाशं गले यावत् सुमित्रा क्षिपति स्वयम् । तावद् दृष्ट्वा नरः कश्चिद् भूपाग्रे तन् न्यवेदयत् ॥ १५१ ॥
तत्रैत्य त्वरितं पाशं सुमित्राकण्ठगं नृपः । छित्वा प्राह प्रिये ! प्राण-त्यागः किं क्रियते त्वया ? ॥ १५२ ॥
सुमित्राऽवक् त्वयाऽन्यासां राज्ञीनां स्नात्रजं पयः । प्रेषितं न हि मह्यं तु प्रियेऽहं तेन पाशतः ॥ १५३ ॥
राजा प्राह मया प्रैषि तुभ्यं स्नात्रपयस्तदा । तत्रैत्य वामनो नीरं लात्वा तत्रागमच्चिरात् ॥ १५४ ॥
राजाऽवग् वामनोत्सूरे त्वयाऽत्राऽऽनायि किं पयः ? । वामनः प्राह वार्द्धत्वा-दंह्र्योर्मन्दगतिर्मम ॥ १५५ ॥
आकर्ण्यैतत्तदा दध्यौ सुमित्रा मयका मुधा । कान्तस्योर्ध्वं कृतः क्रोधो मर्त्तुं च वाञ्छितं मुधा ॥ १५६ ॥

For Private and Personal Use Only

* यतः–" अपूर्वः कोऽपि कोपाग्निः सज्जनस्य खलस्य च । एकस्य शाम्यति स्नेहा-द्वर्द्धतेऽन्यस्य वारितः ॥१॥ 卐
* न कश्चित् चण्डकोपाना-मात्मीयोऽस्तीह भूतले । होतारमपि जुह्वानं स्पृष्टो दहति पावकः ॥ २ ॥ 卐
* इक्कोहुं जाणइ कोइ पाणी मही पलेवणउं । बाहिरि धूम न होइ अब्भिंतर भडके बलइ ॥ ३ ॥" 卐

भूपो दध्यौ मृगाक्षीणा-मीर्ष्यैदक्षा प्रजायते । पापबुद्धिः स्त्रियामेव नृणां चित्ते न विद्यते ॥ १५७ ॥
एवं चिन्तयतो राज्ञोऽभ्येत्यावग् वनपालकः । उद्याने कमलाचार्यो ज्ञानी च (व) समवासरत् ॥ १५८ ॥
दानं तस्मै वितीर्यादौ राजा रामादिपुत्रयुग् । नन्तुं सूरिं ययौ यावद् भामण्डलस्तदाऽगमत् ॥ १५९ ॥
प्रदक्षिणात्रयीं दत्त्वा सूरे राजाऽथ देशनाम् । श्रोतुं-चोपाविशद् याव-त्तावज्ज्ञानी जगावदः ॥ १६० ॥
* पात्रमुत्तमगुणैरलङ्कृतं दायकस्तु पुलकं दधत्तनौ । देयवस्तु परिशुद्धपुष्कलं निष्कलङ्कतपसामिदं फलम् ॥१६१॥ 卐
* यस्य कुक्षिगतं चान्नं शास्त्राभ्यासेन जीर्यति । तारयेत् स्वं पराँश्चापि दश पूर्वान् दशाऽपरान् ॥१६२॥ 卐
* पौषध-प्रतिमा-पार्श्व-सेवा–पद्मप्रभार्चनाः । परमेष्ठिपरं ध्यानं पुण्डरीकश्च मुक्तिदाः ॥ १६३ ॥ 卐
* स्पृष्ट्वा शत्रुञ्जयं तीर्थं नत्वा रैवतकाचलम् । स्नात्वा गजपदे कुण्डे पुनर्जन्म न विद्यते ॥ १६४ ॥ 卐
आकर्ण्यैतद्दशरथो जगौ शत्रुञ्जये जिनः । न नम्यते मया यावद् भूरिसङ्घौघशालिना ॥ १६५ ॥
तावन्मयैकशो भोज-नीयं वासरमध्यतः । भूशय्या ब्रह्मचर्यं च ताम्बूलवर्जनं पुनः ॥ १६६ ॥

सचित्तानां परित्यागः एकैव विकृतिः पुनः । गृहीतव्या मया नूनं भवत्वेवमभिग्रहः ॥ १६७ ॥
ततो भामण्डलोऽवादीद् भगवन् ! किं मनो मम । सीतां दृष्ट्वा विकसति वार्द्धिश्चन्द्रोदयं यथा ? ॥ १६८ ॥
ज्ञानी प्राह पुरे चक्रे चक्रध्वजमहीपतेः । मनःसुन्दर्यभूत् पत्नी पुत्री च रतिसुन्दरी ॥ १६९ ॥
गेहगर्भे बुधोपान्ते पठन्ती रतिसुन्दरी । पुरोहितसुतो दृष्ट्वा राग्यभून्मधुपिङ्गलः ॥ १७० ॥
यतः–' पढमं चिअ आलावो आलावाओ रइ रइओ वीसंभो । वीसंभाओ पणओ पणयाओ वुड्ढए पेम्मं ॥ १ ॥ '
तां कन्यां पिङ्गलो हृत्वा विदर्भनगरे वरे । गत्वा कस्मिन् गृहे स्थित्वा भोगी जातो तया समम् ॥ १७१ ॥
क्रमान्निष्ठितलक्ष्मीकः पिङ्गलस्तृणदारुभिः । विक्रीतैर्निजनिर्वाहं कुरुते गेहिनीयुतः ॥ १७२ ॥
बहिर्वनेऽन्यदा पत्नीं पिङ्गलस्य मनोहराम् । रथकुण्डल आलोक्य हर्तुकामोऽभवद् हृदि ॥ १७३ ॥
दूतीमुखात् प्रलोभ्याथ कुण्डलो मदनातुरः । आनीय तां स्त्रियं भुङ्क्ते लक्ष्मीमिव चतुर्भुजः ॥ १७४ ॥
अनीक्ष्य गेहिनीं तत्र पिङ्गलो दुःखितो भृशम् । दीनास्यो नरपोपान्ते गत्वाऽवग् मे प्रिया गता ॥ १७५ ॥
रथकुण्डल आचष्ट पोतनाभिधपत्तने । एका नारी मया दृष्टा साध्वीपार्श्वे मनोहरा ॥ १७६ ॥
गत्वा तत्र पुरे पत्नी-मदृष्ट्वा मधुपिङ्गलः । पुनः पश्चात् समेत्याऽवग् न दृष्टा स्वप्रिया मया ॥ १७७ ॥
कुण्डलेन तदा हृत्वा नृपपार्श्वाच्च पिङ्गलम् । बहिर्निष्कासयामास तत्पत्न्यासक्तचेतसा ॥ १७८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततोऽन्यत्र पुरे दीनः पिङ्गलः साधुसन्निधौ । धर्मं श्रुत्वा ललौ दीक्षां भवासातछिदे तदा ॥ १७९ ॥
तपस्तीव्रं वितन्वानः पिङ्गलर्षिर्हिमागमे । सहते शीतमुष्णं च तापमन्यत्र यत्नवान् ॥ १८० ॥
दुर्गेऽतिविषमे तिष्ठन् कुण्डलो दुर्दमो बली । अमरणमहीशस्य देशं भनक्ति सन्ततम् ॥ १८१ ॥
देशं विनाशितं तेन बहु श्रुत्वा महीपतिः । यियासुरभवद्याव-त्तं हन्तुं कुण्डलं रिपुम् ॥ १८२ ॥
तावदादेशमादाय बलचन्द्रो महाभटः । प्रणम्य भूपतिं हन्तुं तं शत्रुमचलत् पुरात् ॥ १८३ ॥
बलचन्द्रश्छलं कृत्वा गत्वा तत्र रणाङ्गणे । बद्ध्वाथ कुण्डलं दुर्गे तमात्मीयं व्यधात् द्रुतम् ॥ १८४ ॥
आगत्य स्वपुरे स्वामि-पार्श्वे तं बलिनं रिपुम् । मुक्त्वाऽनंसीद्यदा बल-चन्द्रो हृष्टो नृपस्तदा ॥ १८५ ॥
तुष्टो नृपो ददौ तस्मै भृत्याय कमलां बहु । कुण्डलं ताडयित्वाथ चिक्षेप गुप्तिवेश्मनि ॥ १८६ ॥
सूनोर्जन्मनि भूपेन रथकुण्डलमण्डितः । मुक्तोऽन्यबन्दिसंयुक्तो हर्षपूरितचेतसा ॥ १८७ ॥
गच्छन् वनेऽन्यदाऽन्यत्र रथकुण्डलमण्डितः । साधुं दृष्ट्वाऽनमद्धर्म्मं श्रुत्वा च जिनजल्पितम् ॥ १८८ ॥
तथाहि-" हिंसा पुण जीववहो सोवि अ मंसस्स कारणं होइ । तम्हा कुण जीवदयं सासयसुक्खकए सययं ॥ १ ॥
[आ] संसारत्था जीवा आसि चिय बंधवा परभवेसु । खायंतएणं मंसं ते सव्वे भक्खिआ नवरम् ॥ २ ॥
जे इत्थ जीववहया महुमंससुराइलोलुया पावा । ते हु मुआ परलोए हवंति नरएसु नेरइआ ॥ ३ ॥

For Private and Personal Use Only

जो पुण मंसनिविर्त्तिं कुणइ नरो सीलदाणरहिओवि । सोविअ सग्गाइगमणं पावइ नत्थेत्थ संदेहो ॥ ४ ॥"
श्रुत्वेति कुण्डलः श्राद्ध-धर्म्मं जीवदयामयम् । अङ्गीचक्रे गुरूपान्ते चश्चद्विनयपूर्वकम् ॥ १८९ ॥
ततो नत्वा यतिं गच्छन् श्राद्धधर्म्मं जिनोदितम् । प्रपालयन् कुण्डलो याम्य-दिशम्प्रत्यचलत् क्रमात् ॥ १९० ॥
अटव्यां सलिलाभावात् तृषाऽऽक्रान्तोऽथ कुण्डलः । दध्यौ जीव ! त्वया भूरि पीतं वारि पुरा ध्रुवम् ॥ १९१ ॥
यतः-" जंणेण जलं पीयं घम्मायवजगडिएण तंपि इहं । सव्वेसु वि अगड-तलाय-नई-समुद्देसु नवि हुज्जा ॥ १ ॥
नहदंतमंसकेसट्ठिएसु जीवेण विप्पमुक्केसु । तेसुवि हविज्ज केलास–मेरुगिरिसंनिभा कूडा ॥ २ ॥
हिमवंत-मलय-मन्दर-दीवोदहिधरणिसरिसरासीओ । अहिअयरो आहारो छुहिएणाहारिओ हुज्जा ॥ ३ ॥
पीयं थणयच्छीरं सागरसलिलाउ हुज्ज बहुअयरं संसारम्मि अणंते माऊणं अन्नमन्नाणं ॥ ४ ॥
पत्ता य कामभोगा कालमणंतं इहं स उवभोगा । अप्पुव्वं पिव मन्नइ तहवि य जीवो मणे सुक्खं ॥ ५ ॥
तदा ध्यायन्निति प्राण-त्यागात् कुण्डलमण्डितः । जनकक्ष्मापगेहिन्याः कुक्षौ च समवातरत् ॥ १९२ ॥
तदा तप्त्वा तपस्तीव्र-तरं वेगवती सती । गत्वा स्वर्गे ततश्च्युत्वा पत्न्या जनकभूपतेः ॥ १९३ ॥
गर्भे समागता पूर्व-वर्यपुण्योदयान्ननु । ततो जनकगेहिन्या गर्भे युग्मं विवर्द्धते ॥ १९४ ॥
तदा मृत्वा सुरो भूत्वा पिङ्गलः श्रमणो ध्रुवम् । वैरं ज्ञात्वा रुषाद् गर्भे तौ स्तभ्नाति स्म निर्दयम् ॥ १९५ ॥

ततो जनकगेहिन्या विदेहाख्या जिनार्चनम् । कुर्वाणाया अभून्मुक्ति-गर्भस्य पुण्ययोगतः ॥ १९६ ॥
विदेहा पुत्रपुत्र्यौ च यावत् सूते स्म सौख्यतः । तावत् स पिङ्गलो देवो जहार जनकाङ्गजम् ॥ १९७ ॥
दूरं नीत्वा शीलायां त्वा-ऽऽस्फालयन् ध्यातवान् स च । किं मया मौढ्यतो बालो हन्यते क्रूरचेतसा ॥ १९८ ॥
ध्यात्वेति तं शिशुं हार-कुण्डलाभ्यां समन्वितम् । मुक्त्वा तत्रैव देवः स निजं स्थानं समीयिवान् ॥ १९९ ॥
तदा तत्राऽऽगतश्चन्द्र-गतिर्विद्याधरोत्तमः । लात्वाऽभ्येत्य गृहे प्राह वनदेव्याऽर्पितः सुतः ॥ २०० ॥
ततो भामण्डलेत्याह्वां दत्त्वा तस्य खगेश्वरः । वर्धयद्भूरिशो विद्या-स्तस्मै वितीर्णवान् स्वयम् ॥ २०१ ॥
अस्मिन्नेव भवेऽतस्ते भगिनी जनकात्मजा । भामण्डल ! विजानीहि वियोगः कर्म्मणाऽभवत् ॥ २०२ ॥
भवतो जनकोऽभूत् ते विदेहा जननी पुनः । वियोगात्तव पत्न्या युग् जनको दुःख्यजनिष्ट च ॥ २०३ ॥
* यतः-' उल्लो सुक्को य दो छूढा गोलया मट्टिया मया । दोवि आवडीया कुड्डे जो उल्लो सोत्थ लग्गई ।१। '卐
भामण्डलो निशम्येति नत्वा सीतापदाम्बुजम् । जगौ मया कृतो रागो भवत्यां दुःखदायकः ॥ २०४ ॥
तेन रागेण मे श्वभ्रे पात एव भविष्यति । अतस्त्वया भगिन्यद्य क्षम्यतां मयि साम्प्रतम् ॥ २०५ ॥
तत आलोचनां लात्वा ज्ञानिपार्श्वे स्वशक्तितः । भामण्डलोऽखिलं पापं स्वं निनिन्द मुहुर्मुहुः ॥ २०६ ॥
आलोयणापरिणओ सम्मं संपट्ठिओ गुरुसगासे । जइ अंतरावि कालं करेज्ज आराहओ तहवि ॥ २०७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततो भामण्डलो गत्वा जनकेश-विदेहयोः । मातापित्रोर्मिलित्वाशु प्रमोदं तनुतेतराम् ॥ २०८ ॥
सीतायाः स्वस्य सम्बन्धं ज्ञान्युक्तं मातृतातयोः । पुरतः प्रोक्तवान् सद्यो भामण्डलस्तनूभवः ॥ २०९ ॥
ततो वैताढ्यभूमिध्रे दक्षिणश्रेणिशालिनि । रथनूपुरपूर्यां तु भामण्डलो नृपोऽजनि ॥ २१० ॥
खगश्चन्द्रगतिः प्राप्य चारित्रं विमलं क्रमात् । सर्वकर्म्मक्षयान्मुक्ति-नगर्यां समुपेयिवान् ॥ २११ ॥
इतो दशरथो भूपः प्रेष्य कुङ्कुमपत्रिकाम् । सङ्घमाकारयामास यात्रार्थं सिद्धपर्वते ॥ २१२ ॥
हैमा देवालयाःसप्त शतानि विंशतिः पुनः । वरकाष्टमया दन्त-मयाश्चत्वार एव च ॥ २१३ ॥
सङ्घाधिपाः शतान्यष्टौ मनुजाः पञ्च कोटयः । राजानः शतमेकं च महेभ्या गणनातिगाः ॥ २१४ ॥
इत्यादि सङ्घसंयुक्तो राजा दशरथस्तदा । रामादिपुत्रसंशोभी भामण्डलसमन्वितः (युतोऽचलत्) ॥ २१५ ॥
याचकेभ्यो ददद्दान-मसङ्ख्यं मेदिनीपतिः । पठत्सु बन्दिषु प्रोच्चै-र्निनदं बिरुदावलीः ॥ २१६ ॥
ददानासु पुरन्ध्रीषु धवलानि वरारवम् । सिद्धाद्रावर्हतो नन्तुं चचाल सुखमध्वनि ॥ २१७ ॥
ग्रामे ग्रामे पुरे द्रङ्गे जिनपूजनतत्परः । प्रभावनां व्यधाद् भूपः कैवल्यसुखदायिनीम् ॥ २१८ ॥
मार्गे सिद्धाचलं वीक्ष्य जिनपूजापुरस्सरम् । लम्भयामास भूपालः श्रीसङ्घे लपनश्रियम् ॥ २१९ ॥
ततश्चलन् महीपालो गत्वा सिद्धाद्रिसन्निधौ । सङ्घेशतिलकं सङ्घ-पतिपार्श्वादकारयत् ॥ २२० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आरुह्य पुण्डरीकाद्रिं स्नात्रपूजे जिनेशितुः । कृत्वा ध्वजपताकाया दानं चक्रे जिनालये ॥ २२१ ॥
आरात्रिकोऽग्रमङ्गल-दीपात्रर्त्ति छिदे तदा । कृत्वा चक्रे नृपो भाव-स्तुतिं स्तोत्रविधानतः (?) ॥ २२२ ॥
नाभेयपादुके पुष्पैः पूजयित्वा नरेश्वरः । अक्षतैर्वर्द्धयामास तदा राजादनीं मुदा ॥ २२३ ॥
अन्येषु जिनगेहेषु पूजयित्वाऽर्हतो मुदा । भूपालो वारिकामत्र दीनादवाहयत्तदा ॥ २२४ ॥
सिद्धाद्रावादिदेवस्य प्रासादं विपुलं तदा । कारयामास कल्याण-सुखायाऽवनिनायकः ॥ २२५ ॥
प्रतिलाभ्य गुरून् भक्त्या नत्वा च मेदिनीपतिः । धर्म्मोपदेशनां धर्म्म-सूरिपार्श्वेऽश्रृणोदिति ॥ २२६ ॥

※ यतः–' जं लहइ अन्नतित्थे चरणेन तवेण बंभचेरेण । तं लहइ पयत्तेण सित्तुञ्जगिरिम्मि संपत्तो (निवसंतो) ।१।卐
※ जं कोडीए पुण्णं कामियआहारभोइया जे उ । तं लहइ तत्थ पुण्णं एगोववासेण सित्तुंजे ॥ २ ॥卐
※ जो पडिमं चेइहरे सित्तुंजगिरिस्स मत्थए कुणइ । भोत्तूण भरहवासं वसइ सग्गे निरुवसग्गे ॥ ३ ॥卐
※ जो पुण तवं च तप्पइ उड्ढभूओ इक्कपाय निक्कंपो । सित्तुंजे चडिऊणं होइ सुरिंदो नरिंदो वा ॥ ४ ॥卐
※ छत्तं ज्झयं पडागं चामरभिंगारन्हवण कलसा य । बलिथालं सित्तुंजे दिंतो विज्जाहरो होइ ॥ ५ ॥卐
※ नवकार-पोरिसीए पुरिमड्ढेकासणं च आयामे । पुंडरीअं च सरंतो फलकंखी कुणइ अभतट्ठं ॥ ६ ॥卐
※ छट्ठट्ठम-दसमदुवालसाइं मासद्धमासखमणाइं । तिगरणसुद्धो लहइ सित्तुजं संभरंतो उ ॥ ७ ॥ ' इत्यादि ।卐

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूपो दशरथः पुष्पैः प्रवरैर्दिवसोदये । प्रपूज्योत्ततारद्रेः सिद्धात् सङ्घसमन्वितः ॥ २२७ ॥
जिमयित्वाऽखिलं सङ्घं परिधाप्याम्बरैर्वरैः । भूपश्चलन् ययौ चन्द्र-प्रभाभिधे च पत्तने ॥ २२८ ॥
तत्र चन्द्रप्रभं देवं पूजयित्वाऽतिविस्तरात् । प्रासादं कारयामास चन्द्रप्रभजिनेशितुः ॥ २२९ ॥
सीता सतीशिरोरत्नं प्रासादमपरं पुनः । कारयित्वा तदा चन्द्रप्रभविम्बं न्यवीविशत् ॥ २३० ॥
ततो रैवतके नेमिं नत्वा चाभ्यर्च्य भूधवः । तत् सद्म कारयामास शम्भुपर्वतसोदरम् ॥ २३१ ॥
कैकेयी वरटक्ष्माध्रे गत्वा नत्वा जिनेश्वरम् । प्रासादमादिदेवस्य कारयामास रैव्ययात् ॥ २३२ ॥
रामेण वरटे शैले कारिते शान्तिमन्दिरे । न्यवीविशज्जिनं शान्तिं महामहःपुरस्सरम् ॥ २३३ ॥
ढङ्कशैलान्तिके ढङ्क-पुर्यां श्रीऋषभप्रभोः । बिम्बं न्यवीविशद्रामः प्रासादे कारिते स्वयम् ॥ २३४ ॥
वल्लभ्यां पुरि सर्वज्ञ-गेहे निष्पादिते स्वयम् । सुप्रभा शान्तिबिम्बं तु न्यवीविशद्वरोत्सवम् ॥ २३५ ॥
काम्पील्ये नगरे राम ऋषभस्य जिनेशितुः । लक्ष्मणो वामनस्थल्यां प्रासादं च वरं व्यधात् ॥ २३६ ॥
रामादिभिः सुतैर्मण्ड-लीकैर्भामण्डलादिभिः । शत्रुञ्जयादितीर्थेषु प्रासादाः कारिता वराः ॥ २३७ ॥
एवं दशरथो यात्रां कृत्वा तीर्थेषु भूरिषु । समहं स्वपुरीमागात् श्रीसङ्घं विससर्ज च ॥ २३८ ॥
भवोद्विग्नोऽन्यदा भूपो रामादिनन्दनान् समान् । आकार्य राज्यमात्मीयं रामाय ददते यदा ॥ २३९ ॥

॥ ३३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कैकेयी कपटाऽभ्येत्य तदा पत्युः पुरो जगौ । तव पार्श्वे वरौ द्वौ तु विद्येते मम सम्प्रति ॥ २४० ॥
रणे पङ्के रथो मग्नो मयाऽकर्षि यदा पते ! । तदोक्तं भवता राज्यं तव पुत्राय दास्यते ॥ २४१ ॥
रोगे समागते प्रोक्तं भवतेति वरो वरः । याच्यतां तु मयेत्युक्तं याचिष्येऽवसरे खलु ॥ २४२ ॥
यतः—"प्रायः पुमांसः सरलस्वभावा, रण्डास्तु कौटिल्यकलाकरण्डाः ।
तातायुयाचे कथमन्यथाऽस्मिन्, काले वरं कैकेयसम्भवेयम् ॥ १ ॥"
राज्यमेकवरेणैव देहि मे सूनवेऽधुना । द्वितीयवरतो रामो वने द्वादश हायनान् ॥ २४३ ॥
तिष्ठतात् सीतया युक्त-स्ततो दशरथो जगौ । प्रतिज्ञा मयका चक्रे या सा तु पूरयिष्यते॥ २४४ ॥ युग्मम् ॥
पत्न्यास्तादृग् वचः श्रुत्वा वज्रपातसहोदरम् । तस्थौ दशरथो मौनी यावद्रामो जगौ तदा ॥ २४५ ॥
तात ! राज्यमिदं दत्त्वा भरतायैव सूनवे । आशा सम्पूर्यतां मातुः कैकेय्या मम साम्प्रतम् ॥ २४६ ॥
राज्येच्छा विद्यते मे न पितस्तुव पदाम्बुजे । सेवावाञ्छा समस्त्येव भरतोऽतोऽस्तु भूपतिः ॥ २४७ ॥
ततो भरतपुत्राय दत्त्वा राज्यं सदुत्सवम् । यावद्दशरथोऽचाली-ल्लातुं संयममात्मसात् ॥ २४८ ॥
तावद्रामः पितुः पादौ प्रणम्येति जगौ मुदा । वनवासाय मे देहि त्वमादेशं प्रसद्य हि ॥ २४९ ॥
कृते दशरथेनैवं मौने दध्यौ तु राघवः । मानितं वनवासाय तातेन मम साम्प्रतम् ॥ २५० ॥

For Private and Personal Use Only

सीता-लक्ष्मणयुग् रामो नत्वा तातपदाम्बुजम् । चचाल वनवासाय राज्यनिस्पृहमानसः ॥ २५१ ॥

उक्तंच–" आहूतस्याभिषेकाय विसृष्टस्य वनाय च । ददृशुर्विस्मितास्तस्य मुखरंगं समं जनाः ॥ १ ॥"

तदा विशेषतोऽसारं संसारं निखिलं स्फुटम् । मत्वा दशरथश्चन्द्र-सूर्यन्ते संयमं ललौ ॥ २५२ ॥

रामपृष्ठौ प्रजा गत्वा प्रोचुर्विनयपूर्वकम् । त्वां विनाऽद्य निराधारा भविष्यामो वयं कथम् ॥ २५३ ॥

* यतः–" देहयष्टिर्विना मूर्ध्ना मुखश्रीर्नासया विना । दृग् विना तारया वल्ली विना पत्रेण नैधते ॥ १ ॥卐

* विजला सरसी चैत्य-शिलाका देववर्जिता । विद्या निरधिदेवी च गुहेव हरिवर्जिता ॥ २ ॥"卐

एवं भूरिमहेभ्याली-प्रासादश्रेणिसंयुता । विना रामेण शोभेत नायोध्या साम्प्रतं मनाग् ॥ २५४ ॥

एवं जल्पत्सु लोकेषु जगौ रामो जना ! ननु । अहं तातप्रतिज्ञां तु पालयिष्यामि निश्चितम् ॥ २५५ ॥

* यतः-सकृज्जल्पन्ति राजानः सकृज्जल्पन्ति साधवः । सकृत् कन्याः प्रदीयन्ते त्रीण्येतानि सकृत् सकृत् ॥२५६॥卐

भरतोऽपि मम भ्राता पाता न्यायाध्वना प्रजाः । मामिवाश्रितव्यो हि भरतः प्रजयापि च ॥ २५७ ॥

शून्यं रामेण राज्यं तु प्रपश्यन् भरतस्तदा । ययौ वालयितुं रामं राज्याय रामसन्निधौ ॥ २५८ ॥

प्रणम्य भरतो राम-पदयोरूचिवानिति । राज्यं पश्चात् समेत्य त्वं गृहाणाऽनुगृहाण माम् ॥ २५९ ॥

अहं तु संयमं मुक्ति-शर्मदं संश्रयामि तु । संसारो रोचते मे न रोचते संयमः पुनः ॥ २६० ॥

For Private and Personal Use Only

शत्रुञ्जय
कल्पवृ०
॥ ३३८ ॥

अथवा लक्ष्मणो राज्यं करोतु तव सेवनम् । करिष्येऽहं सदा राम ! सुखे दुःखेऽपि निश्चितम् ॥ २६१ ॥
लक्ष्मणोऽथ तदा प्राह भरतोक्तं त्वया वरम् । अहं प्राणाऽत्यये राम-मेकंकं न त्यजामि च ॥ २६२ ॥
* उक्तंच—"प्रपतेद् द्यौः सनक्षत्रा पृथिवी शकलीभवेत् । शैत्यमग्निरयान्नाहं त्यजामि रघुनन्दनम् ॥ २६३ ॥卐
भरहो उ नमिअ सिरो काउणं सिरंजलिं भणइ रामं । रज्जं करिहि सुपुरिस ! सयलं आणा गुणविसालम् ॥ १ ॥
अहयं धारेमि च्छत्तं चामरधारी हविज्ज सत्तुग्घो । लच्छीहरो य मंती तुज्झं ण सुविहिअं किं वा ॥ २ ॥
भरतं प्रति रामोऽवग्-निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु, लक्ष्मीः समाविशतु गच्छतु वा यथेच्छम्—
अद्यैव वा मरणमस्तु युगान्तरे वा, न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ॥ २६४ ॥
इतश्च कैकेयी देवी तत्राभ्येत्य जगावदः । मया मुधा वने वासो भवता दापितः खलु ॥ २६५ ॥
पश्चादेत्य भवान् राज्यं करोतु भरतस्तव । छत्रादि-धरणात् सेवां करिष्यति निरन्तरम् ॥ २६६ ॥
* यतः-महिला सहावचवला अदीहपेहीह सहावमाइल्ला । तं मे खमेहि पुत्त ! जं पडिकूलं कयं तुज्झ ॥ २६७ ॥卐
ततः पद्मो जगौ मात-र्भरतो राजभृद्यदि । तदा मम मनो तीव्रं मोदते लक्ष्मणस्य च ॥ २६८ ॥ ॥३३८॥
उक्त्वेति सर्वभूपानां प्रत्यक्षं राघवस्तदा । राज्याभिषेचनं चक्रे भरतस्य स्वपाणिना ॥ २६९ ॥
रामलक्ष्मणसीतानां प्रणम्य भरतः पदौ । यदा च भरतोऽचालीत्तदा रामो जगावदः ॥ २७० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

※ यतः—" आलस्योपहतः पादः पादः पाखण्डसंश्रितः । राजानं सेवते पाद एकः पादः कृषीबलः ॥ १ ॥卐
※ एकं पादं त्रयः पादा भक्षयन्ति दिने दिने । तथा भरत ! कर्त्तव्यं यथा पादो न सीदति ॥ २ ॥卐
एताः पश्य पुरो वत्स ! भुजप्रावरणः प्रजा । आभ्य एव प्रसूयन्ते चामरो चामराः श्रियः ॥ २७१ ॥
प्रपद्य रामवाणीं तु भरतो राघवक्रमौ । प्रणम्य चलितः स्वीय-पुरे यातुं शनैः शनैः ॥ २७२ ॥
कैकेय्यपि यथायोग्यं रामादीन्निखिलाँस्तदा । आलाप्य चलिता सार्द्धं सूनुना हृतमानसा ॥ २७३ ॥
ततश्च राघवो हृष्टः सीता-लक्ष्मणसंयुतः । चचाल काननात्तस्मात् स्मरन् पञ्चनमस्कृतिम् ॥ २७४ ॥
※ आहूतस्याभिषेकाय विसृष्टस्य वनाय च । ददृशुर्विस्मितास्तस्य मुखरङ्गं समं जनाः ॥ २७५ ॥卐
पथि पथिकवधूभिः सादरं पृच्छयमाना, कुवलयदलनीलः कोऽयमार्ये !! तवेति ।
स्मितविकचकपोलं व्रीडविभ्रान्तनेत्रं मुखमवनमयन्ती स्पष्टमाचष्ट सीता ॥ २७६ ॥
एतावता पथिकवधूभिर्ज्ञातमयमस्या भर्त्ता रामः ।
रामो गच्छन् वनेऽन्येद्यु-र्गम्भीरातटिनीतटे । वृक्षस्याधः स्थितोऽप्राक्षी-ल्लक्ष्मणं सोदरं प्रति ॥ २७७ ॥
देशोऽयमुद्वसः कस्मा-दभूल्लक्ष्मण ! जल्प्यताम् । लक्ष्मणोऽवग् नरोऽत्रैति कोऽपि यः पृच्छयते स च ॥ २७८ ॥
देशोद्वसनहेतुं तु पृष्टः कश्चिन्नरस्तदा । रामेणावग् वरे देशे पुरे राणापुरेऽत्र च ॥ २७९ ॥

For Private and Personal Use Only

कर्णो भूपो जिनं देवं जैनं साधुं विना क्वचित् । नान्यं कुलिङ्गिनं नौति सरागं निर्जरं पुनः ॥ २८० ॥
यतः—सर्वज्ञो जितरागादि-दोषस्त्रैलोक्यपूजितः । यथास्थितार्थवादी च देवोऽर्हन् परमेश्वरः ॥ २८१ ॥
ध्यातव्योऽयमुपास्योऽय-मयं शरणमीष्यताम् । अस्यैव प्रतिपत्तव्यं शासनं चेतनास्ति चेत् ॥ २८२ ॥
सरागोऽपि हि देवश्चेद् गुरुरब्रह्मचार्यपि । कृपाहीनोऽपि धर्म्मः स्यात् कष्टं नष्टं हहा! जगत् ॥ २८३ ॥
श्रुत्वैतन् नियमं तस्य-भ्येत्य सिंहोदरो नृपः । यावद् हन्ति नृपं कर्णं तावन् नंष्ट्वा गतः स च ॥ २८४ ॥
साधर्मिकः स कर्णो मे ध्यात्वेति रामभूधवः । हत्वा सिंहोदरं कर्णं राज्ये तस्मिन् न्यवीविशत् ॥ २८५ ॥
यतः—दानं वित्तादृतं वाचः कीर्त्तिधर्म्मौ तथाऽऽयुषः । परोपकरणं काया-दसारात् सारमुद्धरेत् ॥ १ ॥
इतोऽन्यत्र गते रामे विद्याधरमुनी उभौ । सीतया शुद्धभक्तेन हर्षेण प्रतिलाभितौ ॥ २८६ ॥
* यतः—अभयं सुपत्तदाणं अणुकंपा उचिअ कित्तिदाणं च । दोहि वि मुक्खो भणिओ तिन्निवि भोगाइयं दिंति ॥卐
* व्याजे स्याद् द्विगुणं वित्तं व्यवसाये चतुर्गुणम् । क्षेत्रे शतगुणं प्रोक्तं पुण्येऽनन्तगुणं भवेत् ॥ २८७ ॥卐
तदा सुगन्धनीरेण पुष्पाणां प्रकरैर्वरैः । सुमनोभिः कृता वृष्टि-स्तत्र सीताग्रतस्तदा ॥ २८८ ॥
भरतोऽपि स्वपुरेऽभ्येत्य प्रणम्य रामपादुके । सभायां तस्थिवान् भूरिनृपसेव्यपदाम्बुजः ॥ २८९ ॥
एकदा बहिरुद्याने धनेश्वरगुरोः पुरः । सुश्राव भरतः क्षोणी-पतिरेवं कृतादरम् ॥ २९० ॥

रयणदीवम्मि गओ गिण्हइ इक्कंपि जो महारयणं । तं तस्स इहाणीयं महग्घमोल्लं हवइ लोए ॥ १ ॥
जिणधम्मरयणदीवे जं णियममणि लहइ इक्कंपि । तं तस्स अणग्घयं होहिइ पुण्णं परभवम्मि ॥ २ ॥
पढममहिंसारयणं गिण्हेउं जो जिणं समच्चेइ । सो भुंजइ सुरलोए इंदियसोक्खं अणोवमिअं ॥ ३ ॥
न्यग्रोधे दुर्लभं पुष्पं दुर्लभं स्वातिजं पयः । दुर्लभं मानुषं जन्म दुर्लभं जिनदर्शनम् ॥ २९१ ॥
अनर्घ्याण्यपि रत्नानि लभ्यन्ते विभवैः सुखम् । दुर्लभो रत्नकोटयाऽपि क्षणोऽपि मानुषाऽऽयुषः ॥ २९२ ॥
केऽप्याप्तमपि पुण्येन तत् प्रमादपरायणाः । हारयन्ति नराः सुप्ता इव चिन्तामणिं करात् ॥ २९३ ॥
तत्रापि दुर्लभः श्राद्ध-धर्म्मः शिवसुखप्रदः । ततोऽपि दुर्लभः साधु-धर्म्मः शीघ्र-शिवप्रदः ॥ २९४ ॥
श्रुत्वेति भरतः प्राह श्रीरामागमनादनु । संयमः साधुधर्म्मस्य गृहीतव्यो मया खलु ॥ २९५ ॥
इतः शुभः खगो विद्यां राक्षसाह्वां तु दुःशकाम् । साधयित्वा बहून् लोकान् भापयामास सन्ततम् ॥ २९६ ॥
ततस्तस्याऽभवन्नाम राक्षसेति जनोक्तितः । वैताढ्यतः स चाम्भोधि-मध्ये वासमचीकरत् ॥ २९७ ॥
ततो द्वीपस्य तस्यैव राक्षसेत्यभिधाऽभवत् । वार्द्धौ सपादलक्षा स्यु-र्द्वीपा गुप्ताः स्फुटा यतः ॥ २९८ ॥
तस्मिन् द्वीपे खगः सोऽपि लङ्कां स्वर्णमयीं पुरीम् । अवासयद्रातीना-मग्राह्यां वप्रशालिता(नी)म् ॥ २९९ ॥
रक्षोद्वीपेऽथ लङ्कायां विहरत्यजिते जिने । घनवाहन इत्याख्यो रक्षोवंशेऽभवन्नृपः ॥ ३०० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्सूनुस्तु महारक्षा जिनाङ्घ्रिसेवनापरः । देवरक्षा सुतस्तस्य प्रव्रज्य च शिवं ययौ ॥ ३०१ ॥
देवरक्षःसुतो धर्म्म-रक्षा राजा नयी वृषी । पद्मरक्षं सुतं न्यस्य राज्ये जग्राह संयमम् ॥ ३०२ ॥
एवं जातेष्वसङ्ख्येषु भूषेषु राक्षसान्वये । बभूव कीर्त्तिधवलो भूरि-विद्याब्धिपारगः ॥ ३०३ ॥
श्रेयांसस्यार्हतस्तीर्थे समुद्राचार्यसन्निधौ । प्रपेदे कीर्त्तिधवलो धर्म्मं सर्वज्ञभाषितम् ॥ ३०४ ॥
इतो वैताढ्यभूमिध्राद् नीत्वा श्रीकण्ठखेचरम् । न्यवासयत् कपिद्वीपे स कीर्तिधवलः खगः ॥ ३०५ ॥
तत्र किष्किन्धभूमिध्रे योजनत्रिशतीमिते । अतिष्ठिपत् स किष्किन्धां राजधानीं नवां स च ॥ ३०६ ॥
ये खगा वानरद्वीपे-ऽवसन् ते वानराः स्मृताः । वानराङ्गधरां विद्यां वानराह्वामसाधयन् ॥ ३०७ ॥
श्रीकण्ठाद् वानरीविद्या-वित्सु जातेषु भूरिषु । मुनिसुव्रततीर्थेऽभूद् घनोदधिः कपिः खगः ॥ ३०८ ॥
तदा लङ्काधिपो राजा तडित्केशाभिधोऽभवत् । तडित्केश-घनोदध्योः प्रीतिरासीन्मिथो द्वयोः ॥ ३०९ ॥
किष्किन्धायां किष्किन्धि-र्घनोदधिसुतोऽभवत् । लङ्कायां तु तडित्केशा-त्सुकेशोऽभूत् खगेश्वरः ॥ ३१० ॥
इतो वैताढ्यभूमिध्रे चक्रवालाभिधे पुरे । खेचरोऽशनिवेगाह्वो बहुविद्याधरोऽभवत् ॥ ३११ ॥
अन्येद्युः प्रातरुत्थाया ऽशनिवेगो व्यचिन्तयत् । वीक्ष्यते चेन्महीपीठं तदा स्यात् सफलं जनुः ॥ ३१२ ॥
यतः—भ्रमद्भिर्दृश्यते पृथ्वी नानातीर्थपुराऽन्विता । श्लाघ्यं च क्रियते जन्म ज्ञायते शक्तिरात्मनः ॥ ३१३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योन निर्गत्य निशेषा-मवलोकयति मेदिनीम् । अनेकाश्चर्यसम्पूर्णां स नरः कूपदर्दुरः ॥ ३१४ ॥

* दीसइ विविहचरिअं जाणिज्जइ सुजण-दुज्जणविसेसो । अप्पाणं कलिज्जइ हिंडिज्जइ तेण पुहवीए ॥ ३१५ ॥卐

विमृशन्निति स व्योम-गामी स्वीयात् पुरात्तदा । मेदिनीमण्डलं द्रष्टुं निर्ययौ स्वविमानगः ॥ ३१६ ॥

भ्रमन्नशनिवेगस्तु किष्किन्धायां पुरि ध्रुवम् । सन्मानितो न किष्किन्धि सुकेशाभ्यां मनाग् यदा ॥ ३१७ ॥

ततस्तौ हन्तुकामोऽभूद्यावदशनिवेगकः । तावत् किष्किन्धिसुकेशावभूतां सज्जितौ युधे ॥ ३१८ ॥

किष्किन्धिश्च सुकेशश्च जितौ तेन रणे तदा । वासं पाताललङ्कायां चक्रतुर्बिभ्यतौ ततः ॥ ३१९ ॥

तत्र पाताललङ्कायां सुकेशस्य महीपतेः । इन्द्राणी प्रेयसी जाता सच्छीलगुणशालिनी ॥ ३२० ॥

इन्द्राणी मालिनं पुत्रं प्रसूतेस्म सुमालिनम् । माल्यवन्तं क्रमात् चारु-लग्ने शोभनवासरे ॥ ३२१ ॥

किष्किन्धेर्भूपतेः पत्न्या श्रीमालया विशिष्टया । जनितश्चादित्यरजा ऋक्षरजाश्च नन्दनौ ॥ ३२२ ॥

नित्यार्हतः प्रणम्यायान् किष्किन्धिर्मधुपर्वते । किष्किन्धाह्वं पुरं स्थाप-यित्वा वासमचीकरत् ॥ ३२३ ॥

सुकेशस्य सुता रुष्टा लङ्कायां च समेत्य ते । जघ्नुश्चाशनिवेगस्य निर्घाताभिधसेवकम् ॥ ३२४ ॥

लङ्कायामभवन् माली राजा प्रपालयन् महीम् । किष्किन्धायामभूदादि-त्यरजा वरनीतिमान् ॥ ३२५ ॥

मालिनश्चाभवत् प्रीति-रादित्यरजसि स्फुटम् । प्राभृतादिप्रदानेन तयोः प्रीतिर्विवर्द्धते ॥ ३२६ ॥

॥ ३४३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विद्याभृतोऽशनिवेग-नाम्नोऽभूद् गुणसुन्दरी । पत्नी पुत्रः सहस्रारा-भिधोऽजनि मनोहरः ॥ ३२७ ॥
सहस्रारस्य पत्न्यासी-न्नाम्नाथ चित्रसुन्दरी । इन्द्रनामाभवत् पुत्रो मातृपितृप्रमोददः ॥ ३२८ ॥
इन्द्र इन्द्र इवाशेष-लोकपालव्यवस्थया । राज्यं कुर्वन् तृणं सर्वं विश्वं च मन्यतेतराम् ॥ ३२९ ॥
इन्द्रः पातालल‍ङ्कायां समेत्य भूरिभृत्ययुग् । रक्षांसि वानरांश्चैव न्यधात् सेवकभावतः ॥ ३३० ॥
इत इन्द्रेण विद्याभृ-न्नाथेन रक्षता भुवम् । । स्थापिता लोकपालाश्च नाम दत्त्वा महीभृताम् ॥ ३३१ ॥
यतः-" चतारि लोगपाला सत्त य अणियाइं तिन्नि परिसाओ । एरावणो गइंदो वज्जं च महाउहं तस्स ॥ १ ॥
चत्तालीसं ठविआ तिन्नि सहस्सा हवंति जुवईणं । मंती विहप्फइ से हरिणेगमेसी बलानीओ ॥ २ ॥
तो सो नमित्व नज्जइ सव्वेसिं खेअराणं सामित्तं । कुणइ सुवीसत्थमणो विज्जाबलगव्विओ धीरो ॥ ३ ॥"
इन्द्रमेवंविधं श्रुत्वा जेतुं माली नरेश्वरः । भ्रातृभिर्वारितोऽप्येव चचालाऽतुलसैन्ययुग् ॥ ३३२ ॥
सुमाली सोदरः प्राह वैरी सोऽतीव दुःशकः । तेन भेदेन हत्येत स वैरी बलवानपि ॥ ३३३ ॥
उक्तं च—" सव्वत्थ सत्थकुसलो भणइ सुमाली सहोदरं जेट्ठं ।
इत्थं कुणहावासं अहव पुरिं पडिनिअत्तत्तामो ॥ १ ॥
दीसंति महाघोरा उप्पाया सउणया य विवरीआ । एए कहंति अजयं अम्हं नत्थेत्थ संदेहो ॥ २ ॥

For Private and Personal Use Only

यो न निर्गत्य निशेषा-मवलोकयति मेदिनीम् । अनेकाश्चर्यसम्पूर्णां स नरः कूपदर्दुरः ॥ ३१४ ॥

* दीसइ विविहचरिअं जाणिज्जइ सुजण-दुज्जणविसेसो । अप्पाणं कलिज्जइ हिंडिज्जइ तेण पुहवीए ॥ ३१५ ॥卐

विमृशन्निति स व्योम-गामी स्वीयात् पुरात्तदा । मेदिनीमण्डलं द्रष्टुं निर्ययौ स्वविमानगः ॥ ३१६ ॥

भ्रमन्नशनिवेगस्तु किष्किन्धायां पुरि ध्रुवम् । सन्मानितो न किष्किन्धि सुकेशाभ्यां मनाग् यदा ॥ ३१७ ॥

ततस्तौ हन्तुकामोऽभूद्यावदशनिवेगकः । तावत् किष्किन्धिसुकेशावभूतां सज्जितौ युधे ॥ ३१८ ॥

किष्किन्धिश्च सुकेशश्च जितौ तेन रणे तदा । वासं पातालल‌ङ्कायां चक्रतुर्बिभ्यतौ ततः ॥ ३१९ ॥

तत्र पातालल‌ङ्कायां सुकेशस्य महीपतेः । इन्द्राणी प्रेयसी जाता सच्छीलगुणशालिनी ॥ ३२० ॥

इन्द्राणी मालिनं पुत्रं प्रसूतेस्म सुमालिनम् । माल्यवन्तं क्रमात् चारु-लग्ने शोभनवासरे ॥ ३२१ ॥

किष्किन्धेर्भूपतेः पत्न्या श्रीमालया विशिष्टया । जनितश्चादित्यरजा ऋक्षरजाश्च नन्दनौ ॥ ३२२ ॥

नित्यार्हतः प्रणम्यायान् किष्किन्धिर्मधुपर्वते । किष्किन्धाह्वं पुरं स्थाप-यित्वा वासमचीकरत् ॥ ३२३ ॥

सुकेशस्य सुता रुष्टा ल‌ङ्कायां च समेत्य ते । जघ्नुश्चाशनिवेगस्य निर्घाताभिधसेवकम् ॥ ३२४ ॥

ल‌ङ्कायामभवन् माली राजा प्रपालयन् महीम् । किष्किन्धायामभूदादि-त्यरजा वरनीतिमान् ॥ ३२५ ॥

मालिनश्चाभवत् प्रीति-रादित्यरजसि स्फुटम् । प्राभृतादिप्रदानेन तयोः प्रीतिर्विवर्द्धते ॥ ३२६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विद्याभृतोऽशनिवेग-नाम्नोऽभूद् गुणसुन्दरी । पत्नी पुत्रः सहस्रारा-भिधोऽजनि मनोहरः ॥ ३२७ ॥
सहस्रारस्य पत्न्यासी-न्नाम्नाथ चित्रसुन्दरी । इन्द्रनामाभवत् पुत्रो मातृपितृप्रमोददः ॥ ३२८ ॥
इन्द्र इन्द्र इवाशेष-लोकपालव्यवस्थया । राज्यं कुर्वन् तृणं सर्वं विश्वं च मन्यतेतराम् ॥ ३२९ ॥
इन्द्रः पाताललङ्कायां समेत्य भूरिभृत्ययुग् । रक्षांसि वानरांश्चैव न्यधात् सेवकभावतः ॥ ३३० ॥
इत इन्द्रेण विद्याभृ-न्नाथेन रक्षता भुवम् । । स्थापिता लोकपालाश्च नाम दत्त्वा महीभृताम् ॥ ३३१ ॥
यतः–" चतारि लोगपाला सत्त य अणियाइं तिन्नि परिसाओ । एरावणो गइंदो वज्जं च महाउहं तस्स ॥ १ ॥
चत्तालीसं ठविआ तिन्नि सहस्सा हवंति जुवईणं । मंती विहप्फइ से हरिणेगमेसी बलानीओ ॥ २ ॥
तो सो नमिव्व नज्जइ सव्वेसिं खेअराणं सामित्तं । कुणइ सुवीसत्थमणो विज्जाबलगव्विओ धीरो ॥ ३ ॥"
इन्द्रमेवंविधं श्रुत्वा जेतुं माली नरेश्वरः । भ्रातृभिर्वारितोऽप्येव चचालाऽतुलसैन्ययुग् ॥ ३३२ ॥
सुमाली सोदरः प्राह वैरी सोऽतीव दुःशकः । तेन भेदेन हत्येत स वैरी बलवानपि ॥ ३३३ ॥
उक्तं च—" सव्वत्थ सत्थकुसलो भणइ सुमाली सहोदरं जेट्ठं ।
इत्थं कुणहावासं अहव पुरिं पडिनिअत्तत्तामो ॥ १ ॥
दीसंति महाघोरा उप्पाया सउणया य विवरीआ । एए कहंति अजयं अम्हं नत्थेत्थ संदेहो ॥ २ ॥

For Private and Personal Use Only

रिट्ठखरतुरयवसहा सारससयवत्त कोल्हायाईया । वासंति अ दाहिणिल्ला एए अजयावहा अम्हं ॥ ३ ॥"
श्रुत्वेति प्रोक्तवान् माली गर्वितः सोदरं प्रति । किं शूकरभयात् सिंहो रक्षति स्वगृहं क्वचित् ? ॥ ३३४ ॥
नंदणवणे महंता जिणालया कारिया रयणचित्ता । अणुहूयं पवरसुहं दाणं च किमिच्छियं दिण्णं ॥ ३३५ ॥
समलंकिअं च गोत्तं जसेण ससिकुंदनिम्मलयरेणं । जं होउ समरमज्झे मरणं किं न य पज्जत्तं ॥ १ ॥
एवं सुमालिवयणं अवगणेऊण पत्थिओ माली । वेयड्ढनगवरिंदे रहनेउर चक्कवालिपुरं ॥ २ ॥"
आयान्तं मालिनं भूपः श्रुत्वैरावणकुञ्जरम् । आरुह्य निर्गतः कर्त्तुं युद्धमिन्द्रोऽपि संमुखम् ॥ ३३६ ॥
रथीव रथिना सार्द्धं तूणीव तूणीना समम् । खड्गीव खड्गिना सार्द्धं युद्धं कर्त्तुं प्रवर्त्तितः ॥ ३३७ ॥
खड्गेन मालिना शक्र आहतो निर्दयं तदा । यदा मूर्च्छामवाप्योर्व्यां पपात शुष्कवृक्षवत् ॥ ३३८ ॥
उत्थायेन्द्रः सरुड् बाढं कुन्तेन मालिनं तथा । जघान हृदये प्राप पञ्चत्वं क्षणतो यथा ॥ ३३९ ॥
मालिनं विहतं श्रुत्वा शक्रेण समराङ्गणे । सुमाली समगादिन्द्रं निहन्तुं स्वाश्रयात्तदा ॥ ३४० ॥
सुमाल्यपि रणं कुर्वन् इन्द्रेण सह सङ्गरे । अशक्तो वैरिणं हन्तुं नंष्ट्वा स्वपुरमीयिवान् ॥ ३४१ ॥
एवं निर्जित्य निःशेषान् वैरिणः समराङ्गणे । वासवः कुरुते राज्यं स्वपुरे त्रिदशेशवत् ॥ ३४२ ॥
उक्तंच—" भज्जइ रहो रहेण निवडइ हत्थि समं गयवरेणं । तुरएण समं तुरंगो पायक्को सह पयत्थेणं ॥ १ ॥

सर-सत्तिबाण-मोग्गर-फलिह-सिला सेल्लआउहसएसु । खिप्पंतेसु समत्थं छत्रं नयणाणं सहसा ॥ २ ॥”
ततो लङ्कापुरीस्थस्य सुमालिमेदिनीपतेः । अभूद् रत्नश्रवाः पुत्रो वर्यलक्षणलक्षितः ॥ ३४३ ॥
सुमाली स्वसुतं राज्ये न्यस्य पार्श्वे गुरोर्मुदा । प्रव्रज्य निखिला साता-सातक्षयाद् ययौ शिवम् ॥ ३४४ ॥
भूपस्य रत्नश्रवसोऽभूवन् विद्यावशा वरा । प्रेयसी कैकसी चासीत् शीलादिगुणशालिनी ॥ ३४५ ॥
कैकसी सूर्यचन्द्रादि-स्वप्नसूचितमङ्गजम् । असूत शोभने घस्रे लसल्लक्षणलक्षितम् ॥ ३४६ ॥
सूनोरारोपिते कण्ठे हारे नवमणीमये । प्रतिबिम्बित आस्ये तु मुखान्यासँस्तदा दश ॥ ३४७ ॥
“ रयणकिरणेसु एत्तो मुहाइं नव नियवयणसरिसाइं । हारे दिट्ठाइं फुडं तेण कयं दहमुहो नामं ॥ १ ॥”
ततो दशास्य इत्यासी-तस्य नाम जनेऽखिले । वर्द्धमानः क्रमान्माता-पित्रोर्मोदकरोऽजनि ॥ ३४८ ॥
कैकसी सुषुवे कुम्भकर्णं पुत्रं च सुन्दरम् । ततः सूर्पणखां पुत्रीं रूपनिर्जितनिर्जरीम् ॥ ३४९ ॥
ततो बिभीषणं पुत्रं चश्वत्स्वप्नाभिसूचितम् । कैकसी सुखतोऽसूत शोभने वासरे स्फुटम् ॥ ३५० ॥
वर्द्धमानाः क्रमादेते रावणाद्याः शुभोदयात् । बभूवू रूपलावण्य-लक्ष्मीकलितविग्रहाः ॥ ३५१ ॥
मातापित्रोर्मुखात् स्वस्य द्विषां पराभवं बहु । भीमारण्ये त्रयोऽप्येयू रावणाद्याः सहोदराः ॥ ३५२ ॥
तत्र पूजोपहाराद्यैः पुष्पैस्तीव्रतपःकृतेः । रोहिण्याद्यां वरां विद्या-मसाधयँश्च ते तदा ॥ ३५३ ॥

॥ ३४६ ॥

दशास्यस्याऽभवन् विद्याः सहस्रशो वशंवदाः । पूर्वपुण्योदयात् किं किं जायते न तनूमताम् ? ॥ ३५४ ॥
आसन् विद्याः सहस्रं तु वशगाः पुण्ययोगतः । अन्या अपि दशास्यस्य विद्याः साधयतस्तदा ॥ ३५५ ॥
विद्याः साधयतस्तत्र कुम्भकर्णस्य भूपतेः । आसन् विद्या सहस्रं तु पूर्वपुण्योदयात्तदा ॥ ३५६ ॥
विद्यानां त्रिशतान्यासन् विभीषणमहीपतेः । पूर्वपुण्योदयेनैव विद्याः साधयतस्तदा ॥ ३५७ ॥
यतः—सव्वायरेण एवं पुण्णं कायव्वयं मणूसेण । पुण्ये णवरि लब्भइ कम्मसमिद्धा-सिद्धीअ ॥ ३५८ ॥

उक्तं च ग्रन्थान्तरे रावणस्य विद्याप्राप्तिस्वरूपम्—

कालम्भि अ संपुण्णे सिद्धाओ महंतविज्जाओ । आगासगामिणी कामदायिणी कामुगामिणी ॥ १ ॥
विजयं दोण्णि वारा जय कम्मा तह य पन्नत्ती । अह भानुमालिणी विअ अणिमालघिमाय णायव्वा ॥ ३५९ ॥
मणथंभणी अखोहा विज्जा सुहदाइणी रओ रूवा । दिण-रयणी करी विज्जा परी य पयत्तो समा दिट्ठी ॥ ३६० ॥
अजरामरा विसन्ना जलथंभणि अग्गिथंभणी चेव । गिरिदारिणी य एत्तो विज्जाय अव लोयणी चेव ॥ ३६१ ॥
अरिविद्धंसी घोरा वीरा य भुयंगिणी तह तहा वरुणी । भुवणा विज्जाय पुणो दारुणीमयणासणी य तहा ॥ ३६२ ॥
रवितेया भयजणणी ईसाणी तह भवेजयाविजया । वंधणि वाराहाविअ कुडिला कित्ती मुणेअव्वा ॥ ३६३ ॥
वाउब्भवायसत्ती कोबेरी संकरी य उद्दिट्ठा । जोगेसीवलमहणी चंडालीवरिसिणी चेव ॥ ३६४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विज्जाओ एवमाइ सिद्धाओ तस्स बहुविह गुणाओ । थोवदिवसे विजाया वरसा दसमुहस्स तहिं ॥ ३६५ ॥
सव्वा रुहरइ विद्धी आगास गमा य जंभिणी चेव । निद्दाणि पंचमिआ सिद्धा विज्जाय कुंभकण्णस्स ॥ ३६६ ॥
सिद्धत्था अरिदमणी निब्बाघाया खगामिणी पमुहा । एआविहु विज्जाय पत्ताओ बिभीसणेण तया ॥ ३६७ ॥
एवंविधमहाविद्याः प्राप्य त्रयोऽपि बान्धवाः । महोत्सवेन पुर्यन्तः समायुर्निजमन्दिरम् ॥ ३६८ ॥
कुर्वाणस्य दशास्यस्य विद्याप्राप्तिमहोत्सवम् । पितामहः सुमाल्यागाद् माल्यवानपि तत्र च ॥ ३६९ ॥
उत्थाय रावणो भ्रातृ-युक्तो विनयपूर्वकम् । तयोश्चरणपाथोजं ननामाऽतुलभक्तिमान् ॥ ३७० ॥
विद्याभिस्ताभिर्हृद्याभिः स्वेच्छया रावणो भ्रमन् । कैलास-हिमवन्मेरु-मुख्येषु गिरिषु ध्रुवम् ॥ ३७१ ॥
वैताढ्याद्दक्षिणश्रेण्यां सुरसङ्गीतपुर्यथ । मयो विद्याधरश्चासीत् पत्नी हेमवती पुनः ॥ ३७२ ॥
तयोर्मन्दोदरी पुत्री बभूव वरविग्रहाम् । यौवनस्थां सुतां दृष्ट्वा मयोऽवग् मन्त्रिणां पुरः ॥ ३७३ ॥
एषा पुत्री दशास्याय दास्यते लसदुत्सवम् । विचार्येति दशास्याय दातुं मयोऽचलत्तदा ॥ ३७४ ॥
मार्गे मयो व्रजन् स्फारां भुवनस्यान्तरास्थिताम् । कन्यां दृष्ट्वा जगौ काऽसि किमर्थंत्वमिह स्थिता ? ॥ ३७५ ॥
साऽवग् दशाननो भ्राता मेरौ नन्तुं जिनान् गतः । अहं चन्द्रनखा खड्गरक्षार्थं स्थापितेह तु ॥ ३७६ ॥
असिश्चन्द्रप्रभासाह्वो नाम्ना स विद्यते वरः । अत्रान्तरे समायातो दशास्यो मेरुपर्वतात् ॥ ३७७ ॥

For Private and Personal Use Only

वर्ये वरं दशास्यं तु ज्ञात्वा विद्याधरो मयः । मन्दोदरीं सुतां तस्मै ददौ सूत्सवपूर्वकम् ॥ ३७८ ॥
स(म)होदरस्य भूपस्य तडिन्मालां सुतां वराम् । विद्युल्लतामिवाम्भोदः कुम्भकर्ण उपायत ॥ ३७९ ॥
वीरविद्याभृतः पुत्रीं नामतः पङ्कजश्रियम् । पर्यणैपीत् सुहर्षेण पित्रादेशाद् विभीषणः ॥ ३८० ॥
आदौ शक्रजितं मेघ-नादं च नन्दनावुभौ । अजीजनत् शुभे लग्ने राज्ञी मन्दोदरी क्रमात् ॥ ३८१ ॥
ज्ञात्वा वैश्रमणं शक्र-भृत्यं कस्यचिदाननात् । गत्वा दशाननस्तेन सार्द्धं युद्धं व्यधाद् भृशम् ॥ ३८२ ॥
बहुष्वहस्सु जातेषु विज्ञाय स्वं जितं रणे । नष्टो वैश्रमणो जीव-मेव लात्वाऽतिदूरतः ॥ ३८३ ॥
विज्ञायाऽसारसंसारं तदा वैश्रमणो हृदि । लात्वा दीक्षां ययौ मुक्तिं सर्वकर्म्मव्रजक्षयात् ॥ ३८४ ॥
जित्वा वैश्रमणं तस्य लात्वा लक्ष्मीं समां द्रुतम् । रावणः पुष्पकारूढः स्वपुरीं समुपेयिवान् ॥ ३८५ ॥
शक्रभृत्यं च तं जित्वा दशास्यो मुदिताशयः । आदित्यरजसेऽदाच्च किष्किन्धां सुहृदे पुरीम् ॥ ३८६ ॥
नवं ऋक्षपुरं कृत्वा स ऋक्षरजसे ददौ । आदित्यरजसश्चासीद् वाली नामा सुतो वली ॥ ३८७ ॥
द्वितीयोऽजनि सुग्रीवः पुत्रो रुचिरविक्रमः । कनीयसी कनी तस्य सुप्रभेत्यभवत् क्रमात् ॥ ३८८ ॥
ऋक्षरजःप्रिया वर्या हरिकान्ता शुभेऽहनि । नलनीलाभिधौ पुत्रा-वसूत वरलक्षणौ ॥ ३८९ ॥
पित्राऽथ विबुधोपान्ते नलनीलौ स्वनन्दनौ । पाठितौ विदुरौ जातौ सर्वशास्त्रेषु संततम् ॥ ३९० ॥

किष्किन्धायामथादित्य-रजा राज्यमकारितः । बालिने सूनवे राज्यं ददौ [illegible] ॥ ३९१ ॥
युवराजपदं सोऽथ सुग्रीवाय वितीर्णवान् । अष्टाह्निकां व्यधात् सार्वा-वासेष्वादित्यभूपति ॥ ३९२ ॥
भूरिभिर्मेदिनीनाथैः सार्द्धं शोभनवासरे । श्रीसुव्रतगुरोः पार्श्वे जग्राहाऽऽदित्यभूपतिः (सर्वसंयमम्) ॥ ३९३ ॥
अथ सूर्पणखां हृत्वा जित्वा चन्द्रोदरं नृपम् । आदित्यरजसः सूनुं बिललङ्कां खरोऽग्रहीत् ॥ ३९४ ॥
शत्रुञ्जय कल्पवृ० हृतां सूर्पणखां ज्ञात्वा खरेणाथ दशाननः । रुष्टो हन्तुं चलन् मन्दो-दर्या पत्न्याऽथ वारितः ॥ ३९५ ॥
असावपि खरो विद्या-धरो विद्याबलोऽस्ति च । अतोऽस्मै दीयते सूर्प-णखा चेत्त्च तदा वरम् ॥ ३९६ ॥
॥ ३५० ॥ आदित्यरजसः पुत्रं चन्द्रोदराऽभिधं वरम् । बलिष्ठं हतवान् युद्धे खरोऽस्थात्तत्पुरे बिले ॥ ३९७ ॥
कदाचित् भवता युद्धे संग्रामे निहतः खरः । तदा ते भगिनी भर्तृहीना नूनं भविष्यति ॥ ३९८ ॥
ततः सूर्पणखां जामिं रावणस्य सदुत्सवम् । उपयेमे खरो विद्याधरः शोभनवासरे ॥ ३९९ ॥
गतक्रोधो दशास्योऽथ स्वजामिरमणं खरम् । सदूषणं न्यधाच्चन्द्रो-दरराज्ये सदुत्सवम् ॥ ४०० ॥
मृते चन्द्रोदरे भार्या-ऽनुराधा कानने स्थिता । विराधाख्यं सुतं चारु गुणगेहमजीजनत् ॥ ४०१ ॥ ॥ ३५० ॥
किष्किन्धायां बलिष्ठं तु बालिनं जितशात्रवम् । श्रुत्वा दशाननो दूत-पार्श्वादाकारयद् ध्रुवम् ॥ ४०२ ॥
बाली प्राह विनाऽर्हन्तं नापरं निर्जरं नृपम् । नमाम्यहं क्वचित् प्राणात्ययेऽपि रावणं प्रति ॥ ४०३ ॥

श्रुत्वैतद्रावणः क्रुद्धो मेलयित्वा बलं महत् । चचाल बालिनं जेतुं कम्पयन्नरिमानसम् ॥ ४०४ ॥
युध्यन् दशाननोऽनश्यद् बालिना बलिना तदा । चन्द्रहासासियुक् कण्ठे गृहीतः पशुवद् ध्रुवम् ॥ ४०५ ॥
सखड्गं रावणं कक्षा-कोटरे पश्यतां नृणाम् । प्रक्षिप्य चतुरम्भोधिं बभ्राम प्रतिवासरम् ॥ ४०६ ॥
कुक्षौ क्षिप्त्वा दशास्यं तु बाली तद्वैरिसद्मसु । दर्शयित्वा प्रणम्याप्तान् शाश्वतानैति मन्दिरम् ॥ ४०७ ॥
तत्रान्यदा धनाचार्य-समीपे धर्म्मदेशनाम् । श्रोतुं बाली ययौ यावत् तावद् गुरुर्जगाविति ॥ ४०८ ॥
* चत्वारः प्रहरा यान्ति देहिनां गृहचेष्टितैः । तेषां पादे तदर्द्धे वा कर्त्तव्यो धर्म्म-संग्रहः ॥ ४०९ ॥卐
* बावत्तरि कलाकुसला पंडियपुरिसा अपंडिया चेव । सव्वकलाणं पवरं जे धम्मकलं न याणंति ॥ ४१० ॥卐
* तं रूवं जत्थ गुणा तं मित्तं जो न विहाडेइ । सो अत्थो जो हत्थे तं विन्नाणं जहिं धम्मो ॥ ४११ ॥卐
* परपीडा न कर्त्तव्या बन्धन-छेदनादिभिः । भूपानां तु विशेषेण न कर्त्तव्या महात्मभिः ॥ ४१२ ॥卐
* कोहो पीइं पणासेइ माणो विणयनासणो । माया मित्ताणि नासेई लोभो सव्वविणासणो ॥ ४१३ ॥卐
* उवसमेण हणे कोहं माणं मद्दवया जिणे । मायं अज्जवभावेणं लोभं संतोसओ जिणे ॥ ४१४ ॥卐
ततो रावणमुन्मुच्य क्षमयित्वा स्वपातकम् । विससर्जाचिराद् बाली लङ्कां प्रति बली बलात् ॥ ४१५ ॥
सुग्रीवं स्वपदे न्यस्य बाली वैराग्यवासितः । विधायाऽष्टाह्निकां सार्वगेहेषु व्रतमाददे ॥ ४१६ ॥

दशकण्ठाय सुग्रीवः श्रीप्रभां तनयां ददौ । यौवराज्यं मुदा बालि-सूनवे चन्द्ररश्मये ॥ ४१७ ॥
वैताढ्ये वायुवेगस्य पुत्रीं रत्नवतीं वराम् । उद्वोढुं चलितो व्योम-वर्त्मना रावणोऽन्यदा ॥ ४१८ ॥
गच्छतो दशकण्ठस्या-ष्टापदस्योर्ध्वमन्यदा । विमानं पुष्पकं बाढ-मन्यदा स्खलितं ध्रुवम् ॥ ४१९ ॥
अधस्ताद् बालिनं साधुं वीक्ष्य दशाननस्तदा । साधुवेषधरोऽप्येष विमानं मेऽस्खलद् दृढम् ॥ ४२० ॥
साधुवेषमसौ दम्भाद् दधानो बालिसंयतः । मयि क्रोधी मयि द्रोही दृश्यतेऽद्यापि मायिकः ॥ ४२१ ॥
* यतः—"मायाशीलः पुरुषो यद्यपि न करोति किंचिदपराधम् ।卐
सर्प्प इवाविश्वास्यो भवेत् तथाप्यात्मदोषहतः ॥ ४२२ ॥
* पृष्ठतः सेवयेदर्कं जठरेण हुताशनम् । स्वामिनं सर्वभावेन तथा वंचयते शठः ॥ ४२३ ॥卐
विमानमधुनाऽनेन स्खलितं व्रतदम्भतः । अतोऽमुं गिरिसंयुक्तं क्षिप्स्यामि लवणाम्बुधौ ॥ ४२४ ॥
पुराऽप्यनेन कक्षायां क्षिप्तोऽहं बासरान् बहून् । यतित्वेऽप्यधुना वैरं न मुञ्चति मया समम् ॥ ४२५ ॥
अस्य पापयतेः प्राणान् नीत्वा यमनिकेतनम् । स्वस्थीभवाम्यहं भूरि-कालवैरिविवर्जितः ॥ ४२६ ॥
विदार्योर्वी ततोऽधस्ताद् गिरेः प्रविश्य रावणः । पर्वतोत्पाटनीं विद्यां सस्मारैकाग्रमानसः ॥ ४२७ ॥
पर्वतोत्पाटनी विद्या-बलात् स्कन्धे च तं गिरिम् । स कृत्वा यावता चक्रे प्रयत्नं रावणो नृपः ॥ ४२८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रुटत् त्रुटत्दृषत् सन्धि-रुद्भ्रान्तभूतसन्ततिः । कम्पमानतरुश्रेणि-र्न्यपतत् भृङ्गसञ्चयः ॥ ४२९ ॥
उन्मार्गे प्रचलन्नीर-प्रवाहः प्रबलानिलः । तदाऽष्टापदभूमीध्रो बभूव भयकृद् भृशम् ॥ ४३० ॥
वाली दध्यौ च कः पापी शैलमुत्पाट्य सम्प्रति । क्षिप्स्यत्यब्धौ यदा तीर्थ-ध्वंस एव भविष्यति ॥ ४३१ ॥
सत्यां शक्तौ च यस्तीर्थ-ध्वंसकारिनरं किल । निवारयति नो यस्य भूरि पापं प्रजायते ॥ ४३२ ॥
यतः—ध्यात्वेति स मुनिर्वाम-पादाङ्गुष्ठाभिषङ्गतः । अष्टापदगिरेर्मौलि-मपीडयत्तदा मनाग् ॥ ४३३ ॥
दशास्यः सङ्कुचद्देहो वमच्छोणितपङ्किलः । तदैव दीनवद् विश्वं रावयन् विरराव सः ॥ ४३४ ॥
तदैत्य निर्जरैः प्रोक्तं मा मुने ! वालयाचलम् । अयं दशाननो मृत्युं गमिष्यत्येकहेलया ॥ ४३५ ॥
प्रसद्याऽस्य दशास्यस्य मुनीश ! देहि जीवितम् । अतः परं दशास्यो ना-पराधं ते करिष्यति ॥ ४६६ ॥
ततः कृपापरो बालिः प्रसद्य रावणोपरि । विररामाऽऽशु तस्यैव भूधरस्यातिपीडनात् ॥ ४३७ ॥
निःसृत्य रावणो बालिं नत्वा क्षन्त्वा जगाविति । अस्मात् पापान्ममाधस्ताद् गतिर्नूनं भविष्यति ॥ ४३८ ॥
शैलस्याधः स्थितो बालि-पादाङ्गुष्ठनिपीडितः । रावं चक्रे ततो देवै रावणाह्वा कृताऽस्य तु ॥ ४३९ ॥
ततोऽमात्यैरगादीति भो रावण ! नराधम ! । श्रमणाद्या न हन्तव्याः कदाचिदुत्तमैर्नरैः ॥ ४४० ॥
* यतः—समणा य बंभणा वि य गोपसुइत्थी य बालया बूढ़ा । जइ वि हुं कुणंति दोसं तह वि य एए न हंतव्वा ॥卐

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततः सान्तःपुरश्चैत्ये कारिते भरतेन तु । रावणः पूजयामास नाभेयादिजिनाधिपान् ॥ ४४१ ॥
क्षमयित्वाऽपराधं स्वं भावपूजाकृते तदा । स्नसां तंत्रीं भुजं वीणां विदधे दशकन्धरः ॥ ४४२ ॥
तादृश्या वीणया नाद–पूजामग्रे जिनेशितुः । कुर्वन् दशाननः प्राप तदैक्यं प्रभुणा समम् ॥ ४४३ ॥
तदा तत्राऽऽगतः शेषो नत्वा भक्त्या जिनेश्वरान् । दशास्यं ध्यानमारूढं दृष्ट्वा हृष्टो जगावदः ॥ ४४४ ॥
दशास्य ! प्रभुभक्त ! त्वं वरं वृणु यथेप्सितम् । रावणोऽवक् प्रभोर्भक्ति-रेवाऽस्तु सुचिरं मम ॥ ४४५ ॥
अनिच्छतो दशास्यस्य प्रभुभक्तस्य सर्प्पराट् । अमोघविजयांशक्तिं दत्त्वा विद्याश्च निर्ययौ ॥ ४४६ ॥
नित्यालोकपुरे गत्वा नमस्कृत्य जिनेश्वरान् । वायुवेगसुतां रत्न-वतीं स परिणीतवान् ॥ ४४७ ॥
तत्र वैताढ्यभूमिध्रे अन्याः खगकनीर्वराः । परिणीय दशास्यः स्व-पुरीं लङ्कां समीयिवान् ॥ ४४८ ॥
इतो बाली तपस्तीव्रं कुर्वन् ध्यायन् परं महः । घातिकर्म्मक्षयादाप केवलज्ञानमञ्जसा ॥ ४४९ ॥
बालिः प्रबोध्य भव्याङ्गि-जनान् भूरीन् सुधर्म्मणि । आयुःक्षये ययौ मुक्तिं शत्रुञ्जयशिलोच्चये ॥ ४५० ॥
तदा वाचंयमा लक्ष द्वादश प्रतिमावराः । अवाप्य पञ्चमं ज्ञानं मुक्तिपुर्यां समागमन् ॥ ४५१ ॥
विद्याभृद्ज्वलनशिख-प्रियाऽसूत सुतां वराम् । तस्यास्तारेति नामाऽदात् पिता कृत्वा जनुर्महः ॥ ४५२ ॥
यौवनस्थां सुरूपां तु साहसगतिसञ्ज्ञिकः । याचते व्योमगोऽभ्येत्य परिणेतुं तमन्वहम् ॥ ४५३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतः समेत्य सुग्रीव-स्तारां कन्यां सदुत्सवम् । परिणीय ययौ स्वीय-नगरेऽनघविक्रमः ॥ ४५४ ॥
सत्स्वप्नसूचितौ पुत्रा-वंगदं च जयं पुनः । ताराऽसूत वरे घस्रे सूर्येद्वोरुच्चयोः सतोः ॥ ४५५ ॥
स साहसगतिस्तारां सुग्रीवोढां जनाननात् । श्रुत्वा दध्यावहं नूनं वञ्चितोऽस्मि ह हा ! किल ॥ ४५६ ॥
तारामङ्गीचिकीः कामं स साहसगतिः खगः । विद्यां साधयितुं यातो रुचिरं हिमवद्गिरौ ॥ ४५७ ॥
इतोऽहङ्कारिणं शक्र-मनन्तं कुमदोद्धतम् । श्रुत्वा खरमुखैर्विद्या-धरैः सुग्रीवसेवितः ॥ ४५८ ॥
शोभने वासरेऽचालीद् विजेतुं दशकन्धरः । चतुरङ्गचमूयुक्तो जितानेकद्विषच्चयः ॥ ४५९ ॥ युग्मम् ॥
रेवाकूलङ्कषातीरे स्थितो दशाननो व्रजन् । स्थापयित्वाऽर्हतो बिम्ब-मानर्च सुन्दरैः सुमैः ॥ ४६० ॥
अकस्मादागतेनाऽम्बु-प्रवाहेन जिनार्चना । व्युदस्यत दशास्ये तु ध्यानलीने प्रभोः पुरः ॥ ४६१ ॥
क्रुद्धे दशानने कश्चि-दागत्य मानवोऽवदत् । इतो माहिष्मतीशोऽस्ति सहस्रांशुर्महीपतिः ॥ ४६२ ॥
संरुद्धाम्बुप्रवाहस्य मोक्षणाद् जिनपार्चना । अपाकृताऽमुना क्रुद्धो दशास्यो रावणोऽजनि ॥ ४६३ ॥
प्रजिघाय दशास्यो यान् भृत्यांस्तज्जयहेतवे । ते सहस्रांशुभूपेन हताः पश्चात् समाययुः ॥ ४६४ ॥
ततो दशाननस्तत्र गत्वा जित्वा रिपुं तकम् । दृढबद्धं सहस्रांशुं स्वकीये शिबिरेऽनयत् ॥ ४६५ ॥
जाते जयजयारावे यावत् संसदि रावणः । उपाविशत् प्रगे तावद् व्योम्न्येकः साधुरागमत् ॥ ४६६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नत्वा दशमुखः साधु-मुपावेश्य वरासने । धर्म्मं श्रोतुमुपाविष्ट-स्ततो मुनिर्जगाविदः ॥ ४६७ ॥
* धर्म्माज्जन्म कुले शरीरपटुता सौभाग्यमायुर्बलं, धर्म्मेणैव भवन्ति निर्मलयशो विद्यार्थसम्पत्तयः ।卐
कान्ताराच्च महाभयाच्च सततं धर्मः परित्रायते, धर्म्मः सम्यगुपासितो भवति च स्वर्गापवर्गप्रदः ॥ ४६८ ॥
रावणोऽवग् मुने ! केन वैराग्येण त्वया व्रतम् । गृहीतं स जगौ माहिष्मत्यां भीमोऽभवत् खगः ॥ ४६९ ॥
तस्याऽजनि सहस्रांशु-स्तनयो विनयी नयी । धर्म्मकर्मकलाविज्ञः कृपाकवचिताशयः ॥ ४७० ॥
* यतः—रज्जोरप्युपरि भ्रमन्ति कतिचित्तीव्राभियोगान्नरा-स्तर्कव्याकरणादि शास्त्रनिपुणाभ्यासस्तु शिल्पं कियत् ।卐
यद् गाढो विनयः श्रुतं यदमलं यद्वीतरागं मनो, यत् सौजन्यमखण्डितं स हि गुणस्तेनैव विद्वान् पुमान् ॥ ४७१ ॥
* विज्ञानं किमु नोर्णनाभ-सुगृहीशुष्माशिहंसादिषु, द्वन्द्वं किं न लुलायलावककुले मेषे तथा कुर्कुटे ।卐
गीतं नृत्यकला च केकिपिकयोर्वाक्सारिकाकीरयोः, सद्धर्म्माचरणे परं चतुरता यद्यस्ति मानुष्यके ॥ ४७२ ॥
भीमोऽन्येद्युर्गवाक्षस्थो वीक्ष्याऽभ्रं गगने महत् । जायमानं प्रगे यावत् पुनः पुनर्विलोकते ॥ ४७३ ॥
तावत्तत्र समायातः तीव्रवातेन सर्वतः । अभ्रं विशीर्णतां नीतं विद्युद्गर्जितसंयुतम् ॥ ४७४ ॥
अभ्राभं भवमालोक्य सहस्रांशुममुं सुतम् । न्यस्य राज्ये मया दीक्षा गृहीता शिवशर्मदा ॥ ४७५ ॥
मुनेः सुतं सहस्रांशुं मत्वा चोन्मुच्य बन्धनात् । क्षमयित्वा दशास्येन स्वराज्ये स्थापितः स च ॥ ४७६ ॥

For Private and Personal Use Only

सहस्रांशुरपि प्रौढ-प्राभृतं दशमौलये । दत्त्वा क्षान्त्वा जगौ भृत्य-स्तवाऽतोऽहं च किङ्करः ॥ ४७७ ॥
स्वराज्ये स्वसुतं न्यस्य सहस्रकिरणो नृपः । भीमः पित्रन्तिके दीक्षां जग्राहाऽनघमानसः ॥ ४७८ ॥
ततो भीमेन संयुक्तः सहस्रांशुर्यतिः सदा । तपःपरो ययौ शत्रु-ञ्जये तीर्थे शिवप्रदे ॥ ४७९ ॥
तत्र भीमसहस्रांशू कुर्वाणौ सन्ततं तपः । लभेते केवलज्ञानं लोकालोकप्रकाशकम् ॥ ४८० ॥
दशाननस्ततो गच्छन् रेवाकूले बहून् पशून् । तुरगान् पक्षिणो दीनान् वीक्ष्येति सेवकान् जगौ ॥ ४८१ ॥
किमेष ज्वाल्यते वह्नि-र्वीक्ष्यन्ते पशवोऽत्र किम् । भृत्या जगुर्द्विजैर्यज्ञः क्रियमाणोऽस्ति साम्प्रतम् ॥ ४८२ ॥
क्षिप्स्यन्ते पशवो ह्येते वह्नौ धर्म्मधिया द्विजैः । ततो दशाननस्तत्र यज्ञे गत्वा जगावदः ॥ ४८३ ॥
एते किं पशवो वह्नौ क्षिप्यन्ते धर्म्महेतवे ? । भवद्भिरविचारज्ञै-र्नरकोर्व्यां च यास्यते ॥ ४८४ ॥
जीवानां हिंसयाऽमुत्र परत्राऽसुखसन्ततिः । श्वभ्रादौ लभ्यते नूनं प्राणिभिर्नात्र संशयः ॥ ४८५ ॥
* यतः—" सर्वे वेदा न तत् कुर्युः सर्वे यज्ञाश्च भारत ! । सर्वे तीर्थाभिषेकाश्च यत् कुर्यात् प्राणिनां दया ॥ १ ॥卐
* वरमेकस्य सत्त्वस्य प्रदत्ताऽभयदक्षिणा । न तु विप्रसहस्रेभ्यो गोसहस्रमलङ्कृतम् ॥ २ ॥卐
* महतामपि दानानां कालेन क्षीयते फलम् । भीताभयप्रदानस्य क्षय एव न विद्यते ॥ ३ ॥卐
* यावन्ति रोमकूपाणि पशुगात्रेषु भारत ! । तावद्वर्षसहस्राणि पच्यन्ते पशुघातकाः ॥ ४ ॥卐

* पृथिव्यामप्यहं पार्थ ! वायावग्नौ जलेऽप्यहम् । वनस्पतिगतश्चाहं सर्वभूतगतोऽप्यहम् ॥ ५ ॥
* यो मां सर्वगतं ज्ञात्वा नहि हिंस्यात् कदाचन । तस्याहं न प्रणस्यामि स च मे न प्रणस्यते ॥ ६ ॥
* मार्यमाणस्य हेमाद्रिं राज्यं वापि प्रयच्छतु । तदनिष्टं परित्यज्य जीवो जीवितमिच्छति ॥ ७ ॥"
* यूपं कृत्वा पशून् छित्वा कृत्वा रुधिरकर्दमम् । यद्येवं गम्यते स्वर्गे नरके केन गम्यते ? ॥ ४८६ ॥

इत्यादि बहुभिः सूक्तैः क्रतुं हिंसामयं तदा । निषिध्य रावणो विप्रा–नग्राहयद् दयामयम् ॥ ४८७ ॥

* यतः–आत्मा नदी संयमतोयपूर्णा सत्यावहा शीलतटा दयोर्मिः ।
तत्राभिषेकं कुरु पाण्डुपुत्र ! न वारिणा शुद्ध्यति चान्तरात्मा ॥ ४८८ ॥

ततस्ते वाडवा जैन-धर्म्मं कुर्वन्त आदरात् । तीर्थे शत्रुञ्जये गत्वा तपस्तेपुश्चिरं मुदा ॥ ४८९ ॥
क्रमात् कर्म्मक्षयाच्छत्रु-ञ्जये तीर्थे शिवं ययुः । तत्र चक्रे दशास्येन विहारं तापसाभिधम् ॥ ४९० ॥
दुर्लङ्घ्यनगरे कुम्भ-कर्णमुख्यान् सहोदरान् । अनेकभृत्यसंयुक्तान् कुम्भ्यश्वबलराजितान् ॥ ४९१ ॥
रावणोऽप्रेषयज् जेतुं–मरातिं नलकूबरम् । शोभने वासरे वर्य-शकुनेषु बहुष्वथ ॥ ४९२ ॥
स्वपुर्यां परितो वप्रं योजनानां शतैर्युतम् । आशाल्या विद्यया तत्र बलीयानरिभूपतिः ॥ ४९३ ॥
तत्र पुर्यन्तिकं कुम्भ-कर्णाद्यास्ते महीभुजः । न शेकुर्वीक्षितुं वप्रं ज्वलज्ज्वालाभिवेष्टितम् ॥ ४९४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुम्भकर्णादयो भूपा अशक्तास्तत्र पत्तने । प्रवेष्टुमभवन् दीन-मानसा लज्जिताशयाः ॥ ४९५ ॥
ततः पश्चात् समागत्य रावणक्ष्मापसन्निधौ । दुर्लङ्घ्यनगराग्राह्य-स्वरूपं ते न्यवेदयन् ॥ ४९६ ॥
रावणोऽथ समागत्य दुर्लङ्घ्यनगरान्तिके । ज्वलद्वह्निमयं वप्र-मपश्यत्त्वरितं तदा ॥ ४९७ ॥
अग्राह्यनगरं तत्र ज्ञात्वा रावणभूधवः । सर्वकामितदां विद्यां स सस्मारैकमानसः ॥ ४९८ ॥

नलकूबरपत्नी तु सानुरागा दशानने । स्वयमेत्य ददौ तस्मै विद्यामाशालिनीं द्रुतम् ॥ ४९९ ॥
वह्निवप्रमपाकृत्य तयैव विद्ययाऽचिरात् । अग्रहीन्नगरं तच्च चक्रं चापि सुदर्शनम् ॥ ५०० ॥

* यतः—धम्मेण कुलप्पसूई धम्मेण य दिव्वरूपसंपत्ती । धम्मेण धणसमिद्धी धम्मेण सुवित्थडा कित्ती ॥ १ ॥卐
* धम्मो मंगलमउलं उसहमउलं च सव्वदुक्खाणं । धम्मो बलं च विउलं धम्मो ताणं च सरणं च ॥ २ ॥卐
नलकूबरभूपोऽवक् प्रणम्य रावणं प्रति । अहमस्मि तवैवाऽतः—परं भृत्यो दशानन ! ॥ ५०१ ॥
तद्राज्यं रावणस्तस्मै वितीर्य तत्प्रियां पुनः । त्वं मे यामीति जल्पित्वा विससर्ज स्वं पुरं प्रति ॥ ५०२ ॥
ततो दशाननोऽभ्येत्य वैताढ्यधरणीधरे । रथनूपुरसञ्ज्ञं तत् पुरं चावेष्टद् रुषा ॥ ५०३ ॥
कोपवह्निज्वलच्चेता इन्द्रो विद्याधराधिपः । स्वबलं ज्ञापयामास रावणाय महीभुजे ॥ ५०४ ॥
संग्रामः क्रियते चेद्धि तदा जीववधो भवेत् । अतोऽहंच भवान् युद्धं कुर्वेऽधुना परस्परम् ॥ ५०५ ॥

For Private and Personal Use Only

ततस्तौ द्वीपमारूढौ स्वस्वविद्यास्वगर्विणौ । अभूतां भीतिदौ नृणां स्वर्गिणामपि तत्क्षणात् ॥ ५०६ ॥
संग्रामं रावणः कुर्वन् बद्ध्वेन्द्रं दृढबन्धनैः । निजाज्ञां ग्राहयामासा–नुगानिन्द्रस्य लीलया ॥ ५०७ ॥
जयढक्कां दशास्योऽथ वादयन् सर्वतस्तदा । लङ्कामभ्येत्य कारायां चिक्षेपेन्द्रं शकुन्तवत् ॥ ५०८ ॥
सहस्रारः समेत्याऽथ भक्त्या नत्वा दशाननम् । जगौ कृत्वा कृपां मुञ्च मत्पुत्रं गुप्तिवेश्मतः ॥ ५०९ ॥
मोक्ष्येऽहं गुप्तितश्चैनं तदा राज्यं ददामि च । अङ्गीकृत्य दशास्योक्त-मिन्द्रः स्वपुरमीयिवान् ॥ ५१० ॥
लङ्कां प्रमार्जयन् शश्व-दिन्द्रो लज्जापरोऽन्यदा । राज्ये स्वं नन्दनं न्यस्य जग्राह संयमश्रियम् ॥ ५११ ॥
तप्त्वा तपश्चिरं क्षिप्त्वा कर्म्माष्टकमशेषतः । इन्द्रर्षिः केवलज्ञानं प्राप्य प्राबोधयज् जनान् ॥ ५१२ ॥
बोधयित्वा जनान् भूरीन् गत्वा शत्रुञ्जयाचले । आयुःक्षयाद्ययौ मुक्ति-मिन्द्रः साधुसहस्रयुग् ॥ ५१३ ॥
परस्त्रीसङ्गमान् मृत्युं विदन् दशाननस्तदा । इच्छन्तीमपि वामाक्षीं न्यषेधयन् निरन्तरम् ॥ ५१४ ॥
वरुणस्याऽऽहवे वीक्ष्य हनुमद्बलमुल्बणम् । हृष्टो दशाननोऽप्राक्षीत् कस्यायं नन्दनः खलु? ॥ ५१५ ॥
मन्त्रीश्वरोऽवगादित्य-पुरे प्रल्हादभूपतेः । पवनञ्जयपुत्रोऽभूत् पत्नीकेतुमतीभवः ॥ ५१६ ॥
माहेन्द्रनगराधीश-माहेन्द्रनृपनन्दिनीम् । अञ्जनासुन्दरीं पाणि-ग्रहादङ्गीचकार सः ॥ ५१७ ॥
पवनञ्जयभूभुग्भू-रञ्जनासुन्दरीभवः । हनुमानाभिधः सूनु-रयं प्रबलविक्रमः ॥ ५१८ ॥

For Private and Personal Use Only

एकदा जननीपार्श्वाद् विमाने याति वेगतः । अर्भकोऽयं पतन् शैलं देहभारादचूर्णयत् ॥ ५१९ ॥
चूर्णिता दृषदो भग्नां-स्तरून् भूरीन् सुतं पुनः । अक्षताङ्गं निरीक्ष्याऽम्बा स्वौकोऽनैषीत् प्रमोदतः ॥ ५२० ॥
एवंविधोऽयं बलवान् हनुमान् विद्यतेऽद्भुतः । क्रियते सेवकश्चायं तदा वर्यं भवेन्ननु ॥ ५२१ ॥
रावणेन ततश्चक्रे हनुमान् सेवको निजः । रावणस्याऽऽदरात् सेवां चकार च दिवानिशम् ॥ ५२२ ॥
तत्र सत्यवती खेटनन्दिनीं जितनिर्जरीम् । अनङ्गसुभगाश्चान्या उपयेमे दशाननः ॥ ५२३ ॥
विद्याभृतो विभाकान्त-रवीन्द्वारबुधान् गुरुम् । शुक्रशनिश्चरान् राहु-केतुसञ्ज्ञान् ग्रहान्नव ॥ ५२४ ॥
अनङ्गसेनभूकान्त-वीर्यवर्यधराधवान् । वश्यऽकार्षीद्दशास्योऽथ स्वकीयभुजलीलया ॥ ५२५ ॥ युग्मम् ॥
दशानने गृहे सर्वे एते कर्म्मकरा इव । कार्याणि रावणोक्तानि कुर्वते स्म दिवानिशम् ॥ ५२६ ॥
त्रिखण्डां मेदिनीं सर्वां साधयित्वा दशाननः । समेत्य स्वपुरे राज्यं चकार न्यायवर्त्मना ॥ ५२७ ॥
षोडशाथ सहस्राणि भूपा मुकुटबद्धकाः । सेवन्ते रावणं भूपं समेत्य स्वपुराद् भृशम् ॥ ५२८ ॥
त्रिखण्डेशो रसक्षोणी मितसहस्रभूधवैः । सेव्यमानो व्यधाद् राज्यं दशास्यः शक्रवत्तदा ॥ ५२९ ॥
कालादिनन्दना लक्ष-प्रमिताः प्रबलौजसः । रावणस्याभवन् वर्याः पृथक् पृथक् प्रियाभवाः ॥ ५३० ॥
एकदा तीर्थमाहात्म्यं श्रुत्वा दशाननो नृपः । [महत् सङ्घयुतः] ग्रामे ग्रामे महं कुर्वन् तीर्थे शत्रुञ्जये ययौ ॥ ५३१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्र स्नात्रार्चनामुख्यं पुण्यं कृत्वा दशाननः । ऋषभस्य पदौ नत्वा गिरिनारगिरौ ययौ ॥ ५३२ ॥
तत्र–विस्तरतः श्रीमन्नेमि-जिनार्चां भावपूर्वकम् । विधाय स्वपुरे चारूत्सवमागाद् दशाननः ॥ ५३३ ॥

स्वयं विस्तरतोऽत्र वाच्य :—

इतश्च दण्डकारण्ये रामस्य तस्थुषः सतः । लक्ष्मणः कानने भ्राम्यन् खड्गमेकमलोकत ॥ ५३४ ॥
कौतुकात्तु करे कृत्वा पार्श्वस्थां वंशजालिकाम् । छित्वाऽञ्जनालवत् शीर्षमपश्यत् पतितं पुरः ॥ ५३५ ॥
ध्यातवान् लक्ष्मणः कोऽपि मया मोढयाद् हतो नरः । अयुध्यमाननृहते भवेत् श्वभ्रप्रदं तमः ॥ ५३६ ॥
लात्वाऽसिं लक्ष्मणोऽभ्येत्य रामान्ते नृवधं जगौ । रामोऽवग् वत्स ! न वरं विहितं साम्प्रतं त्वया ॥ ५३७ ॥
यो ना हतस्त्वया तस्य चन्द्रहासोऽसिरस्ति नु । कोऽपि मर्त्योऽथवा नारी समस्त्युत्तरसाधिका ॥ ५३८ ॥
इतः सूर्पणखा सिद्ध-विद्यं सम्भाव्य तन्दनम् । तत्रैता मस्तकं छिन्नं सूनोर्वीक्ष्य जगाविति ॥ ५३९ ॥
हा वत्स ! स्वच्छ शम्बूक ! केन त्वं विद्विषा खलु । नीतोऽसि यमसंस्त्यायं मृताऽहं त्वां विनाऽधुना ॥ ५४० ॥
दृष्ट्वा तत्र नृपादालीं यान्तीमन्यत्र सा तदा । वीक्ष्याऽऽसन्नवनेऽपश्यद् रामं मन्मथसन्निभम् ॥ ५४१ ॥
मोहिता सा ययाचे तं रामं भोगसुखाय तु । रामोऽवग् मे प्रियाऽस्त्यत्र लक्ष्मणं वृणु भामिनि ! ॥ ५४२ ॥
लक्ष्मणो याचितः सूर्प-णखया भोगहेतवे । जगौ नाहं कदाप्यङ्गी-कुर्वे परप्रियां क्वचित् ॥ ५४३ ॥

॥ ३६२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* यतः–अनृतं साहसं माया-मूर्खत्वमतिलोभता । निःस्नेहो निर्दयत्वं च स्त्रीणां दोषाः स्वभावजाः ॥५४४॥ 卐

अष्टाह्युभयतः सूर्प-णखाऽथ स्मृतनन्दना । कुट्टयन्ति शिरः सूनो-र्वधं पत्युः पुरो जगौ ॥ ५४५ ॥

श्रुत्वैतत् सरुषोऽत्यन्तं खराद्या व्योमगामिनः । चतुर्दश सहस्रैस्तु खगैर्युक्तास्तदाऽचलन् ॥ ५४६ ॥

रिपूनाऽऽगच्छतो भूरीन् वीक्ष्य रामो जगावदः । तिष्ठ भोः ! लक्ष्मणाऽत्रत्वं हन्म्यहं विद्विषोऽखिलान् ॥ ५४७ ॥

लक्ष्मणः प्राह राम ! त्वं सीतामत्र स्थितोऽव हि । त्वत्प्रसादादहं शत्रून् हनिष्याम्येकलीलया ॥ ५४८ ॥

रामो जगौ व्रज भ्रात-र्भवेद् यत्तेऽरिसङ्कटम् । ज्ञापयेथास्तदा सिंह-नादान् मां रिपुसूदनाम् ॥ ५४९ ॥

रामाऽऽदेशं शिरस्याऽऽशु कृत्वा नत्वा च लक्ष्मणः । हन्तुं तान् वैरिणश्चापं सशरं शब्दयन् ययौ ॥ ५५० ॥

क्रुद्धेऽथ लक्ष्मणे सूर्प-णखैत्य रावणान्तिके । भ्रातर्द्वौ मानवौ मारो-पमौ दण्डककानने ॥ ५५१ ॥

जघ्नतुस्तव जामेयं शम्बूकं खचरं ध्रुवम् । मद्वाण्या भावुकस्ते तु ययौ तद्वधवाञ्छया ॥ ५५२ ॥

लक्ष्मणेन समं ताव-त्कीनः स भगिनीपतिः । कुर्वन् घोरं रणं बाढं वैरिणा सह विद्यते ॥ ५५३ ॥

तज्ज्येष्ठः सोदरो रामः स्वबलेन दृढेन तु । सीतया सहितो विश्वं वनेऽपि मन्यते तृणम् ॥ ५५४ ॥

सा सीता विद्यते स्वीय-रूपनिर्जितनिर्जरी । सर्वलक्ष्मीरतिप्रीति-देव्यो यस्याः पुरस्तृणम् ॥ ५५५ ॥

सैव तेऽन्तःपुरं सीताऽलङ्करोति सहोदर ! । तदा तव जनुर्वर्यं जायते नान्यथा मनाग् ॥ ५५६ ॥

For Private and Personal Use Only

श्रुत्वैतद्रावणः सीतां स्मरन् दण्डककानने । गतो रामयुतां सीतां दृष्ट्वा दध्याविदं हृदि ॥ ५५७ ॥
अस्मिन् रामे स्थिते तस्याः पार्श्वे सीतां मनोहराम् । लातुं शक्नोति न शक्रो न शेषो न सुरोऽसुरः ॥ ५५८ ॥
बाहुभ्यां तीर्यतेऽम्भोधि-र्वर्ष्मणाऽऽलिङ्ग्यते शिखी । पञ्चाननमुखे हस्तः क्षिप्यतेः मनुजेन तु ॥ ५५९ ॥
असौ रामो न गृह्येत केनापि बलिना क्वचित् । गृहीतव्या कथं सीता मयेयं साम्प्रतं ध्रुवम् ॥ ५६० ॥
ततोऽवलोकिनी विद्या दशास्येन स्मृता तदा । सीतार्थमागता प्राह किमर्थं च स्मृताऽस्म्यहम् ? ॥ ५६१ ॥
रावणोऽवक् कुरुष्व त्वं तथा सीता यथा सती । अलङ्करोति मेऽद्यैव शुद्धान्तं शोभते ततः ॥ ५६२ ॥
अवलोकिन्यवग् विद्या भो दशास्येह साम्प्रतम् । रामपार्श्वे स्थिता सीता केनचिद् ह्रियते न हि ॥ ५६३ ॥
रावणोऽवक् ततो देवि ! प्रसद्यस्व तथा मयि । यथा सीता छलाद्धस्ते ममाऽऽगच्छति शीघ्रतः ॥ ५६४ ॥
ततोऽवलोकिनी प्राह रामे शृण्वति दूरतः । कुरु लक्ष्मणवत् सिंह-नादं त्वं दशकन्धर ! ॥ ५६५ ॥
तदा रामो विमुच्यैमां सीतामेकाकिनीमिह । लक्ष्मणस्यान्तिके सद्यो यास्यत्येव दशानन ! ॥ ५६६ ॥
रावणेन कृतो सिंह-नादः लक्ष्मणवत्तदा । रामो लक्ष्मणसाहाय्यं कर्त्तुकामोऽचलद् द्रुतम् ॥ ५६७ ॥
एकः पक्षी स्वयं प्राप्य जातिस्मृत्याऽभिधां मतिम् । स्वकीयं प्राग्भवं जज्ञा-वेवं काननसंस्थितम् ॥ ५६८ ॥
प्राग्भवे दण्डको राजा भूत् संघस्योपसर्गकः । पुनः क्षिप्ता क्रमादार्त्ति-ध्यानतो मृतिमीयिवान् (?) ॥ ५६९ ॥

अत्राऽभवं जटायुश्च पक्षी दुर्ध्यानयोगतः । ततः कुर्वे जिनेन्द्रोक्तं धर्म्मं मुक्तिसुखप्रदम् ॥ ५७० ॥
मत्वेति सेवते राम-लक्ष्मणौ धर्म्महेतवे । सार्द्धं च कानने ताभ्यां चचाल पक्षिराट् स च ॥ ५७१ ॥
जटायुर्जानकीराम-लक्ष्मणानां च सन्निधौ । श्रुत्वा जैनं वृषं भूते-ष्टाष्टम्योः क्षपणं व्यधात् ॥ ५७२ ॥
इतोऽम्बरात् समागत्य रावणो धरणीतले । सीतां जहार कुर्वन्तीं विलापमिति स क्ष(ण)पम् ॥ ५७३ ॥
हा ! मातर्हा ! पितर्हा हा ! भ्रातर्हा देवराऽधुना । अस्माद् दुराशयाद्रक्ष रक्षेति मां कृपापरा ॥ ५७४ ॥

हा ! धीमतां प्रथम लक्ष्मण ! हाऽऽर्यपुत्र ! हा ! तात हा ? दशरथ क्षितिपालचन्द्रः ।
नीताऽस्मि निर्जनवने पिशिताननेन, त्रायस्व मामिति मुहुर्विललाप सीता ॥ १ ॥

सा नीयमाना विललाप सीता, श्येनेन चिल्लीवदशाननेन ।
भामण्डल ! भ्रातरहं कनीये हा राम ! हा देवर ! तात मातः ॥ २ ॥

विभूषणं किं कुचमण्डलानां ? कीदृश्युमा ? चन्द्रमसः कुतो भाः ? ।
सीता कथं रौति दशास्यनीता ? हा राम हा देवर तात मातः ! ॥ ३ ॥

सीतावचो निशम्येति जटायुरेत्य तत्र विः । जगौ दुराशयेमां मा हर सीतां सतीं त्वकम् ॥ ५७५ ॥
एषा सती हृतात्रैव परत्र चासुखप्रदा । भविष्यति तवात्मनोऽतो मुंचेमां नरेश्वर ! ॥ ५७६ ॥

एवं प्रोक्ते यदा नैव विरराम दशाननः । तदा दशमुखं हन्तु-मधावत विरंजसा ॥ ५७७ ॥
प्राह चेति-रे रे राक्षस ! मा स्म शङ्करवरभ्रान्त्या विभांक्षीर्नयं, रुष्टो मूढ तदैव यन्मतिमदात्सीतापहारे हरः ।
नो चेदिष्टकपालमण्डलभृताप्याखण्ड्य मुण्डावलीं । भक्त्या ढौकितमीश्वरेण किमिति प्रत्यर्पितं प्राभृतम् ॥ ५७८ ॥
अत्रोटयन् दशास्याङ्गं जटायुर्नखरैर्यदा । तदाऽनैषीद्दशास्यस्तं यमसद्म विमञ्जसा ॥ ५७९ ॥
सीता भीता तदाऽजल्प-दिति भामण्डलं प्रति । हा भामण्डल ! हा भ्रात-र्ममावेहाधमादतः ॥ ५८० ॥
भामण्डलानुगो विद्या-धरो रत्नजटी तदा । सीतां हृतां दशास्येन ज्ञात्वाऽधावत रक्षितुम् ॥ ५८१ ॥
तमापतन्तमालोक्य लङ्केशः पृष्ठितस्तदा । स्वविद्ययाऽथ तद्विद्यां हृत्वा क्षोण्यामपातयत् ॥ ५८२ ॥
तत्पत्नीतामनिच्छन्तीं सीतामविघ्नतस्तदा । मुमोच रावणो देव-रमणाभिधकानने ॥ ५८३ ॥
वरीतुं रावणं सीता बोध्यमानाऽङ्गनादिभिः । राम रामेति नो नामा-ऽमुञ्चच्चित्तान्मनागपि ॥ ५८४ ॥
इतो रामं समायान्तं निरीक्ष्य लक्ष्मणो जगौ । सीतामेकाकिनीं मुक्त्वा त्वं भ्रातः ! किमिहागतः ? ॥ ५८५ ॥
रामेणोक्तं त्वया सिंह-नादोऽकारि प्रयत्नतः । तेन त्वत्सन्निधावागा-मिह साहाय्यकृते तव ॥ ५८६ ॥
लक्ष्मणः प्राह न क्ष्वेडा मया चक्रे सहोदर ! । किन्तु सीतापहारार्थं केनचिद् विहिता च सा ॥ ५८७ ॥
याहि पाहि द्रुतं सीतां त्वमहं सर्वशात्रवान् । हत्वा तव पदोपास्ति कर्तुमेष्यामि शीघ्रतः ॥ ५८८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रामः पश्चात् समायातो-ऽपश्यन् सीतां प्रियां प्रियाम् । मूर्च्छामाप्य क्षणाल्लब्ध-चैतन्योऽथारुदद् भृशम् ॥५८९॥
हे सीते ! हे प्रिये ! प्राण-वल्लभे ! त्वमिहाऽऽव्रज । नोत्तरं देहिं किं छन्नं स्थिताऽसि साम्प्रतं प्रिये ! ॥ ५९०॥
इतस्ततो भ्रमन् सीतां सीतामिति गदन् भृशम् । जटायुषं व्रजत्प्राण-मपश्यद्रामभूपतिः ॥ ५६१ ॥
श्रुत्योः स्थित्वा नमस्कारान् दायं दायं जटायुषम् । अलभयत् सुरावासं रामो धर्म्मज्ञशेखरः ॥ ५९२ ॥
* यतः—पंच नमुक्कारे समायाते वच्चंति जस्स दस पाणा । सो जइ न जाई मुक्खं अवस्स वेमाणिओ होइ ॥१॥卐
* भावनमुक्कारविवज्जियाइं जीवेण अकयकरणाइं । गहिआणि य मुक्काणि य अणंतसो दव्वलिंगाणि ॥ २ ॥卐
* कृत्वा पापसहस्राणि हत्वा जन्तुशतानि च । अमुं मन्त्रं समाराध्य तिर्यञ्चोऽपि दिवं गताः ॥ ५९३ ॥卐
त्रिशिरोदूषणखरान् भूरिभिर्वैरिभिः सह । हत्वा विराधसखिना युक्तोऽचालीत् स लक्ष्मणः ॥ ५९४ ॥
आगतो लक्ष्मणः पश्चा-न्नत्वा ज्येष्ठं सहोदरम् । द्विषां विजयवृत्तान्त-मगदद् भ्रातुरग्रतः ॥ ५९५ ॥
अजल्पन्तं तदा रामं निःप्रियं वीक्ष्य लक्ष्मणः । पप्रच्छ सोदर ! क्वास्ति जानकी साम्प्रतं वद ! ॥ ५९६ ॥
रामः सगद्गदं प्राह ततो यावदिहागमम् । तावत् सीता हृता केन-चित् खगेनैत्य पापिना ॥ ५९७ ॥
जटायुषं हतं कश्चित् श्वसन्तं वीक्ष्य वेगतः । नमस्कारप्रदानेना-नैषं स्वर्गमहं तदा ॥ ५९८ ॥
आचष्ट लक्ष्मणः सिंह-नादो येन कृतस्तदा । तेनैव जानकी भ्रातर्हृता सम्भाव्यते रहः ॥ ५९९ ॥

For Private and Personal Use Only

शशहर क्षीणो काइं रोहिणि पासिबइठी अहँ । अम्हइं दुक्खसयाइं गगणे रावणी लेउ गओ ॥ ६०० ॥
एवं पुनः पुनः रामं जल्पन्तं शशिनं प्रति । लक्ष्मणः प्रोक्तवान् स्वीयं भ्रातरं बोधहेतवे ॥ ६०१ ॥
काइं झूरइं तूं राम सीता गई वलि आविसि । सूनइ न लागइ संधिमाणिक मेलवइ सइ तही ॥ ६०२ ॥

रामविलापश्चैवम्—

कोऽहं वत्स ! स एष आर्य भगवानार्यः सको राघवः के यूयं बत नाथ पूज्यपद्यो दासोऽस्म्यहं लक्ष्मणः ।
कान्तारे किमिहारम्यहं ननुविभो ! देवीगतामृग्यते, का देवी जनकाधिराजतनया हा जानकि ! क्वास्तिसि हा ! ॥
साधु साध्वम्ब ! यत् पृथ्वी-भारो नारोपितो मयि । कलत्रस्यापि न त्राता स्यां कथं रक्षिता क्षितेः ? ॥ ६०४ ॥
रक्तस्त्वं नवपल्लवैरहमपि श्लाध्यैः प्रियाया गुणै-स्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्ताः सखे मामपि ।
कान्तापादतलाहतिस्तव मुदे सत्यं ममाप्यावयोः, सर्वं तुल्यमशोक ! केवलमहं धात्रा सशोकः कृतः ॥ ६०५ ॥
राज्यभ्रंशो वने वासः सीता नीता पिता मृतः । एकैकमपि तद्-दुखं यदब्धीनपि शोषयेत् ॥ ६०६ ॥
कातर्यं मुच्यतां भ्रातः ! साहसं श्रयतां पुनः । विलोक्य नेष्यते सीता दुःखं कार्यं मनाग् नहि ॥ ६०७ ॥ ॥ ३६८ ॥
ततः ससोदरो रामः श्वभ्रलङ्कापुरि द्रुतम् । गत्वा खरसुतं सुन्दं-जिग्ये युद्धं विना ततः ॥ ६०८ ॥
ततः पातालङ्कायां विराधं न्यस्य सेवकम् । रामः ससोदरस्तस्थौ कियन्तो वासरान् ध्रुवम् ॥ ६०९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वमिच्छुरितस्तारां स साहसगतिः खगः । इष्टरूपकरां विद्यां ससाध विप्रतारिणीम् ॥ ६१० ॥
सुग्रीवे क्रीडितुं याते शुभोद्यानेऽन्यदा मुदा । स साहसगतिर्विद्या-धरः सुग्रीवरूपभृत् ॥ ६११ ॥
तारामिच्छुः पुरीमध्ये-ऽभ्येत्य सुग्रीवविष्टरे । उपविष्टोऽनुगैः सर्वैः सेव्यते भक्तिपूर्वकम् ॥ ६१२ ॥
उत्थायान्तःपुरे याव-द्याति सुग्रीवरूपभृत् । तावत् सत्योऽपि सुग्रीवो रुद्धो द्वारि समागतः ॥ ६१३ ॥
सुग्रीवद्वितयं दृष्ट्वा संशये पतितस्तदा । चन्द्ररश्मिः सुतो बालेः शुद्धान्तमरुणत् स्वयम् ॥ ६१४ ॥
सुग्रीवो मायिको नान्तः-पुरे प्रवेशमाप्तवान् । अन्योऽपि न पुरीमध्ये प्रवेशं लभते तदा ॥ ६१५ ॥
किष्किन्धानगरीमध्ये स्थितः सुग्रीवभूपतिः । कियद्भिर्मन्त्रिभिश्चान्तः-पुरं नाना निसेव्यते ॥ ६१६ ॥
बहिस्थोऽपि स सुग्रीवः कियद्भिः सुभटादिभिः । मन्त्रिभिः सेव्यते व्यक्ति-कर्त्तुं शक्तस्तयोर्न कः ? ॥ ६१७ ॥
सुग्रीवयोर्द्वयोरास-न्नक्षौहिण्यश्चतुर्दश । ततो द्वाभ्यां विधीयेत सङ्ग्रामो दारुणः सदा ॥ ६१८ ॥
क्षीणास्त्रः पुरबाह्यस्थः सुग्रीवो ध्यातवानिति । अक्षीणपौरुषो वालि-र्दीक्षां लात्वा शिवं ययौ ॥ ६१९ ॥
अंतःपुरेऽधुना शत्रुं प्रविशन्तं रुरोध यः । अज्ञानानो द्वयोर्भेदः (दं) स बालिसूनुरद्भुतः ॥ ६२० ॥
खरो मम सखा पूर्वं रामेण दोष्मता हतः । ततो राज्यं विराधस्य ददौ श्रयाम्यहं च तम् ॥ ६२१ ॥
सुग्रीवोऽपि विमृश्यैवं विराधसुहृदन्तिके । गत्वाऽऽहाहं श्रये रामं रोचते यदि तेऽधुना ॥ ६२२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततः ससोदरं रामं नत्वा सुग्रीव ऊचिवान् । कृपां कृत्वाऽरितस्त्वं मे राज्यं वालय साम्प्रतम् ॥ ६२३ ॥

किष्किन्धायां सह भ्रात्रा गत्वा रामः ससोदरः । युद्धायाऽऽकारयन्माया-सुग्रीवं सपरिवह(कर)म् ॥ ६२४ ॥

द्वयोः सुग्रीवयोस्तुल्य-रूपं जल्पनमेव च । निरीक्ष्याध्यायि रामेणान्तरे सत्योऽनयोश्च कः ॥ ६२५ ॥

युद्धं चेत् क्रियते तर्हि नृसंहारो भवेद्बहुः । ततस्तथा करिष्येऽहं सुसुखं स्याद्यदावयोः ॥ ६२६ ॥

रामोऽथ सत्यसुग्रीव-ज्ञप्तये समरे तथा । वज्रावर्त्तस्य चापस्य गुणघातमताडयत् ॥ ६२७ ॥

वेशप्रावर्त्तिनी विद्या मायासुग्रीवविग्रहम् । मुक्त्वा नश्यन्तमेवामु-मपश्यन् मायिनं जनाः ॥ ६२८ ॥

तत एकेन बाणेन सुग्रीवं मायिनं द्रुतम् । रामोऽनैषीद्यमावासं ततोऽन्यं शिश्रियुः प्रजाः ॥ ६२९ ॥

ततो दाशरथिर्भ्रातृ-युतः सुग्रीवभूभुजे । किष्किन्धानगरीराज्यं ददौ सन्मानपूर्वकम् ॥ ६३० ॥

भामण्डलो विराधश्च कालज्ञौ सपरिच्छदौ । रामं नत्वोचतुः कार्यं मह्यं दिशतु साम्प्रतम् ॥ ६३१ ॥

जाम्बुवान् हनुमान् नीलो निषधश्चन्दनोऽपि च । गम्भीरोऽरिंदमः सुन्दः सुग्रीवं शिश्रियुर्मुदा ॥ ६३२ ॥

सुग्रीवो राममापृच्छ्य सीताऽन्वेणहेतवे । हनुमन्तं लसतसारं प्रजिघाय विचक्षणम् ॥ ६३३ ॥

इतो दशमुखो वाञ्छन् भोगाय रामगेहिनीम् । स्वप्रियाः प्रेषयामास सन्मानयितुमञ्जसा ॥ ६३४ ॥

गत्वा सीतान्तिके प्रोचू रावणस्य प्रियास्तदा । रावणं वृणु भो ! सीते ! त्रिखण्डभूमिनायकम् ॥ ६३५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वात्रिंशत्तु सहस्राणि पत्न्यो यस्य मनोहराः । रूपेण जयति स्वर्ग-नारीर्मन्मथगेहिनीः ॥ ६३६ ॥
विभीषणादिभिर्भूपैः सीतात्यजनहेतवे । बोधितोऽपि दशास्यो न तत्याज जानकीं तदा ॥ ६३७ ॥
* यतः—वरमग्गिगम्मि पवेसो वरं विसुद्धेण कम्मुणा मरणं । मा गहियव्वयभंगो मा जीयं खलिअसीलस्स ॥卐
* दत्तस्तेन जगत्यकीर्त्तिपटहो गोत्रे मषीकूर्चक-श्चारित्रस्य जलाञ्जलिर्गुणगणाऽऽरामस्य दावानलः ।卐
सङ्केतः संकलापदां शिवपुरद्वारे कपाटो दृढः, शीलं येन निजं विलुप्तमखिलं त्रैलोक्यचिन्तामणिः ॥ ६३८ ॥
प्रच्छं प्रच्छं क्रमाद् विद्या-धरान् लोकान् बहूनपि । रावणापहृतां सीतां जज्ञौ दाशरथिर्ध्रुवम् ॥ ६३९ ॥
सुग्रीवेगच्छति राम साधयामः क्रियान्तरे । नैवाश्चर्यग्रहव्यग्रः सुग्रीवो नागमिष्यति (?) ॥ ६४० ॥

तदा सुग्रीवं प्रति लक्ष्मणोऽवग्—

(समये तिष्ठ सुग्रीव ! मा बालिपथमन्वगाः । न स सङ्कुचितः पन्था येन बाली हतो गतः ॥ ६४१ ॥)
ततः सुग्रीव आगत्य जगाद राघवं (सत्वादार्यः) प्रति । आदेशं देहि सीताया वीक्षणं क्रियते मया ॥ ६४२ ॥
विषमे स्थानके लङ्का-रूपे ज्ञाते सति क्रमात् । प्राहैको व्योमगो रत्न-जटीति राघवं प्रति ॥ ६४३ ॥
सीता हृता दशास्येन नीता तस्य वनान्तिके । तत्र स्थिता सती धर्म्म-परास्तीति मया श्रुता ॥ ६४४ ॥
अन्यदा गणकः पृष्टो मृत्युं स्वं रावणेन तु । जगौ कोटिशिलां यस्तू-त्पाटयिष्यति हन्ति सः ॥ ६४५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततो रामादिविद्याभृद्-युक्तो गत्वा स लक्ष्मणः । उदपाटयत् शिलां कोटिं पश्यत्सु नृषु भूरिषु ॥ ६४६ ॥
यदा रामः सीतां ज्ञातुं कृशाङ्गं हनुमन्तं । प्रेषयामास तदा को प्यवग् विद्याधरेश्वरः ॥ ६४७ ॥
आशे सर्वस्य सर्वत्र न क्वचित् प्रतिहन्यते । ईदृशादपि यत् सत्त्वा-दार्यः कल्याणमिच्छति ॥ ६४८ ॥
ज्ञातुं सीतास्थितिं [रामो] हनुमन्तं सुविक्रमम् । प्रेषयामास लङ्कायां रहः शोभनवासरे ॥ ६४९ ॥
उल्लङ्घयन् गिरीन् ग्रामान् पुराणि सरितस्तदा । हनुमान्नभसा गच्छन् लङ्कायाः सन्निधौ ययौ ॥ ६५० ॥
लङ्कायाः सन्निधौ विद्या-माशालिं दुःशकां नृणाम् । स्थापितां दशवक्त्रेणा-पाचकार भुजाबलात् ॥ ६५१ ॥
गतेषु रावणाद्येषु राक्षसीव स सत्वरम् । हनुमान् गभस्ति रिवोऽभूत् सीताया गोचरे दृशः ॥ ६५२ ॥
ततो वज्रमुखान् कोणपादिनो भीपणाननान् । निहत्य हृत्वतोऽचाली-दग्रतो हनुमान् बली ॥ ६५३ ॥
उत्प्लुत्य हनुमान् व्योम्नि वने सीतापवित्रितम् । ज्ञात्वा रक्षोमुखात् सीता पार्श्वे छन्नं रहः स्थितः ॥ ६५४ ॥
राक्षसीभिर्दशास्याय बोध्यमाना च जानकी । मलक्लिन्नाम्बरीं सीतां जल्पद्रामाभिधां तदा ॥ ६५५ ॥
गृह्णन्तीमर्हतो नाम रामनामान्तराऽन्तरा । सीतां दृष्ट्वा मरुत्पुत्रो दध्यावेवं निजं हृदि ॥ ६५६ ॥
विश्वस्य पावनी सर्व-सतीनारीशिरोमणिः । सीतेयं विद्यते राम-गेहिनी शीलशालिनी ॥ ६५७ ॥
युक्तमस्याः सुधर्मिण्याः कृते दाशरथिः सदा । खिद्यते कुरुते वाल-यितुं चोपक्रमं पुनः ॥ ६५८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रामहस्तगतां मुद्रां हनुमत्करसंस्थिताम् । वीक्ष्य सीता पतिं मृत्यु-गतं ध्यात्वेति चेतसि ॥ ६५९ ॥
रुरोदोच्चैः स्वरं कान्त ! कथं मुक्त्वेह मां मृतः । अधुनाऽहं करिष्यामि प्राणत्यागं मृतेस्तव ॥ ६६० ॥
रुदन्तीं जानकीं पत्युः पञ्चत्वशङ्कया तदा । हनुमान् जीवयामास श्रीरामचन्द्रवार्त्तया ॥ ६६१ ॥
उक्तंच–भर्त्ता ते मानुजो मातः ! कुशली रावणान्तकृत् । तद्दूतोऽहं तु हनुमान् पवनाञ्जनयोः सुतः ॥ १ ॥

यतः–सुद्धे(मुद्रे)सन्ति सलक्ष्मणाः कुशलिनः श्रीरामपादाः स्वयं,
सन्ति स्वामिनि ! मा विधेहि विधुरं चेतोऽनया चिन्तया ।
एतं व्याहर देवि ! मैथिलिसुते नामान्तरेणाधुना,
रामस्त्वद्विरहेण कङ्कणमिदं यद् दापितोऽस्यै चिरात् ॥ ६६२ ॥

तव पत्युरहं भृत्यो हनुमा-न्नामतोऽस्मि हि । मां मुद्रासहितं रामो प्रैषीत् ज्ञातुं तव स्थितिम् ॥ ६६३ ॥
श्रुत्वैतद् वचनं सीता हृष्टाऽऽशु व्यरमन्मृतेः । ततः सत्याः पुरो मुद्रां मुक्त्वाऽनंसीन्मरुत्सुतः ॥ ६६४ ॥
सीतोत्थाय नतिं कृत्वा मुद्रिकांतां सुविष्टरे । मुक्त्वार्चित्वा सुमैस्तां चा-नंसीत् पुनः पुनर्मुदा ॥ ६६५ ॥
उक्तंच–" तिष्ठतो दण्डकारण्ये रामलक्ष्मणयोस्तयोः । आदेशादहमत्राऽऽगां राममुद्रासमन्वितः ॥ १ ॥
आकर्ण्यैतद् वचः सीता मुद्रां मौलिगतां तदा । कृत्वा मुदं व्यधाद् भूयो भूयोऽनंसीच्च तां पुनः " ॥ ६६६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वायुपुत्रोपरोधेन रामस्य कुशलश्रुतेः । एकविंशत्यहोरात्रि-प्रान्ते पारणकं व्यधात् ॥ ६६७ ॥

हनुमन्तं प्रति सीता प्राह—

" असावगाधो बहुनीरपूरै-र्निस्तीर्णवान् यो मनसोऽप्यगम्यः ।
त्वां पुत्र ! पश्यामि च हीनगात्रं निस्तीर्यते किं भवतात्मपुत्रः ॥ १ ॥
अमुं तपो रक्षतु लक्ष्मणस्य तदार्जवं रक्षतु चा(वा)युसूनोः ।
बलीमुखं रक्षतु संशयस्थ-ममायमन्तःकरणं ममापि ॥ २ ॥

सीतायै मुद्रिकां दत्त्वा रामस्मरणहेतवे । सीता चूडामणिं लात्वा सीताङ्घ्री अनमच्च सः ॥ ६६८ ॥

जगाद मारुतिर्मात-स्त्वया खिद्यं मनाग् नहि । हत्वा दशाननं राम-स्त्वामेवाङ्गीकरिष्यति ॥ ६६९ ॥

स्मरन्ती त्वं जिनेन्द्रांह्री रामनाम च नित्यशः । धर्म्मकृत्यं न मोक्तव्यं दुःखं कार्यं च नो त्वया ॥ ६७० ॥

चूडामणिरयं राम-भद्राय दास्यते मया । ततो रामः सतीं त्वां च मत्वा हृष्टो भविष्यति ॥ ६७१ ॥

नत्वा सीतां व्रजन् देव-रमणोद्यानपादपान् । बभञ्जाऽऽदौ मरुत्पुत्रो वनपालं ततो न्यहत् ॥ ६७२ ॥

जघानाक्षं ततोऽन्यानि वनानि मारुतिस्तदा । इतस्तत्राऽऽगतः शक्र-जेता रावणनन्दनः ॥ ६७३ ॥

युद्धं कुर्वन् दशास्याङ्ग-जन्मा मारुतिमञ्जसा । बबन्ध सर्पराड्बन्धै-र्निर्दयं हर्षिताशयः ॥ ६७४ ॥

For Private and Personal Use Only

रामहस्तगतां मुद्रां हनुमत्करसंस्थिताम् । वीक्ष्य सीता पतिं मृत्यु-गतं ध्यात्वेति चेतसि ॥ ६५९ ॥
रुरोदोच्चैः स्वरं कान्त ! कथं मुक्त्वेह मां मृतः । अधुनाऽहं करिष्यामि प्राणत्यागं मृतेस्तव ॥ ६६० ॥
रुदन्तीं जानकीं पत्युः पञ्चत्वशङ्कया तदा । हनुमान् जीवयामास श्रीरामचन्द्रवार्त्तया ॥ ६६१ ॥
उक्तंच–भर्त्ता ते मानुजो मातः ! कुशली रावणान्तकृत् । तद्दूतोऽहं तु हनुमान् पवनाञ्जनयोः सुतः ॥ १ ॥

यतः–सुद्धे(मुद्रे)सन्ति सलक्ष्मणाः कुशलिनः श्रीरामपादाः स्वयं,
सन्ति स्वामिनि ! मा विधेहि विधुरं चेतोऽनया चिन्तया ।
एतं व्याहर देवि ! मैथिलिसुते नामान्तरेणाधुना,
रामस्त्वद्विरहेण कङ्कणमिदं यद् दापितोऽस्यै चिरात् ॥ ६६२ ॥

तव पत्युरहं भृत्यो हनुमा-न्नामतोऽस्मि हि । मां मुद्रासहितं रामो प्रैषीत् ज्ञातुं तव स्थितिम् ॥ ६६३ ॥
श्रुत्वैतद् वचनं सीता हृष्टाऽऽशु व्यरमन्मृतेः । ततः सत्याः पुरो मुद्रां मुक्त्वाऽनंसीन्मरुत्सुतः ॥ ६६४ ॥
सीतोत्थाय नतिं कृत्वा मुद्रिकांतां सुविष्टरे । मुक्त्वार्चित्वा सुमैस्तां चा-नंसीत् पुनः पुनर्मुदा ॥ ६६५ ॥
उक्तंच–" तिष्ठतो दण्डकारण्ये रामलक्ष्मणयोस्तयोः । आदेशादहमत्राऽऽगां राममुद्रासमन्वितः ॥ १ ॥
आकर्ण्यैतद् वचः सीता मुद्रां मौलिगतां तदा । कृत्वा मुदं व्यधाद् भूयो भूयोऽनंसीच्च तां पुनः " ॥ ६६६ ॥

सत्यां शक्त्यामपि व्योम-श्वासपुत्रस्तदा स्वयम् । स्वशक्तिं दर्शयामास नहि शक्रजिते मनाग् ॥ ६७५ ॥
इन्द्रजिन् मारुतिं तात-पार्श्वे नीत्वा जगावदः । असौ सीताक्रमौ नत्वा रामशुद्धिमचीकथत् ॥ ६७६ ॥
अनेन जानकीपार्श्वे प्रोक्तं रामः सलक्ष्मणः । हत्वा दशाननं त्वां त्व-ङ्गीकरिष्यति वेगतः ॥ ६७७ ॥
बभञ्जाऽसौ तरून् देव-रमणोद्यानसङ्गतान् । वनपालमसावक्षं वनान्यन्यानि च स्फुटम् ॥ ६७८ ॥
रावणोऽथ जगौ दुष्ट ! पापिष्ठाधमशेखर ! । सीतायै रामभद्रस्य सन्देशादीनचीकथः ॥ ६७९ ॥
उद्यानवनछेदादि-पापानि त्वमचीकरः । मर्तुमत्र त्वमायातः स्मर रामं निजं पतिम् ॥ ६८० ॥
मारुतिः प्राह यत् पापं सीताया हरणात् कृतम् । तस्मै दास्यति मत्स्वामी राम आलोचनां द्रुतम् ॥ ६८१ ॥
मुञ्चेमां जानकीमद्य यदि त्वं दशकन्धर ! । तदा ते कुशलं नो चे-न्मृत्युरेव तवाऽऽगतः ॥ ६८२ ॥
श्रुत्वैतद्रावणो रुष्टो जगाद सेवकान् प्रति । अमुं खड्गप्रहारेण नयध्वं यममन्दिरम् ॥ ६८३ ॥
यावदायान्ति पौलस्त्य-प्रहिता हननोद्यताः । सेवका मारुतिं खड्ग-प्रहारैर्निर्दयं घनम् ॥ ६८४ ॥
त्रोटयित्वाऽऽशु तावच्चा-ऽहिबन्धं मारुतिर्द्रुतम् । पौलस्त्यमुकुटं चूर्णी-चक्रे पर्पटपुञ्जवत् ॥ ६८५ ॥
ततो दशाननः प्राह पुच्छमस्य च दह्यताम् । पुच्छे प्रज्वालिते सोऽपि लङ्कां प्राज्वालयत्तदा ॥ ६८६ ॥
उत्पत्योत्पत्य स व्योम्नि दग्ध्वा रावणमन्दिरम् । उद्यानं च मरुत्पुत्रो रावणाग्रे जगावदः ॥ ६८७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तवैव मृत्युवेलेषा वर्णिका दर्शिता मया । गच्छाम्यहं समायातं रामं विद्धि दशानन ! ॥ ६८८ ॥
लङ्का दग्धा वनं भग्नं (दग्धं) राक्षसाः प्रलयं गताः । यत् कृतं रामदूतेन स रामः किं करिष्यति ? ॥ ६८९ ॥
पश्यतो मे दशास्यस्य राक्षसानां प्रपश्यताम् । उड्डीय हनुमान् यातो दृष्टिगोचरतस्तदा ॥ ६९० ॥
सीताचूडामणिं सीता-मिव रामाग्रतस्तदा । मुक्त्वा मरुत्सुतोऽनंसीद् रामं च लक्ष्मणं क्रमात् ॥ ६९१ ॥
सीतासत्याः शुभोदन्ते प्रोक्ते हनुमता तदा । आलिङ्ग्य मारुतिं प्रेम्णा रामोऽवक् कुशलं तव ॥ ६९२ ॥
मरुत्पुत्रो जगौ स्वामिन् ! प्रसत्तेस्तत्र सेवकः । दुष्करं सुकरं कार्यं करोत्येव न संशयः ॥ ६९३ ॥
सीतामिलनपौलस्त्य-विगोपनादिकेऽखिले । प्रोक्ते हनुमता रामो मुमुदे ससहोदरः. ॥ ६९४ ॥
ततः सद्वचनैर्वायु-पुत्रमालाप्य सादरम् । मारुतेः पुरतो राम-चन्द्र एवं जगौ तदा ॥ ६९५ ॥
त्रिदशैरपि दुर्लङ्घ्या लङ्का नाम महापुरी । कथं वीर ! त्वया दग्धा विद्यमाने दशानने ॥ ६९६ ॥
उक्तंच–' सत्तेव जोअणसया वित्थिण्णो सव्वओ समंतेण । तस्स चिअ मज्झ देसे अत्थि तिकूडोत्ति वरसेलो ॥
नव जोअणाणि तुंगो पण्णासं जोयणं सव्वओ य वित्थिन्नो । सिहरं तस्स विरायइ उब्भासेउं दस दिसाओ ॥
सिहरस्स तस्स हेट्ठे जम्बूणयकणगवित्तपागारं । लंकापुरित्ति नामं नयरी सुरसंपयसमिद्धा ॥ ३ ॥"
ततः कृताञ्जलिर्भूयो-भूयः प्रणम्रमस्तकः । हनुमानुक्तवान् भक्ति-रसपूरितमानसः ॥ ६९७ ॥

For Private and Personal Use Only

प्रतापेन तु रामस्य देव्या निःश्वसितेन च । पूर्वं दग्धा तु सा लङ्का पश्चाद्वायुवशं गता ॥ ६९८ ॥
शाखामृगस्य शाखायाः शाखां गन्तुं पराक्रमः । यत्पुनस्तीर्यतेऽम्भोधिः प्रभावः प्राभवो हि सः ॥ ६९९ ॥
रावणेन हृतां सीतां ज्ञात्वा दाशरथिस्तदा । लक्ष्मणभ्रातृसुग्रीव-मारुतीनां पुरो जगौ ॥ ७०० ॥
लङ्कायां गम्यते लात्वा चमूमात्मभिरञ्जसा । विजित्य रावणं सीता सती सम्प्रति वाल्यते ॥ ७०१ ॥

सुग्रीवे विभीषणे च लक्ष्मणेन सह रहो मन्त्रयतो रामो जगौ—

मा स्म विश्वस सौमित्रे ! सुग्रीवे च बिभीषणे । यस्य प्रीतिर्न सौदर्ये का प्रीतिस्तत्र विद्यते ? ॥ ७०२ ॥
लक्ष्मणोऽवग्—यान्ति न्यायप्रवृत्तस्य तिर्यञ्चोऽपि सहायताम् ।
अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चते ॥ ७०३ ॥
ततो लक्ष्मणसुग्रीवौ ज्ञात्वा राममनस्तदा । ताडयामासतुर्ढक्कां चमूं मेलयितुं द्रुतम् ॥ ७०४ ॥
असङ्ख्यैः सुभटैरश्वै-र्गजैर्दृढरथैस्तदा । मिलितैश्चेलतू राम-लक्ष्मणौ शोभनेऽहनि ॥ ७०५ ॥
उक्तंच—"मगसिरबहुलपक्खे पंचमिदिवसे दिवायरे उदिए । सुहकरणलग्गजोए अह ताण पयाणयं जायं ॥
दिट्ठो सिही जलंतो निद्धूमो पयलदाहिणावत्ते । आहरणभूसिअंगी महिला सेअसिचयधरा ॥ २ ॥
णिग्गंथमुणिवरिंदो छत्तं हयहसियं तहा कलसो । पत्रणो अ सुरभिगंधो अहिणवं तोरणं विउलं ॥ ३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

खीरदुमंमि अ वासइ वामत्थो वायसो चलियपक्खो । वरभेरिसंखसद्दो सिद्धिं सिग्घं पसाहिंति ॥ ४ ॥
विमानैः खेचराश्चेलु-रश्वेभस्यन्दनैः पुनः । भूचरा अचलन् सिंह-नादं कुर्वन्त आदरात् ॥ ७०६ ॥
दशास्यसुभटौ सेतु-समुद्रौ द्वौ लसद्बलौ । वार्द्धिकूलस्थितौ रामो बबन्ध दृढबन्धनैः ॥ ७०७ ॥
यदा सेतोः समुद्रस्य बन्धं दाशरथिर्व्यधात् । तदाऽयमभवल्लोके प्रघोषः सर्वतो ननु ॥ ७०८ ॥
यतः—" दृषद्भिः सागरो बद्धो मनुष्यैरिन्द्रजिज्जितः । वानरैर्वेष्टिता लङ्का जीवद्भिः किं न दृश्यते ॥ १ ॥
ये मज्जन्ति निमज्जयन्ति च परांस्ते प्रस्तरा दुस्तरे, वार्द्धौ वीर ! तरन्ति वानरभटान् सन्तारयन्तेऽपि च ।
नैते ग्रावगुणा न वारिधिगुणा नो वानराणां गुणाः । श्रीमद्दाशरथेः प्रतापमहिमा सोऽयं समुज्जृम्भते ॥ ७०९ ॥
गत्वा सुवेलशैलेऽथ सुवेलं नाम पार्थिवम् । जित्वा दाशरथिर्लङ्का-समीपे समुपेयिवान् ॥ ७१० ॥
लङ्कापार्श्वे समायाते काकुत्स्थे सबले तदा । रावणो रणतूर्याणि नादयामास सर्वतः ॥ ७११ ॥

अत्र अङ्गदरावणयोर्मिथो जल्पनमिति—

रामः किं कुरुते ? न किंचिदपि च प्राप्तः पयोधेस्तटं, कस्मात् साम्प्रतमेवमेव हि ततो बद्धः किमम्भोनिधिः ।
क्रीडाभिः किमसौ न वेत्ति पुरतो लङ्केश्वरो वर्तते, जानात्येव विभीषणोऽस्ति लङ्कापदे स्थापितः ॥ १ ॥
तदा तत्र स्थितं रामं प्रणम्य मारुतिर्मुदा । प्रोवाच स्वामिभक्त्या तु लक्ष्मणे शृण्वति स्फुटम् ॥ ७१२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बन्धयित्वा दृढं पाशै-र्दशास्यं बलगर्वितम् । इहाऽऽनयेऽद्य वा हन्मि तत्रस्थमसिघाततः ॥ ७१३ ॥

रामं सबलमायान्तं श्रुत्वा भ्राता बिभीषणः । प्रणम्य रावणं प्राह सुकृती त्वं सहोदर ! ॥ ७१४ ॥

त्वयाऽऽदौ जानकी देवी हृता विमृशनं विना । तन्नैवं विहितं वर्यं यतः सत्यस्ति जानकी ॥ ७१५ ॥

एकस्यान्यकलत्रस्य हेतवे को विचक्षणः । गमयेदिहलोकं च परलोकं चमूद्यतः ? ॥ ७१६ ॥

* यतः–" अप्पउ धूलिहिं मेलिओ सयणदीधओ छार । पगि पगि माथा ढंकणु जिणि जोइ परनारी ॥ १ ॥卐

* जे परदारह परंमुह ते वुच्चइ नरसिंह । जे परिरंभइ परथीह तह फुसिज्जइ लीह ॥ २ ॥ "卐

आदौ हनुमता यद्वद् वनादिभञ्जनं कृतम् । बन्धः सेतोः समुद्रस्य रामेण विहितो दृढम् ॥ ७१७ ॥

तेन दाशरथिर्ह्येष बली सम्प्रति वीक्ष्यते । अतः सीतां सतीं देहि रामाय सुखहेतवे ॥ ७१८ ॥

रामे स्वनगरोपान्ते समेते रावणो जगौ । भो अङ्गद ! तव स्वामी किं करोति वदाऽधुना ॥ ७१९ ॥

बलं प्रदर्शयन् स्वीय-स्वामिनो रामभूपतेः । अङ्गदः प्रोक्तवानेवं रावणस्य पुरस्तदा ॥ ७२० ॥

विश्रम्भादुत्तमाङ्गं प्लवगबलपतेः पादयक्षस्य जेतुः कृत्वोत्सङ्गे सलीलं त्वचिकनकमृगस्याङ्गशेषं दधानः ।

बाणं रक्षःकुलघ्नं प्रगुणितमनुजनं नादरात् तीक्ष्णमक्ष्णः कोणेनाऽवीक्ष्यमाणस्त्वदनुजवदने दत्तकर्णोऽयमास्ते ॥

सुवेलशैलदुर्गस्थं सुवेलं बलिनं नृपम् । विजित्य तत्र सैन्यं स्व-मात्मसाद्विदधे क्षणात् ॥ ७२१ ॥

For Private and Personal Use Only

तेन सार्द्धं नहि स्पर्द्धा विभीषेन मनागपि । रामोऽयं दृश्यते वर्ध-मानतेजा लसत्बलः ॥ ७२२ ॥
तदा विभीषणं रामगुणान् लान्तं पुनः पुनः । दृष्ट्वा दशाननः क्रुद्ध-स्तं हन्तुमुद्यतोऽभवत् ॥ ७२३ ॥
शत्रौ प्रशंसिते क्रुद्ध-चेता दशाननस्तदा । विभीषणं गलेकृत्य सभाया निरकाशयत् ॥ ७२४ ॥
तदाऽन्ये भूधवाः प्रोचुः नायं वर्यो दशाननः । सहोदरोदितं नैव मन्यते स्म हितं मनाग् ॥ ७२५ ॥
* यतः–दिवा पश्यन्ति नो घूका काको नक्तं न पश्यति । न पश्यति मदोन्मत्तः स्वार्थी दोषं न पश्यति ॥ १ ॥卐
एके तदा जनाः प्रोचुः न वर्योऽयं विभीषणः । यतो वेत्ति न वक्तुं तु भूभुजां पुरतो मनाग् ॥ ७२६ ॥
* यतः–' सेवकेन सदा स्वस्मिन् हितमेव तु वाञ्छता । स्वामिनो रोच्यमानं तु वक्तव्यं नापरं मनाग् ॥ १ ॥ '卐
ततो बिभीषणस्त्रिश-दक्षौहिणीसमन्वितः । रामं प्रमोदयामास स्वसेवाकरणात्तदा ॥ ७२७ ॥
एगावीस सहस्सा सत्तरिसहिआणि अट्ठ य सयाणि २१८७० ।
एसा रहाण संखा हत्थीण वि एत्तिया चेव ॥ ७२८ ॥
एकं च सयसहस्सं णव य सहस्सा सयाणि तिन्नेव ।
पन्नासा चेव तहा जोहाण वि एतिआ संखा १०९३५० ॥ ७२९ ॥
पंचुत्तरा य सट्ठी होइ सहस्साणि छ च्चिअ सयाणि ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दस चेव वरतुरंगा संखा अक्खोहिणीए उ ६५६१० ॥ ७३० ॥

अट्ठारस य सहस्सा सत्त सया दोण्णि सयसहस्साइं ।

एक्काय इमा संखा सेणिअ ! अक्खोहिणीए य २१८७०० ॥ ७३१ ॥

एकषष्टि सहस्राणि लक्षा पञ्च च षष्टियुग् । त्रिंशदक्षौहिणीः सर्व-कुम्भ्यादि मानमुच्यते ॥ ७३२ ॥

रामोऽवग् रावणश्चेद् वि-जिष्यते हन्यतेऽथवा । तदा तुभ्यं च लङ्काया राज्यं प्रदास्यते मया ॥ ७३३ ॥

विभीषणो जगौ राम ! राज्येन मे कृतं ध्रुवम् । तवैव यदि सेवाऽस्तु मम सातप्रदायिनी ॥ ७३४ ॥

श्रुत्वैतद्वचनं रामो दध्याविदं हृदि स्फुटम् । भृत्या एवंविधा भाग्या-ल्लभ्यन्ते पुण्यशालिना ॥ ७३५ ॥

* यतः–" अरैः सन्धार्यते नाभि-र्नाभौ वाऽराः प्रतिष्ठिताः । स्वामिसेवकयोरेवं वृत्तिचक्रं प्रवर्त्तते ॥ ७३६ ॥ " 卐

* चित्तज्ञः शीलसम्पन्नो वाग्मी दक्षः प्रियंवदः । यथोक्तवादी स्मृतिमान् भृत्यः स श्लाघ्यते नृपैः ॥ ७३७ ॥ 卐

कम्पयन् भूतलं सैन्यै-र्दिशो बधिरयन् रथैः । रजोभिः छादयन् व्योम रामो लङ्कामवेष्टयत् ॥ ७३८ ॥

अक्खोहिणी सहस्सं एक्कं चिअ वानराण सव्वाणं । भामंडलेण सहियं भणियं चउरंगसेन्नस्स ॥ ७३९ ॥

तदा दशाननः सर्वं बलं सन्नह्य वेगतः । लङ्काया निर्गतो युद्धं कर्त्तुं रामाऽरिणा समम् ॥ ७४० ॥

अक्खोहिणी सहस्सा हवंति चत्तारि बुहजणुद्दिट्ठा । रावणबलस्स एवं मगहवई ! होइ परिमाणं ॥ ७४१ ॥

For Private and Personal Use Only

देवसैन्याऽऽयसैरस्त्रै मिथः [illegible]णैः । दशास्य-पद्मसैन्यानां सङ्ग्रामो दारुणोऽभवत् ॥ ७४२ ॥

गजस्थो गजगैः सार्द्ध-मश्वस्थस्तुरगास्थितैः । रथस्था रथगैः सार्द्धं युद्धं वितेनिरे भटाः ॥ ७४३ ॥

जायमाने रणे घोरे मिथस्तत्र जयेच्छया । उद्धतेषु भटेष्वेव जयश्रीः संशयेऽपतत् ॥ ७४४ ॥

आदेशं प्राप्य रामस्य युद्धं कुर्वति मारुतौ । दशास्यस्य महायोधौ भग्नौ हस्तप्रहस्तकौ ॥ ७४५ ॥

शत्रुञ्जय कल्पवृ० ॥ ३८२ ॥

रामादेशादितो युद्धं कुर्वतो नलनीलयोः । सिंहनादा द्विषां वक्षः स्फोटयन्ति दिशोदिशम् ॥ ७४६ ॥

वाद्यमानेषु तूर्येषु सर्वेषु सङ्गरे तदा । युद्धयन्ति सुभटा बाढं द्वयोश्चम्वोः परस्परम् ॥ ७४७ ॥

यतः—भंभामुइंगडमरुयढक्का हुंकारसंखपउराइं । खरमुहि-हुडुकपावय-कंसालयतिव्वसद्दाइं ॥ ७४८ ॥

गयतुरयकेसरीणं सद्दो वित्थरइ-महिसवसहाणं । मयपक्खीण बहुविहो कायरपुरिसाण भयजणणो ॥ ७४९ ॥

यदा नलः कपिर्हस्तं प्रहस्तं नीलवानरो । निन्यतुर्मरणं पुष्प-वृष्टिस्तदाऽपतत् खतः ॥ ७५० ॥

नलवानरनीलैस्तु कपिहस्तप्रहस्तकान् । हतान् श्रुत्वा मुदं रामो लेभे लक्ष्मणसंयुतः ॥ ७५१ ॥

हतौ हस्तप्रहस्तौ तु श्रुत्वा दशास्यसैन्यतः । सारणः शुकमारीचौ सिंहव्याघ्रस्वयम्भुवः ॥ ७५२ ॥

बीभत्सोद्दामचन्द्रार्काः कामवामौ स्मरामरौ । क्षेमङ्करो ज्वरो भीमो वीरो बलिदमो धनः ॥ ७५३ ॥

भीमदन्तमहास्कन्धौ महारथप्रजापती । अरिंदमः शतरथः सहस्रांशुर्मतङ्गजः ॥ ७५४ ॥

वज्रोदरो महावेगः सुन्दपसेन्दुमाधवाः । उत्थिताः समरं कर्तुं यमा इव भयङ्कराः ॥ ७५५ ॥ चतुर्भिः कलापकम्

एते युद्धं वितन्वानाः शरैःखड्गैश्च दारुणैः । रामस्य शिबिरं चक्रु-र्हतप्रायं क्षणादपि ॥ ७५६ ॥

संहारं भूरिजीवानां निरीक्ष्य सप्तघोटकः । ययावस्तछलादन्य-विषयं करुणापरः ॥ ७५७ ॥

प्रातः पद्मभुवा सद्यः प्रेरिता वानरादयः । अढौकन्त दशास्यस्य सैन्यं हन्तुं बलोत्कटाः ॥ ७५८ ॥

संग्रामाङ्गणमागतेन भवता चापे समारोपिते, देवाकर्णय येन येन सहसा यद्यत् समासादितम् ।

कोदण्डेन शराः शरैरपि शिरस्तेनापि भूमण्डले, तेन त्वं भवता च कीर्त्तिरतुला कीर्त्या च लोकत्रयी ॥

जायमाने तदा युद्धे सैन्ययोरुभयोरपि । लक्ष्मणोऽवग् दशास्यं त्वा-श्रित्येति प्रकटारवम् ॥ ७६० ॥

रे राक्षसाः कथयत क्व स रावणाख्यो रत्नं रवीन्दुकुलयोरपहृत्य नष्टः ।

त्रैलोक्यदीपकरचित्रिशिखाकराले यो रामनामदहने भविता पतङ्गः ॥ ७६१ ॥

अथोत्तस्थुर्दशास्यस्य भटा वीररसोत्कटाः । नटीमिव कराग्रस्थां नर्त्तयन्तोऽसिवल्लरीम् ॥ ७६२ ॥

ध्वानयन्तो दिशः शब्दै-स्तिरयन्तो दिशः शरैः । दारयन्तोऽवनीं पद्भ्यां कम्पयन्तोऽचलानपि ॥ ७६३ ॥

अब्धीनुद्वेलयन्तश्च भञ्जयतोऽवनीरुहान् । उत्पतन्तः पतन्तश्च भटा जघ्नुः परस्परम् ॥ ७६४ ॥ त्रिभिर्विशेषकम्

दशास्यस्य तु हुङ्कारैः प्रेरिता यामिनीचराः । बभञ्जुर्वानरान् भूरीन् तटवृक्षानिवोर्म्मयः ॥ ७६५ ॥

भग्नं रामबलं वीक्ष्य सुग्रीव उत्थितो युधे । निवार्य हनुमाँस्तं च कौणपान् हन्तुमुत्थितः ॥ ७६६ ॥
तदा माली धनुःशाली खड्गमुल्लालयंश्च खे । युद्धं हनुमता कर्तु-मुत्तस्थौ यमसोदरः ॥ ७६७ ॥
हनुमान्मालिनं चक्रे निरस्त्रं करलाघवात् । नंष्ट्वा माल्यपि शरणं दशास्यस्य ययौ तदा ॥ ७६८ ॥
अथाऽस्तं तरणौ याते रामेण प्रेषितोऽङ्गदः । गत्वा दशाननोपान्ते जगौ सीता समर्प्यताम् ॥ ७६९ ॥
नो चेत्ते सकुटुम्बस्य रामान्मृत्युमुपागतम् । हक्कितोऽथ दशास्येन पुनरङ्गद ऊचिवान् ॥ ७७० ॥
रक्षोदुर्भिक्षमाधातु मवतीर्णोऽस्ति यः क्षितौ । तस्य रामस्य दूतोहं मनस्तस्य च वालिनः ॥ ७७१ ॥
शिरोभिर्मा देवी शिव इव न ते दास्यति पुनः, प्रबन्धं पश्याधः सरस इव कैलाससुभटः ।
हितं तु त्वां ब्रूमो मम जनकदोर्दण्डविजय-बलात् कीर्त्तिस्तम्भं त्यज कमलबन्धो ! कुलवधूम् ॥ ७७२ ॥
सन्धौ वापि गृहे वापि मयि द्यूते दशाननी । अक्षिता वा क्षिता वापि क्षितिपीठे लुठिष्यति ॥ ७७३ ॥
एवं जाते द्वितीयेऽह्नि रामरावणयोरपि । ततः स्वस्वबले गत्वा बभूवुः सुस्थिता भटाः ॥ ७७४ ॥
अथ वायुसुतो वैरि-बलं निघ्नंस्तदाऽभितः । भ्रान्त्वाऽरातिचमूमध्ये स्वसैन्यं समुपागमत् ॥ ७७५ ॥
कुम्भकर्णोऽसिघातेन निघ्नन् रामबलं तदा । सुग्रीवेण समं युद्धं चक्रे शमनसोदरः ॥ ७७६ ॥
सुग्रीवेण निरस्तास्त्रः कुम्भकर्णः कृतस्तदा । भामण्डलो जघानाऽथ राक्षसान् भूरिशोऽभितः ॥ ७७७ ॥

मरुत्पुत्रासिघातेन कुम्भकर्णोऽपतद् भुवि । ततो दशाननो युद्धं विधातुमुत्थितो रणे ॥ ७७८ ॥
दशाननं निषिध्याऽथ तत्तनुरिन्द्रजित्तदा । उत्तस्थौ रामभद्रस्य बलं निहन्तुमादरात् ॥ ७७९ ॥
द्वयोः शिबिरयोर्वीरा आस्फालन्तो मिथो भुजान् । मल्ला इव नियुध्यन्तो दृश्यन्ते यमसन्निभाः ॥ ७८० ॥
बबन्ध नागपाशेन शक्रजित् कपिनायकम् । भामण्डलं बबन्धाऽहि-पाशेन मेघवाहनः ॥ ७८१ ॥
जीर्णदोरमिवाऽह्नाय त्रोटयित्वाऽहिबन्धनम् । उत्थितौ तत्क्षणात् तत्र भामण्डलकपीश्वरौ ॥ ७८२ ॥
भामण्डलकपीशाभ्यां दशाननबलं समम् । तथा विलोडितं बाढं जीविताऽऽशाऽत्रुटद् यथा ॥ ७८३ ॥
अङ्गदः कुम्भकर्णेन सार्द्धं युध्यन् रणाङ्गणे । कुम्भकर्णं व्यधाद् बाढं व्याकुलं जर्जराङ्गकः ॥ ७८४ ॥
अथ तार्क्ष्यामरोऽभ्येत्य रामाय पुण्यशालिने । विद्या बह्वीः प्रभावढ्याः प्रददौ भक्तिपूरितः ॥ ७८५ ॥
लक्ष्मणाय हलं स्फारं स्यन्दनं मुशलं पुनः । विद्यां गारुडिकीं तार्क्ष्य निर्जरः प्रददौ तदा ॥ ७८६ ॥
एवमन्यानि शस्त्राणि विद्या नानाविधा वराः । वितीर्य रामभद्राय वासवोऽथ तिरोदधे ॥ ७८७ ॥
(समरे लक्ष्मणे युद्धं राक्षसे महसंततम् । अदृष्ट्वा रावणं प्रोच्चै-श्चरमेवं जगौ ध्रुवम्) ॥ ७८८ ॥
निघ्नन्तं लक्ष्मणं सौव-सैन्यं दृष्ट्वा दशाननः । करे चकार धरण-दत्तां शक्तिं ज्वलद्वसुम् ॥ ७८९ ॥
मुमोच रावणः शक्तिं यदैव लक्ष्मणं प्रति । वायुपुत्रादयो रोद्धु-मढौकन्त तदा द्रुतम् ॥ ७९० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वेषां शस्त्रसङ्घातान् न्यत्कृत्य शक्तिरञ्जसा । हलिनो हृदयेऽकस्मान्-न्यपतत् वह्निपिण्डवत् ॥ ७९१ ॥
लक्ष्मणो मूर्च्छितः सद्यः पपात छिन्नवृक्षवत् । तदाऽऽशु रावणो हृष्टः स्वसेवकसमन्वितः ॥ ७९२ ॥
इतो युद्धं वितन्वानो रामो विशिखपङ्क्तिभिः । छत्रं दशास्यशीर्षस्थं चिच्छेद रावणं रथम् ॥ ७९३ ॥
लक्ष्मणं मूर्च्छितं श्रुत्वा-ऽभ्येत्य तत्र तदा द्रुतम् । दृष्ट्वा च मूर्च्छितो रामो न्यपतद् वसुधातले ॥ ७९४ ॥
क्षणात् स्वसेवकैर्वात-प्रक्षेपादिभिरादरात् । सचेतनीकृतो रामः प्राहेति करुणस्वरम् ॥ ७९५ ॥
अहत्वा वैरिसङ्घात-मदत्त्वा जानकीं मम । लङ्काराज्यमदत्त्वा त्वं बिभीषणाय-कथं गतः ? ॥ ७९६ ॥
राममेकाकिनं वैरि-वेष्टितं वैरिसद्मनि । सुरलोकं व्रजन् किं न लज्जसेऽथ वदाऽधुना ॥ ७९७ ॥
त्वया विना निराधारो जातोऽहं लक्ष्मणाऽधुना । मृते त्वयि मम प्राणाः करिष्यन्ति प्रयाणकम् ॥ ७९८ ॥
त्वयि मृत्युं गते वैरि-गेहे वादित्रवादनम् । भविष्यति ततस्ते तु हृष्यन्ति वैरिणोऽखिलाः ॥ ७९९ ॥
आशा बिभीषणादीनां कथं भ्रातस्त्वया विना । मया पूर्णीकरिष्येत वद त्वमेकशोऽधुना ॥ ८०० ॥
तदा वायुसुतः प्राह बद्ध्वा दशाननं त्विह । आनयाम्यथवा लङ्का-वप्रं चूर्णीकरोम्यहम् ॥ ८०१ ॥
यतः—"देवाऽऽज्ञापय किं करोमि किमहं लङ्कामिहैवानये, जम्बूद्वीपमितो नये किमथवा वारांनिधिं शोषये ।
हेलोत्पाटितविन्ध्यमन्दरहिमस्वर्णत्रिकूटाचल-क्षेपक्षोभविवर्द्धमानसलिलं बध्नामि वारांनिधिम् ॥ ८०२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदा रामो दुःखी लक्ष्मणं प्रत्यवग्—

भुङ्क्ते स्म भोजनपरे स्वपिति स्म सुप्ते, जन्मापि मामनु–भवानतनोत् किमन्यत् ।

त्यक्त्वा क्रमं यदकरोत् सुरलोकयात्रां, सापत्यजः प्रकटितः किमयं विकारः ॥ ८०३ ॥

स्थाने स्थाने कलत्राणि मित्राणि च पदे पदे । तं देशं नैव पश्यामि यत्र भ्राता सहोदरः ॥ ८०४ ॥

न मे दुःखं हृता सीता न दुःखं लक्ष्मणो हतः । एतदेव महद् दुःखं यन्न राज्ये विभीषणः ॥ ८०५ ॥

उक्तंच मारुतिनेति तदा—

पश्चात्तापहते बिभीषणबले खिन्ने प्लवङ्गेश्वरे मूढे जाम्बुवति प्लवङ्गमगणे सम्भूय भूयः स्थिते ।

शक्तिप्रौढदृढप्रहारविधुरे मूर्च्छां गते लक्ष्मणे श्रीरामे विलपत्यहो ! हनुमता प्रोक्तं स्थिरैः स्थीयताम् ॥ ८०६ ॥

पातालतः किमु सुधारसमानयामि, निष्पीड्य चन्द्रममृतं किमु वाऽऽनयामि ।

उद्यन्तमुष्णकिरणं किमु वारयामि कीनाशमाशु कणशः किमु चूर्णयामि ? ॥ ८०७ ॥

तदा हनुमन्तं प्रति रामोऽवग्–चतुर्णामपि भ्रातॄणां पञ्चमा मम मारुते ! ।

गच्छ शीघ्रं महावीर ! भ्रातृभिक्षां च देहि मे ॥ ८०८ ॥

जगौ बिभीषणो राम ! त्यज खेदं धृतिं श्रय । शक्त्या हतो नरो रात्रिं जीवत्येवोद्यमं कुरु ॥ ८०९ ॥

For Private and Personal Use Only

ततौ लक्ष्मणरक्षायै परितो बलसप्तकम् । रामादेशाद् व्यधुः सद्यः सुग्रीवाद्यः खगास्तदा ॥ ८१० ॥
सुग्रीवाङ्गदचन्द्रांशु-भामण्डलमुखाः खगाः । तस्थुः संवेष्ट्य तद्देहं लक्ष्मणावनहेतवे ॥ ८११ ॥
भामण्डलसुहृद्भानु-र्नभोविद्याधराग्रणीः । हितेच्छू राममभ्येत्य नत्वाऽऽहेति कृताञ्जलिः ॥ ८१२ ॥
अयोध्यानगरीपार्श्वाद् विंशत्या योजनैः खलु । रक्षितं द्रोणभूपेन विद्यते द्रोणपत्तनम् ॥ ८१३ ॥
कैकयीसोदरो द्रोणः स भूपो विद्यतेऽधुना । विशिल्याह्वा सुता तस्य विद्यते वरलक्षणा ॥ ८१४ ॥
तस्यां गर्भस्थितायां तु मातू रोगोऽतिदुःशकः । ययौ क्षयं च भूरीणां नृणां स्त्रीणां क्षणादपि ॥ ८१५ ॥
तस्या शरीरसंमूर्च्छो यस्यांगे लगति ध्रुवम् । तस्य दुष्टोऽपि रोगः श्राग् विलयमयतेतराम् ॥ ८१६ ॥
देवताऽधिष्ठितं शल्यं निर्गच्छति शरीरतः । शाकिनी-व्यन्तरीमुख्याः पराभवन्ति नो मनाग् ॥ ८१७ ॥
तस्याश्चेत् करसंस्पर्शो लक्ष्मणाङ्गे लगिष्यति । तदाऽयं लक्ष्मणः सज्जो जायते नान्यथा पुनः ॥ ८१८ ॥
श्रुत्वैतद्राम आचष्टा-ङ्गदभामण्डलादिकान् । यूयं याताऽधुनाऽयोध्या-पुर्यां भरतसन्निधौ ॥ ८१९ ॥
सीताहरणवृत्तान्तं शक्त्या लक्ष्मणताडनम् । विशिल्यानयनोदन्तं भरताग्रे निवेद्यताम् ॥ ८२० ॥
ततस्तत्र द्रुतं गत्वा निवेद्य राघवोदितम् । भरताय मरुत्पुत्रा-दयो द्रोणपुरं ययुः ॥ ८२१ ॥
रामोक्तं निखिलं प्रोक्त्वा द्रोणभूमीपतेः पुरः । मरुत्पुत्रश्च भरत-द्रोणभूपतिसंयुतः ॥ ८२२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्यामेव निशीथिन्यां विशिल्यां द्रोणनन्दिनीम् । आनिनायाऽचिराद्राम-सन्निधौ स्वामिभक्तिभाग् ॥ युग्मम् ॥
विशिल्यायाः करस्पर्शात् लक्ष्मणस्य शरीरतः । शक्तिर्याती धृता हस्ते जल्पितेति हनुमता ॥ ८२४ ॥
भोः शक्ते ! किं दशास्यस्य किङ्करी भवसि त्वकम् । साऽवक्प्राग् भवतोऽहं च किङ्करी विहिताऽमुना ॥ ८२५ ॥
मुञ्च मां हनुमद् यामि कृपां कृत्वा ममोपरि । अतः परं करिष्यामि नापराधं भवद्बले ॥ ८२६ ॥
ततो हनुमता मुक्ता शक्तिर्निजालयं ययौ । ततो जयजयारावो रामसैन्येऽभितोऽभवत् ॥ ८२७ ॥
कन्यासहस्रसंयुक्तां विशिल्यां द्रोणभूधवः । लक्ष्मणाय ददौ तत्र चञ्चदुत्सवपूर्वकम् ॥ ८२८ ॥
विशिल्यास्नाननीरेण स्नापिताः कपयो नराः । सद्यो रूढव्रणा जाता गजतार्क्ष्यादयोऽपि च ॥ ८२९ ॥
उक्तंच ग्रन्थान्तरे—" दट्ठूण सत्तिभिन्नं सहोअरं महीअलम्मि पल्हत्थं ।
रामो गलंतनयणो मुच्छावसभिभलो पडिओ ॥ ८३० ॥
सीयलजलोल्लिअंगो आसत्थो वाणरेहिं परिकिन्नो । अह विलविउं पवत्तो रामो कलुणेण सद्देण ॥ ८३१ ॥
हा वच्छ ! सायरवरं उत्तरिऊणं इमं अइदुलहं । विहिजोएण अणत्थं एरिसयं पाविओसि तुमं ॥ ८३२ ॥
सुलहा नरस्स लोए कामा अत्था अणेय संवेहा । णवरं इह य न लब्भइ भाया माया य जणओ य ॥ ८३३ ॥
अहवा परम्मि लोए पावं अइदारुणं मए चिन्नं । तस्सेवं चेव पावफलं जायं सीआनिमित्तम्मि ॥ ८३४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततो दशाननः श्रुत्वा जीवन्तं लक्ष्मणं प्रगे । विद्याया बहुरूपायाः साधितुं चोद्यतोऽजनि ॥ ८३५ ॥
पूजां कृत्वाऽष्टधा वर्यां श्रीशान्तेः षोडशार्हतः । विद्याः साधयितुं लङ्का-धिपस्तामुद्यतोऽभवत् ॥ ८३६ ॥
चैत्रे मासे समायाते प्रोचतू रामरावणौ । चैत्रस्याष्टाह्निकां कर्तुं विद्यतेऽवसरोऽधुना ॥ ८३७ ॥
अत्राहःसु नवस्वेव जिनसद्मसु सादरम् । विधीयतेऽर्चना सर्व-जिनानां श्रावकोत्तमैः ॥ ८३८ ॥
आचाम्लानि विधीयन्ते श्रावकैरत्र पर्वणि । अर्हदादिपदानां तु जापश्च प्रतिवासरम् ॥ ८३९ ॥
चैत्रस्य शुक्लपक्षे चाष्टम्यादौ सुमहोत्सवः । पूर्णिमां यावतारब्धो रामरावणयोर्बले ॥ ८४० ॥
चित्तस्स सुक्कपक्खे उभयबले अट्ठमीमाई । जावच्चिय पंचदसी अट्ठाहिमहूसवो लग्गो ॥ ८४१ ॥
मन्दोदर्या निदेशेन सर्वःपौरजनस्तदा । अष्टाह्निकामहश्चक्रे दशास्यो विघ्नशान्तये ॥ ८४२ ॥
सिद्धविद्यो दशास्योऽथ प्रातः कृत्वा जिनार्चनम् । बुभुजे भूरिभिर्भृत्यै-र्बान्धवैश्च समं मुदा ॥ ८४३ ॥
द्वितीये च दिने प्रातः रामरावणयोर्मिथः । प्रावर्तत रणं घोरं भूरिजीववधात्मकम् ॥ ८४४ ॥
तदा दशाननो हन्तुं वाञ्छन् लक्ष्मीपतिं द्रुतम् । भूरिकौणपयुक्त साद्धं डुढौके वैरिभिर्भृशम् ॥ ८४५ ॥ ॥ ३९० ॥
भरतोऽथ रणं कर्तुं प्रवृत्तो राक्षसैः समम् । कौणपान् लक्ष्मणोऽप्रैषीत् यमसद्म बहूंस्तदा ॥ ८४६ ॥
दुरीकृत्यासिघातेन राक्षसान् हनुमान् बहून् । पौलस्त्यशिबिरं बाढं व्याकुलीकृतवान् खलु ॥ ८४७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तीक्ष्णैः खड्गप्रहारैस्तु लक्ष्मणो यमसोदरः । शतसङ्ख्यान् यमावासं प्रेषयामास कौणपान् ॥ ८४८ ॥
क्रोधोद्ध्मातमनास्तत्र लक्ष्मणः समराङ्गणे । आहत्य विशिखैर्गाढं दशाननमताडयत् ॥ ८४९ ॥
विद्यया बहुरूपिण्या रावणोऽथ रणाङ्गणे । चक्रे स्वरूपतुल्यानि वपुंषि कोटिशस्तदा ॥ ८५० ॥
ततो व्योम्नि क्षितौ पृष्ठेऽग्रे पार्श्वयोश्च लक्ष्मणः । ददर्श रावणान् भूरीन् विविधायुधवर्षिणः ॥ ८५१ ॥
यं यं दशाननं हन्ति लक्ष्मणः स स एव तु । द्विगुणादिककोट्यान्त-प्रमाणो जायते रणे ॥ ८५२ ॥
लक्ष्मणो विशिखैर्वारं वारं लक्षशतप्रमान् । निघ्नन् कोटिमितांस्तत्र ददर्श रावणान् पुनः ॥ ८५३ ॥
लक्ष्मणस्य तदा बाण-गणेषु निशितेष्वहो । हिंसत्सु रावणान् प्रादुरासन् भूरिदशाननाः ॥ ८५४ ॥
ततो लक्ष्मण आचष्ट किं रावणप्रसूरभूत् । गर्त्तायाः शूकरी यस्माद् दृश्यन्ते भूरिरावणाः ॥ ८५५ ॥
किं वाऽभूच्छलभी किं वा सर्प्पिणी किमु गोधिका । यतोऽधुना विलोक्यन्ते रावणा बहवो रणे ॥ ८५६ ॥
लक्ष्मणो बहुरूपाणां संहारिण्या च विद्यया । विना दशाननं मुख्यं जघानान्यान् दशाननान् ॥ ८५७ ॥
ततो दशाननः क्रुद्धः स्वं चक्रं वह्निपिण्डवत् । करे कृत्वा जगौ गच्छ नंष्ट्वा लक्ष्मण ! हेलया ॥ ८५८ ॥
नो चेच्चक्रमिदं शीर्षं तव छेत्स्यति साम्प्रतम् । लक्ष्मणोऽवग् न नश्यन्ति शूराः वैरिभयात् क्वचित् ॥ ८५९ ॥
मुञ्च ते चक्रमागच्छन् मुष्ट्या चूर्णीकरिष्यते । लोहखण्डस्य नो गर्वो विधातव्योऽधुना त्वया ॥ ८६० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुत्वैतद्रावणः क्रुद्धो भ्रमयित्वा शिरोऽभितः । चक्रं चिक्षेप लक्ष्मीशं गमितुं यमसद्मनि ॥ ८६१ ॥
चक्रः प्रदक्षिणीकृत्य सौमित्रेः परितस्तदा । अलश्चक्रे शयो वास्तो-ष्पतेर्दम्भोलिवत्तदा ॥ ८६२ ॥
लक्ष्मणोऽवग् दशास्य ! त्वं मुञ्च सीतां सतीं यदि । तदा ते जीवितव्यं स्या-दन्यथा चक्रतो मृतिः ॥८६३॥
रावणः प्राह मे चक्रं प्राणान्न मे हरिष्यति । मुञ्च त्वं लक्ष्मणेदानीं मम हस्ते समेष्यति ॥ ८६४ ॥
तदा मन्दोदरी पत्न्यऽभ्येत्याऽवग् रावणं प्रति । नह्येतौ मानवौ राम-लक्ष्मणौ किन्तु निर्जरौ ॥ ८६५ ॥
यतः—मनुष्यौ न मनुष्यौ तौ वानरास्ते न वानराः । व्याजेन किमपि छन्नं समेतावत्र निर्जरौ ॥ ८६६ ॥
विपरीते विधौ पुत्र-भार्यापित्रादयः पुनः । विघटन्ते पुनश्चक्रं किमात्मीयं भविष्यति ? ॥ ८६७ ॥
यतः—" विहडइ विहवो विहडइ बंधवो० ॥ ८६८ ॥
अतो न क्रियते कान्त ! साहसं दीयतेऽधुना । सीता सती तु रामाय ततो वर्यं भविष्यति ॥ ८६९ ॥
एवं मन्दोदरीप्रोक्तो नात्यजद्रावणो मदम् । तदा लक्ष्मण आचष्ट मृत्युस्ते रावणाऽऽगतः ॥ ८७० ॥
मुञ्च सीतां सतीं राम-भद्रस्य पदयोर्द्वयोः । सेवां कुरुष्व मुक्त्वा त्वं मानं भूर्यसुखप्रदम् ॥ ८७१ ॥
यतः—औचित्याचरणं विलुम्पति पयोवाहं नभस्वानिव प्रध्वंसं विनयं नयत्यहिरिव प्राणस्पृशां जीवितम् ।
कीर्त्तिकैरविणीं मतङ्गज इव प्रोन्मूलयत्यञ्जसा मानो नीच इवोपकारनिकरं हन्ति त्रिवर्गं नृणाम् ॥ ८७२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वाधीनेऽपि कलत्रे नीचः परदारलम्पटो भवति । संपूर्णेऽपि तटाके काकः कुम्भोदकं पिबति ॥ ८७३ ॥
रावणोऽवक् सुमित्राङ्ग-भव ! त्वं मां गदन्निति । लभसे त्वरितं मृत्युं मम हस्तादतो व्रज ॥ ८७४ ॥
एवंविधानि वाक्यानि जल्पन्ते सुहृदां पुरः । मौनं कृत्वा व्रजित्वा त्व(त्वा)मन्यत्र सुखवान् भव ॥ ८७५ ॥
शीर्षोपरितश्चक्रं भ्रमयित्वा च लक्ष्मणः । हन्तुं दशाननं रोषाद् मुमोच विगतकृपम् ॥ ८७६ ॥
चक्रेण तेन तत्कालं छिन्ने रावणमस्तके । लक्ष्मण ! त्वं जयाभीक्ष्ण-मित्यभूद्वाग् घनाध्वनि ॥ ८७७ ॥
तदानीं व्योम्नि गीर्वाणा जगुर्भूमौ नरा नृपाः । रेजू रावणशीर्षाणि पतितान्यधुना यतः ॥ ८७८ ॥
इह खलु विषमः पुराकृतानां भवति हि जन्तुषु कर्म्मणां विपाकः ।
क्व च ननु जनकाधिराजपुत्री क्व च दशकन्धरमन्दिरे निवासः ॥ ८७९ ॥
इह खलु० हरशिरसि शिरांसि यानि रेजुः । हर हर तानि लुठन्ति गृध्रपादे ॥ ८८० ॥
पौषे कृष्णस्य पक्षस्यै-कादश्यां पश्चिमेऽहनि । दशग्रीवो मृतो यात-श्चतुर्थे नरके ध्रुवम् ॥ ८८१ ॥
यतः—एगो य सत्तमाए पंच पंच य छट्ठि ए एगो । एगो पुण चउत्थीए कन्हो पुण चउत्थपुढवीए ॥ ८८२ ॥
तदा जयजयेत्युच्चै-र्व्याहरन्तः सुधाभुजः । विदधुः सुमनोवृष्टिं सौमित्रेर्मस्तकोपरि ॥ ८८३ ॥
बिभीषणस्तदा सद्यः स्वस्थीकृत्य निशाचरान् । जगाद यदि सौमित्रं सेवध्वं जीवितं तदा ॥ ८८४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुम्भकर्णेन्द्रजिन्मेघ-वाहनाद्याः क्ष्माचराः । रामं नत्वा दशास्यस्य प्रेतकर्म्म विदधिरे ॥ ८८५ ॥
प्रणम्य श्री जिनाधीशं मातृवर्गं समं तदा । कारयामास सर्वत्र रामो जिनार्चनं मुदा ॥ ८८६ ॥
तत उद्यानवनतः सीतामानीय सत्वरम् । गीतगानादिनृत्यानि राघवो स्वं व्यधापयत् ॥ ८८७ ॥
ततः सर्वं परिवारं स्वीयं दशमुखस्य च । राघवः प्रीणयामास सदन्नपानदानतः (पूजां व्यधात् स्वयम्) ॥
इतोऽमितबलो ज्ञानी लङ्कानगरसन्निधौ । षट्पञ्चाशत् सहस्रैस्तु साधुभिर्युक्त ईयिवान् ॥ ८८९ ॥
राम-लक्ष्मण-सुग्रीव-कुम्भकर्ण-बिभीषणाः । इन्द्रजित्प्रमुखा भूपाः श्रुत्वा साधुसमागमम् ॥ ८९० ॥
महादानं वितीर्याऽऽशु कुर्वाणा रुचिरोत्सवम् । धर्म्मं श्रोतुं समाजग्मु र्ज्ञानिनस्तस्य सन्निधौ ॥ ८९१ ॥
तिस्रः प्रदक्षिणा दत्त्वा साधोस्तस्य कृतादराः । धर्म्मं श्रोतुमुपाविष्टा रामाद्या मेदिनीभुजः ॥ ८९२ ॥
यतः–" अह तस्स दिणस्संते साहु णामेण तत्थ अमिअबलो । छप्पन्नसहस्सजुओ मुणीण लंकापुरी पत्तो ॥ ८९३ ॥
जइ सो मुणी महप्पा एन्तो लंकाहिवम्मि जीवंते । तो लक्खणस्स पीइ होन्ती सह रक्खसिंदेण ॥ ८९४ ॥
झायंतस्स भगवओ नूणं घाइक्खएण कम्माणं । रयणिसमयम्मि तइआ केवलनाणं समुप्पन्नं ॥ ८९५ ॥ ॥ ३९४ ॥
सोऊण दुन्दुहिरवं देवाण समागयाण पउमाभो । खेयरबलेण सहिओ साहुसयासं समल्लीणो ॥ ८९६ ॥
ततो ज्ञानी जगौ धर्म्म-देशनां शिवशर्मदाम् । राम-लक्ष्मण-सुग्रीव महीशानां पुरस्तदा ॥ ८९७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मनसि जराभिभूता जायन्ते यौवनेऽपि विद्वांसः । मन्दधियः पुनरितरे न भवन्ति वृद्धत्वयोगेऽपि ॥ ८९८ ॥
आरोहन्ती शिरःस्वान्तावौ-न्नत्यं भजतेतराम् । शिरसः स्वान्तमायान्ती दिशते नीचतां पुनः ॥ ८९९ ॥
विकम्पते हस्तयुगं वपुःश्रीः, प्रयाति दन्ता अपि विद्रवन्ति ।
मृत्युः समागच्छति निर्विलम्बं, तथापि जन्तुर्विषयाभिलाषी ॥ ९०० ॥
पूर्वसंसारजात् पुण्या-पुण्यनिःपादनात् किल । द्वेषप्रीत्यादि जायेत धनश्रेष्ठिनो यथा ॥ ९०१ ॥
श्रीपुरे धनदश्रेष्ठी बभूवाऽनघवैभवः । तस्य पत्नी सुरूपाऽभूद् रूपेण जितनिर्जरी ॥ ९०२ ॥
तस्याभूवन् नृपो भीमः कमलाह्वः पुरोहितः । मन्त्री धनाभिधः श्रेष्ठी चन्द्रः सुहृदः क्रमात् ॥ ९०३ ॥
एकदा धनदश्रेष्ठि-गेहेऽभ्येत्य धनो द्विजः । जातः कर्म्मकरो गेह-कृत्यानि कुरुते सदा ॥ ९०४ ॥
अन्यदा तेन विप्रेण श्रेष्ठिनः सदनाद् रमा । छन्नं लात्वा गतं रात्रौ दूरदेशे कृतत्वरम् ॥ ९०५ ॥
ततः श्रेष्ठी रमां यातां दृष्ट्वा विप्रसमन्विताम् । ज्ञात्वा लात्वा पदौ तस्य विप्रस्य पृष्ठितो ययौ ॥ ९०६ ॥
धृत्वा तं तस्करं पश्चात् समानीय नृपान्तिकात् । यावद्धन्तुं रुषा श्रेष्ठी चालयामास शीघ्रतः ॥ ९०७ ॥
तावत्तत्रागतो ज्ञानी चन्द्रचूडाभिधो जगौ । श्रेष्ठिन् न हन्यते स्तेनो विप्रोऽसौ भवताऽधुना ॥ ९०८ ॥
श्रेष्ठी जगौ ममानेन हृता वह्वी रमा रहः । अतश्चैनं हनिष्यामि चोरदण्डेन हेलया ॥ ९०९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ज्ञानी जगौ त्वया चन्द्र-पुरे पूर्वभवे किल । सोमस्य श्रीर्हृता छन्नं प्रविश्य सदने निशि ॥ ९१० ॥
अतोऽनेन भवेऽस्मिँ तव लक्ष्मी हृता रहः । अत एव न हन्येत विप्र एष वणिग्वर ! ॥ ९११ ॥
पद्मे पुरे वणिग् वीरो भूपो मन्त्री पुरोहितः । श्रेष्ठिराट् श्रीधरश्चापि प्रीतभाजोऽभवन् मिथः ॥ ९१२ ॥
अतस्तेषां नृपादीनामिह प्रीतिः परस्परम् । अजायत भृशं पूर्व-भवजस्नेहतः किल ॥ ९१३ ॥
* यतः–"यस्मिन् दृष्टे मनस्तोषः द्वेषश्च प्रलयं व्रजेत् । स विज्ञेयो मनुष्येण बान्धवः पूर्वजन्मनः ॥ ९१४ ॥卐
* यदुपात्तमन्यजन्मनि शुभमशुभं वा स्वकर्म्मपरिणत्या । तच्छक्यमन्यथा नैव कर्तुं देवासुरैरपि ॥ ९१५ ॥卐
ततो भीमः समुत्थाय मिथ्यादुःकृतपूर्वकम् । प्रीतिं चकार वीरेण समं धर्म्मप्रदानतः ॥ ९१६ ॥
ते सर्वे धर्म्ममार्हन्त्यं कृत्वा स्वर्गसुखं क्रमात् । भुक्त्वा प्राप्य पुनर्जन्म मानुषं सुखदायकम् ॥ ९१७ ॥
प्राप्य भूरिभवान् स्वर्गे नृलोके च परस्परम् । आससादुः सुखं शैवं भूपादयोऽखिलाः क्रमात् ॥ ९१८ ॥
श्रुत्वेति राघवोऽप्राक्षीद् हस्तो नलेन मारितः । प्रहस्तश्च विनीलेन कर्म्मणा केन जल्पताम् ? ॥ ९१९ ॥
केवल्याह पुरे वर्ये कुशस्थलाभिधे श्रिया । इन्धकः पल्लवो विप्रा-वभूतां सोदरौ वरौ ॥ ९२० ॥
कृषिकर्म्मरतौ द्वौ च जिनेन्द्रमतसंश्रितौ । सेवेते संयतौ शुद्ध-भिक्षाया दानतो मुदा ॥ ९२१ ॥
* यतः–"रोगिणां सुहृदो वैद्याः प्रभूणां चाटुकारिणः । मुनयो दुःखदग्धानां गणकाः क्षीणसम्पदाम् ॥९२२॥"卐

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्रैव सोदरौ कृष्ण-मुकुन्दौ वाडवौ सदा । निर्दयौ निन्दनं मौढ्यात् कुर्वाते साधुषु स्फुटम् ॥९२३॥
श्रीपुरे भूपतेर्वैरि-मर्दनस्य सुधर्मि(र्म)णः । दानं लातुं गताः कृष्ण-मुकुन्दाद्या द्विजाः क्रमात् ॥९२४॥
लोभात् कृष्णमुकुन्दाभ्यां द्विजाविन्धकपल्लवौ । निहतौ हरिवर्षे तु अभूतां युग्मिनौ वृष्टात् ॥९२५॥
मृत्वा कृष्णमुकुन्दौ तु वने कालिञ्जराभिधे । अभूतौ शशकौ पाप-कर्म्मणा रोगसंयुतौ ॥९२६॥
यतः–'तिव्वकसायाण इहं पुरिसाणं साधुनिंदणपराणं । इंदियवसाणुयाणं णियमेणं दोग्गइगमणं' ॥१॥
मृत्वा ततो मृगौ जातौ भीमेऽरण्येऽतिदुखितौ । ततश्च जम्बूकौ चन्द्रे वनेऽभूतां सरोगिणौ ॥९२७॥
एवं भ्रान्त्वा भवांस्तिर्यग्-योनिषु प्रचुरांस्तदा । अभूतां तापसौ बाल-तपोनिष्ठौ जटाधरौ ॥९२८॥
मृत्वा विष्णुकुमारस्य भूपस्यारञ्जिकापुरे । पुत्रौ हस्तप्रहस्तौ तु प्रशस्तरूपधारिणौ ॥९२९॥
युग्मिनौ ताविषे गत्वा श्रीपुरे वणिजौ वरौ । अभूतां धर्म्मकर्म्मादि-परौ सर्वज्ञसेवकौ ॥९३०॥
ततो गत्वा सुरावासे किष्किन्धाह्वे पुरे वरे । रक्षरजःसुतौ जातौ नलनीलाभिधौ वरौ ॥९३१॥
पूर्ववैरेण सङ्ग्रामे नलनीलौ नृपाङ्गजौ । नयतः स्म यमावासं हस्तप्रहस्तभूधवौ ॥९३२॥
यतः–"जो जेण हओ पुव्वं सो तेण हम्मए ण संदेहो । तम्हा ण हणेअव्वो अन्नो मोहादिई सत्तू ॥९३३॥
जो जीवाणं सेणिय ! देइ सुहं सो भुंजए सोक्खं । दुक्खं दुक्खावंतो पावइ नत्थेत्थ संदेहो ॥९३४॥"

For Private and Personal Use Only

पुनः पप्रच्छ रामस्तं ज्ञानिनं तु विशिल्यया । किं कृतं सुकृतं येन भवेऽत्र लक्ष्मणस्य तु ॥ ९३५ ॥
शक्तिर्विनिर्गता देहा-द्विशिल्याकरसङ्गतः । ततो ज्ञानी जगौ राम ! शृणु प्रष्टव्यमेव हि ॥ ९३६ ॥
विजये पुण्डरीकाह्वे धीरस्य चक्रिणः प्रिया । प्रीत्याह्वया सुताऽनङ्ग-श्रीः सञ्जाता लसद्गुणा ॥ ९३७ ॥
सुप्रतिष्ठपुरीशेन पुनर्वसुखगामिना । हृत्वा यावद् गतो दूरे ताव-त्तत्रामिलन् खगाः ॥ ९३८ ॥
जायमाने रणे भग्ने विमाने तस्य खेचरैः । क्वचिद्वनेऽपतत् कन्या प्रभेव शशिनो यथा ॥ ९३९ ॥
भीमे श्वापदसंद्रावे वने स्मृत्वा निजान् जनान् । रुदन्ती करुणारावं लाति पित्रादिकाभिधाम् ॥ ९४० ॥
रुदित्वैव चिरं स्वं तु धीरयित्वा कनी च सा । कुर्वाणाऽथ फलाहार-मष्टमादि तपो व्यधात् ॥ ९४१ ॥
षष्ठाष्टमादिकं तीव्रं कुर्वाणा सा तपः सदा । निन्येऽब्दानां सहस्राणि त्रीणि संवेगवासिता ॥ ९४२ ॥
इतो मेरौ जिनान् नत्वा लब्धिवासः खगेश्वरः । तत्रायातो विलोक्याधः कनीं भूमिं समीयिवान् ॥ ९४३ ॥
नत्वा तामवलक्ष्याऽवक् खगः स एहि साम्प्रतम् । त्वां नेष्ये त्वपितुः पार्श्वे ततः सा प्राह तं प्रति ॥ ९४४ ॥
मया त्वनशनं लातं यन्नान्यत्र व्रजाम्यहम् । ततः खगो जगौ कन्या-स्वरूपं चक्रिणः पुरः ॥ ९४५ ॥
वने तत्रागमच्चक्री यावत्तावन्निजाङ्गजाम् । ददर्श गल्यमानां त्व-जगरेण कुटुम्बयुग् ॥ ९४६ ॥
तदाऽऽस्यात् कर्षितुं लग्ने भूपे प्राहेति सा तदा । मयकाऽनशनं नूनं गृहीतं स्वर्गशर्मदम् ॥ ९४७ ॥

ममानेन शरीरेण भक्षितेनाधुना किल । आशाऽस्य मकरस्यैव पूर्यतां तात ! साम्प्रतम् ॥ ९४८ ॥
भक्ष्येऽस्मिन् मच्छरीरे तु गृहीतेऽस्य तनुमतः । मृत्युर्भावी ततः पापं भविष्यति तवाऽतुलम् ॥ ९४९ ॥
भक्षितां नन्दिनीं तेन ज्ञात्वाऽभ्येत्य पुरे निजे । राज्यं दत्त्वाऽङ्गजायाऽऽशु दीक्षां लिप्सुरभूच्च सः ॥ ९५० ॥
द्वाविंशत्या सहस्रैश्च पुत्राणां सह चक्रिराट् । जग्राह संयमं चन्द्र-शेखराचार्यसन्निधौ ॥ ९५१ ॥
तपस्तप्त्वा चिरं प्राप्य केवलज्ञानमन्यदा । भूरिसाधुयुतश्चक्री जगाम शिवसद्मनि ॥ ९५२ ॥
इतः सा कन्यका खाद्य-माना तेन दुरात्मना । धर्म्मध्यानपरा देवी दिव्यरूपाऽभवद्दिवि ॥ ९५३ ॥
अनङ्गश्रीस्ततो मृत्वा जिनधर्म्मस्य सेवया । द्रोणस्य भूपतेः पुत्री विशिल्याऽजनि रूपभाग् ॥ ९५४ ॥
अस्यां गर्भे प्रजातायां मातू रोगश्चिरोद्भवः । गतोऽन्येषां च लोकानां क्षयादिर्दुःशको द्रुतम् ॥ ९५५ ॥
जिनेन्द्रस्यार्चनां शश्व-त्तथा करोति साम्प्रतम् । यथाऽधुनाऽपि लोकाना-मरिष्टं व्रजति क्षयम् ॥ ९५६ ॥
उक्तंच–' सो भणइ दोणदुहिआ अत्थि विसल्ला गुणाहिया लोए । जीसे गब्भत्थाए जणणी रोगेण परिमुक्का ॥
जिणसासणाणुरत्ता णिच्चं पूआसमुज्जयमईआ । बंधूहिं परियणेण य पूइज्जइ देवया चेव ॥ २ ॥
ण्हाणोदयेण तीसे सुरहिसुगंधेण स देव ! सित्तोऽहं । समयं णिययजणेण तेण णिरोगत्तणं पत्तो ॥ ३ ॥'
* पुण्येन लभ्यते राज्यं पुण्येन गेहिनी सुताः । पुण्येन जायते देहो नीरोगश्चामलं यशः ॥ ९५७ ॥ 卐

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अस्मिन्नेव भवे क्षिप्त्वा कर्म्माशेषं पुरार्जितम् । विशल्या यास्यति श्रेयः–पुर्यां शुद्धवृषोदयात् ॥ ९५८ ॥
तदेति धर्म्ममाकर्ण्ये-न्द्रजिन्मन्दोदरी मुदा । कुम्भकर्णादयो भूपा वहवश्च व्रतं ललुः ॥ ९५९ ॥
निःकलङ्कां प्रियां सीतां गृहीत्वा रघुनन्दनः । बिभीषणोक्तमार्गेण लङ्कायां प्राविशन्मुदा ॥ ९६० ॥
लङ्काराज्यं प्रदायाऽऽशु बिभीषणाय राघवः । जिनार्चां कारयामास चक्रे च (समस्त) जिनसद्मसु ॥ ९६१ ॥
भरतोऽथ प्रणम्याऽवग् रामं प्रति लसद्गिरा । चतुर्दश समा जाता कानने वसतस्तव ॥ ९६२ ॥
मातृपित्रुदिता पूर्णा प्रतिज्ञाऽजनि साम्प्रतम् । राजते त्वां विनाऽयोध्या श्मशान स दशा(शी) ननु ॥ ९६३ ॥
अतः स्वागमतः स्वर्ग-तुल्यां निजां पुरीं कुरु । रावणाद्या द्विषोऽशेषा विजिता भवताचिरात् ॥ ९६४ ॥
ततो बिभीषणं पृष्ट्वा रामोऽयोध्यापुरीं प्रति । उपक्रमं व्यधाद्याव-द्यातुं तावन्नरो जगौ ॥ ९६५ ॥
अत्राऽऽसन्ने महातीर्थे वृषभाजितसञ्ज्ञके । विद्येते तत्र गत्वा त्वं नम श्रीवृषभाजितौ ॥ ९६६ ॥
पुष्पकं यानमारुह्य गत्वा च तीर्थयोस्तयोः । जिनयोः पूजनं चक्रे रामो वर्यमहोत्सवम् ॥ ९६७ ॥
दृष्ट्वा बिभीषणं यानं पुष्पकं चाधिरुह्य च । रामो यातुमयोध्यायां चचाल लक्ष्मणादियुग् ॥ ९६८ ॥
भूपेभ्य उपदां गृह्णन् ग्रामे ग्रामे पुरे पुरे । बहुमानं ददंस्तेभ्यो-ऽचालीद् दाशरथिस्तदा ॥ ९६९ ॥
अयोध्यायां सुशोभायां तलिकातोरणादिभिः । रामो भ्रातृयुतश्चक्रे प्रवेशं रुचिरोत्सवम् ॥ ९७० ॥

For Private and Personal Use Only

आदौ जिनालये गत्वा प्रणम्य श्रीजिनाधिपम् । उदारैः स्तवनैश्चक्रे स्तुतिं रामनरेश्वरः । ९७१ ॥ तथाहि–
प्रातः प्रभूतपुरुहूतनतानि पश्य पश्येति पश्यति पदानि तत्र प्रभोर्यः ।
तस्याङ्घ्रियामलमलं विमलं मरुत्वान् संसेवते समसुपर्वयुतो नितान्तम् ॥ ९७२ ॥
त्रैलोक्यलोककुमुदप्रमदप्रदायी कल्कान्धकारनिकरैकनिराकरिष्णुः ।
आनम्रसर्वसुरराजसमाज ! राज-राजेति राजति तवाननपूर्णिमेन्दुः ॥ ९७३ ॥
जय जयेति जपन्ति निरन्तरं मनसि नाम नरास्तव ये विभो ! ।
तुद तुदेति तुदन्ति न तान् मनाग् मदनमोहमुखान्तरवैरिणः ॥ ९७४ ॥
निःशेषनाकिनरनाथनताङ्घ्रिपद्म ! पद्मातनूभवभवाभवभीतिनेतः ।
भक्त्या भवी भुवि विभो ! वदनं प्रपश्यन् सत्सातभाग् भत्र भवेति भवेन् न को हि ॥९७५॥
अर्थिभ्यो मार्गितं दानं दत्त्वा सन्मान्य सज्जनान् । रामो निजालयं वर्यं समायातः सदुत्सवम् ॥ ९७६ ॥
तदाऽयोध्यापुरि भूरिकुलकोटिकुटुम्बयुग् । वर्यवप्रमहेभ्यालीसंयुता शोभतेतराम् ॥ ९७७ ॥
* यतः–सुरभवणसमं गेहं खितिसरो णाम हवइ पायारो । मेरुस्स चूलिआ इव तह य सभा वेजयंती अ ॥९७८॥卐
साला य विउलसोहा चंकमणं हवइ सुविहिनामेणं । गिरिकूडं पासायं तुंगं अवलोअणं चेव ॥ ९७९ ॥

For Private and Personal Use Only

शत्रुञ्जय
कल्पवृ०
॥४०२॥

नामेण वद्धमाणं चित्तं पेच्छाहरं गिरिसरिच्छं । कुक्कुडअंडावयवं कूडं गब्भगिहं रम्मं ॥९८०॥
कप्पतरुसमं दिव्वं एगत्थंभं च हवइ पासायं । तस्स पुण सव्वओ च्चिअ ठियाणि देवीण भवणाइं ॥९८१॥
अह सीह[साह]वाहणीविअ सेज्जाहर विट्ठरं दिणयराभं । ससिकिरणसन्निभाइं चमराइं मउअफरिसाइं ॥९८२॥
वेरुलिअविमलदंडो छत्तं ससिसन्निहं सुहच्छायं । विसमोइयाउ गयणं लंघंती पाउयाओ य ॥९८३॥
वत्थाइ अणग्घाइं दिव्वाइं चेव भूसणवराइं । दुब्भिज्जं चिअ कवयं मणिकुंडलजुवलयं कंतं ॥९८४॥
खग्गं गया य चक्कं कणयारि सिलीमुहा विअ अमोहा । विविहाइ महत्थाइं अण्णाणि वि एवमाईणि ।
पण्णास सहस्साइं कोडीणं साहणस्स परिमाणं । एक्का य हवइ कोडी अब्भहिआ पवरधेणूणं ॥९८६॥
सत्तरि कुलकोडीओ अहियाउ कुडुंबिआण जिट्ठाणं । साएयपुरवरीए वसंति धणरयणपुण्णाओ ॥९८७॥
कइलाससिहरसरिसोवमाइ भवणाइं ताण सव्वाइं । बलयगवामहिसीहिं समाउलाइं सुरम्माइं ॥९८८॥
पोक्खरिणिदीहियासु अ आरामुज्जाणकाणणसमिद्धा । जिणवरघरेसु रम्मा देवपुरी चेव साएया ॥९८९॥
जिणवरभवणाणि तहिं रामेणं कारिआणि बहुआणि । हरिसेणेण व तइआ भविअजणाणंदिअकराइं ॥९९०॥ ॥४०२॥
गामपुरखेड कब्बडणयरी सा पट्टणाण मज्झत्था । इंदपुरी व कया साएया रामदेवेण ॥९९१॥
सव्वो जणो सुरूवो सव्वो धणधन्नरयणसंपुण्णो । सव्वो करभररहिओ सव्वो दाणुज्जओ णिच्चं ॥९९२॥

आदौ जिनालये गत्वा प्रणम्य श्रीजिनाधिपम् । उदारैः स्तवनैश्चक्रे स्तुतिं रामनरेश्वरः । ९७१ ॥ तथाहि–
प्रातः प्रभूतपुरुहूतनतानि पश्य पश्येति पश्यति पदानि तव प्रभोर्यः ।
तस्याङ्घ्रियामलमलं विमलं मरुत्वान् संसेवते समसुपर्वयुतो नितान्तम् ॥ ९७२ ॥
त्रैलोक्यलोककुमुदप्रमदप्रदायी कल्कान्धकारनिकरैकनिराकरिष्णुः ।
आनम्रसर्वसुरराजसमाज ! राज-राजेति राजति तवाननपूर्णिमेन्दुः ॥ ९७३ ॥
जय जयेति जपन्ति निरन्तरं मनसि नाम नरास्तव ये विभो ! ।
तुद तुदेति तुदन्ति न तान् मनाग् मदनमोहमुखान्तरवैरिणः ॥ ९७४ ॥
निःशेषनाकिनरनाथनताङ्घ्रिपद्म ! पद्मातनूभवभवाभवभीतिनेतः ।
भक्त्या भवी भुवि विभो ! वदनं प्रपश्यन् सत्सातभाग् भव भवेति भवेन् न को हि ॥९७५॥
अर्थिभ्यो मार्गितं दानं दत्त्वा सन्मान्य सज्जनान् । रामो निजालयं वर्यं समायातः सदुत्सवम् ॥ ९७६ ॥
तदाऽयोध्यापुरि भूरिकुलकोटिकुटुम्बयुग् । वर्यवप्रमहेभ्यालीसंयुता शोभतेतराम् ॥ ९७७ ॥
* यतः–सुरभवणसमं गेहं खितिसरो णाम हवइ पायारो । मेरुस्स चूलिआ इव तह य सभा वेजयंती अ ॥९७८॥卐
साला य विउलसोहा चंकमणं हवइ सुविहिनामेणं । गिरिकूडं पासायं तुंगं अवलोअणं चेव ॥ ९७९ ॥

For Private and Personal Use Only

नामेण वद्धमाणं चित्तं पेच्छाहरं गिरिसरिच्छं । कुक्कुडअंडावयवं कूडं गब्भगिहं रम्मं ॥ ९८० ॥
कप्पतरुसमं दिव्वं एगत्थंभं च हवइ पासायं । तस्स पुण सव्वओ च्चिअ ठियाणि देवीण भवणाइं ॥ ९८१ ॥
अह सीह[साह]वाहणीविअ सेज्जाहर विट्ठरं दिणयराभं । ससिकिरणसन्निभाइं चमराइं मउअफरिसाइं ॥ ९८२ ॥
वेरुलिअविमलदंडो छत्तं ससिसन्निहं सुहच्छायं । विसमोइयाउ गयणं लंघंती पाउयाओ य ॥ ९८३ ॥
वत्थाइ अणग्घाइं दिव्वाइं चेव भूसणवराइं । दुब्भिज्जं चिअ कवयं मणिकुंडलजुवलयं कंतं ॥ ९८४ ॥
खग्गं गया य चक्कं कणयारि सिलीमुहा विअ अमोहा । विविहाइ महत्थाइं अण्णाणि वि एवमाईणि ।
पण्णास सहस्साइं कोडीणं साहणस्स परिमाणं । एक्का य हवइ कोडी अब्भहिआ पवरधेणूणं ॥ ९८६ ॥
सत्तरि कुलकोडीओ अहियाउ कुटुंबिआण जिट्ठाणं । साएयपुरवरीए वसंति धणरयणपुण्णाओ ॥ ९८७ ॥
कइलाससिहरसरिसोवमाइ भवणाइं ताण सव्वाइं । बलयगवामहिसीहिं समाउलाइं सुरम्माइं ॥ ९८८ ॥
पोक्खरिणिदीहियासु अ आरामुज्जाणकाणणसमिद्धा । जिणवरघरेसु रम्मा देवपुरी चेव साएया ॥ ९८९ ॥
जिणवरभवणाणि तहिं रामेणं कारिआणि बहुआणि । हरिसेणेण व तइआ भविअजणाणंदिअकराइं ॥ ९९० ॥
गामपुरखेड कब्बडणयरी सा पट्टणाण मज्झत्था । इंदपुरी व कया साएया रामदेवेण ॥ ९९१ ॥
सव्वो जणो सुरूवो सव्वो धणधन्नरयणसंपुण्णो । सव्वो करभररहिओ सव्वो दाणुज्जओ णिच्चं ॥ ९९२ ॥

अत्रान्तरे लसद्गीत-नृत्यवाद्येषु भूरिषु । सुखलीनोऽपि भरतो-ऽसारं संसारमीक्षते ॥ ९९३ ॥

तथाहि—दुक्खेहिं माणुसत्तं लद्धं जलबुब्बूओवमं चवलं ।

गयकण्णचवललच्छी कुसुमसमं च जोव्वणं हवइ ॥ ९९४ ॥

किंपागफलसरिच्छा भोगा जीअं च सुविणपरितुल्लं । पक्खिसमागमसरिसा बंधवनेहा अइदुरंता ॥ ९९५ ॥

धन्ना हु तायमाई ते सव्वे उज्झिऊण रज्जाइं । उसभसिरी देसिअत्थं सुगइपहं जे समोइण्णा ॥ ९९६ ॥

धन्ना ते बालमुणी बालत्तणम्मि गहियसामण्णा । न य णाओ पेमरसो सज्झाए वावडमणेहिं ॥ ९९७ ॥

भरहाइमहापुरिसा धन्ना ते जे सिरिं पयहिऊणं । णिग्गंथा पव्वईआ पत्ता सिवसासयं सोक्खं ॥ ९९८ ॥

तरुणत्तणंमि धम्मं जइहं न करेमि सिद्धिसुहगमणं । गहिओ जराए पच्छा डज्झिस्सं सोगअग्गीणं ॥ ९९९ ॥

गलगंडसमाणेसु सरीरछीरं तहा वहंतेसु । थणफोडएसु कावि हु हवइ रई मंसपिण्डेसु ॥ १००० ॥

तंबोलरसालित्ते भरिए च्चिअ दंतकीडयाण मुहे । केरिसया हवइ रई चुंबिज्जंते अहरचम्मे ॥ १००१ ॥

अंतो कयवरभरिए बाहिरमट्ठे सहावदुग्गंधे । को णाम करिज्ज रई जुवइसरीरे णरो मूढो ॥ १००२ ॥

सुरभोगेसु न तित्तो जीवो सुरवरविमानवासम्मि । सो कह अविअण्हमणो माणुसभोगेसु तिप्पिहिइ ॥ १००३ ॥

एवं भरतभूपस्य ध्यायतोऽसारसंसृतिम् । मनो विरागवद् ज्ञात्वा रामोऽवग् भरतं प्रति ॥ १००४ ॥

त्वत्पित्रा यद्ददे राज्यं तुभ्यं तद् वत्स ! साम्प्रतम् । कुरुष्व धर्मं विसन्धानो जिनोक्तं शिवसम्पदे ॥
उक्तंच-अम्ह पिअरेण जो विहु भरह ! तुमं ठाविओ महारज्जे । तं भुंजसु निस्सेसं वसुहं तिसमुद्दपेरंतं ॥
एयं सुदरिसणं तुह वसे य विज्जाहराहिवा सव्वे । अहयं धरेमि च्छत्तं मंतीव अ लक्खणो णिययं ॥ २ ॥
होइ तुहं सत्तुहणो चामरधारो भडा य संनिहिआ । बंधव ! करेहि रज्जं चिरकालं जाइओसि मया ॥
श्रुत्वेति भरतः प्राह यदुक्तं सोदर ! त्वया । तत् सर्वं मयका मौला-वधारि भक्तिपूर्वकम् ॥ १००७ ॥
भुक्ता पृथ्वी प्रजाऽरक्षि दत्तं दानं सुसाधवे । मयाऽतो मेऽधुना चेतो विरागमभवद् भृशम् ॥ १००८ ॥
अनुमन्यध्वमाशु त्वं दीक्षाग्रहणहेतवे । कुरुष्व(ष्वा) प्रतिबन्धं तु मम सम्प्रति सोदर ! ॥ १००९ ॥
※ यतः--जह इंधणेण अग्गी न तिप्पइ सायरो णइसएहि । तह जीवो वि न तिप्पइ महएसु वि कामभोगेसु ॥卐
※ अग्निर्विप्रो यमो राजा समुद्र उदरं गृहम् । सप्तैतानि न पूर्यन्ते पूर्यमाणानि नित्यशः ॥ २ ॥卐
प्रोक्त्वैवं स यदा वृत्त-ग्रहणायोत्थितो द्रुतम् । तदा रामेण संरुद्धः स्नेहेन व्याप्तचेतसा ॥ १०१० ॥
तदा सीता विशिल्या च भद्रा भानुमती रमा । सुभद्रेन्द्रमुखीरत्न-वती पद्मा सुकोमला ॥ १०११ ॥
चन्द्रकान्ता शुभानन्दा-मुख्या लक्ष्मणयोषितः । अन्या अपि वितन्वन्ति क्रीडां भरतसन्निधौ ॥ १०१२ ॥
भरतस्य प्रियाः सर्वाः समेत्य तत्क्षणात् तदा । रागमुत्पादयन्त्यः श्राक् तत्रैत्येति जगुस्तदा ॥ १०१३ ॥

उन्मत्ता सिन्धुरेन्द्रा रयजितपवना वीतयः स्यन्दनाश्च । लक्ष्मी रूपा युवत्यः सततकथितकृत् सेवकाश्चामरौघाः ॥
श्वेतं छत्रं च राज्यं बहुविभवयुतं भोगसौख्यं विहाय ।
दीक्षां भिक्षादिकष्टां भरत ! कथमिहालासि सद्योऽधुना त्वम् ॥ १०१५ ॥
भोगान् भुङ्क्ष्वाऽधुना पूर्व-पुण्यायातान् मनोहरान् । गृह्णीयाश्चरमे काले त्यक्त्वा भोगसुखं किल ॥ १०१६ ॥
इत आलानमुन्मूल्य कुम्भी त्रैलोक्यमण्डपात् । पातयन् भित्तिवृक्षादीन् समागाद्भरतान्तिके ॥ १०१७ ॥
तदा हाहारवं कुर्वन् लोकः सर्वो दिशोदिशम् । नष्टो हलिहरी तत्रा-जग्मतुस्त्वरितं स्फुटम् ॥ १०१८ ॥
बद्ध्वा कुंजरो नीय-मानोऽथ भरतादिभिः । पश्यन् पुनः पुनः दृग्भ्यां भरतं याति वर्त्मनि ॥ १०१९ ॥
आलानाह्वे दृढे स्तम्भे बद्धस्तैः कुञ्जरः स च । भरतं वीक्ष्य संप्राप जातिस्मृतिं स्वयं तदा ॥ १०२० ॥
विस्मेरनयनः कुम्भी भरताभिमुखो ध्रुवम् । स्थित्वाऽक्षिसलिलं मुञ्चन् नात्ति भिक्षां बुभुक्षितः ॥ १०२१ ॥
पुनः पुनर्गजो मुञ्च-न्नश्रूणि प्राग्भवं स्मरन् । मित्रंपूर्वभवोद्भूतं भरतं वीक्षते स्म स ॥ १०२२ ॥
सोमदिट्ठी संजुओ मित्तो बंभे सुरो पुरा आसि । चइऊण नरवरिंदो जाओ बलसत्तिसंपन्नो ॥ १०२३ ॥
हा ! कहं अहयं पुण निंदिअकम्मो तिरिक्खजोणीसु । कह हत्थि समुप्पन्नो विवेगरहिओ अनयकारी ॥
तम्हा करेमि संपइ तं कम्मं जेण सव्वदुक्खाइं । छेतूणं देवलोए भुंजामि जहिच्छिए भोगे ॥ १०२५ ॥

श्रीरामो लक्ष्मणः श्रीमान् भरतोऽपि परे जनाः । दध्युश्चेत् केवलीहैति तदा हस्तिमनो वदेत् ॥१०२६॥
इतस्तत्र पुरे देश-भूषणः कुलभूषणः । संयतौ द्वौ समायातौ विशुद्धचरणादरौ ॥१०२७॥
कुर्वाणयोस्तयोः शुक्लं ध्यानं पुण्यतमःक्षयात् । उत्पन्नं केवलज्ञानं लोकालोकप्रकाशकम् ॥१०२८॥
देवैर्विरचिते ज्ञान्यु-त्सवेऽथ देशभूषणः । दातुं यदोपदेशं तु लग्नो रैविष्टरस्थितः ॥१०२९॥
तदा पद्मः समायातं ज्ञानिनं भ्रातृसंयुतः । अग्रे कृत्वा गजं नन्तुं ज्ञानिपार्श्वे समीयिवान् ॥१०३०॥
प्रदक्षिणात्रयं दत्त्वा ज्ञानिनो राघवो मुदा । भ्रातृहस्तियुतो धर्मं श्रोतुमग्रे ह्युपाविशत् ॥१०३१॥
ततो भव्यावबोधाय केवली देशभूषणः । धर्मं जीवदयायुक्तं द्विधा प्राहेति विस्तरात् ॥१०३२॥
* तथाहि—पढमो गिहवासीणं सायारो णेगपज्जवो धम्मो । होइ निरायारो पुण णिग्गंथाणं जइवराणं ॥१॥卐
* धम्मो अ परमबंधू ताणं सरणं च होइ जीवस्स । धम्मो सुहाण मूलं धम्मो कामदुहा धेणु ॥२॥ इत्यादि卐
अथ लक्ष्मीधरोऽप्राक्षीद् भरतं प्रेक्ष्य कुम्भ्ययम् । मोदते मुञ्चते चाश्रु कथं तत् कथ्यतां गुरो ! ॥१०३३॥
देशभूषण आचष्ट प्राप्य जातिस्मृतिं गजः । भरतेक्षणतः पूर्वं भवं निन्दति साम्प्रतम् ॥१०३४॥
लक्ष्मणोऽवग् वदेदानीं कुम्भिपूर्वभवान् यते ! । ततो ज्ञानी जगौ पूर्व-भवाँस्तस्यैव दन्तिनः ॥१०३५॥
यदा श्रीवृषभो वृत्तं जग्राह सुरसाक्षिकम् । तदा कच्छमहाकच्छा-दयो वृषभसेवकाः ॥१०३६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चतुःसहस्रसङ्ख्याकाः संयमं प्रभुणा समम् । लात्वा तपःपराश्चेलु-र्ग्रामाद् ग्रामे पुरात् पुरे ॥ १०३७ ॥ युग्मम्

भिक्षामलभमानास्ते बुभुक्षाबाधिता भृशम् । षण्मासान्तः प्रभुं मुक्त्वा बभूवुस्तापसाः पुनः ॥ १०३८ ॥

तरुमूलफलाहाराः शश्वद्वल्कलधारिणः । जटाधरा निजछन्द-चारिणस्तापसाश्च ते ॥ १०३९ ॥

गत्वा मरुन्नदीकूले कुर्वाणाः स वनं पुनः । भिक्षां लान्तो गृहस्थेभ्यो निर्वाहं कुर्वते निजम् ॥ १०४० ॥ युग्मम्

उत्पन्ने स्वामिनो ज्ञाने मरीचिस्तापसः पुनः । व्रतं लात्वा पुनर्भग्नः संयमादजनिष्ट सः ॥ १०४१ ॥

तदा प्रल्हादनक्षोणी-पतेः पातो रमापुरीम् । सूते स्म श्रीप्रिया चन्द्रो-दयसूरोदयौ सुतौ ॥ १०४२ ॥

वैराग्यवासितस्वान्त-स्तदा चन्द्रोदयः सुतः । सूरोदययुतो दीक्षां जग्राह प्रभुणा समम् ॥ १०४३ ॥

भग्नौ वृत्तात् क्रमाच्छिष्यौ मारिचेश्च तपस्विनः । भूत्वा मृत्वा भवान् भूरीन् भ्रमतः स्म तपस्विनौ ॥ १०४४ ॥

अथ चन्द्रोदयो नाग पुरे हरिमतेः खलु । प्रल्हादनाप्रियाजातोऽभवत् कुलङ्करो नृपः ॥ १०४५ ॥

सूरोदयोपि तस्मिँस्तत्-पुरे विश्वभवात्मजः । विप्रोऽग्निकुण्डिका-जातो नाम्ना शुचिरतोऽजनि ॥ १०४६ ॥

कुलङ्करो नृपोन्येद्यु-स्तापसोपास्तये व्रजन् । अभिचन्द्रं मुनिं मार्गे वीक्ष्याऽनंसीद्यदा मुदा ॥ १०४७ ॥

तदा धर्म्माशिषं दत्त्वा ज्ञात्वा तं भद्रकात्मजम् । कुलङ्करं प्रति प्राह प्रबोधाय मुनीश्वरः ॥ १०४८ ॥

यत्र त्वं तापसं नन्तुं यासि तत्राऽस्ति दारु यत् । तन्मध्ये सर्परूपेण विद्यते ते पितामहः ॥ १०४९ ॥

For Private and Personal Use Only

तस्मिन् विदारिते काष्ठे गत्वा तत्र महीभुजः । दृष्टः सर्प्पस्ततोऽरक्षि तत्र तेन तपस्विना ॥ १०५० ॥
ततस्तं ज्ञानिनं सत्यं मत्वा भूयो यतेर्गिरा । लिलासुरभवद् वृत्तं कल्याणकमलाप्रदे(दं) ॥ १०५१ ॥
राज्ञो मुखादहिः सोऽपि स्मृत्वा पञ्चनमःकृतिम् । मृत्वा मरुद्गृहे देवो महर्द्धिः समजायत ॥ १०५२ ॥
पत्नी पुरोहिताऽऽसक्ताऽन्यदा कुलङ्करं प्रति । विषदानान्निनायाऽऽशु मृतिं क्रूरतराशया ॥ १०५३ ॥
मृतः कुलङ्करः क्ष्वेड-योगादार्त्तिपरस्तदा । शशकोऽभूत्ततो मोर-स्ततो नागस्ततो गजः ॥ १०५४ ॥
कुर्कुरो दर्दुरस्तस्माद् भवात् सर्प्पश्च दर्दुरः । अभूत् शुचिरतो मृत्वा गजः सूरोदयासुमान् ॥ १०५५ ॥
ततो मच्छोऽभवत् काक-भक्षितः कुर्कुटोऽजनि । ततः काकस्ततः कुम्भी तत ओतुस्ततो गजः ॥ १०५६ ॥
चन्द्रोदयासुमान् विप्रो भूत्वा स्नानेन भूरिशः । जीवान् हत्वाऽभवद् व्याघ्र-स्ततो मच्छोऽभवत् पुनः ॥
चतुर्योनिषु सम्प्राप्य भवान् भूरीन् नरादिषु । चन्द्रोद्रयासुमान् जातो विप्रः कमलपत्तने ॥ १०५८ ॥
तत्र प्राप्य वृषं जैनं कुर्वाणो वरभावतः । मृत्वा गत्वा दिवि च्युत्वा भरतोऽयमभून्नृपः ॥ १०५९ ॥
अकामनिर्जराकर्म तीव्रतपोयोगात् क्षयन् तप । कमलेपत्तने तस्मिन् विप्रस्य च स्यातित्वतं (?) । ॥४०८॥
सुहृत् प्रीतिपरो जातो जैनधर्मरतः पुनः ॥ युग्मम् ॥ १०६० ॥
मायया वञ्चयन् लोकान् धर्माज्जातः स निर्जरः । पूर्वोपार्जितपुण्येन सदैव सुखवानभूत् ॥ १०६१ ॥

मायोपार्जितपापस्यो-दयाद्विप्रासुमान् च्युतः । विन्ध्याटव्यामभूद्धस्ति हस्तिनीशतसेवितः ॥ १०६२ ॥
सूरोदयासुमान् भ्रान्त्वा भवेषु भूरिषु क्रमात् । विन्ध्याटव्यामभूद्धस्ति हस्तिनीशतसेवितः ॥ १०६३ ॥
बलिनं हस्तिनं दृष्ट्वा रावणो भूमिनायकः । आनिनाय निजावासे महामहःपुरस्सरम् ॥ १०६४ ॥
दशास्यस्तस्य भुवना-लङ्कारेत्यभिधां ददौ । अधुना लक्ष्मणावासे विद्यतेऽसौ मतङ्गजः ॥ १०६५ ॥
अधुना भरतं पूर्वभव-सोदरमेक्ष्य स । कुञ्जरो निन्दति स्वीयं भवं तिर्यग्भवं ध्रुवम् ॥ १०६६ ॥
यतश्चैतौ यतिचन्द्रो-दयसूरोदयाभिधौ । दीक्षां श्रीवृषभोपान्ते लात्वा प्रमादमीयतुः ॥ १०६७ ॥
अतो भूरिभवान् भ्रान्त्वाऽधुना भरतकुञ्जरौ । अभूतां भूपमातङ्ग-वंशभूषणकारकौ ॥ १०६८ ॥
अयं कुम्भ्यधुना वृत्तं लिलासुर्मुक्तिहेतवे । अशक्तो निन्दति स्वीयं भवं तिर्यग्भवोद्भवम् ॥ १०६९ ॥
यतः–भंतूण लोहखंभं एसो हु गओ बलेण संखुभिओ। भरहालोए सुमरिअ पुव्वभवं उवसमं पत्तो ॥ १०७० ॥
यतः–नाऊणं एवमेयं चवलतडियसमं सव्वसत्ताणजीयं, संजोगाविप्पओगा पुणरवि बहवो हौंति संबंधिबंधा ।
संसारं दुखसारं परिभमिय चिरं माणुसत्तं लहेउं, तुज्झेत्थं धम्मकज्जं कुणह सुविमलं बुद्धिमन्ताऽपमत्ता ॥
एवं ज्ञानी वचः श्रुत्वा भरतादिमहीभुजः । बहवः संयमं लातुकामा जाता शिवाप्तये ॥ १०७२ ॥
तत उत्थाय भरतः कृताञ्जलिर्जगावदः । भग्नोऽहं भवदुःखेभ्यो भ्रामं भ्रामं भवान् बहून् ॥ १०७३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दीक्षातरणिदानेन महान्तं भववारिधिम् । उत्तारय ऽऽशु मां ज्ञानिन् ! कर्माष्टकंर्म्मिनाशये ॥ १०७४ ॥
विहाय तृणवद्राज्यं त्यक्तनिःशेषभूषणः । सहस्रभूपयुग् दीक्षां भरतोऽलाद् गुरोः पुरः ॥ १०७५ ॥
साधु साध्विति गीर्वाण जल्पन्तो गगनाङ्गणात् । पुष्पवृष्टिं व्यधुस्तेषां यतीनां मस्तकोपरि ॥ १०७६ ॥
अन्ये तु बहवो भूपाः श्राद्धधर्म्मं दयामयम् । अङ्गीचक्रुस्तथाऽन्येपि लोका मुदितमानसाः ॥ १०७७ ॥
इतो भरतमवाप्त-संयमं वीक्ष्य कैकयी । मूर्च्छया न्यपतद् भूमौ सूनोर्वियोगदुःखिता ॥ १०७८ ॥
क्षणात् समुत्थिता राज्ञी कैकयी ज्ञानिना तदा । प्रोक्ता किं क्रियते शोकः सूनोर्वियोगजस्त्वया ॥ १०७९ ॥
अनन्ता नन्दना जाता अनन्तेषु भवेष्वहो । तेषां वियोग आसीत्ते शोकोऽतः क्रियते कथम् ॥ १०८० ॥
* यत उक्तं च–" माता पितृसहस्राणि पुत्रदारशतानि च । संसारेऽत्र व्यतीतानि कस्याऽहं कस्य बान्धवाः ॥ 卐
अहं तात ! त्वया जातो मया त्वं च सहस्रशः । सुत एव पिता जातस्तातमायाविमोहितः ॥ १०८२ ॥
संसारे विविधैर्भेदैः मया दृष्टा सहस्रशः । मातरः पितरः पुत्रा बान्धवाश्चैते कोटिशः ॥ १०८३ ॥
आगतोऽहं गतश्चाहं नानायोनिशतेष्वपि । भ्रान्तोऽहं सुचिरं तत्र यन्त्रबद्धघटीनिभः ॥ १०८४ ॥
एवं तवाऽस्य पुत्रस्या-न्यस्यापि देहिनः पुनः । पुत्रपौत्रादिसम्बन्धा बभूवुर्बहुशः खलु ॥ १०८५ ॥
अथ संवेगमापन्ना कैकयी संसृतिं तदा । निन्दन्ती मन्यते देह-पुत्रादि फल्गु तत्क्षणात् ॥ १०८६ ॥

For Private and Personal Use Only

ततः स्त्रीणां सहस्रैश्च संयुता कैकयी मुदा । संयत्याः सन्निधौ दीक्षां लात्वा प्रापुः शिवश्रियम् ॥ १०८७ ॥
मुनिपार्श्वे स मातङ्गः प्रव्रज्य विरतिं तदा । षष्ठाष्टमादि कुरुते तपस्तीव्रं निरन्तरम् ॥ १०८८ ॥
पारणे शुष्कपत्रादि प्रासुकं भक्षयन् गजः । चत्वारि हायनान्येव तपः षष्ठादि स व्यधात् ॥ १०८९ ॥
कृत्वा संलेखनां प्रान्ते मृत्वा स कुञ्जरः क्रमात् । ब्रह्मस्वर्गे गतः सौख्यं भुङ्क्तेस्म समयं बहु ॥ १०९० ॥
ततश्च्युतो गजो देवः सम्प्राप्य मानुषं भवम् । सर्वकर्म्मक्षयान्मुक्ति-सातमासादयिष्यति ॥ १०९१ ॥
सुमेरुवत् स्थिरो धीरो विहरन् भरतो भुवि । समशत्रुसुहृद्भावो-ऽसातसातसमाशयः ॥ १०९२ ॥
भरतस्तीव्रतपसा क्षिप्त्वा शेषतमश्चयम् । सम्प्राप्य केवलज्ञानं सिद्धाद्रौ शिवमाप्तवान् ॥ १०९३ ॥
भरतेन समं ये तु सिद्धार्थरतिवर्द्धनौ । घनवाहमुखा भूपा-स्तेऽपि केचिच्छिवं ययुः ॥ १०९४ ॥
केचित् स्वर्गे तृतीये तु केचित् तुर्ये च पञ्चमे । केचित् सर्वार्थसिद्धे च विमाने समुपागमन् ॥ १०९५ ॥
तेऽपि वाचंयमाः स्वर्गाच्च्युत्वाऽऽप्य मानुषं भवम् । क्षिप्त्वा कर्माखिलं मुक्ति-पुरीं यास्यन्ति हेलया ॥
भरतस्य वियोगेन लक्ष्मणो दुःखितो हृदि । यावदासीत्तदाऽऽगत्य विराधः सेवको जगौ ॥ १०९७ ॥
भरतोऽखिलकर्म्मौघं क्षिप्त्वा गत्वा शिवाचले । ययौ मुक्तिपुरीं हर्ष मागमल्लक्ष्मणो भृशम् ॥ १०९८ ॥
रामोऽथ भूपतीन् भूरी-नाकार्य रुचिरोत्सवम् । अभ्यषिञ्चत् तदा राज्ये लक्ष्मणं चक्रधारिणम् ॥ १०९९ ॥

विभीषणं त्रिकूटे तु सुग्रीवं वानराधिपम् । किष्किन्धायां मरुत्पुत्रं श्रीपुरे श्रीगिरिस्थिते ॥ ११०० ॥
नीलं रक्षःपुरे वर्ये प्रतिसूरं हनूरुहे । चन्द्रोदरं च पाताल-लङ्कायां न्यविशन्मुदा ॥ ११०१ ॥ त्रिभिर्विशेषकम्
वैताढ्ये दक्षिणश्रेण्यां नगरे रथनूपुरे । भामण्डलो भुनक्ति स्म भूरिविद्याधराश्रितः ॥ ११०२ ॥
अथ रामो जगौ भ्रातुः शत्रुघ्नस्य पुरस्त्विति । रोचते या पुरी चित्तेऽयोध्या तव साम्प्रतम् ॥ ११०३ ॥
त्वं सम्मार्गय शत्रुघ्न ! राज्यरीतिसुहेतवे । अयोध्यां वा गृहाण त्वं पैतृकीं नगरीं वराम् ॥ ११०४ ॥
अथ शत्रुघ्न आचष्ट रामं प्रति कृताञ्जलिः । मथुरां नगरीं मह्यं विश्राणय प्रसद्य तु ॥ ११०५ ॥
रामोऽवग् मथुरापुर्यां मधुराजा बलोत्कटः । जामाता दशवक्त्रस्य चमर-प्रत्तशूलभृत् ॥ ११०६ ॥
तस्य हस्ते त्रिशूलं यद् विद्यते ज्वलनद्युति । तन्मुक्तं विद्विषां शीर्ष-सहस्रं द्युति हेलया ॥ ११०७ ॥
अतः स दुःशको भूपो मधुः सुरसदामपि । बलवन्तो भटा लक्ष-मितास्तं संश्रिताः किल ॥ ११०८ ॥
पालयन् पृथिवीं न्याया-न्नैव केनापि जिप्यते । ततः कथं पुरी सा तु तुभ्यं प्रदास्यतेऽधुना ? ॥ ११०९ ॥
शत्रुघ्नोऽवगहं जित्वा मधुभूपं बलोत्कटम् । राज्यं लास्यामि मह्यं तु त्वमादेशं प्रदेहि हि ॥ १११० ॥
रामस्याऽऽदेशमादाय शत्रुघ्नो वैरिणं प्रति । जेतुं चचाल यावच्च तावन्माता जगाविति ॥ ११११ ॥
पुत्र ! सोऽस्ति बली वैरी सन्तोषं कुर्वतस्त्वकम् । शत्रुघ्नोऽवग् जिना मह्यं राज्यं दास्यन्ति निश्चितम् ॥ १११२ ॥

यतः–तिलोक्कमंगला वि हु असुरसुरणमंसिआ भयविमुक्का । ते दिंतु मंगलं मम जिअभावरिउबला सव्वे ॥
रामोऽवक् छलतो वैरी जिप्यते न बलेन च । यतश्छली स विद्यते विद्याशस्त्रादिभिर्भृशम् ॥ १११४ ॥
ततो जिनालये गत्वा प्रणम्य वृषभं जिनम् । शत्रुघ्नः सबलोऽचाली-ज्जेतुं शत्रुं शुभेऽहनि ॥ १११५ ॥
समेत्य मथुरोपान्ते शत्रुघ्नो यावता स्थितः । तावन्मन्त्री जगौ दुष्टो दुर्जयो विद्यते मधुः ॥ १११६ ॥
अतिवीर्यश्च गन्धारो वरवीर्यो महीपतिः । मधुना विजितः पूर्वं शूलं च धरता करे ॥ १११७ ॥
इतोऽन्यः सुभटोऽभ्येत्य जगौ शत्रुघ्नं साम्प्रतम् । मथुराया बहिर्भीमो-द्यानेऽस्ति मधुभूपतिः ॥ १११८ ॥
नर्त्तकीपार्श्वतो नृत्यं कारयन् मधुभूपतिः । न वेत्त्यस्तमितं सूर्य-मुद्गतं च विलोकयन् ॥ १११९ ॥
येन शूलेन मधुना जिप्यन्ते वैरिणः खलु । तदस्त्रं विद्यते गेहे पुर्यन्तः तत्र गम्यते ॥ ११२० ॥
श्रुत्वेति नगरद्वारं भंक्त्वा शत्रुघ्नभूपतिः । प्रविश्य मथुरामध्ये जयढक्कामवादयत् ॥ ११२१ ॥
जयढक्कारवं श्रुत्वा प्रविष्टं वैरिणं पुरि । ज्ञात्वा मधू रणं कर्त्तु समागान्मथुरामुखे ॥ ११२२ ॥
शूलरिक्तो मधुर्युद्धयन् बलिष्ठोऽपि रणाङ्गणे । वेष्टितः परितोऽत्यन्तं शत्रुघ्नेन महीभुजा ॥ ११२३ ॥
तदा मधुसुतोऽतीव बलिष्ठो लवणाभिधः । युद्धं कुर्वन् हतो मृत्यु-मगात् शत्रुघ्नभूभुजा ॥ ११२४ ॥
दृष्ट्वा हतं सुतं क्रोध-वह्निना ज्वलितो मधुः । उत्थितो यमवद् युद्धं कुर्वन् सार्द्धं च शत्रुणा ॥ ११२५ ॥

त्रिशूलरहितोऽप्येष मधुर्महाबलो नृपः । शत्रुघ्नेन समं युद्धं मासमेकं व्यधात्तदा ॥ ११२६ ॥
आगतं मरणं दृष्ट्वा पुत्रशोकसमाकुलः । मधुर्दध्यौ मया पूर्वं किं लले न हि संयमः ॥ ११२७ ॥
यतः—"मरणं णाऊण धुवं कुसुमसमं जोव्वणं चला रिद्धि ।
अवसेण मए तइया ण कओ धम्मो पमाएणं ॥ १ ॥
पज्जलियम्मि वि भवणे कूवतलायस्स खणणमारंभो । अहिणा दट्ठस्स जए को कालो मन्तजवणस्स ॥ २ ॥
तम्हा पुरिसेण जए अप्पहिअं निययमेव कायव्वं । मरणम्मि समावडीए संपइ समरामि अरहंतं ॥ ३ ॥
अरहन्ते सिद्धे चिअ साहू तह केवलीय धम्मो य । एए हवंति निययं चत्तारि वि मंगलं मज्झ ॥ ४ ॥
एगो जायइ जीवो इक्को उप्पज्जइ भमइ इक्को । सो चेव मरइ इक्को इक्को च्चिअ पावए सिद्धिं ॥ ५ ॥
ध्यात्वेति त्यक्तशस्त्रादि-मधुर्लुञ्चितमस्तकः । सर्वसावद्यविरति-मुच्चचार स्वयं तदा ॥ ११२८ ॥
तत्रैत्य निर्जरा व्योम्नि मधुसंयतमस्तके । व्यधुः कुसुमवृष्टिं तु देववाद्यपुरस्सरम् ॥ ११२९ ॥
शत्रुघ्नेन ततस्तत्रा-भ्येत्य तस्य पदोस्तले । पतित्वा क्षमितो मिथ्या-दुष्कृतस्य प्रदानतः ॥ ११३० ॥
त्वं मधो ! भाग्यवानेव यतो राज्यं तृणवत्तदा । त्यक्त्वाऽऽदाः संयमं मुक्ति-सुखसंततिदायकम् ॥ ११३१ ॥
अहं तु परराज्येप्सु-रस्मि दुष्टमना भृशम् । मम श्वभ्रं विनाऽन्यत्र गतिर्नान्या भविष्यति ॥ ११३२ ॥

For Private and Personal Use Only

धर्म्मध्यानपरोऽत्यन्तं मधुः साधुशिरोमणिः । तृतीये ताविषे देवो-ऽजनि भासुरविग्रहः ॥ ११३३ ॥
आराध्य चमरं शूलं शत्रुघ्नो लसदुत्सवम् । हस्ते जग्राह चक्रीव चक्रं भासुरदीप्तिमत् ॥ ११३४ ॥
जित्वा मधुं तु शत्रुघ्नो मथुरामात्मसात्पुनः । कृत्वाऽयोध्यापुरीमैत्या-नंसीद्रामादिसोदरम् ॥ ११३५ ॥
रामोऽपि नगरे तत्र गत्वा राज्याभिषेचनम् । शत्रुघ्नस्यं व्यधान्नाना-महोत्सवपुरस्सरम् ॥ ११३६ ॥
अन्येद्युर्ज्ञानिनं नत्वा श्रुत्वा धर्म्मं जिनोदितम् । रामोऽप्राक्षीत् कथं भूरि-पुरेषु प्रवरेष्वपि ॥ ११३७ ॥
याचिता मथुरा भ्रात्रा शत्रुघ्नेन निगद्यताम् । ततो ज्ञान्यभणद् राम ! श्रूयतां यत् त्वयोदितम् ॥ ११३८ ॥
मथुरायां तु जवण-देवो धनप्रियो वणिग् । वसन् धर्म्ममकुर्वाणो मृत्वाऽथ वायसोऽजनि ॥ ११३९ ॥
वायसोऽपि मृतो जातो महिषो मथुरापुरि । ततोऽभूद् गवलस्तस्माद् गत्वा महिषोऽन्तरा ॥ ११४० ॥
कर्मौघशमनाज्जातो दारिद्री मनुजः पुनः । विप्रो यतिपदाम्भोजं सेवते स्म निरंतरम् ॥ ११४१ ॥
तस्यैव नगरस्येशे शङ्किते दूरतो गते । महादेवी प्रियाऽऽसक्ता तस्मिन् विप्रेऽभवद् भृशम् ॥ ११४२ ॥
अकस्मान्नृपतौ तस्मिन् समायाते निजालये । भीता पत्नी जगावेष तस्करोऽयमिहागतः ॥ ११४३ ॥
स्तेनं कृत्वा नृपो धृत्वा तमचालयदञ्जसा । वधाय बहिरुद्याने तत्र साधुः समागमत् ॥ ११४४ ॥
साधुना मोचितो दीक्षां लात्वा विप्रस्तपःपरः । मृत्वा प्रान्ते सुरो दिव्य-तनुर्जातः सुरालये ॥ ११४५ ॥

For Private and Personal Use Only

जीवो जवणदेवस्य भुक्त्वा तत्र सुखं चिरम् । च्युत्वाऽभून्मथुरापुर्यां महेभ्यो धनदाभिधः ॥ ११४६ ॥
एवं जवणदेवस्य जीवो भूरि-भवान् क्रमात् । उत्पन्नो मथुरापुर्यां नरनारीभवादिभिः ॥ ११४७ ॥
इतश्च मथुरापुर्यां चन्द्रभद्रमहीपतेः । पत्न्यस्तिस्रोऽभवन् वर्या लक्ष्मी-पद्मा-रमाभिधाः ॥ ११४८ ॥
आद्यपत्न्याः सुतः सूरः शूरतुल्यपराक्रमः । वभूव क्रमतो मार-रूपः स्वीयतनुत्विषा ॥ ११४९ ॥
द्वितीयाऽसूत पुत्रौ तु रामभीमाभिधानतः । क्रमेण भवतां रूप-पराभूतरमाभवौ ॥ ११५० ॥
तृतीयस्या अभूत् पुत्रो धनदस्यासुमान् पुनः । तस्यासीदचलेत्याह्वा चारूत्सवपुरस्सरम् ॥ ११५१ ॥
इतो मृगाङ्कनगरे मङ्गिकाया सुतोऽभवत् । अङ्कनामा लसद्रूपः पूर्वपुण्यशुभोदयात् ॥ ११५२ ॥
क्रमादविनयीभूतो जनकेनाथ ताडितः । अङ्को देशान्तरे ग्रामे ग्रामे बभ्राम सन्ततम् ॥ ११५३ ॥
सपत्नीतनयैः क्ष्वेड–दानाद् भूपप्रियोऽपि च । हन्यमानोऽचलच्छन्नं प्रविष्टो दिवसात्यये ॥ ११५४ ॥
कङ्कटकेनाऽथ विद्धाङ्घ्रि-रशक्तश्चलितुं वने । अचलो वीक्षितोऽङ्केन गच्छतेन्धनमौलिना ॥ ११५५ ॥
उत्तार्येन्धनभारं स कण्टकं चाचलाङ्घ्रितः । उच्चकर्ष यदा तं प्रतीत्यचलस्तदा ॥ ११५६ ॥
ततोऽचलो जगादाङ्कं प्रत्येवं यदि चेन्मम । राज्यं भात्रि तदा तत्रा-गन्तव्यं भवताऽङ्कक ! ॥ ११५७ ॥
अचलेनेति गदिते श्रावस्त्यामङ्क ईयिवान् । अचलोऽपि कोशाम्ब्या-मुद्याने समुपेयिवान् ॥ ११५८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कोशाम्बीशस्तदैवेन्द्र-दत्तः खरुलिका-गतः । धनुर्विद्याविदं-ज्ञात्वा-चल हृष्टोऽभवन्नृपः ॥ ११५९ ॥
विश्राणितेन्द्रदत्तेन मित्रदत्ता स्वनन्दिनी । अचलाय ततो राज्यं नृपोऽदाद् रुचिरोत्सवम् ॥ ११६० ॥
अङ्गादि-विषयान् जित्वा भूरीभाश्वनृसंयुतः । मथुरासन्निधौ प्राप्तोऽचलो विग्रहहेतवे ॥ ११६१ ॥
धनप्रदानतः सर्वान् पुत्रादिनृपसेवकान् । वशीकृतान् द्विषाऽनेन चन्द्रभद्रो विवेद च ॥ ११६२ ॥
ततः सन्धिकृते राजा समुद्रं निजशालकम् । अचलस्यान्तिके प्रैषीद् ददर्श सोऽचलं तदा ॥ ११६३ ॥
वितीर्य प्राभृतं तस्मै पश्चादेत्य स शालकः । अचलागमनं भूमी-पतेरग्रे न्यवेदयत् ॥ ११६४ ॥
ततो राजा बलिष्ठं तं पुत्रं ज्ञात्वाऽथ सम्मुखम् । यावद् याति सुतस्तावत् पितुः पादौ ननाम सः ॥ ११६५ ॥
अचलाय निजे राज्ये वितीर्णे भूभुजा तदा । पुत्राद्या निखिला भृत्या अचलं नेमुरादरात् ॥ ११६६ ॥
चन्द्रभद्रो व्रतं लात्वा तीव्रं तप्त्वा तपश्चिरम् । सिद्धक्ष्माधरे मुक्तिं ययौ सर्वतमःक्षयात् ॥ ११६७ ॥
अङ्काय मिलितायाऽथा-चलेन प्रीतिसंजुषा । श्रावस्तीनगरीराज्यं दत्तं सम्मानपूर्वकम् ॥ ११६८ ॥
कृत्वा राज्यं चिरं स्वीय-सूनवेऽचलभूपतिः । अङ्कयुक्तो ललौ दीक्षां समुद्रमुनिसन्निधौ ॥ ११६९ ॥
अचलाङ्कौ यती तप्त्वा तपः स्वर्गे गतौ सकौ । भुञ्जाते स्वर्गजं सौख्यं देवीदिव्यसमन्वितौ ॥ ११७० ॥
अचलो निर्जरः स्वर्गाच्च्युतश्च कैकयीसुतः । शत्रुघ्नोऽभूद्दशरथ नन्दनो-विश्वनन्दनः ॥ ११७१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शत्रुघ्नस्य पुरा भूरि-भवेषु मथुरापुरि । जन्माऽभवद्रतिस्तेना-धुनाऽस्यैव तु सन्ततम् ॥ ११७२ ॥
यतः—" गेहस्स तरुवरस्स छायाए जस्स एक्कमवि दियहं । परिवसइ तत्थ जायइ जीवस्स रई सहावेण ॥ १ ॥
किं पुण जत्थ वहुभवे जीवेण संगइ कया ठाणे । जायइ तत्थ बाढं रई अ जीवाण निच्चम्मि ॥ २ ॥ "
अथ सोऽङ्कसुरः स्वर्गात् च्युतो हलधरस्य तु । कृतान्तवदनो नाम्ना सेनानीः समजायत ॥ ११७३ ॥
श्रुत्वेति ज्ञानिनो वाणीं रामाद्याः सोदराः समे । विशेषतो जिनेन्द्रोक्तं धर्म्मं वितेनिरेतराम् ॥ ११७४ ॥
मधोस्त्रिशूलमादत्तं शत्रुघ्नेनावगत्य च । चमरो मथुरापुर्यां चक्रे मारिं जनेऽखिले ॥ ११७५ ॥
ततः शत्रुघ्न उर्वीशो ज्ञात्वा शून्यां पुरीं च तां । अयोध्यायां समेत्यास्थात् पार्श्वे रामस्य भूपतेः ॥ ११७६ ॥
इतो वर्षा-ऋतौ पूर्याः मथुराया बहिर्वने । सप्तर्षयश्चतुर्मासीं स्थितास्तपःपरायणाः ॥ ११७७ ॥
तेषां तपःप्रभावेण मारिर्नष्टा गता क्वचित् । ततो रोगोपशान्तिश्च जाता तत्रैव पत्तने ॥ ११७८ ॥
ततस्तेषां सुतपसः मारि नष्टामवेत्य च । शत्रुघ्नो भूपतिस्तत्र समेत्य तान् ननाम च ॥ ११७९ ॥
तेषामुपदेशतो मारि-शान्तये स महीपतिः । पूजां शान्तिजिनेशस्य चकारोत्सवपूर्वकम् ॥ ११८० ॥
मथुरायां चतुर्द्वार-देशेषु जिनपालयान् । कारयित्वा जिनाधीशान् द्वासप्ततिमतिष्ठपत् ॥ ११८१ ॥
ततश्च सप्ततिशतं जिनानां जिनसद्मसु । चतुर्षु स्थापयामास शत्रुघ्नो विघ्नशान्तये ॥ ११८२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सप्तर्षिप्रतिमा स्थाने स्थाने भूपः पुरान्तरे । न्यवीविशत् तदा रोग-शान्तये स महीपतिः ॥ ११८३ ॥
शत्रुघ्नेन ततो नीता नगरी सा महत्तमा । अर्हन्महेभ्यसद्माली-शालिता वप्रशालिता ॥ ११८४ ॥
उक्तंच शत्रुघ्नेन—" अज्जपभिइं च इहं जिणपडिमा जस्स णत्थि णिययघरे ।
तं णिच्छएण मारी मरीहति मयं व जह वग्घी ॥ १ ॥
अंगुट्ठपमाणावि हु जिणपडिमा जस्स होही घरम्मि । तस्स भवणाउ मारी णासिहिति लहुँ ण संदेहो ॥ २ ॥"
शत्रुघ्नो भूरिसङ्घेन सहितः सिद्धपर्वते । यात्रां व्यधाज्जिनेन्द्रार्चा-स्नात्रपूजादि-कृत्यतः ॥ ११८५ ॥
अर्हतां जन्मदीक्षादिस्थानेषु सङ्घसंयुतः । शत्रुघ्नो विदधे यात्रां सम्मेतशिखरे पुनः ॥ ११८६ ॥
ततः—" निक्खमणनाणनिव्वाणजम्मभूमीओ वंदइ जिणाणं ।
नय वसइ साहुविरहिअम्मि देसे बहुगुणेवि ॥ १ ॥
चक्रं छत्रं धनुः शक्तिः गदा मणिरसिः पुनः । सप्तैतानि क्रमाल्लक्ष्मी-भृतोऽभूवन् शुभोदयात् ॥ ११८७ ॥
सहस्राणि षोडश स्त्रीणां लसत्तमकुलोद्भवाम् । लक्ष्मणस्याभवन्नष्टौ पट्टराज्ञ्यः प्रिया वराः ॥ ११८८ ॥
यतः—" तुंग कुल-जाइयाणं उत्तम गुण-रूव-जोव्वणधराणं ।
दस-छच्चेव सहस्सा रामकणिट्ठस्स महिलाणं ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अट्ठमहादेवीओ सव्वाओ वि ताण उत्तमगुणाओ ॥ २ ॥"

सहस्राण्यष्ट गेहिन्यो रामस्य क्रमतोऽभवन् । पट्टराज्यश्चतस्रश्च महादेव्यादयः पुनः ॥ ११८९ ॥

उक्तंच–पढमा उ महादेवी सीया बीआ पभावई भणिया । तइआ चेव रइणिहा सिरिदामा अंतिमा भवइ ॥ ११९० ॥

लक्ष्मणस्य सुताः सार्द्ध–द्विशतप्रमिता मताः । वृषभो धरणश्चन्द्रः सोदराश्च मनोहराः ॥ ११९१ ॥

बद्धमौलिनृपाणां तु सहस्राणि च षोडश । तेषां कोटिः सुताः सार्द्धा–श्चत्वारो रूपशालिनः ॥ ११९२ ॥

अन्यदा सीतया प्रोक्तमेवं दाशरथेः पुरः । पस्फार दक्षिणं नेत्र–मनिष्टस्य प्रदं कथम् ? ॥ ११९३ ॥

साहइ विप्फुरंतं इट्ठं पुरिसस्स दाहिणं नयणं । ता वामं चिअ फुसि(रि)अं सहसत्ति विलोअणं तस्स ॥ ११९४ ॥

ततो रामो जगौ पत्नि ! दुःखं कार्यं त्वया न हि । मयि जीवति कस्ते स्या–दुःखकर्त्ता नरः सुरः ॥ ११९५ ॥

अर्हत्सद्मसु सार्वाणां कुरु पूजां सुमैर्वरैः । अन्यैरपि सखीलोकैः कारय त्वं निरन्तरम् ॥ ११९६ ॥

जिनानां पुरतो दीपं कुरुष्व संयतोत्तमान् । प्रतिलाभय सत्श्राद्धान् भोजय स्वन्नदानतः ॥ ११९७ ॥

श्रुत्वेति सीतया सार्व–पूजां कुर्वाणयादरात् । अन्येऽपि स्वसखीलोका कारिता श्रीजिनार्चना ॥ ११९८ ॥

यतः—"सीया विय जिणपूयं करेइ तवणिअमसंजमुज्जुत्ता ।

ताव य पया समत्था कुणंति पूअं जिणिंदाणं ॥ १ ॥"

For Private and Personal Use Only

इतो रामो व्रजन् मार्गे तिष्ठंश्च संसदि स्फुटम् । जनानामिति वाक्यानि सुश्राव प्रतिवासरम् ॥ ११९९ ॥
चिरकालं स्थिता सीता रावणस्य निकेतने । तेन शीलं न जानक्या पालितं भावि तत्र च ॥ १२०० ॥
सीतामेवंविधां दुष्ट-कलङ्कसहितां किल । यदि रामो रक्षति स्वीय-गेहे मुदितमानसः ॥ १२०१ ॥
तदा कस्य वितीर्येत दोषः सामान्यनुः पुनः । अतो नो रक्षितुं युक्तं जानक्या निजसद्मनि ॥ १२०२ ॥
यतः—"जंपइ पुणो पुणो चिअ जह सीआ रक्खसाग णाहेणं ।
हरिऊण य परिभुत्ता इहाणीआ तहवि रामेणं ॥ १२०३ ॥
उज्जाणेसु घरेसु य तलाव—वावीसु जणवओ सामी । सीया अववायकहं मोत्तूणं ण जंपए अण्णं ॥ १२०४ ॥
दसरहणिवस्स पुत्तो रामो तिसमुद्दमेइणीणाहो । लंकाहिवेण हरियं कह पुण आणेइ जणयसुयं ? ॥ १२०५ ॥
एवं वचस्तदा श्रुत्वा रामो हतमनास्तदा । वज्राहत इवातीव दुःखितोऽजनि चेतसि ॥ १२०६ ॥
यस्याः कृते मया पापं भूरि-जीववधात्मकम् । कृतं बाढं मुधा तस्मात् श्वभ्रेऽहं पातमाप्तवान् ॥ १२०७ ॥
दुःखमूलं भवेन्नारी नरकस्य नृणां खलु । यस्या मोहेन दुःखानि लभतेऽङ्गी पदे पदे ॥ १२०८ ॥
उक्तं च—"धण्णा ते वरपुरिसा जे च्चिअ मोत्तूण निययजुवईओ ।
पव्वइआ कयनियमा सिवमयलमणुत्तरं पत्ता ॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रामस्य मानसं दूनं दृष्ट्वाऽवग् लक्ष्मणस्तदा । मेरुचूलेव सीताऽस्ति निश्चला शीलपालने ॥ १२०९ ॥
वारितो लक्ष्मणेनापि राघवः प्रोक्तवानिति । सीता चेत्त्यज्यते साधु-वाद एव तदा भवेत् ॥ १२१० ॥
कलङ्किताऽथ सीता चे-द्रक्ष्यते स्वीयसद्मनि । तदा कलङ्क आत्मीय-देशे भवति निश्चितम् ॥ १२११ ॥
ततो दाशरथश्छन्नं भृत्यं कृतान्तनामकम् । आकार्याऽवग् रथारूढां कृत्वा जनकनन्दिनीम् ॥ १२१२ ॥
गङ्गायाः पुरतः कूले गत्वा त्यक्त्वाऽधुना द्रुतम् । आगम्यं भवताऽत्रैव निर्विचारं त्वमेककः ॥ १२१३ ॥
ततोऽष्टापदसर्वज्ञ-वन्दनाछलतस्तदा । कृत्वा सीतां रथारूढां कृतान्तश्चलितो निशि ॥ १२१४ ॥
अन्यस्यां दिशि गच्छन् स कृतान्तः सीतयोदितः । भ्रातस्त्वं कथमन्यस्यां दिशि यासि निगद्यताम् ? ॥ १२१५ ॥
कृतान्तोऽवक् तव प्राण-प्रियेणोचे ममाऽग्रतः । सीतां कलङ्किनीं गङ्गा—वरकूले त्यजाऽचिरात् ॥ १२१६ ॥
ततो जनकनन्दिन्या ध्यातं मे रमणोऽधुना । दैवेन प्रेरितो गङ्गा-कूले त्याजयति ध्रुवम् ॥ १२१७ ॥
उत्तीर्य तु नदीकूलं सीतां तत्र त्यजन् वने । दध्यावहमधन्योऽस्मि यतोऽभूवं हि किङ्करः ॥ १२१८ ॥
यतः—“ णिअइट्ठवज्जिअस्स उ अहिअं दुक्खेक्क तग्गय मणस्स ।
भिच्चस्स जीवियाओ कुक्कुरजीयं वरं हवइ ॥ १ ॥
परघरलद्धाहारो साणो होऊण वसइ सच्छंदो । भिच्चो परव्वसो पुण विक्किअदेहो निअयकालं ॥ २ ॥

For Private and Personal Use Only

भिच्चस्स णरवइणं दिन्नादेसस्स पावणिरयस्स । न य हवइ अकरणिज्जं णिंदियकम्मंपि जं लोए ॥ ३ ॥
पुरिसत्तणम्मि सरिसे जं आणा कुणइ सामिसालस्स । तं सव्वं पच्चक्खं दीसइ अ फलं अहम्मस्स ॥ ४ ॥
धिद्धी अहो अकज्जं जं पुरिसा इंदिएसु आसत्ता । कुव्वंति अह भिच्चत्तं ण कुणंति सुहालयं धम्मं ॥ ५ ॥"
सीता प्राह कृतान्त ! त्वं मे पत्युः पुरतस्त्वया । वक्तव्यं च प्रसद्यैव मयि दुष्टतमोजुषि ॥ १२१९ ॥
अहं पूर्वकृतं कर्म्म दुष्टं भोक्ष्ये वनस्थिता । त्वया जिनोदितो धर्मो न मोक्तव्यः शिवप्रदः ॥ १२२० ॥
यत–" रयणं पाणितलाओ कह वि पमाएण सायरे पडियं । केण उवाएण पुणो तं लब्भइ मग्गमाणेहिं ॥ १ ॥
पक्खिविऊण य कूवे अमयफलं दारुणे तमंधारे । जह पडिवज्जइ दुक्खं पच्छायावाहओ बालो ॥ २ ॥"
आकर्ण्यैतद्वचः सीतां विमुच्य तत्र कानने । कृतान्तश्चलितः पश्चा-न्नत्वा सीतापदाम्बुजम् ॥ १२२१ ॥
सीता तत्र स्थिताऽत्यन्तं दुःखिनी करुणस्वरम् । रुदन्तीति जगौ कान्त ! कथं त्यक्तास्म्यहं वने ? ॥१२२२॥
यतः—" हा पउम नाह सत्तम ! हा विहलिअजणसुवच्छल गुणोह ।
सामिय भयदुआए किं ण महं दरिसणं देहि ॥ १ ॥
तुह दोसस्स महाजस ! थेवस्स वि णत्थि एत्थ संबंधो । अइदारुणाण सामिअ मह दोसो पुव्वकम्माणं ॥ २ ॥"
किमत्र कुरुते तातः किं पतिः किं च बान्धवः । दुःखं पूर्वार्जितं चेव भोक्तव्यं मयका किल ॥ १२२३ ॥

शत्रुञ्जय कल्पवृ० ॥ ४२४ ॥

यतः—" नूणं अवन्नवायं लोए अणुट्ठियं मए पुव्वं । घोराटवीए मज्झे पत्ता जेणेरिसं दुक्खं ॥ १ ॥
अहवा वि य अन्नजम्मे [illegible] [illegible] मए पुणो [illegible] । तस्सोदएण एयं दुःखं अइदारुणं जायं ॥ २ ॥
किं वावि कमलसंडे विओइयं हंसजुअलयंपुव्वं । अइणिग्घिणाए संपइ तस्स फलं चेव भोत्तव्वं ॥ ३ ॥
अहवा वि मए समणा दुगंछिया परभवे अपुन्नाए । तस्स इमं अणुसरिसं भुंजेयव्वं महादुक्खं ॥ ४ ॥"
ध्यात्वेति जानकी चित्ते स्मरन्ती श्रीजिनप्रियौ । व्याघ्रादि भैरवेऽरण्ये तस्थौ निर्भयमानसा ॥ १२२५ ॥
यत् कृतं मयका पूर्वं पापं जीववधादिकम् । तदत्र विलयं शीघ्रं यास्यत्येव मम स्फुटम् ॥ १२२६ ॥
उच्चैः स्वरं कृपास्थानं रुदन्तीं जनकात्मजाम् । निशम्य वज्रजङ्घाह्वः पुण्डरीकपुराधिपः ॥ १२२७ ॥
तत्र गत्वा मृग-व्याघ्र-शश-जम्बुकसेवितम् । दृष्ट्वा चाऽवक्कुतोऽत्रागाः किं नामा कस्य गेहिनी ? ॥ १२२८ ॥
एवं प्रोक्ता यदा नैव जजल्प जनकात्मजा । तदा नृपानुगः प्राह मदनस्तत्पुरस्तदा ॥ १२२९ ॥
पुण्डरीकपुरस्वामी वज्रजङ्घाभिधो नृपः । ज्ञानदर्शनचारित्र-सेवी जिनार्चकोऽस्त्यसौ ॥ १२३० ॥
शङ्कादिदोषरहितः श्रुतार्हद्वचनश्रुतिः । परोपकारकृज्जीव वत्सलः करुणापरः ॥ १२३१ ॥ युग्मम् ॥
गजानां धरणार्थं स भूपो सुधर्म्मिशेखरः । आयातोऽत्र वने विद्या–बलशाली सतां हितः ॥ १२३२ ॥
उक्तंच–" पंचाणुव्वयधारी वच्छे सम्मत्त उत्तमगुणोहो । देव-गुरुपूअणरओ साहम्मिअवच्छलो वीरो ॥ १ ॥

॥ ४२४ ॥

श्रुत्वेति जानकी मातृ-पितृकान्तादिकं समम् । सम्बन्धं स्ववनत्यागं यावत्तावज्जगौ शनैः ॥१२३३॥
अहमर्हज्जनुर्भूम्या-दिकवन्दनछद्मतः । रामेण त्याजिताऽत्रैव पूर्वकर्म्माभियोगतः ॥१२३४॥
यतः—' निक्खमणनाणनिव्वाणजम्मभूमीओ वंदइ जिणाणं । न य वसइ साहुजणविरहियम्मि देसे बहुगुणेवि ॥
एवं प्रोक्त्वा निजं कान्तं स्मृत्वा चेतसि जानकी । रुदन्ती वारिता वज्र-जङ्घेनेति महीभुजा ॥१२३६॥
मा त्वं रुदिहि सीते हे ! जानन्ती सर्वविद्वचः । न छुटयते पुरा चीर्ण-कर्म्मणा देहिभिः क्वचित् ॥१२३७॥
यतः–" किं ते साहुसयासे ण सुअं जह णिययकम्मपडिबद्धो । जीओ धम्मेण विणा हिंडइ संसारकंतारे ? ॥१॥
संजोगविप्पओगा उ सुहदुक्खाइं बहुप्पयाराइं । पत्ताइ दीहकालं अणाइणिहणेण जीएणं ॥२॥
खिइतेअजलथलाइसु सकयकम्मुदएण जीवाणं । तिरिअभवे दुक्खाइं छुहतिण्हाईणि भुत्ताइं ॥३॥
विविहाववायतज्जण-निब्भत्थणरोअसोअमाइसु । जीवेण मणुअजम्मे अणुहूयं दारुणं दुक्खं ॥४॥
कुच्छिअतवसंभूया देवा दट्ठूण परमसुरविहवं । पावंति तेवि दुक्खं विसेसओ चवणकालम्मि ॥५॥
णरएसु वि उववण्णा जीवा पावंति दारुणं दुक्खं । करवत्त-जंत-सामलि-विअरणीमाइअं विविहं ॥६॥
तं णत्थि जणयधूए ! ठाणं सुरासुरसेविते वि तेलोक्के । जम्मं मच्चू य जरा जत्थ ण जीवेण संपत्ता ॥७॥
अशुभोदयतस्त्वं तु रामेण त्याजिता वने । शुभोदयात् पुना रामो भवतीं नेष्यते गृहे ॥१२३८॥

For Private and Personal Use Only

भो भो भगिनि ! सीते ! त्वमुत्तिष्ठैहि पुरे मम । कुर्वन्ती धर्म्ममाप्तोक्तं सन्तिष्ठ सदने सुखम् ॥ १२३९ ॥
श्रुत्वेति वचनं वज्र-जङ्घस्य जनकात्मजा । ध्यायन्ती जिनपं चित्ते हृष्टा धत्ते धृतिं तदा ॥ १२४० ॥
जानकीं शिबिकारूढां कृत्वा वज्रमहीपतिः । भगिनीमिव नीन्ये स्व-गेहे स्रूत्सवपूर्वकम् ॥ १२४१ ॥
वज्रजङ्घमहीशेन दत्ताऽऽवासे सुखं स्थिता । सीता भामंडलावासे स्थितिं त्वा मन्यते तदा ॥ १२४२ ॥
इतो रामान्तिकेऽभ्येत्य कृतान्त ऊचिवानिति । स्थाने त्वयोदिते सीता यदा मुक्ता तदा जगौ ॥ १२४३ ॥
सिंहर्क्षभल्ल-चित्रक-गोमायु-व्याघ्रभीषणे । वने मुक्ता मयाऽवादी-दश्रुपूरितलोचना ॥ १२४४ ॥
पत्युर्मे दूषणं नास्ति दूषणं मे कुकर्म्मणः । येन छलादहं भृत्य-पार्श्वादत्र विमोचिता ॥ १२४५ ॥
त्वयोच्यं मे पुरः पत्युः सीता मुक्ता वने वरे । ध्यायन्ती श्रीजिनं वन्यहाराऽस्ति सुखशालिनी ॥ १२४६ ॥
मा मे वियोगतो दुःखं श्रुत्वा दाशरथिः पतिः । हृदयस्फोटतो याया-न्मरणं जीवितात्ययात् ॥ १२४७ ॥
सिंह-व्याघ्रादिजीवेभ्यो दुष्टेभ्यो बिभ्यतीतराम् । कम्पमानतनुर्मुक्ता मया परं तु सा पुनः ॥ १२४८ ॥
न ज्ञायतेऽधुना सा तु सिंहादि-श्वापदैर्वने । भक्षिताऽस्त्यथवा जीव-धारिणी जीवितौजसा ॥ १२४९ ॥
यतः—“सामिय सहावभीरू अहिययरं दारुणे महारण्णे ।
बहुसत्तभीसणरणे जणयसूआ दुक्करं जियइ ॥ १२५० ॥”

आकर्ण्यैतद्वचो रामो मूर्च्छामाप्य पुनः पुनः । सीतां सस्मार चित्तान्त-र्विललाप मुहुर्मुहुः ॥ १२५१ ॥
हा ! मूढेन मया सीता-ऽत्याजि भीषणकानने । किं धात्रा प्रददे बुद्धि-रीदृशी मम साम्प्रतम् ॥ १२५२ ॥
निर्दोषा सा सती सीता लोकालोक प्रजल्पनात् । यत् त्याजिता वने भीष्मे तन्मे मौढ्यविजृम्भणम् ॥ १२५३ ॥
जानक्या विप्रयोगेन दुःखितं राघवं भृशम् । आलोक्य लक्ष्मणः प्राह दुखं किं क्रियतेऽधुना ॥ १२५४ ॥
अविमृश्य कृतं कार्यं दुःखाय जायते नृणाम् । सुविमृश्यं तु सौख्याय जायते नात्र संशयः ॥ १२५५ ॥
यतः—"सहसा विदधीत न क्रिया-मविवेकः परमापदां पदम् ।
वृणते तु विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः ॥ १२५६ ॥
धीरतां प्रतिपद्यस्व कातरत्वं त्यज द्रुतम् । न कृतात् कर्म्मणः कोऽपि छुटिष्यति शरीरभाग् ॥ १२५७ ॥
यतः—"आयामे गिरिसिहरे जले थले दारुणे महारण्णे ।
जीवो संकडपडिओ रक्खिज्जइ पुव्वसुकएण ॥ १ ॥
अह पुण पावस्सुदए रक्खिज्जंतोवि धीरपुरिसेहिं । जंतू मरइ णिरुत्तं संसार ट्ठिई इहं लोए ॥ २ ॥"
बोधितो लक्ष्मणेनैव तदा रामोऽपि सन्ततम् । राज्य कार्यं वितन्वानः सीतां सस्मार चेतसि ॥ १२५८ ॥
सीतागुणगणान् नित्यं स्मरन् जनपदोऽखिलं । रोरुयते तथा पार्श्वे स्थितानपि च दुःखयेत् ॥ १२५९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततस्तत्र वने प्रेष्य भृत्यं जनकनन्दिनीम् । असत्तीं ज्ञातवान् रामो मृतां च व्याघ्रपार्श्वतः ॥ १२६० ॥
रामः सीतां मृतामेव ध्यायन् मन्त्रीश्वरं जगौ । प्रेतक्रिया विधीयेत नानाबलिविधानतः ॥ १२६१ ॥
सीताया विहिते प्रेत-कर्म्मण्येवाखिले तदा । रामेण निखिला लोका बभूवुर्दुःखिनो भृशम् ॥ १२६२ ॥
यतः—'जुवईण सहस्सेहिं अट्ठहिं अणुसंतयंपि परिकिण्णो ।
पउमो सिएक्कमणो सिविणेवि पुणो पुणो सरई ॥ १२६३ ॥
"एवं सणियं सणियं सीयासोए गए विरलभावं । सेसमहिलासु पउमो कह कहवि धिइं समणुपत्तो ॥ १ ॥"
इतश्च पुण्डरीकाह्वे पुरे सुरपुरोपमे । वज्रजङ्घनृपावासे सीता सुन्दर (स्वप्न) सूचितम् ॥ १२६४ ॥
अतिक्रान्तेषु मासेसु नवस्वेषु श्रवणे स्थिते । चन्द्रेऽसूत सुतद्वन्द्वं स्मररूपमनोरमम् ॥ १२६५ ॥ युग्मम् ॥
तयोर्जन्मोत्सवं कृत्वा वज्रजङ्घमहीपतिः । अनङ्ग-लवणेत्याह्वा-माद्यसूनोर्ददौ मुदा ॥ १२६६ ॥
मदनाङ्कुश नामेति द्वितीयस्य ददौ नृपः । ववर्द्धेते ततः पुत्रौ द्वावेव वरविग्रहौ ॥ १२६७ ॥
इतः सिद्धार्थसाधुश्च भूरि-विद्याबलान्वितः । विहरन् पुण्डरीकाह्वे नगरे समुपेयिवान् ॥ १२६८ ॥
भिक्षार्थं विहरन् साधु-गृहाद् गृहं प्रति स्फुटम् । सीताधिष्ठित-संस्त्याये यत्नापरः समीयिवान् ॥ १२६९ ॥
प्रत्यलाभि वराहारैः स साधुः सीतया तदा । सीता ततोऽनमत्पुत्र-द्वययुक्ता सुभावतः ॥ १२७० ॥

For Private and Personal Use Only

ततस्तेनादराद्धर्म्म-शास्त्राणि लवणाङ्कुशौ । पाठितौ च तथा जातौ यथा धर्म्मिष्ठशेखरौ ॥ १२७१ ॥
इतोऽन्यदा धनोऽष्टाङ्ग-निमित्तज्ञो वराशयः । तत्रागतो ददौ विद्या लवणाङ्कुशयोर्निजाः ॥ १२७२ ॥
सोम्यत्वेनेन्दुसङ्काशौ तेजसा रविसन्निभौ । द्विड्वधान्मङ्गलाभौ तु ज्ञातृत्वेन बुधोपमौ ॥ १२७३ ॥
विद्यया गुरुतुल्यौ तु सद्बुध्या कविसुन्दरौ । क्रूरेषु शनिभौ जातौ लवणाङ्कुशनन्दनौ ॥ १२७४ ॥ युग्मम् ॥
विनयादिगुणग्रामै रञ्जयन्तौ सदा जनान् । वज्रजङ्घं निषेवेते सद्भक्त्या लवणाङ्कुशौ ॥ १२७५ ॥
वज्रजङ्घमहीशेन शशिचूलामुखा वराः । द्वात्रिंशत् कन्यका आद्यो लवणः परिणायितः ॥ १२७६ ॥
पृथ्वीपुरे पृथुक्ष्माप-पुत्री कनकमालिका । वज्रजङ्घधरेशेना-ङ्कुशोऽथ परिणायितः ॥ १२७७ ॥
अनयोः परिणयनविस्तरः शास्त्रान्तराज्ज्ञेयः ।

बहुभूपखगैः सेव्य-मानक्रमसरोरुहौ । तिष्ठतः स्म सुखे तत्र नगरे लवणाङ्कुशौ ॥ १२७८ ॥
क्रमाल्लवणाङ्कुशौ पञ्च सहस्र व्योमगाश्रितौ । दुर्जेयौ द्युसदां जातौ स्वस्वोल्लसद्भुजौजसा ॥ १२७९ ॥
एकदा तौ प्रणम्याङ्घ्रीं मातुः प्रपच्छतुर्मुदा । किंनामा ते पतिः कस्य सूनुःसोऽस्ति निगद्यताम् ॥ १२८० ॥
ततो माता जगौ भूमी-पतेर्दशरथस्य तु । वृद्धः पुत्रो बलीयोऽस्ति स मे कान्तो जगद्धितः ॥ १२८१ ॥
येनाहं प्रहताकस्मा-दशास्येनदृढौजसा । वालिता युद्धयोगेन स मे कान्तो मनोरमः ॥ १२८२ ॥

लोकदत्तं कलङ्कं तु मुधा मय्यवगत्य सः । त्याजयामास मां दूरेऽरण्ये स्वीयानुगान्तिकात् ॥ १२८३ ॥
निशम्य जननीवाक्यं चमत्कृतिकृते तदा । असङ्ख्यबलसंयुक्तौ त्वरितं लवणाङ्कुशौ ॥ १२८४ ॥
जनकं वज्रजङ्घं तु पुरः कृत्वा पुरात्ततः । चेलतुः सुदिनेऽयोध्या-पुरिं प्रति प्रमोदतः ॥ १२८५ ॥ युग्मम् ॥
योजनानां चतुः प्रान्तेऽयोध्याया विद्विषो बलम् । आयान्तमधिगम्याशु सन्नह्य रामलक्ष्मणौ ॥ १२८६ ॥
निर्गतौ कुञ्जरारूढौ नानावाद्यपुरस्सरम् । सम्मुखं ययतुर्जेतुं वैरिणं बलशालिनम् ॥ १२८७ ॥
रामरावणवत्तत्र सङ्ग्रामो दारुणस्तदा । लवणाङ्कुशपुत्राभ्यां रामलक्ष्मणयोरभूत् ॥ १२८८ ॥
लक्ष्मणेन विमुक्ते तु चक्रं तौ वैरिणौ प्रति । प्रयासो विफलो जातो वैरिमृत्योरभावतः ॥ १२८९ ॥
ततश्चक्री जगौ राममावां बलिहरी न हि । किन्त्वेतौ हरि-लक्ष्मीशौ समुत्पन्नौ नवौ स्फुटम् ॥ १२९० ॥
यतः—" एअंतरे अमोहं चक्कं जालासहस्सपरिवारं । लच्छीहरेण मुक्कं कुसस्स तेलोकभयजणणं ॥ १ ॥
गंतूणं कुससयासं तं चक्कं वियसियप्पहं सिग्घं । पुणरवि अ पडिनियत्तं संपत्तं लक्खणस्स करे ॥ २ ॥
तं लक्खणेण चक्कं खित्तं खित्तं कुसस्स रोसेणं । विहलं त्तं पडिनियत्तइ पुणो पुणो पवणवेएणं ॥ ३ ॥"
अत्रान्तरे तथाऽस्फालि धनुरङ्कुशशत्रुणा । यथा रामवलं सर्वं भूमिसुप्तमिवाभवत् ॥ १२९१ ॥
प्रोचतुः भ्रातरौ द्वौ तु नवीनौ रामलक्ष्मणौ । समुत्पन्नौ ततः प्राह लक्ष्मणो राघवं प्रति ॥ १२९२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मया कोटिशिला प्रौढो-त्पाटिता यच्च तद्वृथा । यतश्चैतौ समायातौ नवीनौ रामलक्ष्मणौ ॥ १२९३ ॥
आत्मनोर्यदभूद्राज्या-भिषेकस्तद् वृथाजनि । अनयोः क्रियते राज्या-भिषेकः साम्प्रतं ध्रुवम् ॥ १२९४ ॥
मुधा को म्रियते मूढो दुःशास्य इव मानवः । जीवद्भिः प्राप्यते सौख्यं क्रियते धर्म एव च ॥ १२९५ ॥
धर्मेण जायतेऽमुत्र परत्र च सुखावली । ततो रागो न कर्त्तव्यो राज्येऽस्मिन् नयवर्जिते ॥ १२९६ ॥
ततो हलिरमाधीशौ दीनौ स्वभुजनिन्दकौ । ज्ञात्वोत्तीर्य गजाभ्यां तु सञ्जातौ पादचारिणौ ॥ १२९७ ॥
रामस्य नन्दनावावां स्वनामाङ्कितसायकौ । प्राभृतीचक्रतू राम–भूपस्य स्वपितुः पुरः ॥ १२९८ ॥
ततश्चक्रियुतो रामो बाणाक्षरततिं स्फुटम् । वाचयन् विस्मितो जातः किन्त्वेतद् हि विचिन्तयन् ॥ १२९९ ॥
अत्रान्तरे पुरःकृत्य मातरं लवणाङ्कुशौ । समेत्य रामपादाब्जं मुदा नंनमतुस्तराम् ॥ १३०० ॥
ततो जगादानुजौ तु प्राञ्जली राघवं प्रति । अस्मन्माता मुधारण्ये त्याजिता भवता पितः ! ॥ १३०१ ॥
त्याजिता भवताऽरण्ये यदाऽऽवां जननी पितः ! । तदा त्वावां स्थितौ गर्भे भवदीयौ सुतौ ननु ॥ १३०२ ॥
ज्ञात्वेति स्वसुतौ रामो दोर्भ्यामालिङ्ग्य वेगतः । स्वाङ्के निवेशयामास वर्यसन्मानदानतः ॥ १३०३ ॥
रामोऽवग् हा ! मया पत्नी सीता युष्मत् समन्विता । यदत्याजि वने तेन श्वभ्रे पातो भविष्यति ॥ १३०४ ॥
उक्तञ्च–“ हा हा महातिकट्ठं पुत्ता गब्भट्ठिआ अणज्जेणं । सीयाए समं चत्ता भयजणणे दारुणेऽरण्णे ॥ १ ॥ ”

For Private and Personal Use Only

लवणोऽङ्कुशयुग् प्राह नत्वा रामपदाम्बुजम् । एकस्त्वं वा पिताऽन्यस्तु वज्रजङ्घमहीपतिः ॥१३०५॥
येन वां जननी वज्र-जङ्घेनैव भूभुजा । पालिता स्वगृहे नीत्वाऽरण्यान् मुक्ता त्वया सती ॥१३०६॥
जानक्यपि जगौ तातो जनको जनकादभूत् । अरण्ये रक्षणादन्यो वज्रजङ्घः पिताऽभवत् ॥१३०७॥
ततो दाशरथिर्वज्र-जङ्घाय मेदिनीभुजे । ग्रामाणामयुतं दत्त्वा तोषयामास सादरम् ॥१३०८॥
पुष्पविमानमारूढां सीतां पुत्रद्वयान्विताम् । कृत्वा रामो निजावास-मानिन्ये रुचिरोत्सवम् ॥१३०९॥
यतः—"एत्तो साएयपुरी सग्गसरिच्छा कया खणद्धेणं । बहुतूर-मंगलरवा णडणट्टपणच्चिउग्गीआ ॥१॥
पुत्तेहि समं रामो पुप्फविमाणं तओ समारूढो । तत्थ वि लग्गो रेहइ सोमित्ती विरइयामरणो ॥२॥"
ततो निःशेषसर्वज्ञ-प्रासादेषु जिनार्चनाम् । कुर्वाणः कारयंश्चान्यैः स पुष्पादिभिरादरात् ॥१३१०॥
केचिद् भणन्ति सीता तु पुण्डरीकपुराद् वरात् । आनीता दाशरथिना मिलनात् पुत्रयोरनु ॥१३११॥
तदा रामो जगौ सीते ! त्वं सती विद्यसे खलु । लोका वदन्ति पौलस्त्य-गृहे बहुदिनान् स्थिता ॥१३१२॥
तेन नो ज्ञायते सीता सती वाप्यसती पुनः । एतदेव महद्दुःखं विद्यते नापरं पुनः ॥१३१३॥
ततः सीता पुरोद्याने गत्वा प्राह पतिं प्रति । यदाऽहं दिव्यकरणाच्छुद्धा स्यां ज्वलनादिषु ॥१३१४॥
त्रिशत्या तु करैर्व्यूढा परिखान्यक्षदिक्षु च । खदिराङ्गारभृच्चक्रेऽनुगै रामनिदेशतः ॥१३१५॥

ततश्च खदिराङ्गारै-र्ज्वलद्भिर्बहुभिर्भृशम् । खातिकायां भृतायां तु विवेश जनकात्मजा ॥ १३१६ ॥
तदा ते खदिराङ्गारा बभूवुः सलिलं द्रुतम् । वर्यशीलप्रभावेण सीतोत्तीर्णा ततश्च ताम् ॥ १३१७ ॥
रामं कालमुखं दृष्ट्वा पश्यतीषु प्रजासु च । सीता स्वभक्तिसूचार्थं काव्यमेकं जगाविति ॥ १३१८ ॥
* मा गा विषादभवनं भुवनैकवीर ! निःकारणं विगुणिता किमियं मयेति । 卐
देवेन केनचिदहं दहने निरस्ता निस्तारिता तु भवता हृदयस्थितेन ॥ १३१९ ॥
ततस्तदा जनाः सर्वे जानक्याःशीलमद्भुतम् । निरीक्ष्य जगदुः प्रोच्चैः स्वरैः हर्षप्रपूरिताः ॥ १३२० ॥
* सीतया दुरपवादशङ्कया पावके स्वतनुराहुतिः कृता । 卐
पावकः सुजलतामियाय यत् तत्र शीलमहिमानिबन्धनम् ॥ १३२१ ॥
यतः—"रामेण तओ भणिया पासत्था किंकरा खणह खाणिं ।
तिण्णेव उ हत्थसया समचउरंसावगाढा य ॥ १३२२ ॥
पूरेह इंधणेहिं कालागरु-चंदणाइचूलेहिं । चंडं जालेह लहुँ खाणीए सव्वओ अग्गिं ॥ १३२३ ॥
धगधगंतसद्दो प्पज्जलिओ हुअवहो कणयवण्णो । गाउयपरिमाणासु य जालासु णहं पदीप्पंतो ॥ १३२४ ॥
अइचवल चंचलाउ सव्वत्तो विप्फुरंति जालाओ ।

[जम जम्म जिह समा दारा] सोयामणीओ नज्झइ गयणयले उग्गतेयाउ ॥ १३२५ ॥
जइ मणवयण तणूणं रामं मोत्तूण परणरो अन्नो ।
सुविणे विअ अभिलसिओ तो डहउ मम इमो अग्गी ॥ १३२६ ॥
सा एवं जंपिऊणं तओ पविट्ठाऽणलं जणयधूया । जायं जलं सुविमलं सुद्धा दढसीलसंपुण्णा ॥ १३२७ ॥
सीतां शुद्धां तदा वीक्ष्य सुरलोका जगुः स्फुटम् । सतीयं विद्यते सीता श्लाघनीयाद्य नाकिना ॥ १३२८ ॥
वर्द्धापनं जनाः सर्वे गीतगानपुरस्सरम् । कुर्वते जनकक्ष्माप-पुत्र्या गृहे गृहे मुदा ॥ १३२९ ॥
यतः—"विज्जाहरा य मणुया नच्चंता उल्लवंति परितुट्ठा ।
सिरिजणयरायधूया सुद्धा दित्ताणले सीया ॥ १ ॥"
तदा लवाङ्कुशौ पुत्रौ भूरिभूपखगान्वितौ । समेत्य जननीपादौ नेमतुर्मुदिताशयौ ॥ १३३० ॥
पुष्पविमानमारूढा सीता नारीशतान्विता । सर्वज्ञसदनेष्वेत्य नमामाऽमलमानसा ॥ १३३१ ॥
ततो भूरितरं दानं ददाना जनकात्मजा । वीक्ष्यमाणा पुरीलोकै-राजगाम निजालयम् ॥ १३३२ ॥
ततोऽवग् जानकी कान्त ! मा खेदं कुरु साम्प्रतम् । स्वकर्म्मणा कलङ्कं तु प्राप्यं ते दूषणं न हि ॥ १३३३ ॥
कलङ्कात्ते प्रसादेनो-त्तीर्णाहं राघवाऽधुना । तत्कुर्वे कर्म्म येनाऽथ न स्यां नारी भवादतः ॥ १३३४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

※ यतः—" इन्दधणु-फेण-बुब्बुयसमेसु भोएसु दुरभिगंधेसु । किं एएसु महाजस ! का रइबहुदुक्खजणएसु ॥१॥
बहुजोणीसयसहस्सा परिहिंडंती अहं सुपरिसंता । इच्छामि दुक्खमोक्खं संपइ जिणदेसियं दिक्खं ॥ २ ॥
ततो रामो बलात् सीतां प्रति प्रोवाच सादरम् । अधुना त्वं व्रतं लाहि यदा शोभा तदा नहि ॥ १३३५ ॥
अथावसर आयाते गृहीतव्यं त्वया व्रतम् । अहं चापि व्रतं लातुं वाञ्छन्नस्मि तदा पुनः ॥ १३३६ ॥
इतस्तस्य पुरोद्याने ज्ञानी सकलभूषणः । समेत्य समवासार्षीद् भूरिसंयतसेवितः ॥ १३३७ ॥
ततो रामः ससोदर्यो विभीषणादिसेवितः । धर्मं श्रोतुं यतेः पार्श्वे ययौ ननाम चादरात् ॥ १३३८ ॥
श्रुत्वा धर्म्मोपदेशं तु विभीषणो जगाविदम् । रामेण किं कृतं पुण्यं लक्ष्मणेन च पूर्वतः ॥ १३३९ ॥
येनेदृशी रमा जाता गजाश्वादिविभूषिता । लक्ष्मणेन च किं मृत्युं नीतो दशाननो रणे ॥ १३४० ॥
जानकीं दण्डकारण्ये स्थितां मोहेन रावणः । सति सुन्दरशुद्धान्ते छलेन किमपाहर ? ॥ १३४१ ॥
अथ ज्ञानी जगौ जम्बूद्वीपेऽत्र भरते वरे । पुरे क्षेमङ्करे श्रेष्ठी जयदत्ताभिधोऽभवत ॥ १३४२ ॥
तस्यासीद् गेहिनी नाम्ना सुनन्दा शीलशालिनी । नन्दनो धनदत्तोऽभूद् वसुदत्तोऽपरः पुनः ॥ १३४३ ॥
जन्यचक्राभिधो विप्रो मित्रं जातस्तयोः क्रमात् । त्रयस्ते सुहृदः शश्वत् क्रीडां वितन्वतेतराम् ॥ १३४४ ॥
※ यतः 'कोऽहं कस्मिन् कथमायातः का मे जननी को मे तातः । इति परिभावयतः संसारः सर्वोऽयं स्वप्नव्यवहारः

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हा हा दुष्ट ! कदर्थितकायैः क्षिप्तं जन्म मुधा व्यवसायैः ।
काकिण्यार्थे चिन्तारत्नं हारितमेतदकृत्वा यत्नम् ॥ १३४६ ॥
* प्रथमे वयसि यः शान्तः स शान्त इति मे मतिः । धातुषु क्षीयमाणेषु शमः कस्य न जायते ? ॥ १३४७ ॥
* यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता । एकैकमप्यनर्थाय किं पुनस्तच्चतुष्टयम्' ॥ १३४८ ॥
तस्मिन्नेव पुरे वर्ये वणिक् सागरदत्तकः । अभूत्तस्याभवत्पत्नी रत्नाभाह्वा वराशया ॥ १३४९ ॥
तयोर्गुणधरः पुत्रोऽभूतां गुणमती सुता । नयदत्तस्य पुत्राय धनदत्ताय शालिने ॥ १३५० ॥
ददौ सागरदत्तोऽथ पुत्रीं गुणमतीं निजाम् । दातुं मिमेल यावत् स सर्वसज्जनसाक्षिकम् ॥ १३५१ ॥
तत्रैव नगरे श्रेष्ठी श्रीकान्तो भूरिरैभरम् । रत्नाभायै वितीर्याऽथ रहो गुणमतीं ललौ ॥ १३५२ ॥
श्रीकान्तेन हृतां छन्नं तदा गुणमतीं कनीम् । विज्ञाय जन्यचक्रोऽवग् वसुदत्तस्य सन्निधौ ॥ १३५३ ॥
धनदत्तं गतं ग्रामे-ऽन्यत्र मत्वा तदा रुषा । वसुदत्तो निहन्तुं च श्रीकान्तं निर्गतो निशि ॥ १३५४ ॥
वसुदत्तो भ्रमन् बाह्यो-द्याने श्रीकान्तमेक्ष्य च । मुमोचाऽसिं यदा शत्रौ तदा सोऽप्यमुचच्च तम् ॥ १३५५ ॥
तदा मिथोऽसिघातेन निघ्नन्तौ तौ तु निःकृपम् । मृत्वा विन्ध्याटवीमध्ये मृगौ सद्यो बभूवतुः ॥ १३५६ ॥
मृत्वा गुणमती तत्राटव्यां मृग्यभवत्तदा । मृगीं लातुं मृगौ तौ तु युध्यन्तौ मृतिमीयतुः ॥ १३५७ ॥

For Private and Personal Use Only

भूत्वा तौ दंष्ट्रिणौ तत्र वने युद्धपरायणौ । मृत्वाऽभूतां गजौ तस्मान् महिषौ वृषभौ ततः ॥ १३५८ ॥
ततः प्लवङ्गमौ तस्माद् द्वीपिनौ हरिणौ ततः । तत्र युद्धपरौ मृत्वा संजातौ वटपादपौ ॥ १३५९ ॥
ततो भू-नीर-वृक्षा-ग्नि जम्बुका-म्बु-मृगादिकान् । भवान् भूरीन् भ्रमतःस्म श्रीकान्तवसुदत्तकौ ॥ १३६० ॥
इतो भ्रातृवधोदन्तं श्रुत्वाऽतिदुःखितस्तदा । धनदत्तो विनिर्यातः स्वपुर्या दूरतो गतः ॥ १३६१ ॥
धनदत्तो भ्रमन् भूमौ तृषितो रजनौ भृशम् । उद्यानेऽम्बु ययाचे स साधुपार्श्वे कृपास्पदम् ॥ १३६२ ॥
ततः साधुर्जगौ नीरं पीयते न हि साधुभिः । यतोऽम्बु जायते भूरि–जीवात्मकं दिनात्यये ॥ १३६३ ॥
※ यतः–‘ संसजज्जीवसंघातं भुञ्जाना निशि भोजनम् । राक्षसेभ्यो विशिष्यन्ते मूढात्मनः कथं न ते ’ ? 卐
※ उक्तंच–‘ मच्छी-कीड-पयंगा केसा अन्नं पि जं असुज्झं तं । भुंजंतएण रत्तिं तं सव्वं भक्खिअं णवरं ॥ १३६५ ॥卐
※ अत्थमिए दिणयरे जो भुंजइ मूढभावदोसेणं । सो चउगइवित्थिण्णं संसारं भमइ पुणरुत्तं ॥ १३६६ ॥卐
※ लिंगी व अलिंगी वा जो भुंजइ सव्वरीसु रसगिद्धो । सो एइ नरयगमणं पावइ अचरित्तदोसेणं ॥ १३६७ ॥卐
※ जे सव्वरीसु पुरिसा भुंजंति हि सीलसंयमविहूणा । महुमज्जमंसनिरया ते जंति मया महानरयं ॥ १३६८ ॥卐
※ हीणकुलसंभवा विहु पुरिसा उच्छन्नदारधणसयणा । परपेसणाणुकारी जे भुत्ता रयणिसमयम्मि ॥ १३६९ ॥卐
※ करचरण फुट्ट केसा बीहच्छा दूहवा दरिद्दा य । तणदारु-जीविया ते जेहिं भुत्तं विआलम्मि ॥ १३७० ॥卐

* जे पुण जिणवरधम्मं घेत्तुं महुमज्जमंसविरइं च । ण कुणंति राइभुत्तं ते हुंति सुरा महिड्डिया ॥ १३७१ ॥
* ते तत्थ वरविमाणे देवीसयपरिमिआ विसयसोक्खं । भुंजंति दीहकालं अच्छरसंगीयमाहप्पा ॥ १३७२ ॥
* चइऊण इहं आया णरवइवंसेसु खायकित्तीसु । उत्रभुंजिऊण सोक्खं पुणरवि पावंति सुरसरिसं ॥ १३७३ ॥
* पुणरवि जिणवरधम्मे बोहिं लहिऊण गहिअ वयनियमा । काऊण तवं घोरं पावेंति सिवालयं धीरा ' ॥१३७४॥
* ' अस्तं गते दिवानाथे आपो रुधिरमुच्यते । अन्नं मांससमं प्रोक्तं मार्कण्डेन महर्षिणा ॥ १३७५ ॥
* चत्वारो नरकद्वाराः प्रथमं रात्रिभोजनम् । परस्त्रीगमनं चैव संधानानन्तकायिके ' ॥ १३७६ ॥

श्रुत्वेति धर्म्ममाप्तोक्तं प्रपद्य धर्म्ममार्हतम् । धनदत्तो मृतः स्वर्गे प्रथमे समुपेयिवान् ॥ १३७७ ॥
तत्र स्वर्गसुखं भुङ्क्त्वा महासुराभिधे पुरे । मित्रश्रेष्ठिसुतः पद्म-रुचिनामाऽभवत् कृती ॥ १३७८ ॥
पद्मरुचिर्व्रजन् पुर्यां मध्ये जरद्गवं वरम् । श्वसन्तं पतितं दृष्ट्वा कृतारावं महीतले ॥ १३७९ ॥
स च पञ्चनमस्कारं गावमश्रावयत्तथा । यथा स श्रद्दधे कर्ण-गतं सुन्दरभावतः ॥ १३८० ॥
तस्मिन्नेव पुरे छत्र-छायभूमीपतेस्तदा । श्रीकान्ताप्रेयसी-कुक्षा-ववतार स गौर्मृतः ॥ १३८१ ॥
जाते तस्मिन् सुते जन्मो-त्सवं कृत्वा महीपतिः । वृषभध्वज इत्याह्वां ददौ सज्जनसाक्षिकम् ॥ १३८२ ॥
कुमारः प्रथमं पूर्व-भवं मृत्युभुवं निजाम् । दृष्ट्वा जातिस्मृतिं प्राप्य दध्यावेवं पुनः पुनः ॥ १३८३ ॥

मम गोः प्राग्भवे शीत-तृषार्त्तिततनोर्भृशम् । म्रियतः प्रददौ पञ्चनमस्कारं नृपाङ्गभूः ॥ १३८४ ॥
नमस्कारप्रभावेन मम राजकुले जनुः । अभूदतः करिष्येऽह-मत्र श्रीजिनमन्दिरम् ॥ १३८५ ॥
कारयित्वा जिनागारं तत्र वृद्धककुब्रतः । रूपं कुमारसंयुक्त-मचीकरत् नृपाङ्गजः ॥ १३८६ ॥
राजपुत्रो जगौ भृत्यान् योऽत्रैत्य मानवो ननु । चिरं तिष्ठति वक्तव्यं तदा मे पुरतो द्रुतम् ॥ १३८७ ॥
ततो जिनालये भूरि-जनेषु वन्दनाकृते । आगच्छत्सु समायातः पद्मरुचिर्वणिग्वरः ॥ १३८८ ॥
नत्वा जिनं नृगोरूपं पश्यन् पद्मरुचिर्यदा । नान्यत्रेति तदा भृत्यै-र्ज्ञापितं नृपसूनवे ॥ १३८९ ॥
भूपपुत्रः समागत्य नत्वा पद्मरुचिर्जगौ । नमस्कारप्रदानेन श्रीरीदृग् मे त्वया ददौ ॥ १३९० ॥
वृषभोऽपि नमस्कार-दानाद्राज्यं महत्तमम् । लम्भितोऽहं त्वयाऽतस्त्वं गुरुः संसारतारकः ॥ १३९१ ॥
यतः—"तं चिय ण कुणइ माया नेव पिआ णेव बन्धवा सव्वे ।
जं कुणइ सुप्पसण्णो समाहिमरणस्स दायारो" ॥ १३९२ ॥
ततो द्वावपि सर्वज्ञ-गुरुपूजां निरन्तरम् । कुर्वाणौ तिष्ठतः प्रीति-भाजौ परस्परं मुदा ॥ १३९३ ॥
क्रमादायुःक्षये पद्म—रुचिश्रीवृषभध्वजौ । मृत्वा स्वर्गे द्वितीये तु सुरौ जातौ लसत्तनू ॥ १३९४ ॥
च्युत्वा पद्मरुचिः स्वर्गा-न्नन्दावर्त्तपुरे वरे । नन्दीश्वरनृपस्याभूत् पुत्रो नयननन्दकः ॥ १३९५ ॥

खेचरर्द्धिं विभुज्याऽथ तत्र नन्दीश्वराङ्गजः । लात्वा दीक्षां ययौ स्वर्गे चतुर्थे जीवितात्ययात् ॥ १३९६ ॥
क्षेमंकरे भरतपुरे, च्युत्वा पूर्वविदेहगे । स श्रीचन्द्राभिधः पुत्रो विमलाद्वाहनेशितुः ॥ १३९७ ॥
तत्र भोगसुखालीनो धनदत्तासुमान् भृशम् । श्रीचन्द्रो वेत्ति सूर्येन्द्वो-रुदयास्तं न चेतसि ॥ १३९८ ॥
अथाऽन्यदा पुरोद्याने समाधिगुप्तनामकम् । सूरिं समागतं श्रुत्वा नन्तुं श्रीचन्द्र ईयिवान् ॥ १३९९ ॥
उपविष्टे कुमारे तु धर्म्मं श्रोतुं जिनोदितम् । प्रारेभे देशनां कर्त्तुं प्रवृत्तः स मुनीश्वरः ॥ १४०० ॥
"जीवो अणाइकालं हिंडंतो बहुविहासु जोणीसु । दुक्खेहिं माणुसत्तं पावइ कम्माणुभावेण ॥ १ ॥
इन्दधणु-फेण-बुब्बुय-संज्झासरिसोवमे मणुअजम्मे । जो ण कुणइ जिणधम्मं सो हु मओ वच्चए नरयं ॥ २ ॥
जह इन्धणेसु अग्गी ण य तिप्पइ जलेसु वि समुद्दो । तह जीवो न य तिप्पइ विउलेसु वि कामभोगेसु ॥ ३ ॥"
श्रुत्वेति साधुवचनं श्रीचन्द्रो राज्यमञ्जसा । दत्त्वा स्वसूनवे दीक्षां ललौ मुनीशसन्निधौ ॥ १४०१ ॥
षष्ठाष्टमादि कुर्वाण-स्तपः श्रीचन्द्रसंयतः । आयुःक्षये समुत्पन्नो ब्रह्मलोके सुरालये ॥ १४०२ ॥
नगरे नीलकुण्डाह्वे विजयात् सेनभूपतेः । पत्नी नयनचूलाऽभूद् गुणालङ्कारभूषिता ॥ १४०३ ॥
वज्रकम्बुः सुतस्तस्य स्नुषा हेमवती वरा । अभूतां सद्गुणश्रेष्ठि(णि)-शालिनौ रुचिराशयौ ॥ १४०४ ॥
श्रीकान्तस्यपुनोऽसुमान् स्वयम्भूरभवत्तयोः । वसुदत्तस्य जीवोऽथा-ऽभ्रमद् भूरिभवेष्वहो ॥ १४०५ ॥

For Private and Personal Use Only

जिनेन्द्रमतसंसेवी श्रीभूत्याह्वः पुरोहितः । तस्मिन्नेव पुरे जातो वसुदत्तासुमान् क्रमात् ॥ १४०६ ॥
पत्नी सरस्वती तस्य पतिभक्ता गुणाकरा । कुर्वाणा श्रीजिनप्रोक्तं धर्म्मं तस्थौ समाहिता ॥ १४०७ ॥
इतो गुणमती जीवो भ्रमन् भूरिषु योनिषु । विन्ध्याटव्यामभूत् कर्म्म-वशान्मातङ्गगेहिनी ॥ १४०८ ॥
गङ्गापङ्के निमग्नां तां गच्छज्जीवां गजप्रियाम् । वीक्ष्य साधुरदात् पञ्च-नमस्कारं कृपाशया ॥ १४०९ ॥
मृत्वा सरस्वती कुक्षा-वततार वसा वशा । सरस्वती प्रसूतेस्म पूर्णे मासे सुतां क्रमात् ॥ १४१० ॥
पुत्र्या वेगवती नाम श्रीभूतिः सप्रियो ददौ । क्रमाद्वेगवती जैन-धर्म्मद्विष्टाऽभवत् किल ॥ १४११ ॥
इतस्तत्र पुरोद्याने श्रीसुन्दरयतीश्वरम् । वन्द्यमानं जनैर्वीक्ष्य दध्यौ वेगवतीति सा ॥ १४१२ ॥
अयं कलङ्कितः साधुर्यदि स्यात् साम्प्रतं द्रुतम् । तदा जिनमते भूयान् कलङ्को जायतेऽखिलः ॥ १४१३ ॥
जगौ वेगवती नृणां पुरो ह्येष यतिः स्त्रिया । रममाणः समं दृष्टो मया कल्ये दिनात्यये ॥ १४१४ ॥
"रागेण व दोसेण व जो दोसं संजयस्स भासेइ । सो हिंडइ संसारे दुक्खसहस्साइं अणुहवंतो ॥ १४१५ ॥
श्रुत्वेति नगरीलोकैः तस्मिन् साधावनादरः । चक्रे तथा यथा सार्व–मते स्यादवहीलना ॥ १४१६ ॥
स्वस्मिन् कलङ्कदानं तु मत्वेत्यभिग्रहं ललौ । साधुर्येन ममाऽदायि मुधा कलङ्ककालिमा ॥ १४१७ ॥
तस्य पुंसस्त्रियो वापि विघ्नं भवतु विग्रहे । यद्यहं स्यां कलङ्की तु तदाऽस्तु भस्म मे तनुः ॥ १४१८ ॥

For Private and Personal Use Only

एवं कृत्वा प्रतिज्ञां स कायोत्सर्गे स्थितो यतिः । चक्रे शासनदेव्यैत्य वक्रं वेगवतीमुखम् ॥ १४१९ ॥
उक्तं शासनदेव्या च वेगवत्या स्त्रिया मुधा । कलङ्कः प्रददे साधोः भाव्यस्या मरणं ततः ॥ १४२० ॥
ततोऽतिपीडिता वेगवत्यभ्येत्यान्तिके यतेः । नत्वाऽवग् मयकाऽदायि कलङ्कोऽस्य मुनेर्मुधा ॥ १४२१ ॥
अभाग्यानां शिरोरत्न-मस्म्यहं धुरि साम्प्रतम् । यतो मया मुधा साधोः कलङ्कः प्रददे तदा ॥ १४२२ ॥
ततो वेगवती सज्जीभूता धर्म्मं जिनोदितम् । प्रपेदे सन्निधौ तस्य साधोरेव मुधा तदा ॥ १४२३ ॥
ततः प्रभावना जाता शासने श्रीजिनेशितुः । धर्म्मं वेगवती चक्रे पूजयन्ती जिनक्रमौ ॥ १४२४ ॥
दृष्ट्वा वेगवतीरूपं स्वयम्भूभूपतिस्तदा । ययाचे पितरं तस्याः पाणीपीडनहेतवे ॥ १४२५ ॥
श्रीभूतिरवदत् पुत्रीं निजां वेगवतीमिमाम् । न हि मिथ्यादृशो दास्ये दास्ये सुश्रावकाय तु ॥ १४२६ ॥
स्वयम्भूनृपतिर्हत्वा श्रीभूतिं तत्सुतां तदा । रुदन्तीं स्वगृहेऽनैषीद् भोगसौख्यकृते खलु ॥ १४२७ ॥
तदा वेगवती प्राह हत्वा मे जनकं त्वकम् । नीताहं ततोऽहं स्यां परत्र तव मृत्यवे ॥ १४२८ ॥
मोचयित्वा बलात् स्वं तु तदा वेगवती सती । लात्वा दीक्षां तपस्तीव्रं चक्रे द्वादशधा मुदा ॥ १४२९ ॥
मृत्वा वेगवती प्रान्ते विहिताराधनाक्रिया । दिव्यरूपधरा देवी द्वितीये ताविषेऽभवत् ॥ १४३० ॥
मिथ्यात्वभावितस्वान्तः स्वयम्भूभूपतिस्तदा । मृत्वाऽगान्नरके घोरे प्रथमे बहुदुःखदे ॥ १४३१ ॥

ततो निर्गत्य भूयिष्ठ-भवान् तिर्यग्भवान् क्रमात् । प्राप्य स्वयम्भू भूपालोऽपान्चकार तमो बहु ॥ १४३२ ॥
कर्म्मोपशमनाल्लक्ष्मी-पुरे कुशद्विजन्मनः । स्वयम्भूजीव उत्पन्नः सावित्रिकाप्रियोदरे ॥ १४३३ ॥
जाते तस्मिन् सुते विप्रो विधाय जननोत्सवम् । प्रभासकुन्द इत्याह्वां ददौ सज्जनसाक्षिकम् ॥ १४३४ ॥
वर्धमानः क्रमात् प्राप्त-यौवनोऽथ विरागवान् । दीक्षां प्रभासकुन्दस्तु ललौ संयतसन्निधौ ॥ १४३५ ॥
सदा तीव्रं तपः कुर्वन् षष्ठाष्टमादिकं मुदा । शरीरं कृशयामास प्रभासाभिधसंयतः ॥ १४३६ ॥
विद्याधरविभूतिं तु दृष्ट्वाऽन्येद्युः स संयतः । निदानमकरोदेवं भूयासं खेचरेश्वरः ॥ १४३७ ॥
तपोविक्रयतोऽनेन साधुना संयमो मणिः । त्यक्तो मुधा गृहीतस्तु शोकमुष्टिरशर्मदः ॥ १४३८ ॥
यतः–" छेत्तूण य कप्पूरं कुणइ वइं कोद्दवस्स सो मूढो । आचुण्णिऊण रयणं अविसेसो गेण्हए बोरं ॥१४३९॥
दहिऊण य गोसीसं गेण्हइ छारं तु सो अबुद्धीओ । जो चरिअ तवं घोरं मरइ सनियाणमरणेणं " ॥ १४४० ॥
अथ प्रभासकुन्दस्तु निदानोज्झितपुण्यकः । मृत्वा तृतीयताविषे उत्पन्नो निर्जरो वरः ॥ १४४१ ॥
च्युत्वा ततो दशास्यः स रत्नश्रवः–खगेशभूः । त्रिखण्डाधिपतिर्भूरि-विद्याभृत्सेवितोऽजनि ॥ १४४२ ॥
श्रीकान्तस्याऽसुमान् भूरि-भवान् भ्रान्त्वा भवान् क्रमात् । दशाननोऽभवल्लङ्का-नायको वरविक्रमः ॥१४४३॥
ब्रह्मस्वर्गाच्च्युतो जीवो धनत्तस्य राघवः । अभूद्दाशरथिः पुत्रो वृद्धो दशरथस्य तु ॥ १४४४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वसुदत्ताऽसुमान् मृत्वा श्रीभूतिश्च पुरोहितः । स लक्ष्मणोऽभवत् पुत्रोऽपरो दशरथस्य तु ॥ १४४५ ॥
उक्तंच–' जो वि हु सो सिरिभूई वेगवइकएण सयंभूणं वहिओ । धम्मफलेणं देवो जाओ अह वरविमाणंमि ॥
चइउं पइट्ठणयरे पुणव्वसू खेयराहिवो जाओ । महिलाहेउं सोयं करिअ नियाणं च पव्वइओ ॥ १४४७ ॥
काऊण तवं घोरं सणंकुमारे सुरो समुप्पन्नो । चइओ सोमित्तिसुओ जाओ वि हु लक्खणो एसो ॥ १४४८ ॥
सिरिकंतो य सयंभू कमेण जाओ पभासकुंदो सो । विज्जाहराण राया जाओ लंकाहिवो सूरो ' ॥ १४४९ ॥
गुणमत्यसुमान् मृत्वा भ्रान्त्वा भूरिषु योनिषु । भूत्वावेगवती स्वर्गे गत्वा सीताऽभवत्ततः ॥ १४५० ॥
धनदत्तादिभ्रात्रोर्यो जन्यचक्रोऽभवत् सुहृद् । सोऽस्मिन् भवे भवान् जातस्त्वं विभीषण ! साम्प्रतम् ॥ १४५१ ॥
योऽभूद् वृद्धो वृषः पञ्च-नमस्कारस्मृतः मृतः । छत्रछायमहीशस्य नन्दनो वृषभध्वजः ॥ १४५२ ॥
सोऽस्मिन् भवे दिवश्च्युत्वा कपिविद्याधराधिपः । सुग्रीवोऽजनि रामस्य लक्ष्मणस्याधुना सुहृत् ॥ १४५३ ॥
यतः–" एए सव्वेवि पुरा आसि णिरंतरं सिणेहसंबद्धा । रामस्य तेण णेहं वहंति णियमं च अणुकूला ॥ "
पूर्वं वेगवतीष्टाऽभू-द्वाढं स्वयम्भूभूपतेः । येन तेनेह सीतेयं दशास्येन हृताऽधुना ॥ १४५४ ॥
वेगावत्या भवे पूर्वे कलङ्कः साधवे ददे । अस्मिन्नतो भवे प्रापि कलङ्कः सीतया किल ॥ १४५५ ॥
यतः–" रागेण व दोसेण व जो दोसं संजयस्स भासेइ । सो हिंडइ संसारे दुक्खसहस्साइं अणुहवंता ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वयम्भुवा पुराऽमारि श्रीभूतिश्च पुरोहितः । तेनेह लक्ष्मणेनापि हतो दशाननः खलु ॥ १४५६ ॥
यतः—" जो जेण हओ पुव्वं सो तेणेव हणिज्जए ण संदेहो । एसा ठिईय नियय संसारत्थाण जीवाणं ॥ १ ॥ "
ततो विभीषणः प्राह भगवन् ! केन कर्म्मणा । लवाङ्कुशौ बलिष्ठौ तु जातौ तत्र निगद्यताम् ॥ १४५७ ॥
ज्ञान्याचष्टाऽथ काकन्द्यां पूर्यभूद् रतिवर्द्धनः । भूपस्तस्याभवत् पत्नी वर्या सुदर्शनाभिधा ॥ १४५८ ॥
तयोरभवतां पुत्रौ प्रियङ्करहितङ्करौ । सर्वगुप्तोऽभवन्मन्त्री प्रतिकूलो महीपतेः ॥ १४५९ ॥
सर्वगुप्तप्रिया दुष्टशीलाऽथ विजयावलिः । भोगाय प्रार्थयामास निद्यन्येर्द्युमहीपतिम् ॥ १४६० ॥
भणिताऽथ महीशेन मन्त्रिपत्नि ! त्वयाऽधुना । प्रोक्तमत्र परत्रापि भूरिदुःखप्रदं वचः ॥ १४६१ ॥
यतः–" अप्पाधूलिहि मेलिउं सयणा दीधउ जे उच्छार । पगि पगि माथा ढांकणुं जेणि जोइ परनारि ॥ १४६२ ॥
क्रमात् परनराश्लेषां वाञ्छती स्वीयगेहिनी । विज्ञाय मन्त्रिणा द्वेषो विशेषाद् भूपतौ दधे ॥ १४६३ ॥
क्रोधेन मन्त्रिणा गेहे ज्वालिते मेदिनीपतिः । पुत्रपत्नीयुतो यातो वाराणस्यां पुरि ध्रुवम् ॥ १४६४ ॥
सर्वगुप्त इतो मन्त्री राज्यं कृत्वाऽऽत्मसाद् द्रुतम् । दूतमप्रेषयत् काश्यां जेतं काशीपुराधिपम् ॥ १४६५ ॥
मन्त्रिणः सर्वगुप्तस्य यद्याज्ञा ध्रियते त्वया । तदा ते कुशलं भूरि-कालं भूप ! भविष्यति ॥ १४६६ ॥
काशीपतिर्धनः प्राह योऽस्ति स्वस्वामिवञ्चकः । तस्य को मन्यते चाज्ञां जानन् न्यायपथं किल ? ॥

For Private and Personal Use Only

* यतः—" सती पत्युः प्रभोः भृत्यः गुरोः शिष्यः पितुः सुतः । आदेशे संशयं कुर्वन् खण्डयत्यात्मनो व्रतम् ॥ 卐
काशीशेन तदाऽत्यन्तं [illegible] दूत एव स । सर्वगुप्तान्तिके गत्वा काशीशोक्तं न्यवेदयत् ॥ १४६८ ॥
श्रुत्वेति सर्वगुप्तोऽथ सन्नह्य शिबिरं निजम् । काशीनाथं विजेतुं तु चचालाऽतुलविक्रमः ॥ १४६९ ॥
काशीसत्कमथो देशं लुण्टयन् सर्वगुप्तकः । तृणवन्मन्यते विश्वं स्वीयदोरोजसा तदा ॥ १४७० ॥
काशीशः कसिपो भूपः आकार्य्य रतिवर्द्धनम् । सपत्नीनन्दनं भक्त्या गौरवं तस्य च व्यधात् ॥ १४७१ ॥
ततः कासिपभूपालःस्वामिनं रतिवर्द्धनम् । अग्रे कृत्याऽचलज्जेतुं सर्वगुप्ताभिधं रिपुम् ॥ १४७२ ॥
युद्धं कुर्वन् रणे सर्वगुप्तो भग्नबलस्तदा । रतिवर्द्धनभूपेन सार्द्धं दीनमना अभूत् ॥ १४७३ ॥
लात्वा सर्वबलं सर्व-गुप्तस्य मन्त्रिणोऽन्तिकात् । रतिवर्द्धनभूपालो यदाऽभूत् सबलो भृशम् ॥ १४७४ ॥
तदा नंष्ट्वा द्रुतम् सर्व-गुप्तो गत्वाऽतीदूरतः । अरण्येऽभूत् पुलिन्दस्य सदृशो विभवक्षयात् ॥ १४७५ ॥
विजित्य वैरिणं सद्यो रतिवर्द्धनभूपतिः । स्वीयपुर्यां समायातः कुर्वाणो विजयोत्सवम् ॥ १४७६ ॥
रतिवर्द्धनभूपाले स्वीये शेषबले सति । कसिपो मेदिनीपालः सुखं राज्यं चकार सः ॥ १४७७ ॥
अन्येद्युर्नगरोद्याने सूरीशं शीलसुन्दरम् । रतिवर्द्धनभूपालो वन्दितुं समुपेयिवान् ॥ १४७८ ॥
श्रुत्वा धर्म्मं समुत्पन्न वैराग्यो रतिवर्द्धनः । वितीर्य पुत्रयो राज्यं ललौ दीक्षां तदन्तिके ॥ १४७९ ॥

For Private and Personal Use Only

विजयावलिका मृत्वा संजाता राक्षसी तदा । रतिवर्द्धनराजर्षे-रुपसर्गं व्यधाद् भृशम् ॥ १४८० ॥
उपसर्गं वितन्वत्यां राक्षस्यां रतिवर्द्धनः । अवाप्य केवलज्ञानं मोक्षसौख्यमसाधयत् ॥ १४८१ ॥
इतः सम्प्राप्तवैराग्यौ प्रियङ्करहितङ्करौ । दत्त्वा स्वसूनवे राज्यं जगृहतुर्व्रतं तदा ॥ १४८२ ॥
षष्ठाष्टमादिकं तीव्रं तपो नित्यं समाहितौ । कुर्वाणौ सुखिनौ जातौ प्रियङ्करहितङ्करौ ॥ १४८३ ॥
समाधिमरणं प्राप्य प्रियङ्करहितङ्करौ । ग्रैवेयके गतौ धर्म्म-ध्यानैकलीनमानसौ ॥ १४८४ ॥
ग्रैवेयकं सुखं भुङ्क्त्वा प्रियङ्कर-हितङ्करौ । सञ्जातौ नन्दनौ दाश-रथेरत्र लवाङ्कुशौ ॥ १४८५ ॥
प्राग्भवार्जितपुण्येन रामपुत्रौ लवाङ्कुशौ । सञ्जातौ बलिनौ वर्य-रूपनिर्जितमन्थौ ॥ १४८६ ॥
एवं पूर्वभवान् राम-लक्ष्मणादिमहीभुजाम् । प्रोक्त्वा विशेषतो धर्म्मं जगौ सकलभूषणः ॥ १४८७ ॥
※ तथा हि–" वरिसह ते गेआ दीहडा जे जिणधम्मिहिं सार । तिन्नि सया ऊण सट्ठडीइं तइं गुणइ गमार ॥१॥卐
※ 'इयं मायारात्रिर्बहुलतिमिरा मोहललितैः, कृतज्ञानालोकास्तदिह निपुणं जाग्रत जनाः ।卐
अलक्षः संहर्तुं ननु तनुभृतां जीवितधना-न्ययं कालश्चौरो भ्रमति भुवनान्तः प्रतिदिनम्' ॥ २ ॥
'आसन्नसिद्धिआणं विहिबहुमाणो अ होइ नायव्वो । विहिचाओ अविहिभत्ती अभव्वजीअदूरभव्वाणं ॥ ३ ॥
धन्नाणं विहियोगो विहिपक्खाराहगा सया धन्ना । विहिबहुमाणा धन्ना विहिपक्ख अदूसगा धन्ना' ॥ ४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शत्रुञ्जयादितीर्थेषु ये यात्रां कुर्वते जनाः । तेषां स्वर्गापवर्गादि-सुखं हस्ततले भवेत् ॥ १४८८ ॥
अनादिकालसम्भूतं तीर्थं शत्रुञ्जयाचलः । यत्रानन्ताः शिवं प्राप्ता मुनयः क्षिप्तपातकाः ॥ १४८९ ॥
ये शत्रुञ्जयतीर्थेषु तिष्ठन्ति पक्षिणोऽपीह । तेऽपि स्तोकैर्भवैरेव गमिष्यन्ति शिवालयम् ॥ १४९० ॥
गतेषु तीर्थनाथेषु गते ज्ञाने च केवले । लोकान् भवाम्बुधेः शत्रु-ञ्जयाद्रिस्तारयिष्यति ॥ १४९१ ॥
जिनेष्वर्हन् यथा मुख्यः शैलेषु मन्दरो यथा । तथाऽयं सिद्धिभूमिभ्यो मुख्यो निगद्यते जनैः ॥ १४९२ ॥
यः श्रीसङ्घपतीभूय भूरीन् भव्यान् शिवाचले । वन्दयन्ति शिवं नेतुं लभन्ते नात्र संशयः ॥ १४९३ ॥
एवं श्रुत्वा वचो रामो जगौ शत्रुञ्जयाचले । यात्रां कर्त्तुं ममाऽस्तीच्छा साम्प्रतं मुनिसत्तम ! ॥ १४९४ ॥
ज्ञानी प्राह तु भव्यानां तीर्थे शत्रुञ्जयाभिधे । वाञ्छा यात्रां विधातुं हि भव्यानां भवति ध्रुवम् ॥ १४९५ ॥
येषां शत्रुञ्जये यात्रां कर्त्तुं वाञ्छा प्रजायते । सिद्धिं याति च धन्यः स शिवगामी भविष्यति ॥ १४९६ ॥
ततो दाशरथिः प्रेष्य वह्वीः कुङ्कुमपत्रिकाः । सङ्घमाकारयामास यात्रां कर्त्तुं शिवाचले ॥ १४९७ ॥
कल्याणखचिताः पञ्च शतानि जिनपालयाः । कलधौतमयाः सप्त शतानि द्वादशाधिकाः ॥ १४९८ ॥
वर्यकाष्ठमयाः पञ्च सहस्रा द्वादशाधिकाः । चेलुः पुर्यास्तदा दाशरथे सङ्घे मनोहरे ॥ १४९९ ॥ युग्मम् ॥
अनसां कोटयः सप्त भूरिकोटय नरास्त्रियः । महिषाः पृष्टिवाहाश्च कोटय एकोनविंशतिः ॥ १५०० ॥

For Private and Personal Use Only

गजा दश सहस्राणि ताक्ष्यां विंशतिकोटयः । चेलुर्दाशरथे सङ्घे भूरिवाद्यपुरस्सरम् ॥ १५०१ ॥
ग्रामे ग्रामे पुरे पुर्यां कुर्वन् स्नात्रोत्सवं मुदा । ययौ दाशरथिः शत्रुञ्जये तीर्थे शिवप्रदे ॥ १५०२ ॥
तीर्थे तत्राऽऽदिदेवस्य कृत्वा स्नात्रादिकं महः । आनर्च पादुके नाभि-सूनोर्दाशरथिर्मुदा ॥ १५०३ ॥
ततो मुक्ताफलैः स्फारतरै राजादनीतरुम् । वर्द्धयामास काकुत्स्थो गीतनृत्यपुरस्सरम् ॥ १५०४ ॥
तत्र श्रीआदिदेवस्य जीर्णस्य जिनसद्मनः । श्रीरामः कारयामास समुद्धारं शुभाशयः ॥ १५०५ ॥
कृत्वा दाशरथिः पूजां विस्तरात् प्रथमार्हतः । सङ्घं सन्मानयामास भक्तवस्त्रादिदानतः ॥ १५०६ ॥
प्रतिलाभ्य गुरून् भक्त-वस्त्रविश्राणनादिभिः । रामः सन्तोषयामास याचकानपि भावतः ॥ १५०७ ॥
ततो रैवतके तीर्थे गत्वा श्रीनेमिनाथकम् । विस्तरात् पूजयामास भक्त्या दशरथात्मजः ॥ १५०८ ॥
पश्चादायात् क्रमाद्रामो विसृज्य सङ्घमादरात् । वर्योत्सवमलश्चक्रे साकेतं भ्रातृसंयुतः ॥ १५०९ ॥
अन्यदाऽष्टापदे तीर्थे चक्रिणाऽऽद्येन कारिते । सिंहनिषिद्ययाकारे प्रासादेऽभ्रंलिहे वरे ॥ १५१० ॥
चतुर्विंशतिरर्हन्तो वृषभाद्यास्तमोपहाः । मानप्रमाणभृद्देहाः श्रुता रामेण सद्गुरोः ॥ १५११ ॥
उक्तंच—" उसभो पंच धणुस्सय नव पासो सत्त रयणीओ वीरो ।
नव सत्त पंच अट्ठ य पन्ना दस पंच परिहाणी ॥ १ ॥

For Private and Personal Use Only

ततः श्रीसङ्घमाकार्य भूत्वा सङ्घपतिः स्वयम् । रामोऽचालीज् जिनान् नन्तुं तीर्थेऽष्टापदनामनि ॥ १५१२ ॥
आरुह्याऽष्टापदं शैलं प्रत्येकं जिननायकम् । वृषभादीन् मुदाऽऽनर्च नानोत्सवपुरस्सरम् ॥ १५१३ ॥
यतः—" चत्तारि अट्ठ दस दोय वंदिया जिणवरा य चउव्वीसं ।
परमट्ठनिट्ठिअट्ठा सिद्धा सिद्धिं मम दिसंतु ॥ १५१४ ॥
ततः सम्मेतशिखरे तीर्थे गत्वा जिनेश्वरान् । पूजयित्वा सुमै रामः स्वं जनुः सफलं व्यधात् ॥ १५१५ ॥
अट्ठावयम्मि उसभो सिद्धिगओ वासुपुज्ज चंपाए । पावाए वद्धमाणो अरिट्ठनेमि अ उज्जंते ॥ १ ॥
अवसेसा तित्थयरा जाइजरामरणबंधणविमुक्का । सम्मेयसेलसिहरे वीसं परिनिव्वुए वंदे ' ॥ २ ॥
ततो रामो वितन्वान उत्सवं स्वपुरे क्रमात् । पृथिवीं न्यायमार्गेण पालयामास सन्ततम् ॥ १५१६ ॥
अन्यदोत्पन्नवैराग्यो लोचं कृत्वा स्वपाणिना । सीता त्यक्तगृहारम्भा जिघृक्षुरभवद् व्रतम् ॥ १५१७ ॥
तादृशीं जानकीं दृष्ट्वा रामो मूर्च्छामुपागतः । पतितो धरणौ स्वस्थी-कृतश्चन्दनसेवनैः ॥ १५१८ ॥
ऊचे रामो मया पत्नि ! कोऽपराधः कृतस्तव । कथं मामेककं मुक्त्वा व्रतं लास्यति साम्प्रतम् ? ॥ १५१९ ॥
त्वां विना मेऽधुना प्राणाः करिष्यन्ति प्रयाणकम् । सीताऽवग् न पते ! शोकः क्रियते पुरुषोत्तमैः ॥ १५२० ॥
एक एवासुमान् याति परलोकं स्वकर्म्मणा । एक एव समायाति प्राग् जन्माऽर्जितकर्म्मणा ॥ १५२१ ॥

* " भवारण्यं भीमं तनुग्रहमिदं छिद्रबहुलं बली कालश्चौरो नियतमसिता मोहरजनी ।卐

गृहीत्वा ज्ञानस्य विरतिफलकं शीलकवचं समाधानं कृत्वा स्थिरतरदृशो जाग्रत जनाः ! ॥ १५२२ ॥

एवं पर्यवसाय्यैव रामं जनकनन्दिनी । सर्वगुप्तगुरूपान्ते ललौ दीक्षां शिवप्रदाम् ॥ १५२३ ॥

तदा रामेण विदधे तथा दीक्षोत्सवो महान् । यथा प्रापुर्जना बोधि-बीजं निर्वृतिदायकम् ॥ १५२४ ॥

सूरिणोक्तं त्वया सीते ! पालनीय तथा व्रतम् । यथा करतलेऽभ्येति शिवश्रीस्तव लीलया ॥ १५२५ ॥

सुव्रतायतिनीपार्श्वे सर्वगुप्तेन सूरिणा । मुक्ता सीता तदा शुद्ध-क्रियाशिक्षणहेतवे ॥ १५२६ ॥

श्रीसर्वगुप्तसूरीश-पार्श्वे श्रीरामलक्ष्मणौ । लवाङ्कुशौ तथाऽन्येऽपि धर्म्मं श्रोतुमुपागमन् ॥ १५२७ ॥

सीतादियतिनीयुक्ता सुव्रता च प्रवर्तिनी । धर्म्मोपदेशनां श्रोतुं श्राद्धीयुक्ता समागमत् ॥ १५२८ ॥

सूरीशः सर्वगुप्तोऽथ मेघगर्जितया गिरा । देशनां कर्त्तुमारेभे भव्याङ्गिबोधहेतवे ॥ १५२९ ॥

यतः-" जत्थ अहिंसा सच्चं अदत्तपरिवज्जणं च बंभं च । दुविहपरिग्गहविरई तं हवइ सिवाय चारित्तं ॥ १ ॥

विणओ दया दाणं सीलं णाणं दमो तहा झाणं । कीरइ जं मोक्खट्ठा तं हवइ सिवाय चारित्तं ॥ २ ॥

जइ धम्मक्खर संभलइ नयणे निद्द न माइ । वत्त करंताए मर कूलरेडा व किं रयणि विहाइ (?) ॥ ३ ॥

धम्मसरिसा जे गया ते गुणसायरा दीह । अवरह पापारंभी सिउं भा सम देजे लीह ॥ ४ ॥

कोइ पुण भवियसीहो इक्कभवे भाविऊण सम्मत्तं । वीरो कम्मविसोहिं काऊण य लहइ निव्वाणं ॥ ५ ॥
लद्धूण वि जिणधम्मे बोहिं स कुडुंबकद्दमम्मि निहुत्तो । इन्दियसुहसाउलओ परिहिंडइ सो वि संसारे ॥ ६ ॥"
श्रुत्वैतद्राम आचष्ट संसारासारतां पुनः । जानतो मे कथं नैव विरागो जायतेतराम् ? ॥ १५३० ॥
ज्ञान्याऽऽचष्टाच्युतेनामा बलिना मोह एधते । तेन मोहेन ते नैव वैराग्यं जायतेऽधुना ॥ १५३१ ॥
ततो रामो जगौ मोक्षो भवात् कस्माद् भविष्यति । ज्ञान्याह ते शिवप्राप्ति-र्जायतेऽत्र भवे बलिन् ! ॥ १५३२ ॥
श्रुत्वेति राघवः सर्व-सर्वज्ञसदनेष्वपि । व्यधात् पूजां जिनेशानां सर्वपौरसमन्वितः ॥ १५३३ ॥
इतः सीता तपस्तीव्रं कुर्वाणा प्रतिवासरम् । दवदग्धावनीरुड्वत् कृशदेहाऽभवत्तदा ॥ १५३४ ॥
महाव्रतानि पञ्चैव शुद्धानि जनकात्मजा । पालयन्ती तपस्तीव्रं ततान शिवशर्मदम् ॥ १५३५ ॥
षष्ठाष्टमादिकं तीव्रं कुर्वाणा जनकात्मजा । षष्टिं वर्षाणि दिवसा-स्त्रयस्त्रिंशद् व्यधात्तमाम् ॥ १५३६ ॥
प्रान्ते संलेखनां कृत्वा-ऽऽराधनां क्षमणात्मिकाम् । सीता मृत्वाऽच्युते स्वर्गे-ऽच्युतेन्द्रोऽजनि सत्तनुः ॥१५३७॥
द्वाविंशतिसमुद्रायु-र्भूरिदेवनिसेवितः । मनसा निर्जरीभोग-लीनोऽच्युताधिपोऽजनि ॥ १५३८ ॥
यतः-"दो कप्प कायसेवी दो दो फरिसरूवसद्देहिं । चउरो मणेणुवरिमा अप्पविआरा अणंतसुहा ॥ १ ॥"
नारि मृत्वा प्रजायेत नरो नरोऽबला पुनः । राजा रङ्को भवेद्रङ्को राजा कर्म्मनियोगतः ॥ १५३९ ॥

यतः–" राया जायइ भिच्चो भिच्चो रायत्तणं पुण उवेइ । माया वि हवइ धूया पिया वि पुत्तो समुब्भवइ ॥ १ ॥
एवं अरहरघडी-जंतसमे इह समत्थ संसारे । हिंडंति सव्वजीवा सकम्म विप्फंदिअं सुइरं ॥ २ ॥"
रामो लक्ष्मणसंयुक्तः पालयन् मेदिनीं चिरम् । लक्ष्मणे निबिडां प्रीतिं धत्ते सोऽपि च राघवे ॥ १५४० ॥
अन्यदा वासवोऽप्राक्षी-दुपविष्टः सभान्तरे । अयोध्यायां नर्या रामो भूपोऽस्ति लक्ष्मणान्वितः ॥ १५४१ ॥
रामेऽस्ति यादृशी प्रीति-र्लक्ष्मणस्याधुना किल । रामस्य लक्ष्मणे प्रीति-र्विद्यते यादृशी पुनः ॥ १५४२ ॥
न तादृश्यधुनाऽन्यत्र कस्यापि वीक्ष्यते भुवि । तदैको निर्जरः प्राह सत्यमेतत्त्वयोदितम् ॥ १५४३ ॥
अहं तयोः करिष्येऽहं परीक्षां साम्प्रतं प्रभो ! । ततः स निर्जरोऽयोध्या-नगरीं समुपेयिवान् ॥ १५४४ ॥
लक्ष्मणस्यानुजस्यैव भृत्यस्य रूपमञ्जसा । कृत्वा तस्यान्तिकेऽभ्येत्य जगादेति कृपास्पदम् ॥ १५४५ ॥
उत्पन्नशूलरोगः सन् रामोऽद्य मृतिमीयिवान् । आकर्ण्यैतद्वचोऽकस्माद् वज्रपातसहोदरम् ॥ १५४६ ॥
लक्ष्मणस्य तदा प्राणाः परलोकमसाधयन् । मोहेन जायते किं न नृणां दुःखादिकं खलु ॥ १५४७ ॥
लेख्यबिम्बमिव श्रीशं स्थितं प्रगतजीवितम् । दृष्ट्वा देवो निजे चित्ते दध्यावेवं पुनः पुनः ॥ १५४८ ॥
मयोक्ते हास्यवचने लक्ष्मणोऽयं महीपतिः । मृतोऽतोऽहं कथं पापा-च्छुटिष्यामि दुराशयः ॥ १५४९ ॥
मृतस्य चक्रिणोऽशक्तो जीवितं दातुमात्मना । जानन् देवो ययौ स्वर्गे विषादग्रस्तमानसः ॥ १५५० ॥

यतः–" असमिक्खिअकारीणं पुरिसाणं इत्थपाव हिययाण । सयमेव कयं कम्मं परितावपरं हवइ पच्छा " ॥१५५१॥
तदा तत्रैत्य गेहिन्यो मृतं वीक्ष्य पतिं स्फुटम् । रुदन्त्यो जगदुः कान्तः ! जल्प त्वमेकदा किल ॥ १५५२ ॥
निशम्य लक्ष्मणं त्यक्त–प्राणं दाशरथिस्तदा । आगत्यावग् वचो देहि भो लक्ष्मण ! सहोदर ! ॥ १५५३ ॥
अजल्पन्तं रमानाथं रामोऽवग् न मया तव । अपराधः कृतोऽतस्त्व-मुत्तरं वितरैकशः ॥ १५५४ ॥
आलिङ्ग्य लक्ष्मणं रामः प्राहोत्तिष्ठ सहोदर ! । त्वं विना निखिलं राज्यं दुःखितं विद्यतेऽधुना ॥ १५५५ ॥
यतः–" उट्ठेहि सयणवच्छल ! वाया मे देहि विलवमाणस्स । किं व अकारण कुविओ हरसि मुहं दोसरहियस्स ॥१॥
ण तहा डहइ णिदाहो दिवायरो हुअवहो व्व पज्जलिओ । जह डहइ णिरवसेसं देहं एक्कोअरविओगो ॥ २ ॥
किं वा करेमि वच्छय ! कत्तो वच्चामिहं तुमे रहिओ । ठाणं पिच्छामि न तं निव्वाणं जत्थ उ लहामि ॥ ३ ॥
हा वच्छ ! मुंचसु इमं कोवं सोमो अ होहि संखेवं । संपइ अणगाराणं वट्टइ वेला महरिसीणं ॥ ४ ॥ "
सूर्योऽस्तमगमत् पश्य लक्ष्मणोत्थाय वेगतः । कुमुदानि प्रफुल्लानि निद्राणानि कजानि च ॥ १५५६ ॥
इष्टं यद्विद्यते तेऽथ तज्जल्प पुरतो मम । विषादं त्यज संहर्षं श्रय श्रीनिलयाऽधुना ॥ १५५७ ॥
उत्तिष्ठ सोदरेदानीं व्यतिक्रान्ता निशाऽखिला । उदयन् विद्यते सूर्यो बोधयन् पद्मकाननम् ॥ १५५८ ॥
त्वय्यजल्पति वादित्रं वाद्यते न हि केनचित् । जिनालयेऽपि सङ्गीतं कारयिष्यति कोऽधुना ॥ १५५९ ॥

लक्ष्मणं चाऽद्य लक्ष्मीशं मृतं ज्ञात्वा बिभीषणः । सुग्रीवो वर्द्धनो मेघ-श्चन्द्रोदरः समागमन् ॥ १५६० ॥
रामं प्रति जगुः स्वामिन् ! शोको न क्रियते सता । जलबुद्बुदतुल्यानि देहानि सन्ति देहिनाम् ॥ १५६१ ॥
यतः–" जलबुब्बुय सरिसाइं राहव ! देहाइं सव्वजीवाणं । उप्पज्जंति चयंति अ णाणाजोणीसु पत्ताणं ॥ १ ॥
इंदा सलोगपाला भुंजंता उत्तमाइ सोक्खाइं । पुण्णखयम्मि तेऽविअ चइउं अणुहोंति दुक्खाइं ॥ २ ॥
ते तत्थ मणुअदेहे तणबिंदुचलाचले अइदुग्गंधे । उप्पज्जंति महाजस ! का सन्ना पायए लोए ॥ ३ ॥
अन्नं तु मयसमाणं सोयइ अहिअं विमूढभावेणं । मच्चुवयणे पविट्ठं ण सोयई चेव अप्पाणं ॥ ४ ॥
तं णत्थि जीवलोए ठाणं तिलतुसतिभागमित्तंपि । जत्थ ण जाओ जीओ जत्थेव ण पाविओ मरणं ॥ ५ ॥"
एवं पुनः पुनः प्रोक्ते सुग्रीवेण खगामिना । रामो जगौ मृतो नैव सोदरो मेऽधुना खलु ॥ १५६२ ॥
ततो लक्ष्मणवक्त्रं तु दृष्ट्वाऽऽहोत्तिष्ठ सोदर ! । साध्यते विषयोऽन्योऽपि वैरिवर्गोऽखिलोऽपि च ॥ १५६३ ॥
ततो ग्रासं मुखे लक्ष्मी-पतेः कृत्वाऽऽह राघवः । भो भ्रातर् ! भुङ्क्ष्व पक्वान्नं पिब स्वच्छं पयः पुनः ॥ १५६४ ॥
ततो विभीषणः प्राह भो ! रामोत्तिष्ठ शीघ्रतः । वैरिणः शिबिरं चन्द्र(ण्ड)-मागतं स्वपुरान्तिके ॥ १५६५ ॥
ततो रामः समुत्थाय चटायित्वा गुणे धनुः । टणत्कारं विधायाशूपविष्टो लक्ष्मणान्तिके ॥ १५६६ ॥
इतोऽच्युतेश्वरः सीताजीवोऽपि मोहकर्दमे । रामं स्वकान्तमैक्ष्येति दध्यौ पुनः पुनर्हृदि ॥ १५६७ ॥

मदीयो रमणो रामो मोहजालेऽसुखप्रदे । पतितो नरके गामी कथं रक्षिष्यते मया ॥ १५६८ ॥
ततोऽच्युतेश्वरोऽभ्येत्य विप्रवेषधरस्तदा । रामं प्रति जगौ मोह-पाशे किं पतितोऽसि हि ? ॥ १५६९ ॥
यतः–" न य होइ कज्जसिद्धी एव कुणंताण मोहगहियाणं । जायइ सरीरखेयो णवरं विवरीअबुद्धीणं ॥ १ ॥ "
एष ते सोदरो मृत्युं प्राप्तोऽतस्त्वं च राघव ! । कुरुष्व वह्निसंस्कारं नीत्वा प्रेतवनेऽधुना ॥ १५७० ॥
रामोऽवग् भवता कूटं जल्प्यते साम्प्रतं स्फुटम् । सुप्तोऽस्ति निर्भरं भ्राता विनिद्रोऽथ भविष्यति ॥ १५७१ ॥
एवं प्रोक्त्वा निजस्कन्धे कृत्वा पुरबहिर्वने । गत्वा मुक्त्वा वने राम आनीयाम्राणि ऊचिवान् ॥ १५७२ ॥
भ्रातरुत्तिष्ठ वर्याणि सहकारफलानि तु । अमूनि भक्षयेदानीं तृप्तो भवेह साम्प्रतम् ॥ १५७३ ॥
ततोंसे लक्ष्मणं कृत्वा यावच्चचाल राघवः । तावत् स निर्जरश्चैकं मृतं नरं निजांसगम् ॥ १५७४ ॥
कृत्वा सन्मुखमायात-स्तदा दाशरथेः पुरः । रामोऽवग् मृतकं स्कन्धे किं कृतं भवताऽधुना ॥ १५७५ ॥ युग्मम् ॥
देवोऽवग् मृतकस्यास्य दत्त्वौषधानि साम्प्रतम् । जीवयिष्याम्यतो राम-स्तं प्रति प्रोक्तवानिति ॥ १५७६ ॥
मृतः कोऽपि न जीवेद्धि ततः स निर्जरो जगौ । इदं चेन्मृतकं ह्येत-ज्जीविष्यति कथं तव ? ॥ १५७७ ॥
ततः स निर्जरः पद्मं शिलापृष्ठे दृढे तदा । वप्त्वा सिञ्चन् कबन्धेन राघवेणावलोकितः ॥ १५७८ ॥
रामेणोक्तं शिलायां तु न पद्मं वर्द्धते क्वचित् । स देवोऽवक् कथं तर्हि मृतकं जीववद्भवेत् ? ॥ १५७९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यादि बहुशो वारान् वालुकादिप्रदर्शनात् । रामं सीताऽच्युताधीशो बोधयामास स वृषे ॥ १५८० ॥
ततः स वासवः प्रादुर्भूय स्वगमनं दिवः । ज्ञापयित्वा स्थिरीचक्रे रामं दीक्षाश्रीहेतवे ॥ १५८१ ॥
प्रबुद्धो राघवो वह्नि-संस्कारं कमलापतेः । कृत्वा दीक्षां गृहीतुं तु शत्रुघ्नं प्रत्यवक् तदा ॥ १५८२ ॥
अहं दीक्षां गृहीष्यामि राज्यं त्वं लाहि साम्प्रतम् । शत्रुघ्न ऊचिवान् पूर्व-महं लास्यामि संयमम् ॥ १५८३ ॥
उक्तंच–" पिय विभवेण एत्तो सक्कारेऊण लक्खणं रामो । पुहइए पालणट्ठा सिग्घं चिअ भणइ सत्तुग्घं ॥ १ ॥
वत्थ ! तुमं सयलमिणं भुंजसु रज्जं णराहिव समग्गं । संसारभमणभीओ पविसामि तवोवणं अहयं ॥ २ ॥
सत्तुग्घो भणइ तओ अलाहि रज्जेण दुग्गइकरेण । संपइ मोत्तूण तुमे देव ! गई णत्थि मे अण्णा ॥ ३ ॥"
शत्रुघ्नं राज्यमगृह्णन्तं ज्ञात्वा दाशरथिस्तदा । अनङ्गलवणं पुत्रं प्रत्युवाच स्फुटाक्षरम् ॥ १५८४ ॥
राज्यमेतद् गृहाण त्वं गृहीष्येऽहं तु संयमम् । पुत्रो जगौ विना त्वं तु स्थातुं शक्नोमि न क्षणम् ॥ १५८५ ॥
ततो रामो निजे पट्टे बलेन वृद्धमङ्गजम् । अतिष्ठिपद् बहुक्ष्माप-साक्षिकं लसदुत्सवम् ॥ १५८६ ॥
तदा विभीषणः पुत्रं सुभूषणाभिधं वरम् । स्वपट्टेऽतिष्ठित्पुत्रं सुग्रीवोऽङ्गदनामकम् ॥ १५८७ ॥
अन्येषामङ्कुशादीनां नन्दनानां यथोचितम् । रामो विश्राणयामास विषयान् विषयोज्झितः ॥ १५८८ ॥
तदाऽन्ये बहवो भूपा रामेण सह संयमम् । लातुकामा निजं राज्यं स्वपुत्रेभ्यो ददुर्मुदा ॥ १५८९ ॥

For Private and Personal Use Only

तदाऽर्हद्दाससुश्राद्ध-मुखात् सुव्रतसंयतम् । समागतं निशम्याशु रामो हर्षं समागमत् ॥ १५९० ॥
ततोभूरि-महीपाल-विद्याधरसमन्वितः । तत्रैत्य तं यतीशं तु ननामाऽनघमानसः ॥ १५९१ ॥
उत्तार्य्य मुकुटादीनि भूषणान्यखिलान्यपि । रामो व्रतं ललौ भूरि-भूपविद्याधरान्वितः ॥ १५९२ ॥
तदा बहु सहस्राणि भूपालाः साधुसन्निधौ । जगृहुः संयमं सद्यः संसाराम्बुधितारकम् ॥ १५९३ ॥
विशुद्धं चरणं शश्वत् पालयन् राघवो मुदा । विनयादपठद् भूरि-शास्त्राणि गुरुसन्निधौ ॥ १५९४ ॥
शत्रुघ्नोऽपि तदा दीक्षां ललौ बिभीषणोऽपि च । ताभ्यां सार्द्धं महीपालाः बहवः संयमं ललुः ॥ १५९५ ॥
सार्द्धं रामेण भूपालाः सहस्राणि तु षोडश । जगृहुः संयमं मुक्त्वा तृणवद्राज्यमञ्जसा ॥ १५९६ ॥
(नारीणां)सहस्राणि त्रयस्त्रिंशत् सप्ताधिकानि तद्दिने । प्रव्रज्यां जगृहुः लक्ष्मी-वती साध्व्यन्तिके मुदा ॥ १५९७ ॥
श्रीसुव्रतान्तिके रामः पठन् शास्त्राणि भूरिशः । पपाठ नवपूर्वाणि सार्द्धानि विनयाश्रितः ॥ १५९८ ॥
ततो गुरूपदेशेन विहारमेककः करन् । रामर्षिः कुरुते स्मोग्रं तपोऽभिग्रहभाक् सदा ॥ १५९९ ॥
" यतः–अह णिग्गओ मुणी सो गुरुणा अणुमोइओ पउमनाहो । पडिवण्णो अ विहारं उत्तमसामत्थसंपण्णो ॥ १ ॥ "
भूमिभृद्गह्वरे तस्यां रात्रौ दाशरथेर्यतेः । तृतीयं ज्ञानमुत्पन्नं तद्ज्ञानावरणक्षयात् ॥ १६०० ॥
अवधिज्ञानतस्तुर्ये नरके लक्ष्मणं गतम् । विज्ञाय ध्यातवानेवं भवस्य विषमां स्थितिम् ॥ १६०१ ॥

सय सत्त कुमारत्ते तिन्नेव सयाणि मंडलित्ते य । चत्तालिसय विजए जस्स उ संवच्छरातीआ ॥ १ ॥
एक्कारस य सहस्सा सपंच णवया तहेव सट्ठिजुआ । वरिसाणि महारज्जे जेण सयासे ठिया विसया ॥ २ ॥
बारस चेव सहस्सा हवंति वरिसाण पंचवीसूणा । भोत्तूण इन्दियसुहं गओ य नरयं अणिमिअप्पा ॥ ३ ॥
देवाण को व दोसो परभवजणिअं समागयं कम्मं । बन्धवनेहनिहेणं मओ गओ लक्खणो नरयं ॥ ४ ॥"
मम पूर्वभवोद्भुतः स्नेहोऽभूल्लक्ष्मणे मुधा । न कृतात् कर्म्मणः कोऽपि छुटिष्यति तनूधरः ॥ १६०२ ॥
प्रायो मोहसुरामत्तो जीवो नैव हिताहिते । जानीतेऽनादिसंसार-भ्रमखिन्नो दिवानिशम् ॥ १६०३ ॥
लक्ष्मणोऽपि मम भ्राता तुर्ये श्वभ्रे गतो यदि । तदाऽन्येषां नृणां पापात् किं किं दुःखं न जायते ? ॥ १६०४ ॥
यतः–" एगो य सत्तमाए पंच य छट्ठी पंचमाए एगो । एगो चउत्थीए कण्हो कण्णो पुण तच्चपुढवीए ॥ १ ॥"
अथ राममुनिः षष्ठो-पवासी विहरन् भुवि । महापुर्यां विवेशैव भिक्षाग्रहणहेतवे ॥ १६०५ ॥
तत्रैत्य भूपतिः सोमः प्रणम्य राघवं प्रति । प्राहाऽथाऽस्मद्गृहात् भिक्षां गृहाणाऽनुगृहाण माम् ॥ १६०६ ॥
ततो राम ऋषिः प्राह न ह्येकस्मिन् गृहे मम । भिक्षां प्रकल्पते लातुं ततो नोच्यमिदं वचः ॥ १६०७ ॥
ततो रामयतिर्भिक्षां शुद्धां पश्यन् गृहे गृहे । भीमस्य वणिजो गेहे शुद्धान्नमाप्तवाँस्तदा ॥ १६०८ ॥
तदा तस्याऽऽलये पुष्प–रत्नवृष्टिं सुधाभुजः । वितेनिरे तथा हर्षो यथाऽभूद् द्युसदामपि ॥ १६०९ ॥

तत्र रत्नपुरे यत्र यत्र गेहे च गेहिनः । रामो याति तदा ते तु पक्वान्नं ददते जनाः ॥ १६१० ॥
अतीवादरतोऽशुद्धमाहारं राघवो यतिः । ज्ञात्वेत्यभिग्रहं घोरं जग्राह शिवहेतवे ॥ १६११ ॥
यदाऽटव्यां ममाहारः शुद्धो हस्ते चटिष्यति । भोक्तव्यं मयका तस्मिन् दिनेऽन्यस्मिन् मनाग् न हि ॥१६१२॥
कदाचिद् वासरे तस्मिन् कदाचिदपरे पुनः । कदाचित् सप्तमे षष्ठे मासे मासद्वये पुनः ॥ १६१३ ॥
भिक्षां शुद्धामटव्यां तु लभमानश्च राघवः । चकार पारणं घोरं संसाराम्बुधितारणम् ॥ १६१४ ॥
एकदा श्रीपुरेशस्य मधुभूमिपतेर्वने । जिमतः शुद्धमाहारं प्रापद् रामो यतिर्यदा ॥ १६१५ ॥
तदा देवैः समागत्य वृष्टिः कुसुमरत्नयोः । विदधे भूपतेरग्रे रामर्षेस्तिष्ठतः सतः ॥ १६१६ ॥
रामे कोटिशिलायां तु तस्थुषि ध्यानतत्परे । प्रतिकूलानुकूलाश्चो-पसर्गा विहिताः सुरैः ॥ १६१७ ॥
माघस्य शुद्धपक्षे तु द्वादश दिवसात्यये । पश्चिमे प्रहरे चन्द्रे भरणीभस्थितेऽन्यदा ॥ १६१८ ॥
क्षपकश्रेणिकारूढः रामः क्षिपंस्तमश्चयम् । अवाप केवलज्ञानं विश्वविश्वप्रकाशकम् ॥ १६१९ ॥ युग्मम् ॥
तदाऽभ्येत्य सुरा दाश-रथेः केवलचिन्महः । चक्रुर्विविधवाद्यादि-सुन्दरं मुदिताशयाः ॥ १६२० ॥
रामस्य केवलज्ञानोत्पत्तिं ज्ञात्वाऽवधेश्चिदः । स्वर्गात् सीतेन्द्र आगत्य चक्रे चारु महोत्सवम् ॥ १६२१ ॥
त्वयाऽद्य कर्मसङ्घातं क्षिप्त्वा तीव्रतपोऽसिना । प्राप्तं ज्ञानमिति स्तौति सीतेन्द्रो मुदिताशयः ॥ १६२२ ॥

यतः–बहुदुक्खजालपुण्णं कसायगाहाउलं भयावत्तं । संजमजाणारूढो संसारमहोयही तिण्णो ॥ १६२३ ॥
झाणाणिलाहएणं विविह तविंधणमहंतजलिएणं । णाणाणलेण राहव ! तुमए जम्माडवी दड्ढा ॥ १६२४ ॥
* "वैरग्गमुग्गरेणं विचुण्णिअं कम्मपंजरं सिग्घं । हणिओ अ मोहसत्तू उत्तसमसूलेण धीरेणं ॥ १ ॥" 卐
अथ सीतेन्द्र आकर्ण्य चतुर्थे नरके स्थितम् । लक्ष्मणं नरके तत्र गत्वा ददर्श नारकान् ॥ १६२५ ॥
यतः–"नरएसु जाइं अइकक्खदुक्खाइं परतिक्खाइं । को वण्णेइ ताइं जीवंतो वासकोडीवि ॥ १ ॥
कक्खडदाहं सामलि असिवणवेअरणिपहरणसएहिं । जा जा अण्णाओ पावंति नारया तं अहम्मफलं ॥ २ ॥"
क्रियमाणां भृशं पीडां देवैः परमधार्मिकैः । लक्ष्मणस्य दशास्यस्य सीतेन्द्रो दृष्टवान् स्वयम् ॥ १६२६ ॥
ततो मिथो वितन्वानौ युद्धं लक्ष्मणरावणौ । सीतेन्द्रोऽवग् महाकाष्टं सर्वं पापविजृम्भितम् ॥ १६२७ ॥
यतः–"के इत्थ सामलीए कंटयपउराए विलइया संता । ओयरणारुहणाइं कारिज्जंतेऽत्थ बहुआइं ॥ १ ॥
जंतेसु केवि छुडा पीलिज्जंते पुरा अकयपुन्ना । कंडूसु डद्धपाया उज्झंति अहोमुहा अन्ने ॥ २ ॥
असिचक्कमोग्गरहता लोलंता कक्खडे धरणिवट्ठे । खज्जंति आरसंता चित्तयवयवग्घसीहेहिं ॥ ३ ॥
पाइज्जंति रडंता सुतत्ततवुतंबसण्णिहं कललं । असिपत्तवणगया विअ अन्ने छिज्जंति सत्थेहिं ॥ ४ ॥"
ततः सीताऽच्युताधीशो दध्यौ स्वयं कृताघतः । किं किं न लभते दुःखं जीवश्चतुर्गतौ गतः ? ॥ १६२८ ॥

For Private and Personal Use Only

ततः सीताऽसुमान्निन्द्रः समेत्य रामसन्निधौ । नत्वाऽप्राक्षीत कदा मोक्षं गन्ता लक्ष्मणनायकः ॥ १६२९ ॥
रामोऽवक् पुष्करे द्वीपे विदेहे पद्मपत्तने । लक्ष्मणप्राणभृच्चक्री पद्मनामा भविष्यति ॥ १६३० ॥
प्रपाल्य चक्रिपदवीं भूत्वा तीर्थङ्करः पुनः । छित्त्वाऽखिलतमो मोक्षं गन्ता पद्मजिनेश्वरः ॥ १६३१ ॥
हनुमान्नन्दनं स्वीयं राज्ये न्यस्य विरागवान् । ललौ दीक्षां क्रमाच्छत्रु-ञ्जये मुक्तिमीयिवान् ॥ १६३२ ॥
विन्ध्याशैलवने प्राप्ता-विन्द्रजिन्मेघवाहनौ । प्रापतुः केवलज्ञानं तत्तीर्थं च तदाह्वया ॥ १६३३ ॥
नर्मदायास्तटे यत्र कुम्भकर्णः शिवं ययौ । तत्तीर्थं कुम्भकर्णाह्वं बभूव भुवि विश्रुतम् ॥ १६३४ ॥
राज्ये स्वं स्वं सुतं न्यस्य सोदरौ द्वौ लवाङ्कुशौ । लात्वा दीक्षां विदं प्राप्य सेत्स्यतः सिद्धपर्वते ॥ १६३५ ॥
रामं केवलिनं नत्वा सीतेन्द्रो धर्म्मवासितः । अच्युते तविषे सद्यो जगामामलमानसः ॥ १६३६ ॥
ततो दाशरथिर्ज्ञानी विहरन् वसुधातले । अयोध्यानगरो-पान्तवनेऽथ समवासरत् ॥ १६३७ ॥
उद्यानपालकाद्राम-मागतं नगरान्तिके । श्रुत्वाङ्कुशलवौ (तौ तु) धर्मं श्रोतुं समागतौ ॥ १६३८ ॥
ततो रामो ददौ धर्मो-पदेशमिति सादरम् । धर्म्मादेव शिवप्राप्ति-र्जायते देहिनां किल ॥ १६३९ ॥
* "आयुर्वायुचलं सुरेश्वरधनुर्लोलं चलं यौवनं, विद्युद्दण्डतुलं धनं गिरिनदीकल्लोलवच्चञ्चलम् ।卐
स्नेहं कुञ्जरकर्णतालचपलं देहं च रोगाकुलं, ज्ञात्वा भव्यजनाः सदा कुरुत भो ! धर्म्मं महानिश्चलम् ॥ १ ॥

* कर्त्तव्या देवपूजा शुभगुरुवचनं नित्यमाकर्णनीयं, दानं देयं सुपात्रे प्रतिदिनममलं शीलनीयं च शीलम् ।卐
तप्यं शुद्धं विशालं तप इह महती भावना भावनीया, श्राद्धानामेष धर्म्मो जिनपतिगदितः पूतनिर्वाणमार्गः ॥१६४०॥
श्रुत्वेति रामवचनं तदाऽङ्कुशलवौ नृपौ । वैराग्यवासितस्वान्तौ दीक्षां गृहीतुमासताम् ॥ १६४१ ॥
ततः स्वं स्वं सुतं राज्ये न्यस्याङ्कुशलवौ नृपौ । दीक्षां दाशरथेः पार्श्वे ललतुः शिवहेतवे ॥ १६४२ ॥
सामाचारीं गुरुप्रोक्तां कुर्वाणौ तु लवाङ्कुशौ । पेठतुर्भूरिशास्त्राणि जिनोक्तानि कृतादरम् ॥ १६४३ ॥
क्रमादवधिविज्ञानं सम्प्राप्यचाङ्कुशलवौ । भूरीन् भव्याङ्गिनो धर्म्मे बोधयतः स्म सन्ततम् ॥ १६४४ ॥
अन्येद्यू राघवो ज्ञानी विहरन् मेदिनीतले । साधुकोटित्रयीयुक्तः सिद्धाद्रौ समुपागमत् ॥ १६४५ ॥
तत्र राममुनिः शत्रु-ञ्जयतीर्थनतेः फलम् । साधुभ्यः कथयामास सदेति मुक्तिहेतवे ॥ १६४६ ॥
प्राणिभिर्यं समारूढै-र्लोकाग्रमतिदुर्लभम् । प्राप्यते स च सिद्धाद्रि-र्जयतात् सुचिरं भुवि ॥ १६४७ ॥
बहुपापा अपि प्राण-भाजः शत्रुञ्जयाचले । तीव्रं तपो वितन्वानाः शिवं यास्यन्ति यान्ति च ॥ १६४८ ॥
* मुक्तेषु तीर्थनाथेषु गते ज्ञाने च केवले । लोकानां तारकः सिद्ध-शैलोऽयं कीर्त्तितो भवेत् ॥ १६४९ ॥卐
तीर्थे शत्रुञ्जये ध्यायन् जिनं प्रपूजयन् भवी । अचिरेणैव कालेन लभते शिवसम्पदम् ॥ १६५० ॥
इत्यादि तीर्थमाहात्म्यं शृण्वन्तः सन्ततं मुदा । कोटित्रयमिता वाचं-यमाः प्रापुः विदंवराम् ॥ १६५१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

साधुकोटित्रयीयुक्तः क्षीणकर्म्माष्टकव्रजः । रामः शत्रुञ्जये तीर्थेऽलञ्चक्रे शिवपत्तनम् ॥ १३५२ ॥
सम्प्राप्य केवलज्ञानं सिद्धशैलेऽङ्कुशलवौ । भूरिसाधुयुतो मुक्तिं जग्मतुः पातकक्षयात् ॥ १६५३ ॥
इत्यादि विस्तराद् राम-चरित्रं शिवदायकम् । ज्ञेयं पद्मचरित्रात्तु भव्यैः स्वहितच्छुभिः ॥ १६५४ ॥
मुनिसुन्दरसूरीशां तपागच्छखभास्वताम् । शुभशीलाभिधः शिष्य-श्चकारैनं कथानकम् ॥ १६५५ ॥

॥ श्री नारदमुक्तिगमनस्वरूपम् ॥

जहिं रामाइतिकोडी इगनवई अ नारयाइ मुणिलक्खा ।
जायाउ सिद्धराया जयउ तयं पुंडरी तित्थं ॥ २० ॥

नारदानां मुनीनां सम्बन्धः प्रोच्यते—

श्रीवीरस्यार्हतो धर्म्म-घोषो धर्म्मयशाः पुनः । विनयौ द्वावजायेतां चारित्राराधनादरौ ॥ १ ॥
अशोकपादपस्याधः स्थितौ तौ संयतौ तदा । स्वाध्यायं कुरुतः स्मोच्चै-स्तच्छाया नाऽनमत् तदा ॥ २ ॥
समेत्य स्वामिनः पार्श्वे पप्रच्छतुः प्रभुं च तौ । स्वामिन् ! अशोकवृक्षस्य छाया नमति नो कथम् ? ॥ ३ ॥

For Private and Personal Use Only

प्रभुः प्राह पुरि शौर्ये समुद्रविजयाभिधः । नृपोऽभवद्यदा न्यायी यादवानां शिरोमणिः ॥ ४ ॥
तापसस्य तदा यज्ञ-यशसः सोममित्रिका । पत्न्यासीत्तनयो यज्ञ-दत्तः सोमयशा स्नुषा ॥ ५ ॥
यज्ञदत्तस्य पुत्रोऽभू-न्नारदाह्वो मनोहरः । सोऽर्हद्धर्म्मरुचिर्जन्म यावदासील्लसत्तनुः ॥ ६ ॥
उञ्छवृत्तिं वितन्वाना यज्ञयशोमुखाः प्रगे । एकान्तरोपवासादि कुर्वते प्रतिवासरम् ॥ ७ ॥
अन्यदा नारदं बालं मुक्त्वाऽशोकतरोरधः । उञ्छवृत्यर्थमन्यत्र जग्मुर्यज्ञयशोमुखाः ॥ ८ ॥
इतो वैताढ्यभूमिध्रान् व्रजद्भिर्जृम्भिकामरैः । स्वनिकायाच्च्युतो बालो विज्ञातोऽवधितस्तदा ॥ ९ ॥
स्तम्भयित्वा तरोस्तस्य छायां ते निर्जरा ययुः । पश्चात्ते जृम्भिका आग-च्छन्तस्तं ददृशुस्तथा ॥ १० ॥
नीत्वा तं बालकं स्वीय-स्थाने ते जृम्भकामराः । प्रज्ञप्तिरोहिणीमुख्या विद्यास्तस्मै वितेनिरे ॥ ११ ॥
माणिक्यपादुकारूढो हेमकुण्डलिकाकरः । नभोऽध्वना व्रजन्नित्यं तीर्थानि वन्दते स च ॥ १२ ॥
शीलव्रतधरो मुञ्ज-जटामण्डितमस्तकः । चारित्रिणो यतीन् भक्त्या वन्दते नारदोऽनिशम् ॥ १३ ॥
अन्यदा नारदो द्वार-वत्यां यातो मुरारिणा । प्रणम्य भक्तितः पृष्टः किं शौचमुच्यते सता ? ॥ १४ ॥
प्रत्युत्तरस्य दाने त्वसमर्थो नारदस्तदा । गत्वा पूर्वविदेहेष्व-नंसीत् सीमन्धरं जिनम् ॥ १५ ॥
ततोऽवग् नारदः स्वामिन् ! शौचं किं प्रोच्यते बुधैः । सीमन्धरो जिनोऽवोचत् सत्यं शौचं निगद्यते ॥१६॥

पुनः कृष्णेन शौचार्थे पृष्टे स्वं नारदस्ततः । विदेहेष्वपरेऽप्राक्षी-न्नत्वा युगन्धरं जिनम् ॥ १७ ॥
किं शौचं प्रोच्यते स्वामी जगौ तपो निगद्यते । एवं बाहुजगाविन्द्र-निग्रहं नारदाग्रतः ॥ १८ ॥
दयां सुबाहुराचष्ट श्रुत्वेतन्नारदोऽखिलम् । (द्वारवत्यां समागत्य) जगौ मुरद्विषः पुरः ॥ १९ ॥
पुनः कृष्णेन शौचार्थे पृष्टे दध्यौ च नारदः । ऊहापोहपरो जाति-स्मृतिमान् प्रोक्तवानिति ॥ २० ॥
सत्यं शौचं तपः शौचं शौचमिन्द्रियनिग्रहः । सर्वभूतदया शौचं जलशौचं च पञ्चमम् ॥ २१ ॥
भूत्वा प्रत्येकबुद्धः स शौचाध्ययनमद्भुतम् । नारदः प्रोक्तवान् कृष्ण-भूपबोधाय तत्क्षणम् ॥ २२ ॥
* नक्तं दिनं निमज्जन्तः कैवर्त्ताः किन्तु पाप्मनाः । शतशोऽपि तथा स्नाता न शुद्धा भावदूषिताः ॥२३॥卐
* चित्तं शमादिभिः शुद्धं वचनं सत्यभाषणैः । ब्रह्मचर्यादिभिः कायः शुद्धो योगी (जलं) विनाऽप्यहो ! ॥२४॥卐
* मृदो भारसहस्रेण जलकुम्भशतेन च । न शुध्यन्ति दुराचाराः स्नातास्तीर्थशतैरपि ॥ २५ ॥卐
* आग्नेयं वारुणं ब्राह्म्यं वायव्यं दिव्यमेव च । पार्थिवं मानसं चैव स्नानं सप्तविधं स्मृतम् ॥ २६ ॥卐
* सप्त स्नानानि प्रोक्तानि स्वयमेव स्वयम्भुवा । द्रव्यभावविशुद्ध्यर्थं ऋषीणां ब्रह्मचारिणाम् ॥ २७ ॥ इत्यादि卐
नारदो विहरन् सोऽपि भुवि प्रबोधयन् जनान् । शत्रुञ्जये ययौ भूरि-साधुसन्ततिसेवितः ॥ २८ ॥
इतस्तदा रमापुर्यां भूपो मदनमण्डनः । सप्तकोटिमितश्राद्ध-युतस्तत्र समागमत् ॥ २९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रपूज्य वृषभं देवं जिनानन्यानपि क्रमात् । स्वामिनः पादुकां पूज-यामास भूपतिर्मुदा ॥ ३० ॥
ततः प्रदक्षिणां दत्त्वा राजादन्या महीपतिः । संघयुग् वर्द्धयामास मुदा मुक्ताफलैः क्रमात् ॥ ३१ ॥
ततो नरपतिर्गत्वा नारदस्यान्तिके मुदा । नत्वा सिद्धाद्रिमाहात्म्य-मश्रोषीदिति सादरम् ॥ ३२ ॥
* तावद् गर्जन्ति हत्यादि-पातकानीह सर्वतः । यावच्छत्रुञ्जयेत्याख्या श्रूयते न गुरो मुखात् ॥ ३३ ॥卐
* न भेतव्यं न भेतव्यं पातकेभ्यः शरीरिभिः । श्रूयतामेकवेलं श्री-सिद्धक्षेत्रगिरिकथा ॥ ३४ ॥卐
* वरमेकदिनं सिद्धि-क्षेत्रसर्वज्ञसेवनम् । न पुनस्तीर्थलक्षेषु भ्रमणं क्लेशभाजनम् ॥ ३५ ॥卐
* पदे पदे विलीयन्ते भवकोटिभवान्यपि । पापानि पुण्डरीकाद्रे-र्यात्रां प्रति यियासताम् ॥ ३६ ॥卐
इति सिद्धाद्रिमाहात्म्यं शृण्वन्तो बहवो जनाः । प्रपन्नाः संयमं सम्यक् तदा नारदसन्निधौ ॥ ३७ ॥
नारदो दशभिर्लक्षैः सार्द्धं वाचंयमैर्वरैः । शत्रुञ्जये ययौ मुक्ति-नगर्यां मासि माधवे ॥ ३८ ॥
एवमष्टौ क्रमाद् भूरि-लक्षसाधुसमन्विताः । शत्रुञ्जये ययुर्मुक्ति-नगर्यां पातकक्षयात् ॥ ३९ ॥
एतेषां चरित्राणि शास्त्रेभ्यो ज्ञेयानि,—
यतः—"लक्षैरेकनवत्या तु मुनिभिः सह नारदाः । नवापि निर्वृतिं भेजु-स्तीर्थे शत्रुञ्जये क्रमात् ॥ १ ॥"
उक्तंच—"एतस्यामवसर्प्पिण्या-मित्येवं नारदाः क्रमात् । लक्षैकनवत्या प्रापुः सिद्धिं शत्रुञ्जयाचले ॥ १ ॥"

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री नन्दिषेणसूरि–अजितशान्तिस्तव–मुक्तिगमनसम्बन्धः ।

नेमिवयणेण जत्ता-गएण जहिं नंदिसेणजइवइणा ।
विहिओऽजियसंतिथओ जयउ तयं पुंडरी तित्थं ॥ २१ ।

श्रीनेमिनाथस्य वचनेन यात्रागतेन नन्दिषेणयतिपतिना–नन्दिषेणसूरिणा 'विहित' श्चक्रे 'अजि-शान्तिस्तवः'-द्वितीय-षोडशजिन 'स्तवः' स्तोत्रं यत्र सिद्धाचले तत्तीर्थं पुण्डरिकाभिधं जयताच्चिरम् ॥

श्री नेमीशान्तिकेऽन्येद्यु–र्नन्दिषेणमहीपतिः । धर्म्मं जीवदयामूलं श्रोतुं भावादुपागमत् ॥ १ ॥

* रम्यं रूपं करणपटुताऽऽरोग्यमायुर्विशालं, कान्ता रूपविजितरतयः सूनवो भक्तिमन्तः ।卐
षट्‌ खण्डोर्वीतलपरिवृढत्वं यशः क्षीरशुभ्रं, सौभाग्यश्रीरिति फलमहो धर्म्मवृक्षस्य सर्वम् ॥ २ ॥

* चत्वारः प्रहरा यान्ति देहिनां गृहचेष्टितैः । तेषां पादे तदर्द्धे वा कर्त्तव्यो धर्म्मसंग्रहः ॥ ३ ॥卐

"दो चेव जिणवरेहिं जाइजरामरणविप्पमुक्केहिं । लोगम्मि पहा भणिया सुसमण सुसावओ वावि ॥१॥"

* यात्रार्थं भोजनं येषां दानार्थं च धनार्जनं । धर्मार्थं जीवितं येषां ते नरा स्वर्गगामिनः ॥ ४ ॥卐

अनित्यं निखिलं विश्वं पुत्रपौत्रादिकं खलु । ज्ञात्वा राज्यं स्वपुत्राय नन्दिषेणनृपो ददौ ॥ ५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अष्टाह्निकामहः कृत्वा श्रीजिनेश्वरसद्मसु । नन्दिषेणनृपो दीक्षां जग्राहाऽनघमानसः ॥ ६ ॥
पठन् गुर्वन्तिके शास्त्रं नन्दि-षेणयतिः क्रमात् । सर्वशास्त्राब्धिपारीणो बभूवाऽमलबुद्धिमान् ॥ ७ ॥
ज्ञात्वा योग्यं तदा नन्दि-षेणं नेमिजिनेश्वरः । सूरीश्वरपदं वर्य-वासरे दत्तवान् किल ॥ ८ ॥
नन्दिषेणोऽन्यदा नेमि–पार्श्वेऽप्राक्षीत् कृताञ्जलिः । भगवन् ! क शिवप्राप्ति-र्भविष्यति ममोत्तमा ॥ ९ ॥
 नेमिः प्राहाऽस्ति सिद्धाद्रिः पुण्यस्थानं तमोपहम् । तत्र तीर्थे शिवं यान्ति जग्मुर्यास्यन्ति मानवाः ॥ १० ॥
 ※ यतः–तेषां जन्मचरित्रं च जीवनं सार्थकं च ये । सिद्धक्षेत्राचलं यान्ति परेषां व्यर्थमेव तत् ॥ ११ ॥卐
 ※ चतुर्विंशतयोऽनन्ताः सिद्धाः सिद्धाचलेऽर्हताम् । सेत्स्यन्ति चैत्योद्धृतयस्तव् सङ्ख्यां वेत्ति केवली ॥१२॥卐
※ ऋषिहत्यादिभिः पापै भवकोटिकृतैरपि । मुच्यते दर्शनादस्य स्पर्शनात्तु किमुच्यते ? ॥ १३ ॥卐
तत्र शत्रुञ्जये तीर्थे गतस्य तव संयत ! । भविष्यति शिवप्राप्ति-र्निःशेषकर्म्मणां क्षयात् ॥ १४ ॥
श्रुत्वैतन्नेमिनो वाक्यं नन्दिषेणयतीश्वरः । भूरिसाधुयुतः सिद्ध-पर्वते समुपेयिवान् ॥ १५ ॥
मुख्यसार्वालये मूल-नाथमादिजिनेश्वरम् । नत्वा स्तुत्वाऽन्यसर्वज्ञान् ननाम स च सूरिराट् ॥ १६ ॥
जिनं श्रीअजितं सूरिः स्तवन् शान्तिजिनेशितुः । स्वपृष्ठे वीक्ष्य चित्ते नु ध्यातवानिति तत्क्षणात् ॥ १७ ॥
पृष्ठिं मे ददतः शान्तेः पापं भवति निश्चितम् । अतःस्तौम्यऽजितं शान्तिं युगपद् द्वौ जिनाविति ॥ १८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

“अजियं जियसव्वभयं संतिं च पसंतसव्वगयपावं ।
जयगुरु संति गुणकरे दोवि जिणवरे पणिवयामि ॥ १ ॥ गाहा ॥
ववगयमंगुलभावे तेहिं विउलतवनिम्मलसहावे ।
निरुवममहप्पभावे थोसामि सुदिट्ठसब्भावे ॥ २ ॥ गाहा ॥” इत्यादि गाथा ४०,
एवं श्रीनन्दिषेणस्या-चार्यस्य स्तवतः सतः । श्रीशान्तिमजितं सार्वौ युगपद् वरभावतः ॥ १९ ॥
सन्मुखौ द्वौ जिनावासौ श्रीशान्त्यजितयोस्तदा । अभूतां त्वरितं प्राज्य-प्रभावौ विलसद् द्युती ॥ २० ॥ युग्मम् ॥
नन्दिषेणगुरुस्तत्रागतानां देहिनां पुरः । शत्रुञ्जयस्य माहात्म्यं जजल्पेति निरन्तरम् ॥ २१ ॥
प्राणिभिर्यं समारूढै-र्लोकाग्रमतिदुर्लभम् । प्राप्यते स च तीर्थेशः शाश्वतोऽयं गिरिर्वरः ॥ २२ ॥
अस्मिँस्तीर्थे महापापी चन्द्रसेननरेश्वरः । समेत्यार्चां प्रभोश्चक्रे तथा पुष्पैः सुगन्धिभिः ॥ २३ ॥
यथाऽर्जितं तमः सर्वं नरकोत्पत्तिहेतुकम् । छित्त्वा प्राप्य गृहस्थोऽपि ज्ञानं मुक्तिं समीयिवान् ॥ २४ ॥
कलापुर्यां नृपो भीम-नामा पापकरोऽपि हि । अत्र तीर्थे तपः कृत्वा सम्प्राप परमं पदम् ॥ २५ ॥
* गतेषु तीर्थनाथेषु मुक्तौ तीर्थे गतेऽर्हतः । लोकानां तारकः सोऽयं श्रवणात् कीर्त्तनादपि ॥ २६ ॥卐
* अत्रार्हतां कृता पूजा स्तुतिपुष्पाक्षतादिभिः । आसंसारं कृतं पापं प्राणिनां हि व्यपोहति ॥ २७ ॥卐

For Private and Personal Use Only

इत्यादि बहुशो धर्म्मो-पदेशं तत्र शृण्वताम् । भविनामभवन्मुक्ति-सातं स्वर्गसुखं पुनः ॥ २८ ॥
श्रीशान्तेः पुरतोऽन्येद्युर्मेघवाहनभूपतिः । ध्यानं कुर्वन् शिवं प्राप सर्वपापततिक्षयात् ॥ २९ ॥
सहस्रैः सप्तभिर्वाचं-यमैः सच्छरणादरैः । सहानशनमादत्ते नन्दिषेणो गुरूत्तमः ॥ ३० ॥
तदा तत्र महीपालाः समेत्य बहवो द्रुतम् । प्रभुं प्रपूज्य विदधुः सुरैरनशनोत्सवम् ॥ ३१ ॥
सर्वकर्म्मक्षयात् प्राप्य ज्ञानमादावनुत्तरम् । नन्दिषेणो ययौ मुक्तिं शान्तिसन्नान्तिके क्रमात् ॥ ३२ ॥
अन्येऽपि साधवः प्राप्य ज्ञानं केवलसंज्ञकम् । स्वस्वायुषः क्षये मुक्ति-मलञ्चक्रुः समीहिताः ॥ ३३ ॥

श्रीकृष्णचरिते नेमिनाथसम्बन्धगुम्फित–साम्बप्रद्युम्नप्रमुख–श्रीकृष्णनरकगमनस्वरूपम्

पज्जुन्न-संबपमुहा कुमरवरा सड्ढ-अट्ठ-कोडिजुआ ।
जत्थ सिवं संपत्ता जयउ तयं पुंडरी तित्थं ॥ २२ ॥

व्याख्या—प्रद्युम्नशाम्बप्रमुखकुमाराः सार्द्धाष्टकोटियुता यत्र श्रीशत्रुञ्जये 'शिवं' मुक्तिं 'सम्प्राप्ताः' गता–जग्मुर्जयतात् तत्तीर्थं शत्रुञ्जयाभिधम्—

॥४७१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पूर्वमादिजिनस्याभूत् सुतो बाहुबलिर्नृपः । तस्य सोमयशाः सूनुः सोमवज्जनहर्षदः ॥ १ ॥
तद्वंशे येऽभवन् भूपाः सोमवंशा स्मृताश्च ते । सोमभूमीपतेः पुत्रः श्रेयांसोऽजनि भूपतिः ॥ २ ॥
सार्वभूमः सूभूमश्च सुघोषो घोषवर्द्धनः । महान्दी सुनन्दी च सर्वभद्रः शुभङ्करः ॥ ३ ॥
एवं क्रमादसङ्ख्येषु मुक्तिं स्वर्गं गतेषु च । चन्द्रकीर्त्तिरभूद्भूपः सोऽनपत्यो दिवं ययौ ॥ ४ ॥
कोऽस्य पट्टे महीपालः स्थाप्यते इति मन्त्रिषु । कुर्वाणेषु विचारं तु वाणीति गगनेऽभवत् ॥ ५ ॥
हरिवर्षाभिधात् क्षेत्राद् युगल्येको मनोहरः । अत्रैव मोक्ष्यते रोषान् वैराच्चैकेन नाकिना ॥ ६ ॥
अत्रान्तरे सुरः कश्चित् क्षेत्राच्च हरिवर्षतः । नीत्वा युगलिनं तत्र पुरे मुक्त्वा रहो ययौ ॥ ७ ॥
ततो व्योम्नि पुनर्जाता वाणीति तत्र तत्क्षणात् । एष स्वामी भवद्भाग्यै–रागतोऽत्रास्ति निश्चितम् ॥ ८ ॥
ततस्तैः सचिवैः राज्येऽभिषिक्तो युगली स तु । सेव्यते सर्वसामन्त-सेवकैर्भक्तिपूर्वकम् ॥ ९ ॥
हरिवर्षाभिधक्षेत्रा-त्तीर्थे श्रीशीतलेशितुः । तत्राभूद् युगली राजा हरिनामा मनोहरः ॥ १० ॥
उक्तंच–" सीअलजिणस्स तित्थे सुहुमो(सुमुहो) नामेण आसि महिपालो । कोसंबीनयरीए तत्थेव य वीरयकुविंदो ॥
हरिऊण तस्स महिलं वणमालं नाम नरवई तत्थ । भुंजइ भोगसमिद्धिं रईए समं अणंगोव्व ॥ २ ॥
अह अन्नया नरिंदो फासुयदाणं मुणिस्स दाऊण । असणिहओ उववन्नो महिलासहिओ य हरिवासे ॥ ३ ॥

For Private and Personal Use Only

कंताविओगदुहिओ पोट्टिलमुणिस्स पायमूलम्मि । घेत्तूण य पव्वज्जं कालगओ सुरवरो जाओ ॥ ४ ॥
अवहिविसएण नाउं देवो हरिवाससंभवं मिहुणं । अवहरिऊण य तुरियं चंपानयरम्मि आणेइ ॥ ५ ॥
हरिवाससमुप्पन्नो जेण य हरिऊण आणिओ इहयं । तेणं चिअ हरिराया विक्खाओ तिहुअणे जाओ ॥ ६ ॥"
हरिवंशोऽभवत्तस्माद् हरिभूपात् सुविश्रुतः । हरेः पुत्रोऽभवत् पृथ्वीपतिः प्रबलविक्रमः ॥ ११ ॥
ततो महाहरिराजाऽभवद् हिमहरिस्ततः । ततो वसुगिरिर्भूप-स्ततः सूरगिरिर्नृपः ॥ १२ ॥
ततो मित्रगिरिर्भूप-स्ततोऽभूत् सुयशा नृपः । ततो रूपगिरिर्भूपस्ततो हंसगिरिर्नृपः ॥ १३ ॥
एते त्रिखण्डभोक्तार एते सङ्ख्याधिपा नृपाः । हरेर्भूमिपतेर्वंशे जिनधर्म्मधुरन्धराः ॥ १४ ॥
एवं क्रमादसङ्ख्याता हरिवंशेऽभवन्नृपाः । केचिज्जग्मुः शिवं केचित् स्वर्गलोकं व्रतग्रहात् ॥ १५ ॥
इतो राजगृहे वर्ये हरिवंशे मनोहरे । सुमित्रोऽजनि भूपालः समानस्तेजसा रवेः ॥ १६ ॥
पद्मादेव्याभिधा पत्नी शीलादिगुणशालिनी । धर्म्मं जिनोदितं शश्व-च्चकार हर्षपूरिता ॥ १७ ॥
निशीथे प्राणतात् स्वर्गात् पुण्यवान् निर्जरो वरः । तस्या राज्ञ्याः सुखं गर्भेऽवततार शुभे क्षणे ॥ १८ ॥
चतुर्दशमहास्वप्न-वीक्षणाद् नृपगेहिनी । हृष्टा पत्या समं जाता गर्भे तस्मिन् स्थिते तदा ॥ १९ ॥
उच्चस्थाने तु सूर्यादि-मुख्यग्रहेषु शालिषु । स्थितेषु सुषुवे पुत्रं पद्मादेवी सुखस्थिता ॥ २० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत्रेन्द्रमहोत्सवादि मुक्तिगमनपर्यन्तं श्रीमुनिसुव्रतचरित्रं व्याख्येयं विस्तरभयान्नोक्तमत्र ।

मुनिसुव्रततीर्थेश–तीर्थे हरिकुलोद्भवः । सुदृढोऽजनि भूपालो जितप्रत्यर्थिभूपतिः ॥ २१ ॥

तस्माद्वसुमहीपाल-स्ततो वसुध्वजो नृपः । वसुकेतुस्ततो रत्न-केतू रत्नध्वजस्ततः ॥ २२ ॥

एवं चासङ्ख्यभूपेषु जातेषु भुजशालिषु । हरिवंशेऽभवद्भूपो यदुनामा लसद्बलः ॥ २३ ॥

यदोर्भूपस्य पुत्रोऽभूद् यादवोऽरिवनानलः । तस्याऽजनि सुतः सूरनामा सूरसमप्रभः ॥ २४ ॥

सूरस्य नन्दनौ शौरि–सुवीरौ वरविक्रमौ । अभूतां हरिवंशे तु वैरिकुम्भिमदाहरी ॥ २५ ॥

सूरः सञ्जातवैराग्यः शौरिं राज्ये निजे न्यधात् । युवराजपदं दत्त्वा सुवीराय व्रतं ललौ ॥ २६ ॥

शौरिर्दत्त्वा सुवीराय मथुराराज्यमञ्जसा । कुशार्त्तविषये शौर्या–भिधं पुरं न्यवेशयत् ॥ २७ ॥

शौरेस्त्वन्धकवृष्ण्याद्या वहवः सूनवोऽभवन् । सुवीरस्याऽभवन् पुत्रा भोजवृष्ण्यादयः पुनः ॥ २८ ॥

वितीर्य मथुराराज्यं सुवीरो भोजवृष्णये । सुवीराह्वं पुरं सिन्धु–विषयेऽस्थापयद् वरम् ॥ २९ ॥

शौरिरन्धकवृष्णिं तु न्यस्य राज्ये निजेऽन्यदा । सुप्रतिष्ठगुरोरन्ते दीक्षां लात्वा शिवं ययौ ॥ ३० ॥

मथुरां रक्षतो न्यायाद् भोजवृष्णेर्महीपतेः उग्रसेनाभिधः पुत्रोऽजनिष्टाद्भुतविक्रमः ॥ ३१ ॥

शौर्याभिधं पुरं पातोऽन्धकवृष्णेर्नरेशितुः । सुभद्रा गेहिनी पुत्रान् दशाऽसूत यथाक्रमम् ॥ ३२ ॥

For Private and Personal Use Only

समुद्रविजयोऽक्षोभ्यः स्तिमितः सागरोऽपि च । हिमवानचलश्चैव धरणः पूरणस्तथा ॥ ३३ ॥

अभिचन्द्रो वसुदेवो दशार्हाख्यो दशापि ते । अन्धकवृष्णिभूपस्य दशैते नन्दनाः स्मृताः ॥ ३४ ॥ युग्मम् ॥

वर्यशीला महीपाला अमी सर्वे नृपाङ्गजाः । प्रीतियुक्ता लसच्छास्त्राः पितुर्भक्तिं व्यधुस्तराम् ॥ ३५ ॥

दशार्हानां दशानां द्वे कुन्ती माद्र्यभिधे वरे । सहोदर्यौ मिथः प्रीति-परे जाते शुभाशये ॥ ३६ ॥

समुद्रविजयं ज्येष्ठं पुत्र-मन्धकवृष्णिराट् । स्वराज्ये न्यस्य चारित्रं लात्वा प्राप शिवश्रियम् ॥ ३७ ॥

समुद्रविजये भूपे न्यायात् पालयति क्षितिम् । सुखिनो(नी) जनता जाता रामभूमीपतेरिव ॥ ३८ ॥

स्वयं जिनेश्वराज्ञां तु शीर्षे यो वहते सदा । दत्ते दानं सुपात्रेभ्यो जिनं पूजयति ध्रुवम् ॥ ३९ ॥

स एव विद्विषोऽशेषान् समुद्रविजयो नृपः । आज्ञां स्वां ग्राहयामास लीलया समराङ्गणे ॥ ४० ॥

तस्यासीद् गेहीनी शील-गुणमाणिक्यरोहणः । शिवाभिधा मुकुन्दस्य श्रीरिवेशस्य पार्वती ॥ ४१ ॥

सुवत्सला परीवारे भक्ता देवगुरावपि । सुकृपा सूक्ष्मजीवेऽपि निःकृपा पापहिंसने ॥ ४२ ॥

परस्परं सदा प्रीति-परौ धर्म्मपरायणौ । शिवा-समुद्रविजयौ समयं निन्यतुः सुखम् ॥ ४३ ॥

मथुरायामितो भोज-वृष्णौ प्रव्रजिते सति । उग्रसेनोऽभवद्राजा प्रिया तस्य च धारिणी ॥ ४४ ॥

प्राग्भवोद्भववैरेण कश्चित् तापसपुङ्गवः । मृत्वाऽभूद्धारिणीकुक्षौ वासरे ह्यशुभेऽन्यदा ॥ ४५ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्यास्तदाऽभवद् भर्तृ-पलभक्षणदोहदः । तेन ज्ञातं तया पुत्रो भावी पत्युर्मृतिप्रदः ॥ ४६ ॥
जातमात्रं सुतं क्षिप्त्वा कांस्यपेटां नरै रहः । यमुनायाः प्रवाहेऽम्बा मोचयामास वेगतः ॥ ४७ ॥
यान्ती पेटा गता सूर्य–पुरे यावत् प्रवाहतः । तावदासादिता तत्र वणिजा केनचित्तदा ॥ ४८ ॥
तामुद्घाटय शिशुं तत्र स्थितं प्राप्य वणिग्वरः । कांस्यपेटान्तराप्तत्वात् कंस इत्यभिधां ददौ ॥ ४९ ॥
वर्द्धमानः क्रमात् कंसो-ऽकुट्टयत् परबालकान् । ततो दिने दिने तस्य रावो याति वणिग्गृहे ॥ ५० ॥
विज्ञाय स्वकुशलायोग्यं समुद्रविजयाय तम् । दत्त्वा वणिक् ततस्तत्र कंसो वृद्धिसमीयिवान् ॥ ५१ ॥
क्रमात् कंसोऽभवद् गाढं वसुदेवस्य वल्लभः । वसुदेवो ददाति स्म सन्मानं स्वन्नदानतः ॥ ५२ ॥
इतो राजगृहे न्यायी जरासन्धो महीपतिः । अभूत् त्रिखण्डभूभर्त्ता प्रतिविष्णुर्बली क्रमात् ॥ ५३ ॥
जरासन्धोऽन्यदा कंस-युतं यदुवरं वसुम् । जेतुं सिंहरथं सद्यो-ऽचालयत् सुबलं रिपुम् ॥ ५४ ॥
युद्धे सिंहरथो वैरी हतः कंसेन भूभुजा । ततस्तत्र जरासन्ध–भूपस्याऽऽज्ञा प्रवर्त्तिता ॥ ५५ ॥
वसुदेवः समायातः पश्चात् कंसाय भूभुजे । अदापयज् जरासन्ध-पार्श्वाज्जीवयशोऽङ्गजाम् ॥ ५६ ॥
पश्चाद्भवोद्भवाद् वैराद् जरासन्धसमीपतः । विवाहानन्तरं कंसो मथुराराज्यमाप्तवान् ॥ ५७ ॥
उग्रसेनं नृपं तातं स्वं मत्वा कस्यचिदाननात् । कंसश्चिक्षेप कारायां पूर्ववैरनियोगतः ॥ ५८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भोगास्तुङ्गतरङ्गभङ्गचपलाः प्राणा क्षणध्वंसिनः, स्तोकान्येव दिनानि यौवनसुखं स्फूर्तिः क्रियास्वस्थिरा ।
तत् संसारमसारमेव निखिलं बुद्ध्वाऽऽत्मपापक्षये, लोकानुग्रहपेशलेन मनसा यत्नः समाधीयताम् ॥ ५९ ॥
पितृदुःखाद् गुरूपान्तेऽतिमुक्तस्तत्तनूभवः । प्रव्रज्यामाददे मुक्ति-सातसन्ततिदायिनीम् ॥ ६० ॥
जरासन्धनृपं कंसो दशार्हा अन्धवृष्णिजाः । सेवमानास्तदा स्वं स्वं राज्यं यान्ति निरन्तरम् ॥ ६१ ॥
* यतः–"राज्ञि धर्म्मिणि धर्म्मिष्ठाः पापे पापाः समे समाः । राजानमनुवर्त्तन्ते यथा राजा तथा प्रजा ॥६२॥
इतः सूर्यपुरे रूपं वसुदेवस्य सुन्दरम् । पश्यन्त्यो नाबला गेहे कृत्यानि कुर्वते मनाग् ॥ ६३ ॥
समुद्रविजयोपान्ते स्वस्वपत्नीविचेष्टिते । पौरैः प्रोक्ते नृपः प्राह सर्वं वयं भविष्यति ॥ ६४ ॥
समुद्रविजयः प्राह वसो-र्भ्रातुः पुरोऽन्यदा । वत्स ! ते भ्रमतः पुर्यां क्लमो देहेऽभिजायते ॥ ६५ ॥
अतस्त्वया निजावासात् प्रतोल्याश्च बहिः क्वचित् । न यातव्यं विलोकयेत यद्यत्ते तच्च लास्यताम् ॥ ६६ ॥
भ्रात्रोक्तं वसुदेवोऽथ प्रतिपद्य स्थितो गृहे । यद्यद् विलोकयते खाद्यं तत्तदाऽऽनयतेऽनुगैः ॥ ६७ ॥
श्रीखण्डरससम्पूर्णं रूप्यकच्चोलकं वरम् । दासीहस्तात्छित्वा प्रैषीत् पत्युरन्ते तु तापहृत् ॥ ६८ ॥
दासी हस्तात्तदाऽऽकर्ष्य कच्चोलं वसुवासवः । चान्दनेन रसेन स्वं देहं लिलिम्प बाल्यतः ॥ ६९ ॥
तदा दासी जगौ कुर्व-न्नकृत्यं चेदृशं भवान् । न्यायेन गुप्तिवद् गेहे भ्रात्राऽस्थापि किलाऽधुना ॥ ७० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वसुदेवस्तदा दध्यौ यद्येवं सोदरौ व्यधात् । तदा मयाऽत्र न स्थेयं गन्तव्यं दूरतः क्वचित् ॥ ७१ ॥

यदि दूरं व्रजन्तं मां ज्ञास्यते च सहोदरः । तदा यातुं न दास्येत भ्रात्रा मम मनागपि ॥ ७२ ॥

तेन छन्नमहं यामी-ति ध्यात्वा वसुनिर्जरः । पुर्या बहिश्चितां चक्रे रात्रौ रहसि दारुभिः ॥ ७३ ॥

तन्मध्ये मृतकं क्षिप्त्वा दत्त्वा वह्निं च गोपुरे । अक्षराणि लिलेखेति वसुः स्वाङ्गासृजा तदा ॥ ७४ ॥

वसुदेवश्चितामध्ये प्रविश्य मृतिमीयिवान् । तेनान्यत्र विलोक्योऽहं न कुत्रापि सहोदरः ॥ ७५ ॥

पत्तने च पुरे ग्रामे वैताढ्ये विपुले गिरौ । खग-भूमिधवादीनां कन्यकानां सहस्रशः ॥ ७६ ॥

स्वकलादर्शनात् रूप-सौभाग्याभ्यां वसुः सुरः । तदीयमातृपितृभ्यां दत्ताश्च परिणीतवान् ॥ ७७ ॥ युग्मम् ॥

रोहणक्षोणिभुग् पुत्र्या रोहिण्याः सत् स्वयंवरे । भूपानाकारयामास भूरीनुद्वाहहेतवे ॥ ७८ ॥

भूयःसु भूधवेष्वेव वाञ्छत्सु रोहिणीं तदा । परिणीयामिलद् भ्रातु-र्ज्येष्ठस्य वसुनिर्जरः ॥ ७९ ॥

हलभृज्जन्मकथकान् सुस्वप्नांश्चतुरो निशि । निरीक्ष्याऽसावि रोहिण्या शोभने वासरेऽन्यदा ॥ ८० ॥

जन्मोत्सवं पिता कृत्वा सूनोः सज्जनसाक्षिकम् । बलभद्रेति नामाऽदात् जनाल्हादकरं मुदा ॥ ८१ ॥

कंसोपरोधतोऽन्येद्यु-र्देवकक्ष्मापनन्दिनीम् । देवकीं वसुगीर्वाणः परिणिन्ये सदुत्सवम् ॥ ८२ ॥

तस्मिन् क्षणे जरासन्ध-पुत्री कंसस्य गेहिनी । मद्यं जीवयशाः पीत्वा ग्रहिलाऽभूत् सखीयुता ॥ ८३ ॥

For Private and Personal Use Only

* यतः—" मद्यपानरसे मग्नो नग्नः स्वपिति चत्वरे । गूढं च स्वमभिप्रायं प्रकाशयति लीलया ॥१॥" 卐

वारुणीपानतो यान्ति कान्तिः कीर्त्तिः धृतिः श्रियः । विचित्राश्चित्ररचना विलुठत्कज्जलादिव ॥ ८४ ॥
तत्र भिक्षाकृते स्वीयं देवरं चातिमुक्तकम् । आगतं वीक्ष्य कंसस्य पत्नी जीवयशा जगौ ॥ ८५ ॥
अस्मिन् क्षणे वरं कान्तानुज ! त्वमतिमुक्तक ! । आगतोऽसि मया सार्द्धं मद्यं पिब रमस्व च ॥ ८६ ॥
जल्पन्त्येति तया कण्ठैः श्लिष्टः कंसाऽनुजो जगौ । देवक्याः सप्तमो गर्भो हन्ता ते तात-कान्तयोः ॥ ८७ ॥
आकर्ण्यैतद् वचो जीवयशा गतमदा क्षणात् । पत्यू रहो मुनिप्रोक्तं कंसस्य पुरतो जगौ ॥ ८८ ॥
मृत्युभीतेन कंसेन प्रीत्यै-वानकदुन्दुभिः । अर्थितो देवकीगर्भान् जल्पन्नेवं कृपास्वरम् ॥ ८९ ॥
स्वप्ने मेघसुरः कश्चित् प्राहेति कंस ! चेद्यदि । देवक्याः सप्तगर्भांस्त्वं वर्द्धिष्यसि गृहे रहः ॥ ९० ॥
तदा ते जीवितं भावि चिरं नो चेन्मरिष्यसि । अनुमेने वचस्तच्च वसुदेवस्तदादरात् ॥ ९१ ॥
देवक्या जनितं गर्भं कंसो नीत्वा रहस्तदा । हन्ति निःकरुणं स्फार-शिलायामुपरि स्फुटम् ॥ ९२ ॥
नैगमेषी तदाऽभ्येत्य रहोवृत्त्या तमर्भकम् । नीत्वाऽदात् सुलसाश्राद्धयै कंसाय तत्सुतां पुनः ॥ ९३ ॥
मृतं वसुसुतं गत्वा स्फालयित्वा दृढाश्मनि । न्यक्षिपद् धरापीठे कंसभूपो रहोऽन्यदा ॥ ९४ ॥
एवं षडपि तत्पुत्रान् सुलसाश्राद्ध्यै सुरो ददौ । सुलसाया सुताः पञ्च मृताः कंसाय चार्प्पयत् ॥ ९५ ॥

कंसोऽप्यास्फालयन् स्फारः पाषाणोपरि निर्दयम् । अहो ! निर्दयता पुंसां विद्यते दुःखदायिनी ॥ ९६ ॥
नाम्नाऽनीकयशोऽनन्त–सेनावजितसेनकः । निहतारिर्देवयशा शत्रुसेनोऽभवत् क्रमात् ॥ ९७ ॥
सुलसाऽपालयत् पुत्रान् देवक्याः षडपि स्वयम् । यथा यथाऽभवन् देव–कुमाराभाः स्वरूपतः ॥ ९८ ॥
अन्येद्युर्देवकी सिंह-सूर्याग्निकुञ्जरध्वजान् । विमानपद्मसरसी निशीथे सप्त चैक्षत ॥ ९९ ॥
सम्प्राप्तसमये प्राप्त-दोहदा देवकी क्रमात् । नभःसिताऽष्टमीरात्रौ प्रासूत तनयं वरम् ॥ १०० ॥
शुभकर्म्मोदयात्तस्य शिशोः कंसानुयायिनाम् । नियुक्तानां ददौ निद्रां बालकाश्रितदेवता ॥ १०१ ॥
नीत्वा शिशुं करे दुन्दु-र्मोक्तुं तु गोकुले यदा । चचालावक् तदा कारा-गृहस्थ उग्रसेनकः ॥ १०२ ॥
कोऽधुना मध्यरात्रौ तु गच्छति त्वरितं रहः । तदाऽऽकाशेऽभवद्वाणी दिव्येति प्रकटाक्षरम् ॥ १०३ ॥
वर्द्धमानो शिशुर्ह्येष कारागृहादितः किल । कर्षयित्वा भवन्तं तु सुखिनं श्राक् करिष्यति ॥ १०४ ॥
नन्दपत्न्या यशोदाया दत्त्वा पुत्रं निजं तदा। गोकुलात्तत्सुतां दुन्दुः स्वीयगेहे समानयत् ॥ १०५ ॥
अथ कंसानुगा बुद्धा-स्तामादाय सुतां तदा । कंसायार्प्पयन् दध्यौ ततः कंसो हृदि त्विति ॥ १०६ ॥
हनिष्यति कथं ह्येषा बाला मां बलिनं नृपम् । मत्वेति छिन्ननासां तां कृत्वा कंसोऽमुचत्तदा ॥ १०७ ॥
कंसोऽथ ध्यातवान् साधो-र्वाग् मया विहिताऽन्यथा । यतो मया हता गर्भाः सप्तापि देवकीभवाः ॥ १०८ ॥

एवं छलात् तदा गत्वा गोकुले देवकी मुदा । स्तन्यपानादिना पुत्रं मोदयामास चेतसि ॥ १०९ ॥
कृष्णांगत्वाद् ददौ नाम कृष्णेति नन्दगोकुली । शकुनिं पूतनां कृष्णोऽवधीदादौ बलादपि ॥ ११० ॥
ततो बिभेद शकटं पादयो यमलार्जुनौ । बभञ्ज वलतः कृष्णो मातुर्मोदं ददौ ततः ॥ १११ ॥
कृष्णरक्षाकृते रामं दुन्दुस्तत्रामुचत्तदा । रेमाते तौ दशधनु-र्देहौ परस्परं सदा ॥ ११२ ॥
इतः सूर्यपुरे वर्ये समुद्रविजयप्रिया । चतुर्दश महास्वप्नान् शिवाऽपश्यन्निशान्तरे ॥ ११३ ॥
"गयवसहसीहअभिसेयदामससिदिणयरं झयं कुम्भं । पउमसरसागर-विमाण-भवण-रयणुच्चय सिहिं च ॥ ११४ ॥"
तदैव कार्त्तिके कृष्णे द्वादश्यां त्वाष्ट्रगे विधौ । अवातरत् शिवाकुक्षौ च्युत्वाऽपराजितात् प्रभुः ॥ ११५ ॥
नभसि श्वेतपञ्चम्यां निशीथे त्वाष्ट्रगे विधौ । शिवाऽसूत सुतं कृष्ण-देहं सच्छंखलाञ्छनम् ॥ ११६ ॥
षट्पञ्चाशदिग्कुमार्यः स्वस्थानादेत्य तत्र च । चक्रुर्निजं निजं कृत्यं वैयावृत्त्यादिकं प्रभोः ॥ ११७ ॥
स्वस्वस्थानात् ततोऽभ्येत्य चतुःषष्टिश्च वासवाः । मेरुशीर्षे व्यधुर्जन्मोत्सवं तस्य जिनेशितुः ॥ ११८ ॥
" मेरु-अह-उड्ढलोआ चउदिसिरुयगाउ अट्ठ पत्तेय । चउविदिसिमज्झरुयगाउ पइंति छप्पन्न दिगकुमरी ॥ "
गतासु दिक्कुमारीषु कृत्वा कार्यं निजं निजम् । इन्द्र इन्द्रयुतो जन्मोत्सवं मेरौ व्यधात् प्रभोः ॥ १२० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इन्द्रा १० देवलोकात् व्यन्तरेन्द्रा ३२ भवनेन्द्रा २० द्वौ चन्द्रसूर्यौ एवं शक्राः ६४ ॥

प्रातः पिता व्यधाज्जन्मोत्सवं बन्दिविमोचनात् । अरिष्टनेमिरित्याह्वा-मदात् सज्जनसाक्षिकम् ॥ १२२ ॥

वर्द्धमानो जिनोऽरिष्ट-नेमिर्निर्जरसेवितः । मातापित्रोरदान्मोदं स्वपराक्रमदर्शनात् ॥ १२३ ॥

समेत्य स्वर्गतः शक्रो नित्यं श्रीनेमिनः प्रभोः । सेवां वितनुते भूरि-देवनिर्जरसंयुतः ॥ १२४ ॥

नैमित्तिकमितोऽप्राक्षीत् कंसो मे स्यान्मृतिः कुतः । नैमित्तिको जगौ केशी मेषो हयः खरो रिपुः ॥ १२५ ॥

पूतना वृषभोऽरिष्टो दुर्दमाः दुष्टमानसाः । हनिष्यतेऽथ येनैते स ते हन्ता भविष्यति ॥ १२६ ॥

आरोपयिष्यति यः शार्ङ्गं धनुर्गुणं स्वलीलया । वरिष्यति च यः सत्य-भामां स त्वां हनिष्यति ॥ १२७ ॥

अथ केशि-हयारिष्ट-मुख्यान् नैमित्तिकोदितान् । कृष्णेन निहतान् ज्ञात्वा कंसोऽभूदाकुलो हृदि ॥ १२८ ॥

कंसो ज्ञातुमरिं शार्ङ्गं धनुः पूजापुरस्सरम् । सत्यभामां निजां जामिं धनुरग्रे न्यविविशद् ॥ १२९ ॥

कंसोऽवग् य इमं चापं गुणे चारोपयिष्यति । तस्मै दास्याम्यहं सत्य-भामां जामिं सदुत्सवम् ॥ १३० ॥

कंसेनाऽऽकारिता भूपा भूरिशस्तत्र मण्डपे । आययुर्वरितुं सत्य-भामां स्वस्वपुरात्तदा ॥ १३१ ॥

तत्र कर्म्मण्यनावृष्टि-र्वसुदेवसुतो बलो । रथारूढोऽचलद्वीर-भूपेषु मिलितेष्वथ ॥ १३२ ॥

रात्रौ स गोकुले सुप्तः कृष्णं सहायिनं प्रगे । कृत्वा विनिर्ययौ यातुं मथुरायां ततस्तदा ॥ १३३ ॥

For Private and Personal Use Only

रथस्खलनहेतुं द्रुं रथादुत्तीर्य माधवः । द्रुतमुन्मूलयामास तदा कमलनालवत् ॥ १३४ ॥
उपविश्य रथे कृष्णं प्रीत्यानावृष्टिरञ्जसा । सभायां शार्ङ्गकोदण्ड-रोचिष्टौ समुपाययौ ॥ १३५ ॥
गृह्णन् चापमनावृष्टि-रस्खलच्च यदा तदा । जनोऽहासीत् समः सत्य-भामा लज्जामुपाययौ ॥ १३६ ॥
तदा स कुपितः कृष्णोऽधिज्यं शार्ङ्गं विधाय द्राग् । कृत्वा करे टणत्कारं चक्रे तथा स लीलया ॥ १३७ ॥
यथा कटाक्षकुसुमैः सत्य-भामाऽतिहर्षिता । अपूजयद् भुजायुग्मं कृष्णस्य देववत्तदा ॥ १३८ ॥
कंसाहूतास्तदाऽनेके भूपा एयुः स्वदेशतः । मण्डिते मल्लयुद्धे तु मल्लयुद्धदिदृक्षया ॥ १३९ ॥
कृष्णोऽपि कौतुकी सार्द्धं श्रीरामेण व्रजन् पथि । कालियाहिं जघानाशु यमुनायां ह्रदे खलु ॥ १४० ॥
कृष्णोऽवधीद् गजं पद्मो-त्तरं रामश्च चम्पकम् । ज्ञातमेतच्च कंसेन ज्ञातौ शत्रू ततः स्वकौ ॥ १४१ ॥ युग्मम् ॥
मल्लयुद्धाङ्गणे मल्लौ चाणूर-मुष्टिकाभिधौ । भुजास्फोटं वितन्वाना-वागतौ कुञ्जराविव ॥ १४२ ॥
राम-कृष्णौ कुमारौ तु कुर्वाणौ केलिमादरात् । तत्रायातौ वितन्वानौ कौतुकं भूभुजामपि ॥ १४३ ॥
चिरं तत्र वितन्वानौ मल्लयुद्धं बलाऽच्युतौ । समुद्रविजयक्ष्माप-मुख्ये भूपे समागते ॥ १४४ ॥
मल्लाविव भुजास्फोट-परौ सिंहरवायुतौ । विराजेतांतरां तौ तु यमविग्रहसोदरौ ॥ १४५ ॥
चाणूरं हतवान् कृष्णः सौमित्रो मुष्टिकं यदा । मृत्युभीतस्तदा कंसश्चकम्पे हृदये दृढम् ॥ १४६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ साहसमालम्ब्य भुजास्फोटं दृढं तदा । कुर्वाणः कंस आचष्ट बल-कृष्णौ प्रति स्फुटम् ॥ १४७ ॥
रे रे गोपौ गवां दुग्धं पीत्वा पीनतनू स्फुटम् । युवां स्वमरणं नैव पश्यतं मम पार्श्वतः ॥ १४८ ॥
कृष्णः प्रोवाच भो कंस ! स्वोत्कर्षं यत् प्रजल्पसि । लभिष्यसि फलं तस्य गमनाद्यमसद्मनः ॥ १४९ ॥
ततः कंसः समुत्थाय हन्तुं कृष्णमधावत । तदा कृष्णोऽपि तं हन्तु-मुत्थितः स्फारयद्भुजम् ॥ १५० ॥
मल्लक्रीडां मिथः कृष्ण-कंसयोः कुर्वतोस्तदा । देवा अपि समायाता द्रष्टुं व्योम्निक्षितौ नृपाः ॥ १५१ ॥
तथा चण्डबलः-कृष्णः कंसं जघान मर्मणि । यथा मुक्तौ मुनिः कंसो यमसद्म समीयिवान् ॥ १५२ ॥
कंसे मृतेऽथ कारोको-मध्यान्निःकाश्य तत्क्षणात् । उग्रसेननृपं राज्ये समुद्रविजयो व्यधात् ॥ १५३ ॥
रामकृष्णाङ्गजौ लात्वा समुद्रविजयादयः आययुः स्वपुरे सूर्य-पुरे सूत्सवपूर्वकम् ॥ १५४ ॥
इतो जीवयशा रोदं रोदं पत्यौ मृते चिरम् । जरासन्धनृपोपान्ते गता प्राहेति गद्गदम् ॥ १५५ ॥
वसुदेवसुताभ्यां ते जामाता दुर्दमोऽपि हि । गमितो यमगेहे तु मल्लयुद्धविधानतः ॥ १५६ ॥
ज्ञात्वा कंसवधोदन्तं जरासन्धो जगौ सुताम् । वत्स ! मा त्वं रुदस्तेऽरीन् रोदयिष्याम्यहं द्रुतम् ॥ १५७ ॥
जरासन्धस्ततो भूपं सोमाह्वं स्वाङ्गरक्षकम् । प्राजिघायानुशिष्येति समुद्रविजयान्तिके ॥ १५८ ॥
समुद्रं सोमको नत्वा-ऽऽचष्टेति भूपतेः पुरः । रामकृष्णौ कुलाङ्गारौ जरासन्धोऽथ याचते ॥ १५९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एतौ कंसस्य हन्तारौ रामकृष्णौ तवाङ्गजौ । अतो वध्याविमौ नूनं शूलादिक्षेपणैः स्फुटम् ॥ १६० ॥
स्वकीयकुलरक्षायै बलकृष्णौ बलोत्कटौ । जरासन्धान्तिके प्रेष्य कुरु राज्यं चिरं नृप ! ॥ १६१ ॥
आद्यो दशार्ह आचष्ट भोः सोमक ! पतिस्तव । अर्थयन् रामकृष्णौ तु बालकौ लज्जते न हि ॥ १६२ ॥
क्रीडयाऽऽभ्यां हतः कंसः कुर्वन् मल्लरणक्रियाम् । तयोरूर्ध्वं कथं कोपः क्रियते स्वामिना तव ॥ १६३ ॥
समुद्रविजयप्रोक्तं पश्चादागत्य सोमकः । यावज्जगौ जरासन्ध-स्तावत् क्रुद्धोऽभवद् भृशम् ॥ १६४ ॥
इतः स्वनन्दिनीं सत्य-भामां पूर्वानुरागिणीम् । उग्रसेनो ददौ प्रीत्या कृष्णाय लसदुत्सवम् ॥ १६५ ॥
मेलयित्वा निजान् सर्वान् यादवान् यादवेश्वरः । स्वभद्रहेतवेऽप्राक्षीत् क्रोष्टिकं कुशलं तदा ॥ १६६ ॥
क्रोष्टिकोऽवग् भवत्पुत्रौ रामकृष्णौ महाभुजौ । त्रिखण्डभरताधीशौ भविष्यतः क्रमादिमौ ॥ १६७ ॥
एष नेमिकुमारस्तु भविष्यति सुभाग्यवान् । तेनेदं स्थानकं त्याज्यं भवद्भिर्हितमिच्छुभिः ॥ १६८ ॥
अधुना तु जरासन्धाद् भवतामिह तिष्ठताम् । मया विलोक्यते विघ्नं युक्तं तेनात्र न स्थितिः ॥ १६९ ॥
समुद्रोऽवग् गमिष्यामो वयं कस्यां दिशि द्रुतम् । जगाद क्रोष्टिको यातं यूयं च वारुणीदिशि ॥ १७० ॥
सत्यभामा सुतद्वन्द्वं यत्र सूते स्म वासरे । तत्र निवेश्य नगरं स्थातव्यं सुखहेतवे ॥ १७१ ॥
युष्माकं तिष्ठतां तत्र भविष्यति रिपुक्षयः । वर्द्धिष्यति कुटुम्बादि सर्वं राज्यं च सर्वतः ॥ १७२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

युष्माकं गच्छतां मार्गे कुलाधिष्ठातृदेवता । भवन्तीरापदः सर्वा हनिष्यति न संशयः ॥ १७३ ॥
षट्पञ्चाशत् कुलैः कोटया यादवानां सहाऽन्यदा । पश्चिमां दिशमुद्दिश्या-ऽचालीद्यादवभूपतिः ॥
देशानुल्लङ्घयन् भूरीन् मध्ये विन्ध्याचले क्रमात् । समुद्रविजयस्तस्थौ विश्रामार्थं कुटुम्बयुग् ॥ १७४ ॥
इतः समुद्रविजय-प्रोक्तं सोमकवक्त्रतः । श्रुत्वा हन्तुं रिपूँ स्ताँश्च जरासन्धोऽचलत् क्षणात् ॥ १७५ ॥
कालकोऽथ सुतोऽभ्येत्य नत्वा तातं जगावदः । निहन्तुं कोटिकां स्वामि-न्नुद्यमस्ते न युज्यते ॥ १७६ ॥
त्वं तिष्ठाऽत्र रिपून् हन्तु-मादेशं देहि मेऽधुना । स्वर्गमर्त्य-बिलादिस्थान् हनिष्याम्येकहेलया ॥ १७७ ॥
हत्वा कंसं नृपं यच्च मेलितं पातकं किल । प्रायश्चित्तं प्रदास्यामि तस्य तेषां द्विषामहम् ॥ १७८ ॥
* यतः—अत्युग्रपुण्य—पापाना-मिहैव फलमाप्यते । त्रिभिर्वर्षैस्त्रिभिर्मासै-स्त्रिभिः पक्षैस्त्रिभिर्दिनैः ॥ १७९ ॥卐
* जठराग्निः पचत्यन्नं फलं कालेन पच्यते । कुमन्त्रैः पच्यते राजा पापी पापेन पच्यते ॥ १८० ॥卐
राज्ञां सप्तशतीयुक्तो भूरीभाश्वभटान्वितः । कालकः प्राप्य तातज्ञां हन्तुं तान् विद्विषोऽचलत् ॥ १८१ ॥
जरासन्धसुते काल—कुमारे समुपेयुषि । कृतान्त इव रामस्य कृष्णस्य रक्षका सुरी ॥ १८२ ॥
एकद्वाराश्रि(च)ता बह्नि-र्ज्वलन्ती वह्निना भृशं । कृत्वोपान्ते स्थिता वृद्ध-रूपा रोति कृपास्वरम् । १८३ ॥ युग्मम् ॥
कालस्तत्रागतोऽप्राक्षीद् भो रोदिषि किं त्वकम् ? सा प्राहाऽस्ति जरासन्धो नृपस्त्रिखण्डभूमिभुग् ॥ १८४ ॥

For Private and Personal Use Only

जरासन्धनृपाद् भीताः समुद्रविजयादयः । यादवा बलकृष्णाभ्यां युक्ता नेशुः स्वदेशतः ॥ १८५ ॥
मार्गे ते यादवाः सर्वे चलन्तस्त्वरितं क्रमात् । अत्रायातां नृणामास्यात् शुश्रुवुस्त्विति सादरम् ॥ १८६ ॥
हन्तव्याः यादवाः सर्वे यत्र तत्र गता मया । प्रतिज्ञामिति कृत्वा स कालकः सबलोऽचलत् ॥ १८७ ॥
श्रुत्वेति यादवाः सर्वे वारिता मयका बहु । चितास्वाशु प्रविष्टास्ते मृत्युहेतोः कृतत्वराः ॥ १८८ ॥
तेषां वियोगतोऽत्राहं दुःखिता मानसे भृशम् । रोदिम्युच्चैःस्वरं नाभू-द्रक्षिता कोऽपि निर्जरः ॥ १८९ ॥
स्वां प्रतिज्ञां स्मरन् काल-कुमारो यादवाँस्तदा । कर्षितुं ज्वलने सद्यः प्रविष्टो मूढमानसः ॥ १९० ॥
अपरे बहवः काल-कुमारस्यानुगास्तदा । प्रविष्टाः स्वामिनः पृष्ठे स्वामिभक्ताः कृतत्वराः ॥ १९१ ॥
※ यतः-' क्षमी दाता गुणग्राही स्वामी दुःखेन लभ्यते । अनुकूलः शुचिर्दक्षः स्वामिन् ! भृत्योऽपि दुर्लभः ॥१९२॥ ' 卐
प्रविश्य यादवा वह्नौ मृता विन्ध्याचलान्तिके । तत्पृष्ठे कालको गत्वा मरणं समुपागमत् ॥ १९३ ॥
आकर्ण्यैतज्जरासन्धो हर्षशोकभयाकुलः । भूत्वा दध्यौ मृतः काल-कुमारो न हि तद् वरम् ॥ १९४ ॥
यादवानामितो यातां पश्चिमाककुभि द्रुतम् । अब्धेः कूले सुतौ सत्य-भामाऽसूत वरेऽहनि ॥ १९५ ॥
तयोर्जन्मोत्सवं कृत्वा यादवा भानुभामरौ । ददुर्नाम ततो देवा-नुज्जयन्तेऽचलेऽनमत् ॥ १९६ ॥
समुद्रविजयेनोक्तः कृतस्नानो बलिर्हरिः । कृताष्टमतपा पूजां चकार पश्चिमाम्बुधेः ॥ १९७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तृतीयनिशि पाथोधि-देवोऽभ्येत्य जगौ हरिम् । स्मृतोऽहं भवता कस्मै हेतवे वद माधव ! ॥ १९८ ॥
कृष्णोऽवग् नगरीं स्फारां कारयित्वाऽम्बुधेस्तटे । आवासान् विपुलान् वास-हेतोर्वः कुरु साम्प्रतम् ॥ १९९ ॥
द्वादशयोजनायामां नवयोजनविस्तृताम् । रैरत्नवप्र-संयुक्तां पुरीं स धनदो न्यधात् ॥ २०० ॥
तत्रैकद्वित्रिकादींश्च भोमान् सप्तान्तिकान् वरान् । आलयान् धनदश्चक्रे जिनचैत्याननेकशः ॥ २०१ ॥
तस्या द्वारवतीत्याह्वां प्रददौ धनदो यदा । तदैव यादवाः सर्वे तत्र वासं व्यधुर्मुदा ॥ २०२ ॥
पाञ्चजन्याभिधं शङ्खं हरायाऽदात्तदा सुरः । रामाय च सुघोषं तु रत्नमाल्याम्बराणि च ॥ २०३ ॥
कुबेरो हरये पीत-वाससी कौस्तुभं मणिम् ! शार्ङ्गं चापं वरं खड्गं नन्दनाह्वं प्रदत्तवान् ॥ २०४ ॥
गदां कौमोदकीं वर्यं स्यन्दनं गरुडध्वजम् । धनदः प्रददौ कंस-द्विषे सन्मानपूर्वकम् ॥ २०५ ॥
वनमालां हरेस्ताल-ध्वजं नीलाम्बरे हलम् । रामाय प्रददौ सद्यो धनदो रुचिरोत्सवम् ॥ २०६ ॥
अरिष्टनेमये ग्रीवा-ऽऽभरणं बाहुरक्षकम् । हारं त्रैलोक्यविजयं चन्द्रसूर्याख्यकुण्डले ॥
गङ्गातरङ्गविशदे वाससि विमले वरे । सर्वतेजोमयं रत्न-मप्यदाद् धनदो मुदा ॥ २०७ ॥
मिलित्वा यादवैः सर्वैः धनदाऽऽद्यैः सुरैरपि । राज्येऽभिषिषिचे कृष्णो बलभद्रसमन्वितः ॥ २०८ ॥
नेमिर्दशधनुर्देहः क्रमात् प्राप्य च यौवनम् । निर्विकारः स्वरूपेण जिगाय स्मरवैभवम् ॥ २०९ ॥

For Private and Personal Use Only

एकदा दिवि शक्रेण सुराणामग्रतो मुदा । वर्णितं नेमिनाथस्य सत्त्वशौर्यादि सुन्दरम् ॥ २१० ॥
सत्त्वे शौर्ये कूले शैले दानरूपगुणेष्वपि । प्रभुर्नेमिर्न केनाऽपि चाल्यते त्रिदशैरपि ॥ २११ ॥
आकर्ण्यैतत् सुराः केचित् दधतोऽमर्षमात्मनि । प्रभुं चालयितुं द्वार-वत्युपान्ते समाययुः ॥ २१२ ॥
मर्त्यरूपधराः कृत्वा पुरं स्फारं तदन्तिके । स्थिता जहुर्गवादीनि नरान् नारींश्च भूरिशः ॥ २१३ ॥
तान् जेतुं ये ययू राजसेवकास्ते तदा द्रुतम् । हताः पश्चात् समायाताः प्रोचुश्च तद्विचेष्टितम् ॥ २१४ ॥
अनाधृष्टिर्द्विपो जेतुं गतस्तैः समराङ्गणे । बद्ध्वा निजपुरीमध्ये क्षिप्तश्च भृत्यसंयुतः ॥ २१५ ॥
ततः समुद्रविजयं यान्तं जेतुं रिपूंश्च तान् । निषिध्य रामकृष्णौ तु गतौ हन्तुं द्विषस्तदा ॥ २१६ ॥
कुर्वाणौ समरं राम-कृष्णौ तैर्वैरिभिः समम् । बद्ध्वा क्षिप्तौ दृढं कारा-गृहे स्वभृत्यसंयुतौ ॥ २१७ ॥
ततो नेमिकुमारस्तु गत्वा तत्र रणाङ्गणे । सकृपोऽपि च तैः सार्द्धं युद्धं चक्रेऽतिदारुणम् ॥ २१८ ॥
युद्धं कुर्वन् प्रभुः शत्रून् सर्वान् निश्चेष्टकाष्ठवत् । चकार न यथोच्छ्वासं कर्तुं शेकुर्मनागपि ॥ २१९ ॥
ततस्ते निर्जराः सर्वे स्वं रूपं बिभ्रतस्तदा । नत्वा प्रभुं जगुः स्वीया-गमहेतुमशेषतः ॥ २२० ॥
तदा तैर्निर्जरैश्चारु-हारं कुण्डलयामलम् । दत्तं यदा तदा शक्रस्तत्रैत्य प्रभुमानमत् ॥ २२१ ॥
जगौ शक्रः प्रभुर्होष केनापि चाल्यते नहि । अनन्तौजालसत्सत्त्व-गाम्भीर्यशौर्यवानसौ ॥ २२२ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रामकृष्णावनावृष्णि समुद्रविजयादयः । विधाय नेमिनं हस्त्या-रूढमानिन्युरालये ॥ २२३ ॥
* तदा शक्रयुताः सर्वे यादवा मुदिताशयाः । शत्रुञ्जयमहातीर्थे यात्रां चक्रुः सविस्तरात् ॥ २२४ ॥卐
नेमिं प्रणम्य गीर्वाणै-र्भूरिभिः सह वासवः । आददानो गुणान्नेमि जिनस्य स्वर्गमीयिवान् ॥ २२५ ॥
ततः कृष्णो बलेनाऽमा राज्यं कुर्वन् लसन्नयात् । पपालोर्वीं तथा बाढं सुखिन्यासीद्यथा दृढम् ॥ २२६ ॥
अन्यदा नारदोऽभ्येत्य कृष्णस्य पुरतो जगौ । रुक्मिक्षोणिपतेर्वर्या समस्ति रुक्मिणी स्वसा ॥ २२७ ॥
ततः कृष्णनृपः प्रेष्य रुक्मिभूमिपतिं स्फुटम् । याचते रुक्मिणीं पाणि-ग्रहहेतोः शुभेऽहनि ॥ २२८ ॥
यदा न ददते रुक्मी स्वपुत्रीं हरये स्वयम् । तदा दध्यौ हरिर्ग्राह्या रुक्मिणी हठतो मया ॥ २२९ ॥
तत्रैत्य रुक्मिणं भूप-मददानं स्वसोदरीम् । मत्वा हृत्वा च तां कृष्णोऽचालीत् स्वीयपुरीं प्रति ॥ २३० ॥
समायातं तदा पृष्ठौ रुक्मिणं कमलापतिः । निर्जित्य स्वपुरोपान्ते समियाय वराशयः ॥ २३१ ॥
परिणीय रमानाथो रुक्मिणीं लसदुत्सवम् । आनीय नगरीमध्ये तस्यै वर्यं गृहं ददौ ॥ २३२ ॥
जवाज्जम्बुवतो विद्या-भृतो जम्बुवतीं सुताम् । स्नातां सुरनदीतीरे जहार पुरुषोत्तमः ॥ २३३ ॥
आनीय स्वपुरोपान्ते गन्धर्वोद्वाहतो द्रुतम् । परिणीयानयद्विष्णुः पुर्यां जम्बुवतीं प्रियाम् ॥ २३४ ॥
लक्ष्मणा च सुसीमा च गौरी पद्मावती ततः । गन्धारी चेति कृष्णस्याभूवन् यदष्ट वल्लभाः ॥ २३५ ॥

For Private and Personal Use Only

अन्यदा रुक्मिणी स्वप्ने बलक्षवृषभस्थिते । विमाने स्वां निषण्णां तु दृष्ट्वा पत्युः पुरोऽवदत् ॥ २३६ ॥
कृष्णोऽवक् ते प्रिये! पुत्रो भविष्यति मनोहरः । श्रुत्वेति सत्यभामायै कापि दासी न्यवेदयत् ॥ २३७ ॥
ईर्ष्यया सत्यभामाऽपि गत्वा कृष्णान्तिकेऽवदत् । स्वप्नेऽदर्शि मया हस्ति-मल्लोऽथ गिरिसोदरः ॥ २३८ ॥
कृष्ण आचष्ट ते सूनु-रनूनवैभवक्रमः । भविष्यति लसद्रूप—पराभूतमनोभवः ॥ २३९ ॥
गर्वस्त्वया न कर्त्तव्यः कार्यो धर्म्मो जिनोदितः । श्रुत्वैतत् कापि दास्येत्य रुक्मिण्याः पुरतो जगौ ॥ २४० ॥
सत्यभामोदितं कूटं ज्ञात्वाऽवग् रुक्मिणी तदा । कूटं किं जल्प्यते सत्यभामे! सत्कुलया त्वया ॥ २४१ ॥
भामाऽऽचष्ट ममोक्तं च कूटं भवति दैवतः । ततः सूनोर्विवाहस्य समये समुपागते ॥ २४२ ॥
रुक्मिक्षोणिभुग्पुत्रि! भवत्यै त्वरितं किल! भद्रीकृत्य शिरो देया वालास्तुभ्यं मया तदा ॥ २४३ ॥
रुक्मिण्यवग् मयोक्तं चेत् कूटं भवति दैवतः । भद्रीकृत्य शिरो देया वालास्तुभ्यं मया तदा ॥ २४४ ॥
विधाय साक्षिणं ते द्वे गते स्वस्वगृहे क्रमात् । तदैव दधतु गर्भं पृथक् पृथक् शुभेऽहनि ॥ २४५ ॥
सुप्रद्योतं सुतं चारु-दिने प्रद्युम्ननामकम् । रुक्मिणी सुषुवे सत्य-भामाथ भानुसंज्ञकम् ॥ २४६ ॥
पूर्ववैरात् सुरो धूम-केतुश्छन्नं दिनात्यये । रुक्मिणीपुत्रमादायामुचद् वैताढ्यपर्वते ॥ २४७ ॥ युग्मम् ॥
गते तस्मिन् सुरे काल-संवराभिधखेचरः । लात्वा कनकमालायै पत्न्यै दत्त्वा जगावदः ॥ २४८ ॥

त्वयोच्यं सर्वलोकानां पुर एव स्फुटाक्षरम् । मयाऽसावि सुतो गूढगर्भयाऽद्य शुभेऽहनि ॥ २४९ ॥
जल्पन्तीति पतिप्रोक्तं लोकानां पुरतस्तदा । पपाल तं सुतं स्तन्य-पानदानात् प्रमोदिता ॥ २५० ॥
प्रद्युम्नाह्वां धरन् पुत्रः पोष्यमाणो दिने दिने । मातापित्रोर्ददौ मोदं वारिधेरिव चन्द्रमाः ॥ २५१ ॥
इतोऽकस्माद् हृतं पुत्रं विज्ञाय रुक्मिणी हृदि । दुःखिताऽभूद् भृशं शश्वत् रुदन्ती करुणं-स्वरम् ॥ २५२ ॥
तदैत्य कृष्ण आचष्ट शोको नैव विधीयते । पूर्वार्जिताघपुण्यानां वियोगो न हि जायते ॥ २५३ ॥
※ यतः-" यदुपात्तमन्यजन्मनि शुभमशुभं कर्म्मपरिणत्या । तच्छक्यमन्यथा नैव कर्त्तुं देवाऽसुरैरपि ॥२५४॥卐
※ आरोहतु गिरिशिखरं समुद्रमुल्लङ्घ्य यातु पातालम् । विधिलिखिताऽक्षरमालं फलति कपालं न भूपालम् ॥२५५॥卐
श्रुत्वैतद् रुक्मिणी पुत्र-वियोगसम्भवं तदा । दुःखं त्यक्त्वा सदा धर्म्मं चकार जिनवरोदितम् ॥ २५६ ॥
इतः सीमन्धरोपान्ते प्रद्युम्नस्य गतं भवम् । निशम्य नारदोऽभ्येत्य कृष्णस्य सन्निधौ जगौ ॥ २५७ ॥
रुक्मिण्या प्राग्भवे ह्येक-मण्डं प्रलिप्य कुंकुमैः । दुःखिनीं चटिकां चक्रे षोडशप्रहरावधि ॥ २५८ ॥
तेन षोडशवर्षान्ते रुक्मिण्या नन्दनोऽनघः । मिलिष्यत्यन्यथा नैव प्राक् कृतं कर्म्म जायते ॥ २५९ ॥
※ यतः—" हसंतो हेलया कर्म्म ते कुर्वन्ति प्रमादिनः । जन्मान्तरशतैरेते शोचन्तेऽनुभवन्ति तत् ॥१॥ "卐
इतो निःशेषशास्त्रार्थ-विदुरं मदनोपमम् । प्रद्युम्नं वीक्ष्य रागान्धा-ऽभवत् खगप्रिया भृशम् ॥ २६० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रद्युम्नेन समं भोगं वाञ्छन्त्यवक् खगप्रिया । तापं स्मरोद्भवं मे त्वं हृदोदानाद् दयां कुरु ॥ २६१ ॥
श्रुत्वेति जननीवाणीं विस्मितः कृष्णसूर्जगौ । इदं दुर्गतिदं प्रोक्तं वचः किं जननि ! त्वया ॥ २६२ ॥
* यतः—" अप्पउं धूलिहिं मेलिउं सयणह दीधउ छार । पगि पगि माथा ढाकणुं जिणि जोइ परनारि ॥१॥卐
* अकर्त्तव्यं न कर्त्तव्यं प्राणैः कण्ठगतैरपि । सुकर्त्तव्यं तु कर्त्तव्यं प्राणैः कण्ठगतैरपि ॥ २ ॥ "卐
ततः कनकमालाऽवग् नाहं ते जननी निजा । किन्तु त्वं कानने प्राप्तः पालितोऽत्र मयाऽधुना ॥ २६३ ॥
जगज्जयकरे विद्ये गौरीप्रज्ञप्तिकाभिधे । गृहाणाऽनुगृहाण त्वं भोगदानात् कृपाऽऽकर ! ॥ २६४ ॥
अकृत्यं न करिष्येऽह-मिति ध्यात्वाऽऽह कृष्णसूः । मातः ! प्रयच्छ मे विद्ये प्रमाणं वचनं तव ॥ २६५ ॥
विद्ये तयोदिते प्राप्य साधयित्वा स कृष्णसूः । याचमानां हृदं तां च त्यक्त्वाऽगान् नगराद् बहिः ॥ २६६ ॥
तदा दत्त्वा नखैः स्वाङ्गं तया कलकले कृते । उदायुधा रिपुं हन्तुं तत्रेयुस्तत्सुतास्तदा ॥ २६७ ॥
मातुः पराभवकरं नरं ज्ञात्वाऽथ तत्सुताः । कुपिता बहिरुद्याने प्रद्युम्नं हन्तुमागमन् ॥ २६८ ॥
आयान्तस्ते हता विद्या-बलेन हरिसूनुना । तथा यथाऽगमन् रक्तं वमन्तः स्वीयमन्दिरे ॥ २६९ ॥
ताडितान् तत् सुतान् वीक्ष्य क्रुद्धः संवरखेचरः । ययौ कृष्णसुतं हन्तुं सर्वानुगसमन्वितः ॥ २७० ॥
प्रद्युम्नः संवरं खेटं बलिष्ठमपि लीलया । जित्वोद्याने स्थितो यावत् नारदस्तावदागमत् ॥ २७१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रद्युम्नो नारदं नत्वो-पविश्य यावदग्रतः । तावद् ऋषिर्जगौ कृष्ण-रुक्मिण्योर्नन्दनोऽसि भोः ! ॥ २७२ ॥
केशदानादिसम्बन्धस्तव भानोश्च जन्मनि । रुक्मिणीसत्यभामाभ्यां कृतोऽस्ति कृष्णनन्दन ! ॥ २७३ ॥
यदि त्वं नाधुना तत्र गत्वाऽम्बां प्राग् प्रमोदय । तदा बालप्रदानेन मृत्युर्मातुर्भविष्यति ॥ २७४ ॥
प्रज्ञप्त्या विद्यया वर्य-विमाने रचिते तदा । उपविश्याऽचलत् कृष्ण-सूनुर्नारदसंयुतः ॥ २७५ ॥
पश्यन् पदे पदे ग्राम-नगराणि बहून्यपि । द्वारिकानगरीपार्श्वे कानने समुपागमत् ॥ २७६ ॥
तदोत्तरकुरुभागे कन्यां दुर्योधनो नृपः । दातुं भानुकुमाराया-गत्याऽस्थात् स्वीयपत्तनात् ॥ २७७ ॥
विवाह्यां कन्यकां हृत्वा प्रद्युम्नो नारदान्तिके । बहिर्यानेऽमुचद् विद्या-बलाददृश्यरूपभृत् ॥ २७८ ॥
कृष्णोद्यानं ततश्चक्रे फलपुष्पच्युतं स च । अशोषयच्च पानीय-स्थानानिनिखिलान्यपि ॥ २७९ ॥
यज्ञयात्राश्वमातङ्ग-गवां भक्षणहेतवे । यस्तृणौघः कृतस्तं चा-ऽदृश्यीचक्रे स कृष्णभूः ॥ २८० ॥
विद्यया सार्थपो भूत्वा प्रद्युम्नो वाहयन् हयम् । दृष्टो भानुकुमारेण ततस्तत्रागमत् स च ॥ २८१ ॥
लातुं मूल्यात् हयं भानु-र्वाहयन् पातितो भुवि । प्रद्युम्नविद्यया सर्वैर्हस्यमानः पुरीं ययौ ॥ २८२ ॥
प्रद्युम्नः प्रपठन् वेदं गच्छन् वाडववेषभृत् । भामायाः कुब्जिकां दासीं सरलां विदधेतराम् ॥ २८३ ॥
दासीपार्श्वे तु भोज्यं च मायी विप्रोऽर्थयन् बहु । दास्या स्वस्वामिनी पार्श्वे नीतोऽन्यासि तयाऽऽसने ॥२८४॥

For Private and Personal Use Only

भामाऽवग् द्विज ! रुक्मिण्याः कुरु मां रूपतोऽधिकाम् । विप्रोऽवक् प्रथमं शीर्षं रूपार्थं मुण्डयाऽधुना ॥ २८५ ॥
विप्रोक्ता वर्यरूपार्थं सत्यभामाऽतिहर्षिता । आकार्य नापितं शीर्षं मुण्डयामास वेगतः ॥ २८६ ॥
जीर्णाम्बरधरा चक्षु-रञ्जयित्वैककं च सा । वषट् स्वाहेति वर्णालीं जल्पन्त्यस्थात् सुरीपुरः ॥ २८७ ॥
चेटीविश्राणितं भोज्यं भुञ्जानो वाडवो बहुम् । न तृप्तोऽभूद्यदा दासी तदेति प्राह तं प्रति ॥ २८८ ॥
भक्षितं निखिलं भोज्य त्वयाऽद्य तिष्ठ साम्प्रतम् । उत्थाय स द्विजः प्राहा-न्यत्र भोज्याय गम्यते ॥ २८९ ॥
सवालो मुनिवेषोऽथ यदाऽगात् रुक्मिणीगृहे । तद्दर्शनात्तदा तस्याश्चित्ते श्वासोऽभवत्तराम् ॥ २९० ॥
रुक्मिणी विष्टरं यावन्नानिनाय गृहान्तरात् । तावत् कृष्णासने दृष्टो-पविष्टं तं जगाविति ॥ २९१ ॥
हरिं वा हरिजातं वा विनाऽस्मिन् हरिविष्टरे । अन्यं नरं समासीनं सहन्ते न हि देवताः ॥ २९२ ॥
मुनिः प्राह सुरा मां न विघ्नयेयुस्तपोबलात् । षोडशाब्दतपोन्तेऽहं पारणार्थमिहागमम् ॥ २९३ ॥
देहि भोज्यं ममेदानीं नो चेद् भामानिकेतने । यास्यामि पारणायेति तेनोक्ते रुक्मिणी जगौ ॥ २९४ ॥
नारदोक्तोऽपि नो पुत्र आयातोऽत्र ममालये । तेनोद्वेगेन मे गेहे पेचेऽन्नं न मनाग् मया ॥ २९५ ॥
पृष्टया कुलदेव्या तु ममाऽद्य पुत्रसङ्गमः । कथितो नाभवत् सत्योऽतो त्वं वक्षि तदागमम् ॥
सोऽप्याह रिक्तपाणीनां पृष्टं न सफलं भवेत् । दीयते भोजनं वर्य-मथवा भक्तिपूर्वकम् ॥ २९६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* यतः—" रिक्तपाणिर्न पश्येच्च देवं नैमित्तिकं गुरुम् । उपाध्यायं च वैद्यं च फलेन फलमादिशेत् ॥२९७॥卐
रुक्मिण्याऽऽचष्ट किं पेया रोचते वद साम्प्रतम् । स प्राह यदि लभ्येत पेया स्यादमृतं मम ॥ २९८ ॥
राध्यमाना तया पेया न सिसेध यदा तदा । ययाचे स मुनिः कृष्ण-मोदकान् रुक्मिणीं वरान् ॥ २९९ ॥
रुक्मिण्याऽऽह मुकुन्दस्य मोदका अन्यदेहिनाम् । भक्षिता नहि जीर्यन्ति तेनान्यन् मार्गया-धुना ॥ ३०० ॥
सोऽवक् त्वं मोदकान् देहि किं ते जरणचिन्तया । तपोबलाद्गलिष्ठान्न-मपि जीर्यति तत्क्षणात् ॥ ३०१ ॥
सशंका सा ददावेकं मोदकं मुनये तदा । सोऽपि भुक्त्वा क्षणात्तां च तं याचितवान् पुनः ॥ ३०२ ॥
प्रदत्तान् मोदकान् भूरीन् भुञ्जानं तं मुनिं तदा । वीक्ष्याऽवग् रुक्मिणी तेऽस्ति बलिष्ठं तपसो बलम् ॥ ३०३ ॥
इतो मुण्डितशीर्षां तां जल्पन्तीं मुनिनोदितम् । भामां प्रत्यवदन् भृत्याः फलरिक्तमभूद्वनम् ॥ ३०४ ॥
बभूवु निर्जलानीतः सरांसि सकलान्यपि । पपात तुरगाद् भानु-र्वाहयन् वाहनं क्षितौ ॥ ३०५ ॥
भान्वर्थागतकन्यास्तु स्वर्गनारीसहोदरीः । अकस्माज्जह्रिरे केन-चिन्नरेणापि साम्प्रतम् ॥ ३०६ ॥
भामया प्रेषिता दासी केशानयनहेतवे । रुक्मिणीसदने गत्वा ममार्ग शीर्षवालकान् ॥ ३०७ ॥
दासी सन्मानिता यावद् रुक्मिण्या रुचिरोक्तितः । तावत्तत्र स्थितो माया-मुनिरेवं जगाद स ॥ ३०८ ॥
प्रच्छन्नं प्रेषिता सत्य-भामया तद्वरं कृतम् । रुक्मिण्याश्च शिरोजातान् सत्या ते स्वामिनी किल ॥ ३०९ ॥

For Private and Personal Use Only

आनयन्ती स्वकीयान्ते भवत्याः पाणिनाऽधुना । कथं लज्जति नो पापा-न्न बिभेति च साम्प्रतम् ३१० ॥ युग्मम् ॥
मुनिस्तस्याः शिरोजातैर्भूत्वा कंचन भाजनं । तां दासीं प्रेषयामास भामोपान्ते तथास्थिताम् ॥ ३११ ॥
अनागतान् शिरोजातान् रुक्मिण्या दासिकां पुनः । भद्रीकृतोत्तमाङ्गां तां वीक्ष्य सत्या चिखेद सा ॥ ३१२ ॥
दास्या एव शिरोजातान् दासीं तादृशमस्तकाम् । नीत्वा कृष्णान्तिके सत्य-भामा रोषादिदं जगौ ॥ ३१३ ॥
प्रतिभूस्त्वमभू रुक्मि-पुत्र्या केशकृते तदा । रुक्मिण्या तु मे दासी चक्रे एवंविधाऽधुना ॥ ३१४ ॥
कृष्णोऽवग् दृश्यसे भद्री–कृतशीर्षाऽधुना कथम् । स्वामिन्या सदृशी दासी तया चक्रेऽधुना प्रिये ! ॥
सत्यभामा जगौ स्वामिन् ! हास्येनानेन मे सृतम् । रुक्मिणी शीर्षजान् सद्यो भवानानयतु स्फुटम् ॥३१५॥
कृष्णेन रुक्मिणीगेहे केशार्थं प्रेपितो हली । कृष्णं तत्र स्थितं वीक्ष्य लज्जितो ववले द्रुतम् ॥ ३१६ ॥
पश्चादेत्य हली तत्रो-पविष्टं केशवं स्वयम् । प्राह रूपद्वयकृते स्नुषाऽहं हेपितो त्वया ॥ ३१७ ॥
रुक्मिणीसदने रूपं त्वयैकं विहितं किल । रूपेणैकेन चात्रेदं वीक्ष्यसे साम्प्रतं हरे ! ॥ ३१८ ॥
हरिराह न तत्रागा-महं शपथपूर्वकम् । मायेयं ते गदित्वेति रामः स्वस्थानमीयिवान् ॥ ३१९ ॥
इतो मुनिर्जगौ रुक्मि-पुत्र्यग्रे ते सुतो ह्ययम् । रुक्मिण्याह कथं पुत्र एष्यति क्षण ईदृशे ॥ ३२० ॥
प्रद्युम्नोऽथ स्वरूपस्थोऽनमन्मातुः पदौ मुदा । बाहुभ्यां रुक्मिणी पुत्र-मालिलिङ्गातिमोदतः ॥ ३२१ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रुक्मिण्यालिङ्गिते पुत्रे बाहुभ्यां स्नेहपूर्वकम् । पुत्रोऽवग् न पितुः पार्श्वे वाच्योऽहं पुत्रवाक्यतः ॥ ३२२ ॥
उक्त्वेति स्यन्दनारूढां विधाय रुक्मिणीं लघु । शंखमापूरयन् राजमार्गेऽचालीत् स कृष्णभूः ॥
हृत्वाऽहं रुक्मिणीं यामि कृष्णो वाऽन्योऽपि रक्षतु । प्रद्युम्नो व्याहरन्नेवं ययौ पुर्या बहिः द्रुतम् ॥ ३२३ ॥
वैरिणं रुक्मिणीं हृत्वा गच्छन्तं नगराद्बहिः । श्रुत्वा कृष्णोऽचलद् हन्तुं प्रियां वालयितुं द्रुतम् ॥ ३२४ ॥
तत्र गत्वा दृढं शार्ङ्ग-मास्फालयन् हरिर्जगौ । रे ! मुमूर्षुः कथं पत्नी-मिमां मम हरिष्यसि ? ॥ ३२५ ॥
मुञ्चेमां रुक्मिणीं सद्यो नो चेन्मत्तो मरिष्यसि । न ज्ञातं किं बलं माम-कीनं वैरिहरं त्वया ? ॥ ३२६ ॥
भङ्क्त्वा तच्छिबिरं विद्या-बलात् सद्यः स कृष्णभूः । कृष्णं निरायुधं चक्रे निर्दन्तमिव दन्तिनम् ॥ ३२७ ॥
यद्यच्छस्त्रं करे कृष्णः कुरुते तच्छिरच्छिदे । तत्तद्दूरे क्षिपत्येप कृष्णपुत्रोऽर्कतूलवत् ॥ ३२८ ॥
विषण्णेऽथ हरावेत्य नारदः प्रोक्तवानिति । प्रद्युम्नोऽयं सुतस्ते यो रुक्मिण्याऽसावि दीप्तिमान् ॥ ३२९ ॥
श्रुत्वेति हरिरालिङ्ग्य प्रद्युम्नं प्रेमपूर्वकम् । कृत्वा पट्टेभमारूढं चचाल स्वपुरं प्रति ॥ ३३० ॥
प्रद्युम्न-रुक्मिणीयुक्तः कृष्णः कुर्वन् महोत्सवम् । दृश्यमानः पुरीलोकैः स्वीयगेहं समाययौ ॥ ३३१ ॥
इतो दुर्योधनोऽप्येत्य जगौ पुत्रकृते तव । आनीताऽत्र कनी सा तु हृता केनाऽधुना रहः ॥ ३३२ ॥
कन्या विलोक्यमानापि यदा लब्धा न केनचित् । तदाऽतिदुःखिनश्चासन् सर्वे दुर्योधनादयः ॥ ३३३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ कृष्णो जगौ कोऽस्ति यः कन्यां नयतेऽत्र हि । आनयिष्याम्यहं कन्या-मित्युक्त्वा कृष्णजोऽचलत् ॥ ३३४ ॥
तेनानीतां कनीं तस्मै दीयमानां बलादपि । प्रद्युम्नो दापयामास भानवे लसदुत्सवम् ॥ ३३५ ॥
खेचराः खेचरीर्भूमि-चरा भूमिचरीर्बहूः । प्रद्युम्नाय ददुश्चारूत्सवं तत्रैत्य कन्यकाः ॥ ३३६ ॥
जीर्णमश्चस्थितां भामां दृष्ट्वाऽप्राक्षीद्रमापतिः । किं तेऽस्ति हृदये दुःखं ? सत्यभामा ततो जगौ ॥ ३३७ ॥
प्रद्युम्नसदृशं पुत्रं प्रापेऽहं तव पार्श्वतः । कृष्णोऽवग् न त्वया दुःखं कार्यं पुत्रो भविष्यति ॥ ३३८ ॥
चतुर्थतपसा तुष्टो नैगमैषी हरिं जगौ । किं ते विलोक्यते कृष्ण ! ततो हरिर्जगावदः ॥ ३३९ ॥
तथा कुरु यथा सद्यः प्रद्युम्नस्य समः सुतः । जायते सत्यभामाया बलरूपपरमादिभिः ॥ ३४० ॥
हारं दत्त्वा जगौ देवः पत्न्या देयस्त्वया ह्ययम् । भविष्यति क्रमात्पुत्रो भामाया मदनोपमः ॥ ३४१ ॥
गतेऽथ निर्जरे हार-स्वरूपं विद्यया तया । ज्ञात्वा जाम्बुवतीं भामा-तुल्यां द्युम्नो ह्यकारयत् ॥ ३४२ ॥
विद्यया प्रेरिता जाम्बु-वती कृष्णान्तिके ययौ । भामाभ्रान्त्या च तं हारं दत्त्वा तां बुभूजे निशि ॥ ३४३ ॥
सुस्वप्नसूचितः स्वर्गा-च्च्युतः कोऽपि सुधाशनः । चञ्चत् पुण्यप्रभावेन तस्याः कुक्षाववातरत् ॥ ३४४ ॥
गतायां जाम्बुवत्यां तु भामाऽगाद् भोगहेतवे । कृष्णो दध्यावियं भोग-कृतेऽगात्तत्क्षणात् पुनः ॥ ३४५ ॥
भोगेनैकेन जायेत तृप्तिः पुंसश्च न स्त्रियः । जायतेऽष्टगुणः कामो यतो नार्या नरात् किल ॥ ३४६ ॥

For Private and Personal Use Only

* यतः–' आहारो द्विगुणः स्त्रीणां निद्रा तासां चतुर्गुणा । षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥ ३४७ ॥

* सुवंशजो-ऽप्यकृत्यानि कुरुते प्रेरितः स्त्रिया । स्नेहलं दधि मथ्नाति पश्य मन्थानको न किम् ? ॥ ३४८ ॥

ध्यात्वेति भुञ्जमानस्य कृष्णस्य तां प्रियां पुनः । भंभामवादयद् द्युम्नो निःशेषबलतस्तथा ॥ ३४९ ॥

केनेयं वादिता भम्भेत्येवं संशयवान् हरिः । रत्यासक्तोऽभवच्चित्ते चकितो हृदये बहु ॥ ३५० ॥

प्रद्युम्नताडितां भम्भां ज्ञात्वा क्षुब्धो हरिर्जगौ । भावी तव सुतोऽनर्घ्य-रूपो भामे ! प्रियोत्तमे ! ॥ ३५१ ॥

प्रगे जाम्बुवतीकण्ठे हारमालोक्य केशवः । प्रद्युम्ननिःकृतिं शंसन् बाढं विस्मयमाप्तवान् ॥ ३५२ ॥

काले जाम्बुवती पुत्रं शाम्बाभिधमजीजनत् । भामाऽपि जन्मतो भीरुं भीरुकाह्वं सुतं तदा ॥ ३५३ ॥

अथोपायात् कन्यां वर्यां वैदर्भी रूक्मिणीसुतः । उपयेमे तदा शाम्बः सुहरिण्यां हिमात्मजाम् ॥ ३५४ ॥

भामाऽन्यदाऽवदद् जाम्बु-वति ! शाम्बः सुतस्तव । मत्सूनुं भीरुकं भीष-यति त्वया स वार्यताम् ॥ ३५५ ॥

भामया प्रेरितः कृष्णः प्राह जाम्बुवतीं प्रति । शाम्बस्त्वत्तनयो धीष्णो भीषयत्येव भीरुकम् ॥ ३५६ ॥

जगौ जाम्बुवती शाम्बः सौम्योऽस्ति मे सुतः सदा । विरुद्धं न मनाक् कस्य कुरुते कर्हिचित् प्रिय ! ॥ ३५७ ॥

* यतः–" जो जस्स वट्टए हियए सो तं ठावेइ सुन्दरसहावं । वग्घी छावं जणणी भद्दं सोमं च मन्नेइ ॥१॥ "

कृष्णोऽवक् ते सुतः सौम्यो विद्यते तत् सदा प्रिये ! । तथाऽपि क्रियते सूनोः परीक्षा तस्य साम्प्रतम् ॥ ३५८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आभीरीरूपभृज्जाम्बु-वत्याऽऽभीरोऽभवद्धरिः । तौ गतौ नगरस्यान्तर्दधिविक्रयदम्भतः ॥ ३५९ ॥
दृष्ट्वाऽऽभीरीं जगौ शाम्ब इहैहि लामि ते दधि । इत्युक्त्वा तां बलान्नीन्ये शून्यगेहान्तरे स च ॥ ३६० ॥
तदा जाम्बुवती लक्ष्मी-पतिभ्यां प्रकटीकृते । स्वरूपे चानशच्छाम्बो लज्जितः स्थगिताङ्गकः ॥ ३६१ ॥
जगौ जाम्बुवतीं कृष्णः सूनोः कृत्यं त्वयेक्षितम् । वरं सौम्यं सुतं सा ही मन्यते क्रूरमप्यहो ॥ ३६२ ॥
द्वितीयेऽह्नि व्रजन् शाम्बो हस्तात्तकीलको जगौ । वृत्तं यो ह्यस्तनं मेऽत्र वक्त्याऽऽस्येऽस्य क्षिपाम्यमुम् ॥३६३॥
श्रुत्वैतद्वचनं तस्य रुष्टः कृष्णो जगौ तदा । स्वेच्छाचरण रे शाम्ब ! मा तिष्ठाऽत्र पुरे मम ॥ ३६४ ॥
शाम्बः प्रद्युम्नतो विद्यां प्रज्ञप्तिं प्राप्य निर्ययौ । प्रद्युम्नोऽप्यर्दयच्छाम्ब इव भीरुकमन्वहम् ॥ ३६५ ॥
भामयोक्तं न किं याहि प्रद्युम्नान्यत्र शाम्बवत् । प्रद्युम्नोऽवक्क गच्छामि मातः ! सम्प्रति गद्यताम् ॥ ३६६ ॥
सत्यभामा जगौ प्रेत-वने गच्छ त्वकं द्रुतम् । प्रद्युम्नोऽवग् वचो मात-स्तव प्रमाणमेव मे ॥ ३६७ ॥
अहं मातः ! कदेष्यामि सत्यभामा जगौ ततः । शाम्बं हस्ते गृहीत्वाऽहं पुर्यां यदाऽऽनयाम्यहम् ॥ ३६८ ॥
तदा त्वया समागम्यं महोत्सवपुरस्सरम् । ततो मातुः गिरा सद्यः प्रद्युम्नोऽगात् पितुर्गृहे ॥ ३६९ ॥
भ्रमन् देशान्तरे शाम्ब-स्तत्र प्रेतवने क्रमात् । समेत्य मिलितो भ्रातुः प्रद्युम्नस्य करन्नतिम् ॥ ३७० ॥
इतो भामा कनीनां त्वे-कोनशतममेलयत् । भीरूद्वाहकृते कन्या-नैकामिलति सुन्दरी ॥ ३७१ ॥ .

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रज्ञप्त्या विद्यया ज्ञात्वा भामाचेतसि चिन्तितम् । प्रद्युम्नः कृतवान् शाम्बं दिव्यकन्यां च विद्यया ॥ ३७२ ॥
जितशत्रुनृपो भूत्वा स्वयमादाय तां कनीम् । द्वारकासन्निधावेत्य तस्थौ भूरिपरिच्छदः ॥ ३७३ ॥
ज्ञात्वा तामागतां कन्यां जितशत्रुनृपं कनीम् । भामाऽयाचत पुत्रार्थं वर्यसन्मानपूर्वकम् ॥ ३७४ ॥
जितशत्रुर्जगौ चेन्मत्-पुत्रीं धृत्वा करे स्वयम् । भामा नयति पुर्यन्तो महोत्सवपुरस्सरम् ॥ ३७५ ॥
उद्वाहसमये त्वस्याः शयं भीरुशयोपरि । चेत् कारयसि भामे ! त्वं तदा भीरुर्वृणोत्विमाम् ॥ ३७६ ॥
अङ्गीकृत्य वचस्तस्य धृत्वा तां कन्यकां करे । पुरे भामां समायान्तीं दृष्ट्वेत्यूचुः पुरीजनाः ॥ ३७७ ॥
भामा पुण्यवती ह्येषा पुत्रोद्वाहक्षणेऽधुना । सन्मान्य शाम्बमानैपीत् पुरीमध्ये विचक्षणा ॥ ३७८ ॥
प्रज्ञत्या विद्यया शाम्बं कन्यारूपधरं स्फुटम् । सत्यभामेक्षते हृष्टा वधूबुद्ध्या पदे पदे ॥ ३७९ ॥
शाम्बं पुरीजना दर्शं दर्शं तत्र नृपाध्वनि । दध्युः किं साम्प्रतं सत्याऽऽ-नयते जाम्बुवतीभवम् ॥ ३८० ॥
एके जना जगुः सत्य-भामेयं विद्यते वरा । यत आनयते शाम्बं सपत्नीजमपि स्फुटम् ॥ ३८१ ॥
* नात्मीयं न परं लोका उत्तमा मन्यते क्वचित् । उत्सवे तु रिपुं केचि-न्मानयन्ति जनाः सदा ॥ ३८२ ॥ 卐
भामौकसि गता कन्या दक्षिणं स्वशयं तदा । भीरोर्हस्तोर्ध्वमायातः तस्थावुद्वाहमण्डपे ॥ ३८३ ॥
कन्यानां नवनवतेः पाणीनामुपरि स्वयम् । कृत्वा निजं शयं कन्या-ऽनलस्य परितोऽभ्रमत् ॥ ३८४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उद्वाहादनु शाम्बेन स्वरूपे प्रकटीकृते । भ्रकुटया भीषितो भीरु-र्भामायाः शरणं ययौ ॥ ३८५ ॥
भामाऽपि शाम्बमालोक्य प्राह रे ! केन हि त्वकम् । आनीतोऽसि पुरीमध्ये पापिन् ! मूर्खोत्तमाऽधुना ॥ ३८६ ॥
ततो मातुः पदौ नत्वा भक्त्या शाम्बो जगाविदम् । आनीतोऽस्मि त्वयेदानी-महं सज्जनसाक्षिकम् ॥ ३८७ ॥
सर्वासां कन्यकानां तु भीरुकस्य करग्रहम् । भवत्याऽऽकारितः सर्व-लोकसज्जनसाक्षिकम् ॥ ३८८ ॥
तया पृष्टा जनाः प्रोचुः शाम्बोऽस्माभिर्निरीक्षितः । अनेन कन्यका सर्वा परिणीता सदुत्सवम् ॥ ३८९ ॥
जितशत्रुर्नृपो जातः प्रद्युम्नो रुक्मिणीसुतः । सत्यभामा जगौ खिन्ना शाम्बं प्रतीदमीर्ष्यया ॥ ३९० ॥
मायी बन्धुः पिता मायी मायिनी यस्य च प्रसूः । मायी सोऽछलयत्कन्या-रूपो मां सहजो रिपुः ॥ ३९१ ॥
जननीजनकभ्रातृ-प्रमुखा यस्य मायिनः । मायावी स भवत्पुत्रो-ऽछलयन्मां रिपूपमः ॥ ३९२ ॥
उक्त्वेति दुःखिनी भामा निःश्वस्य सुचिरं तदा । आगत्य स्वगृहे जीर्ण-मञ्चमाशिश्रियद् द्रुतम् ॥ ३९३ ॥
वसुदेवं नमस्कृत्य शाम्बोऽवग् भ्रमता त्वया । परिणीता बह्वः कन्याः मयाल्पेनानेहसा शतम् ॥ ३९४ ॥
वसुदेवोऽगदत् कन्याः स्वयंवरसमागताः । सहस्रशः तदम्बादि-दत्ता अङ्गीकृता मया ॥ ३९५ ॥
जननीं छलयित्वा त्वं मायया बन्धुसंयुतः । एकोनं च शतं कन्याः पर्यणैषीरिहागताः ॥ ३९६ ॥
क्रुद्धं पितामहं मत्वा नत्वा शाम्बो जगावदः । क्षन्तव्यं मत्कृतं सर्व-मपराधं पितस्त्वया ॥ ३९७ ॥

तादृग् विनयगर्भेण वचसा प्रीणितो भृशम् । शाम्बं पितामहस्तत्र प्रशशंस लसद्गिरा ॥ ३९८ ॥
यादवानां कुमारास्तु प्रद्युम्नप्रमुखा वराः । पाण्डुभूपसुतैः सार्द्धं रंरम्यन्ते मुदा तदा ॥ ३९९ ॥
इतश्च यवनद्वीपाद् वणिजो रत्नकम्बलान् । विक्रीणन्तः पुरे पुर्यां द्वारवत्यां समाययुः ॥ ४०० ॥
सपादलक्षद्रव्येण तत्रैकं रत्नकम्बलम् । विक्रीणतोऽन्यदा तेषु वणिजः शुश्रुवुर्ध्रुवम् ॥ ४०१ ॥
पुरे राजगृहे रत्न-कम्बलं ह्येककं किल । द्विलक्ष्या लभ्यते नैव प्राप्यते स्तोक एव सः ॥ ४०२ ॥
वणिजस्ते ततो रत्न-कम्बलान् निखिलानपि । लात्वा राजगृहे जग्मु-र्मगधादेशभूपतेः ॥ ४०३ ॥
विक्रीणन्तः क्रमात्पुर्यां जरासन्धमहीपतेः । गेहोपान्ते ययुर्यावद् वणिजस्ते च तावता ॥ ४०४ ॥
जरासन्धमहीपाल-पुत्री जीवयशाः खलु । वणिजः सन्निधौ याता गृहीतुं रत्नकम्बलान् ॥ ४०५ ॥
अल्पमूल्येन सा मार्ग-यन्ती जीवयशास्तदा । वणिग्भिर्जगदे पुण्य-वत्येवं किं प्रजल्प्यते ? ॥ ४०६ ॥
द्वारकाह्वपुरीमध्ये एते च रत्नकम्बलाः । विक्रीता द्विद्विलक्ष्या तु कथं त्वमिति मार्गय ? ॥ ४०७ ॥
अतस्तन्नगरं वयं विद्यतेऽतः पुरा ननु । ततो जीवयशाः प्राह कुत्रास्ति सा पुरी वरा ? ॥ ४०८ ॥
वणिजो जगदुः स्फुटं पश्चिमाम्भोधिसन्निधौ । विद्यते द्वारका नाम्ना पुरी स्वर्गपुरीसमा ॥ ४०९ ॥
तत्र यादववंशीयः कृष्णो नाम महीपतिः । पपाल जनता न्याय-मार्गेण शक्रविक्रमः ॥ ४१० ॥

॥ ५०४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समुद्रविजयो भूपो नवसोदरसंयुतः । प्रतापी विद्यतेऽन्येऽपि यादवाः कोटिसम्मिताः ॥४११॥
हट्टश्रेणौ मणीनां तु राशीन् कैलाससोदरान् । वीक्ष्य ज्ञैस्तर्क्यतेऽम्भोधि-र्मणिशेषोऽधुनाऽभवत् ॥४१२॥
स्थाने स्थाने तु कल्याण-पुञ्जान् प्रौढतरान् बहून् । स्वर्णद्वीपः किमत्रागाद् वीक्ष्येति चिन्त्यते बुधैः ॥४१३॥
दुकूलसञ्चयान् भूरीन् स्थाने स्थाने निरीक्ष्य तु । लोकाः प्रोचुर्जगत् सर्व-दुकूलान्येयुरत्र तु ॥४१४॥
कृष्णनामश्रुते जीवयशा एत्य पितुः पुरः । जगाद तत्र जामातु-र्हन्ता सम्प्रति जीवति ॥४१५॥
तेन मे विद्यते शल्यं दुःखं कुर्वन् दृढे हृदि । तत् कर्षयाऽधुना तात ! नो चेन्मृतास्म्यहं द्रुतम् ॥४१६॥
जरासन्धो जगौ सर्वे यादवाः कृष्णसंयुताः । प्रविश्याग्नौ मृतिं जग्मु-रतो मा त्वं कराऽसुखम् ॥४१७॥
इतस्तत्र समागत्य वणिजोऽप्यपरे पुनः । जरासन्धनृपस्याग्रे ऽमुञ्चन् स्थालं मणीभृतम् ॥४१८॥
सन्मान्य तान् नृपोऽप्राक्षीद् रत्नानीदृशि कुत्र नु ? । विद्यन्ते च कुतः स्थाना-दानीतानि निवेद्यताम् ॥४१९॥
रत्नानि चन्द्रमार्त्तण्ड-बिम्बाभानि त्विषाम्भरैः । स्फारामलकमानानि मौक्तिकानि शुभानि च ॥४२०॥
दर्शयित्वा नृपस्योचु-र्वणिजो विनयाश्रितम् । अपश्चिमाब्धितटे द्वार-वत्यस्ति नगरी वरा ॥४२१॥ युग्मम् ॥
तत्र कृष्णाभिधो राजा सर्वयादवपुङ्गवः । पालयन्न्यायतो राज्यं रामं स्मारयति प्रजाः ॥४२२॥
समुद्रविजयो राजा नवसोदरसंश्रितः । प्रीतिमान् विद्यतेऽत्यन्तं लोकेषु निखिलेष्वपि ॥४२३॥

For Private and Personal Use Only

ईदृक्षाणि मणीमुक्ता-फलानि भूरिशो नृप ! । लभ्यन्तेऽन्यानि वस्तूनि रुचिराणि बहून्यपि ॥४२४॥
स्थित्वा द्वादश वर्षाणि रहोवृत्त्याऽथ पाण्डवाः । समागत्य हरेः पार्श्वे तिष्ठन्ति साम्प्रतं सुखम् ॥४२५॥
तत्र सन्मानिता बाढं यदुभिः पाण्डुनन्दनाः । स्वं राज्यं सस्मरुश्चन्द्रं चकोरा इव सन्ततम् ॥४२६॥
दूतं दुर्योधनोपान्ते प्रेष्य राज्यं निजं स्फुटम् । पाण्डवा मार्गयामासुः स्नेहवाक्यपुरस्सरम् ॥४२७॥
यदा दुर्योधनो राज्यं पाण्डवेभ्यो ददौ न हि । तदा ते सुभटान् भूरीन् मेलयामासुरञ्जसा ॥४२८॥
दुर्योधनोऽपि सन्नह्य स्वकीयं शिबिरं द्रुतम् । आगच्छन् विद्यते युद्धं कर्त्तुं तैः सार्द्धमञ्जसा ॥४२९॥
श्रुत्वैतत्तु जरासन्धो मेलयित्वा बलं बहुम् । चचाल वैरिणं कृष्णं हन्तुं राजगृहात् पुरात् ॥४३०॥
तदा दुर्योधनोऽभ्येत्य जरासन्धान्तिके जगौ । हन्म्यहं पाण्डवान् याव-त्तावत्त्वं तिष्ठतात् स्थिरम् ॥४३१॥
ततो दुर्योधनः कुर्वन् युद्धं पाण्डुसुतैः समम् । स्वसोदरयुतो यातः परलोकं रणाङ्गणे ॥४३२॥
अयं सम्बन्धस्तच्चरित्राद्विस्तराद् ज्ञेयः ।
ततो दुर्योधनं भूपं पाण्डवैर्यममन्दिरे । प्रेषितं मगधाधीशः श्रुत्वा खिन्नोऽभवद् हृदि ॥४३३॥
ततः प्राहः जरासन्धः स्वभृत्यानां पुरस्त्विति । दुर्योधनो वरो भृत्यो हतः पाण्डुतनूभवैः ॥४३४॥
अतश्चेद् हन्यते कृष्णः पाण्डुपुत्रैः सहाचिरात् । तदा मे निर्वृतिश्चित्ते भविष्यति शुभोदयात् ॥४३५॥

विचार्येत्यनुगैः सार्द्धं जरासन्धो नरेश्वरः । शिक्षयित्वा वरं दूतं मदनाह्वं स्फुटारवम् ॥ ४३६ ॥
प्रेषयामास कृष्णस्य समीपे च जगौ स च । अहमस्मि जरासन्ध-भूपदूतो नरेश्वर ! ॥ ४३७ ॥ युग्मम् ॥
जरासन्धोऽगदन्माम-कीनाऽऽस्यादिति साम्प्रतम् । जामाता मे हतः कंस-स्त्वया यत्तद्वरं न हि ॥ ४३८ ॥
पार्थस्य सारथीभूत्वा दुर्योधनः सहानुजैः । मद्भृत्यो गमितो मृत्युं त्वया यत्तद्वरं न हि ॥ ४३९ ॥
जरासन्धोदितं दूत-मुखाच्छ्रुत्वा हरिस्तदा । धिक्कृत्य तं पुनः पश्चात् प्रेषयामास वेगतः ॥ ४४० ॥
ततो दूतो जरासन्धो-पान्ते गत्वा जगाविति । पाण्डुपुत्रैर्बलेनैव युतः कंसरिपुर्बली ॥ ४४१ ॥
न मन्यन्ते तृणं त्वां तु साम्प्रतं चान्यभूपतीन् ।.........॥ ४४२ ॥
ततः क्रुद्धो जरासन्धः सज्जोऽभूद्रणहेतवे । यावत्तावद् हरिरपि सन्नह्य प्रस्थितोऽध्वनि ॥ ४४३ ॥
गूर्जरात्रस्य देशस्य भूषणे वर्द्धिकारके । विषये चाऽमिलत् सैन्यं जरासन्धमुकुन्दयोः ॥ ४४४ ॥
जरासन्धोऽथ सेनानीं हरिण्यनाभभूपतिम् । विधाय गरुडव्यूहं प्राववर्त्त युधे द्रुतम् ॥ ४४५ ॥
कृच्छ्रात् कृत्वा त्वनावृष्टिं सेनान्यं वरविक्रमम् । डुढौके वैरिणं हन्तुं धर्म्मपुत्रादियुग् हरिः ॥ ४४६ ॥
हयानां हेषितैः साम-योनीनां च गर्जितैः । भटानां सिंहनादेन नभोऽभूद्बधिरं तदा ॥ ४४७ ॥
विभिद्य गरुडव्यूहं महानेमि-धनञ्जयौ । अनावृष्टिश्च भूयिष्ठ-शत्रून् यमगृहेऽनयत् ॥ ४४८ ॥

अथ रुक्मी महानेमिं शिशुपालो धनञ्जयम् । हरिण्यनाभोऽनाधृष्टिं योद्धुं क्रोधादधीचलन् ॥ ४४९ ॥
षण्णामपि महीशानां तेषां विशिखवर्षिणाम् । संग्रामो दारुणोऽत्यन्त-मसह्योऽभून्मिथस्तदा ॥ ४५० ॥
न स सादी निषादी न पदाती न रथी न च । महानेमेः शरा यत्र निपतन्ति रणाङ्गणे ॥ ४५१ ॥
महानेमिशरैर्व्याप्तं रुक्मिणं रक्षितुं नृपाः । वेणुदारिमुखाः सप्त जरासन्धाज्ञया स्थिताः ॥ ४५२ ॥
महानेमिशरैस्तेषा-मष्टानामपि सायकान् । चिच्छेद लघुहस्तत्वाज् ज्योतिंषीव प्रभाकरः ॥ ४५३ ॥
तदा यादवसुरेशै-र्मगधेशस्य भूपतेः । सङ्ग्रामे जघ्निरे क्रुद्धै-र्बहवो बाहुशालिनः ॥ ४५४ ॥
अवधीज्जयसेनं तु हरिण्यनाभभूपतिः । न्यहन् हरिण्यनाभं तु क्रुद्धोऽनाधृष्टिभूधवः ॥ ४५५ ॥
एकोनविंशतिं सूनून् जरासन्धस्य भूपतेः । रथनेमिर्यमावासं प्रेषयामास वेगतः ॥ ४५६ ॥
विलोडिते निजे सैन्ये भूभुजा रथनेमिना । शिशुपालं च सेनान्यं जरासन्धो व्यधात्तदा ॥ ४५७ ॥
रामकृष्णवधे कृत्वा प्रतिज्ञां मगधेश्वरः । शिशुपालयुतोऽचाली-न्निहन्तुं रामकेशवौ ॥ ४५८ ॥
चिह्नेन मुरविद्वेषि-हलिनावुपलक्ष्य च । जरासन्धो निहन्तुं तौ समागात् समराङ्गणे ॥ ४५९ ॥
इतोऽष्टाविंशतिः पुत्रा जरासन्धावनिपतेः । रामेण सह युध्यन्तो-ऽलभ्वन्कुर्यमममन्दिरम् ॥ ४६० ॥
रामपुत्रान् जरासन्धो हत्वा नव निजासिना । गच्छन् भीमेन गदया निहतो न्यपतद्भुवि ॥ ४६१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षणादुत्थाय भीमं तं तथा शिरस्यताड़यत् । जरासन्धो यथा वायुपुत्रोऽवनितलेऽपतत् ॥ ४६२ ॥
तदाऽर्जुनो जरासन्ध-मताडयत् तथा शरैः । यथा शक्नोति नो बाणं संधितुं कार्मुके मनाग् ॥ ४६३ ॥
एकोनसप्ततिं पुत्रान् जरासन्धस्य युध्यतः । अवधीद् रुक्मिणीनाथ-स्ततश्च नव सप्त च ॥ ४६४ ॥
प्रगेऽन्यदा चमूं सुप्त-प्रायां वीक्ष्य हरिर्जगौ । भो नेमे ! स्वं बल सुप्तं किं नोतिष्ठति साम्प्रतम् ? ॥ ४६५ ॥
नेमिः प्राह जरा विद्या मुक्ता मगधभूभुजा । तेनात्मीयं बलं सुप्त-मिवाऽशेषं विलोक्यते ॥ ४६६ ॥
शान्तिकादिषु भूयिष्ठो–पचारेषु कृतेष्वपि । यदोत्तिष्ठति नो चक्रं तदाऽऽह नेमिमच्युतः ॥ ४६७ ॥
त्वं विज्ञोऽसि कृपावाँस्त्वं नेमे ! जल्प यथाऽधुना । यथा स्वं शिबिरं सर्वं जायतेऽत्र सचेतनम् ॥ ४६८ ॥
नेमिर्जगाविह क्षोणी-मध्ये पार्श्वजिनेशितुः । बिम्बमस्त्यहिनाथार्च्यं सुप्रभावं शिवप्रदम् ॥ ४६९ ॥
उपवासत्रयप्रान्ते तुष्टः पातालनायकः । तुभ्यं दास्यति लक्ष्मीश ! बिम्बं पार्श्वजिनेशितुः ॥ ४७० ॥
तस्य स्नात्राम्बुना सेनाऽभिषिक्ता निखिला लघु । उत्थास्यति यतोऽस्यास्ति प्रभावः प्रबलो भुवि ॥ ४७१ ॥
नेम्युक्तकरणात् पार्श्व-बिम्बस्य स्नात्रवारिणा । अभिषिक्तं बलं कंस-शत्रुणोत्थितमञ्जसा ॥ ४७२ ॥
तत्र स्थाने मुकुन्देन प्रासादः कारितो महान् । तस्मिन्निवेशितं पार्श्व-नाथबिम्बं च सूत्सवम् ॥ ४७३ ॥
स्थापयित्वा पुरं तत्र वर्यं शङ्खेश्वराभिधम् । अपूरयत्तथा शङ्खं कृष्णोऽरेर्भी–रोभीर्यथाऽजनि ॥ ४७४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदद्यापि महातीर्थं श्रीमच्छङ्खेश्वराभिधम् । विघ्नानि निजभक्तानां हन्ति ध्यानार्चनादिभिः ॥ ४७५ ॥
अथ सन्नह्य मगध-नाथो हन्तुं द्विषद्बलम् । समेत उत्थितान् शत्रून् वीक्ष्येति ध्यातवान् हृदि ॥ ४७६ ॥
मया दत्ता जरा ह्येषां केनाथोत्तारिता लघु । पार्श्वस्नात्राम्बुनोत्तीर्णां ज्ञात्वा मगधभूभुजा ॥ ४७७ ॥
नभोमण्डपमातन्वन् रविमाच्छादयन् समम् । जरासन्धो व्यधाद्बाण-वृष्टिं पाथोदवत्तदा ॥ ४७८ ॥
एकदा मगधाधीशे सम्पूर्णानुगसंयुते । कुर्वाणे सङ्गरे शत्रु-संहारकारकं भृशम् ॥ ४७९ ॥
इन्द्रदत्तरथारूढो नेमि-र्लक्षमितद्विषाम् । परितो भ्रामयामास तथा स्वं स्यन्दनं दृढम् ॥ ४८० ॥ युग्मम् ॥
यथा निगडसन्नद्धा इवासंस्ते द्विषोऽखिलाः । स्तम्भिता इव ते तत्र दृश्यन्ते नरनिर्जरैः ॥ ४८१ ॥
निवृत्तेऽथ रणे ते तु मुत्कलाः प्रभुणा कृताः । कम्पमाना द्विषो नेमुः प्रभुपादाम्बुजद्वयम् ॥ ४८२ ॥
बलभद्रोऽथ शत्रुघ्नं मुशलेन रणाङ्गणे । चूर्णयन् विदधेऽकस्मात् प्रलयानेहसं तदा ॥ ४८३ ॥
पश्चापि पाण्डवाः स्वस्व-शस्त्रैः शत्रून् प्रयुध्यतः । अतिथीन् विदधे प्रेत-पतेः प्राणापहारतः ॥ ४८४ ॥
जरासन्धः शये शक्रं स्फुरद् वह्निकणान्वितम् । लात्वा जगाद भो गोप ! मुञ्च मानं च मां श्रय ॥ ४८५ ॥
जीवन् भद्रमवाप्नोति जीवन् पश्यति मेदिनीम् । जीवन् करोति पुण्यानि जीवन् पासि निजं पुरम् ॥ ४८६ ॥
श्रयिष्ये त्वं न मे पादौ तदा चक्रमिदं द्रुतम् । कृष्ण ! भेत्स्यति ते मौलिं पयोजनालवद् द्रुतम् ॥ ४८७ ॥

For Private and Personal Use Only

जल्पन्तमिति मगधा-धीशं प्राह जनार्दनः । हत्वा त्वामहं समागां तु पाताऽस्मि न्यायमार्गतः ॥ ४८८ ॥
मुञ्च चक्रं जरासन्ध ! मा विलम्बं कुरु त्वकम् । इदं चक्रं ममेदानी-मनुकूलं भविष्यति ॥ ४८९ ॥
क्रुद्धस्ततो जरासन्धो भ्रामयित्वा शिरोऽभितः । कल्पान्तानलवद् भीदं चक्रं मुमोच तं प्रति ॥ ४९० ॥
चक्रं प्रदक्षिणीकृत्य कृष्णस्य सुकृतोदयात् । अलश्चक्रे शयं विद्युत्-पुञ्जवद्धरणीधरम् ॥ ४९१ ॥
स्वमर्द्धचक्रिणं कृष्णो जानन् सुस्वप्नसूचनात् । भ्रामयित्वाऽभितः शीर्ष (घनं) प्राहेति वैरिणं प्रति ॥ ४९२ ॥
चक्रं मम शये तस्थौ तव सैन्यं हतं बहु । यद्यद्यापि श्रय त्वं मां चक्रं मुञ्चामि नो तदा ॥ ४९३ ॥
जरासन्धो जगौ चक्रं ममेदं विद्यते हरे ! । तेन मे च न किमपि विघ्नमत्र करिष्यति ॥ ४९४ ॥
कृष्णमुक्तं तदा चक्रं जरासन्धस्य मस्तकम् । तथाऽछिन्दद् यथा सद्यो जरासन्धो मृतिं गतः ॥ ४९५ ॥
जरासन्धो हतः कंस-द्विषा चक्रेण तत्क्षणात् । जगाम नरकं तुर्यं नानादुःखप्रदायकम् ॥ ४९६ ॥
※ यतः-"एगो य सत्तमीए पंच य छट्ठीइ पंचमी एगो । एगो य चउत्थीए कण्हो पुण तच्चपुढवीए ॥ १ ॥" 卐
जीयाद्वेष मुरारातिश्चिरं वासवविक्रम ! । इत्युक्त्वा ववृषुर्देवाः पुष्पौघं तस्य मस्तके ॥ ४९७ ॥
इतो मगधनाथस्य सहदेवमुखाः सुताः । एत्य नेमुर्मुरारातिं मुक्त्वा प्राभृतमद्भुतम् ॥ ४९८ ॥
मुकुन्दो विनयात्तेषां तुष्टो राजगृहेशताम् । तेभ्यो ददौ लसन्मान-दानपूर्वं तदाऽचिरात् ॥ ४९९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पाटलाह्वां पुरीं वर्यां संस्थाप्य पञ्च पाण्डवाः । स्वकारिते जिनागारे-ऽतिष्ठिपन्नेमिनायकम् ॥ ५०० ॥
पुरं पञ्चासुरं पञ्च सुराः संस्थाप्य हर्षिताः । प्रासादान् कारयामासुः पञ्च कैलाससोदरान् ॥ ५०१ ॥
तेषां पार्श्वमहावीर-शान्तिनेम्यादिबोधिदान् । अस्थापयन् सुरास्ते तु भूयिष्ठकमलान्वयात् ॥ ५०२ ॥
कुमाराह्वं पुरं राज-कुमाराः कमलान्वयात् । स्थापयित्वा जिनागारे नेमिनाथमतिष्ठिपन् ॥ ५०३ ॥
पुरीं छत्रपतीत्याह्वां स्थापयित्वा शुभेऽहनि । नृपाश्छत्रधराः स्फारं जिनागारमकारयत् ॥ ५०४ ॥
तत्र श्रीशान्तिनाथस्य प्रतिमां बहुरैन्वयात् । कुमाराः स्थापयामासुः पूजयामासुरादरात् ॥ ५०५ ॥
येषां यत्राभवद्राज-धानी पूर्वमहीभुजाम् । कृष्णस्तेभ्यस्सुतेभ्यस्तां ददौ सन्मानपूर्वकम् ॥ ५०६ ॥
चक्रानुगोऽथ कंसारि-र्भूरिभूपनिषेवितः । चचाल भरतार्द्धं तु सद्यः साधयितुं ध्रुवम् ॥ ५०७ ॥
भरतार्द्धस्थितान् भूपान् मासैः षड्भिर्मुरारिणा । विजित्योर्ध्वं कोटिशिलां दध्रे च चतुरङ्गुलम् ॥ ५०८ ॥
यतः—"वामभूयंगे पढमेण धारिआ सरीरेण बीएण । तइएण कंठदेसे नेइ चउत्थो अ वच्छअले ॥ १ ॥
पंचमओ पुण हियए छट्ठो पावेइ कडियल पएसं । सत्तमओ जा उरुजो जाणु नेइ अट्ठमओ ॥ २ ॥
एएण नवमहरिणा एसा चउरंगुलं समु क्खिता । उच्चत्तवित्थरेण पत्तेअं जोअणपमाणं ॥ ३ ॥"
षोडशप्रमितै राज्ञां सहस्रैः सेवितः क्रमात् । कृष्णोऽलङ्कृतवान् द्वारवतीं विलसदुत्सवम् ॥ ५०९ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मणी चक्रं धनुः खड्गं वनमाला गदा पुनः । शङ्खश्चेत्यभवद्रत्न-सप्तकं कमलापतेः ॥ ५१० ॥
अथ नेमिः सदा तुल्यैः कुमारैर्निर्जरोपमैः । सार्द्धं वितनुते क्रीडा-मुद्यानादिषु सन्ततम् ॥ ५११ ॥
रममाणोऽन्यदा कृष्णा-युधशालान्तरे प्रभुः । गतो गदां शये यावल्लातु-कामोऽभवल्लघु ॥ ५१२ ॥
तावदायुधपालोऽवग् गदामेनां विना हरिम् । नैवोत्पाटयितुं कोऽपि नरो वा नृपतिः प्रभुः ॥ ५१३ ॥
एवं जल्पति तस्मिँश्च गदामुत्पाट्य लीलया । भ्रमयामास शीर्षस्या-भितो नेमिः शिवाङ्गजः ॥ ५१४ ॥
तदैवायुधपालेन वार्यमाणः प्रभुस्तदा । कुलालचक्रवच्चक्रं नेमिरभ्रामयत्तदा ॥ ५१५ ॥
ततश्चायुधपालेन वार्यमाणः प्रभुर्भृशम् । चटयित्वा धनुश्चक्रे टणत्कारं मुकुन्दवत् ॥ ५१६ ॥
ततश्च वार्यमाणोऽपि शस्त्रपालेन तत्क्षणात् । खड्गमुल्लालयामास पतन्तं च करे दधौ ॥ ५१७ ॥
ततश्चायुधपालेन मुकुन्दादधिकारवम् । वार्यमाणो भृशं स्वामी शङ्खमापूरयद् दृढम् ॥ ५१८ ॥
शङ्खवादेन मातङ्गा रज्जूरत्रोटयन् दृढाः । तुत्रोटुर्गिरिशृङ्गाणि कम्पमापवसुन्धरा ॥ ५१९ ॥
उत्कल्लोलेनाभवद्वार्द्धिः प्लावयन् वसुधातलम् । आवासा भित्तयस्त्रोटं त्रोटंपेतुर्दृढा अपि ॥५२०॥ युग्मम् ॥

* उक्तश्च—"चक्रं येन कुलालचक्रवदंगुल्या भृशं भ्रामितं, सारङ्गं च धनुर्मृणालवदलंयेन स्वयं नामितम् ॥ 卐
विष्णोरप्यसमं श्रमभ्रमकरीं कौमोदकीं यष्टिवद्, येनोत्पाट्य निजं तदा भुजतरौ शाखाश्रियं प्रापिता ॥१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* विष्णोः शङ्खवरेऽरविन्दवदलं यैन स्वयं पूरिते, स्तम्भोन्मूलमनेकपा हयवरा उद्बन्धनास्त्रस्तिरे ।
विश्वं द्राग् बधिरं धरापि विधुरा वप्रश्चकम्पेऽधिकं, पेतुस्ते मृतका इवाभवदलं शङ्खा स्वबन्धौ हरेः ॥ २ ॥
* सञ्चेलुः शैलनाथा विचलितमिलया भीतिभीताः समुद्राः संत्रासुर्दिग्करीन्द्राः भ्रमणपरिगतै र्मूर्च्छितं यादवेन्द्रैः ॥
ब्रह्माण्डं खण्डखण्डैः स्फुटितमुदधिभिः प्लावितं भूमिपीठं यस्येत्थं शङ्खखड्ग भ्रमणविलसिते सोऽस्तु नेमिः शिवाय ॥

शङ्खस्यारवमाकर्ण्य चकितो ध्यातवान् हरिः । उत्पन्नः किं नवः कृष्णः साम्प्रतं बलवान् पुनः ? ॥ ५२१ ॥
जरासन्ध इवाह्वाय प्रत्यर्थी साम्प्रतं ह्ययम् । यमस्य सदने प्राण त्यागान्नेतव्य एव तु ॥ ५२२ ॥
इत्युच्चरन् हरिर्हस्तघात–कम्पितभूतलम् । सिंहनादादरिर्हन्तु-मुत्तस्थौ त्वरितं तदा ॥ ५२३ ॥
नेदुर्यावद्रणारम्भ-कारिवादित्रनिस्वनाः । तावदस्त्रगृहाध्यक्षो-ऽभ्येत्य नत्वा हरिं जगौ ॥ ५२४ ॥
नादयित्वा धनुः शार्ङ्गं कृत्वा खड्गं करे निजे । उत्पाट्य ते गदा चक्रे नेमिरभ्रामयद् भृशम् ॥ ५२५ ॥
मयका वार्यमाणोऽपि कौतुकान्नेमिनन्दनः । लीलयाऽपूरयच्छङ्खं चक्रे च बधिरं जगत् ॥ ५२६ ॥
तस्मान्मुञ्च रुषं शत्रु–समागमसमुद्भवम् । तवाऽयं विद्यते भ्राता-ऽरिष्टनेमिर्बली नयी ॥ ५२७ ॥
आकर्ण्यैतन्निजभ्रातु-र्बलं श्रीनेमिनस्तदा । कंसारिर्व्यरमद् वैरि-वधारम्भाच्च तत्क्षणात् ॥ ५२८ ॥
तदा नेमिः समागत्य तत्र संसदि केशवम् । बलभद्रं ननामान्य-वृद्धानपि च यादवान् ॥ ५२९ ॥

For Private and Personal Use Only

नमन्तं नेमिनं बाल-कुमारं वीरविक्रमम् । वीक्ष्य व्रीडावनम्रोऽभूद् भूमिं पश्यन् जनार्दनः ॥५३०॥
क्षणात् कृष्णो जगौ भ्रात-र्गत्वा त्वमायुधालये । शङ्खस्य वादनं बाढं व्यधात् तच्च वरं कृतम् ॥५३१॥
चक्रासिभ्रामणं चाप-ताडनं विहितं हि यत् । भवता तदपीदानीं वरं बालत्वभावतः ॥५३२॥
कदाचिद् हस्ततश्चक्रं भ्रमत्पतति मस्तके । तदाऽकस्माद्भवत्येव मृतिर्वा तेऽङ्गभञ्जनम् ॥५३३॥
तेन नैवंविधा क्रीडा क्रियते बालभावतः । त्वं विज्ञोऽसि ततः शिक्षा दीयतेऽस्माभिरत्र किम् ? ॥५३४॥
शङ्खादिपूरणं क्लेश-कारकं दुःखदायकम् । विद्यतेऽतो मया तेऽग्रे कथ्यते मृदुवाक् पुनः ॥५३५॥
नेमिर्जगौ त्वया कृष्ण ज्येष्ठभ्रात्राऽत्र शिक्षणम् । जल्प्यते तद्वरं भ्रातु-र्लघोर्हितकृते भवेत् ॥५३६॥
श्रुत्वैतच्चकितः कृष्णो द्रष्टुं नेमिबलं जगौ । मया तेंऽसे शयो न्यस्तः सद्यस्त्वं वालयाऽधुना ॥५३७॥
नेमिः सुलीलया कृष्ण-शयं कमलनालवत् । अवालयत् ततः कृष्णः प्राहेति नेमिनं प्रति ॥५३८॥
स्वस्कंधे स्वशयं बाढं स्थापय त्वं तु लीलया । वालयिष्याम्यहं श्रीश-प्रोक्तं नेमिस्ततो व्यधात् ॥५३९॥
मुकुन्दो वालयन्नेमि-हस्तं न बलतो यदा । तदा दोषि प्रभोः शाखा-लग्नकीर इवाभवत् ॥५४०॥
नेम्यंसतरुशाखायां कृष्णो हिण्डोलिते सति । हरिर्हिण्डोलितः ख्याति-रिति जाता तदा जने ॥५४१॥
नेमेस्तादृग् बलं दृष्ट्वा विखिन्ने केशवे सति । बलभद्रो जगौ कृष्ण ! त्वं विषादं कुरुष्व मा ॥५४२॥

अस्मिन् नेमौ स्थिते गर्भे शिवा माता वराशया । चतुर्दश महास्वप्नान् सुखसुप्ता ददर्श सा ॥ ५४३ ॥
तेनासौ न हि राज्यार्थी दीक्षार्थी नेमिरस्ति च । दृश्यतेऽस्य मनो नित्यं निस्पृहं शिवशर्मणि ॥ ५४४ ॥
असौ नेमिकुमारस्तु द्वाविंशो जिननायकः । तीर्थं चतुर्विधं स्थाप-यिष्यति शिवशर्म्मणे ॥ ५४५ ॥
कृष्णेन स्वबलावलोकनकृते बाहुं तिरोनामितं, प्रोद्दण्डं निजलीलया व्यनमयत् स्वं नालनामं तदा ।
यद् बाहुं नमयन्नयं पुनरभूत् पादोज्झितोर्वीतलः, शाखालम्बितकीरवत् स जयतात् त्वं विश्वविश्वाद्भुतः ॥५४६॥
श्रुत्वैतद् बलभद्रस्य वचस्तत्र जनार्दनः । हृष्ट सन्मान्य नेमिं तु निजावासे समीयिवान् ॥ ५४७ ॥
यतः–एवं बलोक्तमाकर्ण्य भिन्नसंशय आशये । स्वागसः क्षमयामास नेमिमालिङ्गयन् हरिः ॥ ५४८ ॥
द्वास्थायुधगृहाध्यक्षा-नाकार्यादिशदच्युतः । निषेध्यो न हि कुत्राप्या-गच्छन् यान् नेमिरेष हि ॥ ५४९ ॥
शिवा वक्ति मुकुन्दस्य पुरतो नेमिनन्दनः । बोधनीयस्तथा कन्यां यथाऽङ्गीकुरुतेतराम् ॥ ५५० ॥
भो गोपिका ! भवन्तीभिस्तथा बोध्योऽङ्गजो मम । यथाऽसौ वृणुते कन्या-मित्याचष्ट शिवा तदा ॥ ५५१ ॥
वत्सोद्वाह कनीं माता यदाऽऽहाऽवग् तदा सुतः । कन्यां योग्यां यदा लप्स्येऽङ्गीकरिष्ये तदाऽम्ब ! ताम् ॥५५२॥
※ " वत्स ! त्वं कुरु नः प्रमोदविधये वीवाहमेवं यदा, प्रोक्तं श्रीशिवयाऽम्बया जिनमतोऽवादीस्त्वमेवं तदा । 卐
योग्यामम्ब ! कनीमहं ननु यदा लप्स्ये वरिष्ये तदेत्युक्ता मोदयदंबिका गुरुतरं तत्ते गुरुत्वं गुरोः ॥ १ ॥ "

अन्यदा केशवो नेमि-युक्तोऽन्तःपुरसंयुतः । दीर्घिकायां जलक्रीडां विधातुं प्राविशत्तमाम् ॥ ५५३ ॥
कृष्णेन प्रेषिता गोप्यो नेमेरुद्वाहहेतवे । जलोच्छलनदम्भेना-छोटयन् देवरं भृशम् ॥ ५५४ ॥
चञ्चत् कुङ्कुमपिण्डेन निजघान हरेरुरः । काचित् कृष्णं जलक्षेपाद् व्याकुलं कुरुतेतराम् ॥ ५५५ ॥
भो देवर ! जलक्रीडां क्रियतां हरिवल्लभाः । जल्पन्तीति जलक्षेपा-न्नेमिनं व्याकुलं व्यधुः ॥ ५५६ ॥
गोपीनां बहुभिर्हाव-भावैर्लोचनकूणितैः । न विकारमगान् नेमि-चित्तं मेरुरिवानिलैः ॥ ५५७ ॥
निर्गत्य जलतो गोप्यः सुमनोमुकुटादिभिः । भूषयन्त्यो हरिं नेमिं भूषयामासुरादरात् ॥ ५५८ ॥
हास्यं रसं वितन्वन्त्यो गोप्यो भामादयो जगुः । भो नेमे ! कुरु कन्यायाः सङ्ग्रहं सुखहेतवे ॥ ५५९ ॥
पुरुषः शोभते नार्या नरेण तु नितम्बिनी । भाति भूपोऽनुगैर्भूपै राजन्ते सेवकाः पुनः ॥ ५६० ॥
किं नेमे ! प्रियया रिक्तो लब्धं देहमिदं किल । विश्ववंद्य ! त्वमेकाकी हा ! हा ! हारयसि वृथा ॥ ५६१ ॥
स्युः षोडश सहस्राणि स्त्रीणां भ्रातुर्हरेस्तव । एकस्या योषितोऽपि त्वं निर्वाहं किं करोपि न ? ॥ ५६२ ॥
जगौ जाम्बुवती भामे ! देवरोऽयं नपुंसकः । विद्यते तेन न स्त्रीणां सङ्ग्रहं कुरुते मनाग् ॥ ५६३ ॥
भामाऽवग् नाभिपुत्राद्या जिनाः कृतपरिग्रहाः । शिवं ययुरतः स्थान-मधिकं किं समीहसे ? ॥ ५६४ ॥
नेमिः प्राह कनीं योग्यां लप्स्ये तदा वृणोमि ताम् । भामा प्रोवाच ते योग्यां कन्यामत्रानयाम्यहम् ॥ ५६५ ॥

यतः–'वसन्ते विविधाः क्रीडा गोपिकागणमध्यगः । चकार निर्विकारस्तु सविकारं न मानसम्' ॥ ५६६ ॥
नेमिर्द्ध्यौ रुषमेषा विधाय स्थास्यति स्वयम् । तेन मौनव्रतं श्रेय इदानीं मम निश्चितम् ॥ ५६७ ॥
* आत्मनो मुखदोषेण वध्यन्ते शुकसारिकाः । बकास्तत्र न वध्यन्ते मौनं सर्वार्थसाधकम् ॥ ५६८ ॥卐
नेमिना विहिते मौने सत्यभामा जगावदः । पाणिग्रहमसौ मेने देवरो नेमिनायकः ॥ ५६९ ॥
तदा गोप्योऽखिला प्रोचु-र्वयं जातमिदं खलु । यतोऽसौ देवरः पाणि-ग्रहणं च करिष्यते ॥ ५७० ॥
मया न मानितं ह्येतद् यद्येवं च वदाम्यहम् । तदैताभिः प्रजल्प्येत देवरोऽसत्यवागयम् ॥ ५७१ ॥
एवं मौने कृते तत्र कुमारेण जनार्दनः । नेमिनं गजमारोप्य सप्रियो गृहमाययौ ॥ ५७२ ॥
नेमिर्मातुः पितुः पार्श्वे गत्वाऽऽचष्ट रमापतिः । कन्यापाणिग्रहोऽमानि नेमिना मद्वचच्छलात् ॥ ५७३ ॥
मत् प्रियोदितान्......... ॥ ५७४ ॥
समुद्रविजयश्रीश-शिवाः प्रोचुर्वरां कनीम् । विलोक्य कार्यते पाणि-ग्रहं नेमिरयं क्षणात् ॥ ५७५ ॥
भामा तदा जगौ राजीमती मे भगिनी कनी । योग्याऽस्ति नेमिनो रूप-लावण्यसम्पदा स्फुटम् ॥ ५७६ ॥
शिवाया रुचितं ज्ञात्वा यदोग्रसेनसद्मनि । कृष्णो गतस्तदाऽमानि तेन विष्टरदानतः ॥ ५७७ ॥
कृष्णोऽवग् भवतो राजी-मती पुत्री तु विद्यते । तेन नेमिकुमारेण सहोद्वाहश्च कार्यते ॥ ५७८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उग्रसेनो जगौ गेहा-दिकं सर्वं तवास्ति च । मां किं प्रक्ष्यसि लक्ष्मीश ! यथारुचि विधीयताम् ॥ ५७९ ॥
ततो नैमित्तकं सद्य आकार्य कमलापतिः । श्रावणश्वेतषष्ठ्यां तु ललौ लग्नं समीपतः ॥ ५८० ॥
ततो यदुनिकेतेषु मधुरैर्धवलारवैः । गायन्त्यो योषितः श्रुत्वा श्रोतुं लोकाः समाययुः ॥ ५८१ ॥
मुकुन्दो द्वारकापुर्या-मुद्वाहासन्नवासरे । प्रत्यट्टं च प्रतिद्वारं तोरणालीमकारयत् ॥ ५८२ ॥
 शृङ्गारितेषु सर्वेषु सज्जनेपु मुरारिणा । दीयते स्वन्नपानादींस्तेभ्योऽप्यादरपूर्वकम् ॥ ५८३ ॥
 कर्पूरगन्धधूल्यादि-वासितैर्वारिभिर्वरैः । स्नपयित्वा प्रभुं गोप्यः प्रददुर्धवलानि तु ॥ ५८४ ॥
 स्नानान्ते दिव्यवसनैः परिधाप्याऽथ नेमिनम् । गोप्यः सिंहासने वर्ये सद्यो न्यवीवशन् मुदा ॥ ५८५ ॥
उग्रसेनालये गत्वा कौसुम्भीं वधूटिकां वराम् । राजिमत्यै ददौ कृष्णः सद्यः सन्मानपूर्वकम् ॥ ५८६ ॥
अथ लग्नक्षणे श्वेत-वस्त्राभरणभूषितः । गोशीर्षचन्दनालिप्त-तनुः स्वामी विराजते ॥ ५८७ ॥
चामरैर्वीज्यमानो स्व-धृतछत्रोलसच्छिरा । नेमिरारूढवान् वर्य-रथं मन्मथसन्निभः ॥ ५८८ ॥ युग्मम् ॥ ॥ ५१९ ॥
यदूनां कोटिभिर्वर्य-कुमारैः सदृशै रयात् । कृष्णादिभिर्नरेन्द्रैश्च नेमिः परिवृतोऽभितः ॥ ५८९ ॥
उच्चार्यमाणैर्धवलै नृत्यद्भिर्नर्त्तकैर्जनैः । पठद्भिर्वन्दिभिर्वाद्य-मानैस्तूर्यैरनेकशः ॥ ५९० ॥
दृश्यमानोऽक्षिकोटिभि-र्वर्ण्यमानो विचक्षणैः । वर्द्धाप्यमानो नारीभिः नेमिनाथः पदे पदे ॥ ५९१ ॥

For Private and Personal Use Only

चचाल भूमिभुग्मार्गे उग्रसेननृपात्मजाम् । राजीमतीं लसद्रूपां परिणेतुं शुभे क्षणे ॥ ५९२ ॥ त्रिभिर्विशेषकम्
इतः स्नाता लसद्वस्त्रा वर्यभूषणभूषिता । सखीपरिवृता तस्थौ ध्यायन्ती नेमिनं हृदि ॥ ५९३ ॥
वातायनमथाऽऽरुह्य सखी राजीमतीं जगौ । आयान्तं नेमिनं पश्य रूपावर्जितमन्मथम् ॥ ५९४ ॥
तदा राजीमती वीक्ष्य नेमिमायान्तमध्वनि । अयं चेन्मे पतिर्जात-स्तदा भाग्यं महत्तमम् ॥ ५९५ ॥
क्षणेन दक्षिणे नेत्रे स्फुरिते राज्यवक्त्र् तदा । दक्षिणं प्रस्फुरच्चक्षुः किं करिष्यति साम्प्रतम् ? ॥ ५९६ ॥
यतः-"साहेइ विप्फुरंतं इट्ठं पुरिसस्स दाहिणं नयणं । वामं कहेइ अणिट्ठं इय भणियं पुव्वपुरिसेहिं ॥ १ ॥
साहेइ इट्ठं नारीण वामयं चक्खु दाहिणं कहेइ अणिट्ठं.......इय० ॥ २ ॥"
थूत्कारं तु सखी कृत्वा जगौ राजीमतीं प्रति । अशुभं ते गतं श्रेयः समेतं विद्धि साम्प्रतम् ॥ ५९७ ॥
राजीमती जगौ भद्र-वाण्या किं जायते शुभम् ? । शर्करोच्चारतो वक्त्रे शर्करा किं प्रविक्ष्यति ? ॥ ५९८ ॥
सखी प्राहेति तदा—इक्कच्चिअ राइमई विणयावग्गंमि वण्णणिज्जगुणा ।
जीसे नेमि करिस्सइ लावण्णनिही करग्गहणं ॥ १ ॥
चन्द्रानना जगौ तदा-रायमईए रूवं विही विनिम्मिय रंभरूवहरं । न करिज्जावि संजोगं हविज्ज ता नूणमजसभरं ॥
किं वा पायालकुमरो किं वा मयद्धओ अह सुरिंदो । मह चेव मुत्तिमंतो अह एसो पुण्ण(संदोहो)मय वरो ॥ २ ॥"

हसित्वैका सखी जगौ-एषा परिणीतात्मनो नोपलक्षिष्यति इत्यादि, ।
इतो नेमिः समागच्छन् पशून् करुणसंरवान् । श्रुत्वा सारथीमप्राक्षी-देते के पशवो वद ? ॥५९९॥
सारथिः प्रोक्तवान् पाणि-पीडने ते शिवाङ्गज ! । यदूनां गौरवायैते पशवो मेलिता यथा ॥६००॥
छागी छग हुडा हुडी ललायुर्गण्डकः किरिः । भल्लूकोऽपि च जम्बूको मर्कटो हरिणो हरः ॥६०१॥
कलापो बर्हिणः काक पुष्टः सकृत्प्रजः पुनः । मद्गुर्वनाश्रयो घूक-स्ताम्रचूडः सितच्छदः ॥६०२॥
चरटा खञ्जरीटश्च खञ्जरीटः सलक्षणः । क्रौञ्चः किकिदिवश्चक्र-वाकश्चवुटकश्चुटी ॥६०३॥
दात्यूहश्च बकोटश्च कूररः शारिकस्तथा । पारापतः शकुन्तश्च गुञ्जलो विषसूचकः ॥६०४॥
तित्तिरं कुम्भकारश्च हारीतो मरुलस्तथा । इत्याद्या पशवोऽनेके मेलिताः सन्ति साम्प्रतम् ॥६०५॥
स्वं स्वं मोचयितुं ह्येतान् पशून् प्रजल्पतः सतः । नेमिर्ज्ञात्वा जगौ सूत ! रथं वालय सत्वरम् ॥६०६॥
तदलं बन्धुवर्ग्गस्य स्नेहेन विषयेन मे । प्रस्थितस्य शिवागारे जीवहिंसाऽर्गला स्मृता (तेनैव पापात्मनः) ॥६०७॥
छोटयित्वा पशून् सर्वान् बन्धान् सारथिपार्श्वतः । नेमिः स्वस्यन्दनं सद्योऽवालयत् सूतपार्श्वतः ॥६०८॥
नेमिं व्यावर्त्तितरथं दृष्ट्वा तदा यदूत्तमः । समुद्रविजयो माता शिवा गोप्योऽखिला जगुः ॥६०९॥
वत्स ! स्वच्छाऽधुना मा त्वं रथं पश्चाच्च वालय । परिणीय वधूं हर्ष-मस्माकं कुरु शीघ्रतः ॥६१०॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नेमिः प्राह पशूनां तु वधे भवति दुर्गतिः । अतो मया न कर्त्तव्यं कन्यायाः पाणिपीडनम् ॥ ६११ ॥
समुद्रविजयः प्राह पूरयाऽस्मन्मनोरथान् । नाभेयाद्याः कृतोद्वाहाः मुक्तिं जग्मुर्जिनोत्तमाः ॥ ६१२ ॥
ततोऽप्युच्चैः पदं ते स्यात् कुमार ब्रह्मचारिणः । ततो राजीमती पाणि-पीडनं कुरु वेगतः ॥ ६१३ ॥
नेमिः प्राहैककन्यायाः सङ्ग्रहेऽनन्तदेहिनाम् । वधो भवति नो तेन वक्तव्यं भवता यतः ॥ ६१४ ॥
तदा शिवा जगौ-पत्थेमि जणणिवच्छलवच्छ ! तुमं पढमपत्थणं किं पि । काऊण पाणिग्गहणं मह दंसे निअ वहूवयणं
चन्द्राननना जगौ—"आकण्णय कण्णरसायण जणणि भणियस्स पडिवयणं ।
तित्थयरेहिं त्रि जणणी मन्निआ भिन्नए लोए ॥ १ ॥"
राजीमती जगौ—"जइ सयलसिद्धभुत्ताइ धुत्त ! रत्तोऽसि मुत्तिगणीयाए ।
ता एवं परिणयणारंभेण विडंविआ किमहं ॥ १ ॥"
सख्यः प्रोचुश्चेति—"पिम्मरहिअंमि पियसहिअ ! एयम्मि किं करिसि पियभावं ? ।
पिम्मपरं किंपि वरं अन्नयरं ते करिस्सामो ॥ १ ॥"
राजमती कर्णौ पिधाय जगाविति—"सहि ! एयं असोअव्वं तुमंपि जंपसि किमिह मज्झ पुर ।
जइ कह वि पच्छिमाए उदयं पावइ दिणयरो तहवि । मोत्तूण नेमिनाहं करेमि नाहं वरं अन्नं ॥ १ ॥

For Private and Personal Use Only

जय विहु एअस्स करे मज्झ करो नत्थि परिणयणसमए। तह वि सिरे मह सु च्चिय दिक्खासमए करो होउ ॥२॥"

नेमिः प्राह मया ज्ञातं संसारस्य सुखं किल। ममाऽतो विद्यते मुक्ति-सातवाञ्छा मनोहरा ॥ ६१५ ॥

इतः सारस्वता देवा समेत्य स्वर्गतस्तदा। प्रोचुरेवं जय त्वं तु धर्म्मतीर्थं प्रवर्त्तय ॥ ६१६ ॥

जय निर्जितकन्दर्प ! जन्तुजाताभयप्रद ! । नित्योत्सवावतारार्थं नाथ ! तीर्थं प्रवर्तय ॥ ६१७ ॥

ततोऽभ्येत्य गृहे नेमि-र्दानं सांवत्सरं रयात्। वर्षं यावद्ददौ पृथ्वी-मनृणां विदधे क्रमात् ॥ ६१८ ॥

तथाहि–' एगा हिरण्णकोडी अट्ठेव य अणूणगा सयसहस्सा। सूरोदयमाइयं दिज्जइ जा पाउरासाओ ॥ १ ॥

तिन्नेव य कोडी सया अट्ठासीयं च हुंति कोडीओ। असीयं च सयसहस्सा एयं संवच्छरे दिन्नं ॥ २ ॥'

ततः स्नानं प्रभुः कृत्वा परिधायाऽम्बराणि च। कृष्णेन शिबिकायां तु कृतायां न्यविशत्तमाम् ॥ ६१९ ॥

विज्ञायाऽवधिना नेमेः संयमग्रहणक्षणम्। इन्द्रोऽभ्येत्य व्यधाचार्वी-मुत्तरां शिबिकां वराम् ॥ ६२० ॥

आदौ तु कृष्णविहितां, शिबिकामारुह्य नेमिजिनः। पुराद्बहिर्यादवाद्यैः, सोत्सवं समुपेयिवान् ॥ ६२१ ॥

द्वयोः शिबिकयोरेकी-भूतयोस्तत्र तीर्थपः। उपविष्टोऽचलच्छक्र-धृतछत्रेन्द्रवीजितः ॥ ६२२ ॥

हरिमुख्यनृपैः शक्रे-शानाभ्यां भूरिनिर्जरैः। परिवृतोऽर्थिभिर्गीय-मानानूनगुणव्रजः ॥ ६२३ ॥

गत्वा रैवतकोद्यानेऽवरुह्य शिबिकासनात्। कृतषष्ठतपाः पञ्च-मुष्ट्या लोचं व्यधात्तदा ॥ ६२४ ॥ त्रिभिर्विशेषकम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हायनानां त्रिशत्या तु जन्मवस्त्राद् गते सति । नभोधवलषष्ठ्यां तु पूर्वाह्णे त्वाष्ट्रगे विधौ ॥ ६२५ ॥
निवृत्ते तुमुले सामा-यिकस्योच्चरणक्षणे । प्रभोर्ज्ञानं समुत्पन्नं तुर्यं वाचंयमोचितम् ॥ ६२६ ॥ युग्मम् ॥
तिहिं नाणेहिं समग्गा तित्थयरा जाव हुंति गिहिवासे । पडिवन्नम्मि चरित्ते चउनाणी जाव छउमत्थे ॥१॥
सहस्रं भूभुजां लोचं विधाय प्रभुवत्तदा । जग्राह संयमं स्वामि-भक्त्या केचित् स्वभावतः ॥ ६२७ ॥
कृष्णेन्द्रादिषु यातेषु स्वस्वस्थाने नृपादिषु । वरदत्तद्विजावासे गोष्ठस्थेऽह्नि द्वितीयके ॥ ६२८ ॥
पारणं परमान्नेन यावत् प्रभुर्व्यधात्तमाम् । तावत्तत्र गृहे रत्न-वृष्टिं चक्रुः सुधाभुजः ॥ ६२९ ॥ युग्मम् ॥
यत–' अद्ध य तेरस कोडी उक्कोसा तत्थ होइ वसुहारा । अद्ध य तेरस लक्खा जहन्निया होइ वसुहारा ॥१॥'
विहारं कुर्वतोऽहस्सु चतुःपञ्चाशति व्रतात् । गतेषु केवलज्ञानं सहस्राम्रवनेऽजनि ॥ ६३० ॥
सद्यः सुरवरैरेत्य तत्र वप्रत्रये कृते । उपविष्टो जिनो नेमि-र्दातुं धर्मोपदेशनाम् ॥ ६३१ ॥
इत उद्यानपस्याऽऽस्याद् ज्ञानोत्पत्तिं प्रभोस्तदा । मत्वा हृष्टो ददौ दानं मुरारातिर्यथोचितम् ॥ ६३२ ॥
कृष्णः समुद्रविजय-शिवाभामादिसंयुतः । गत्वा तत्र प्रभोस्तिस्रः प्रदक्षिणा व्यधाद् द्रुतम् ॥ ६३३ ॥
बलिं कृत्वा प्रभुं नत्वा स्थाने यथोचिते हरौ । उपविष्टे परे स्वस्वो-चिते स्थाने न्यवीविशत् ॥ ६३४ ॥
"राया व रायमच्चो तस्सासइ पउर जणवओ वावि । दुब्बलिकंडिय बलि छडीअ तंदुलाणाढगं कलमा ॥१॥

For Private and Personal Use Only

भाइअपुणाणियाणं अखंडफुडियाण फलगसरियाणं । कीरइ बली सुराविं अ तत्थेव च्छुहंति गंधाइ ॥ २ ॥
बलिपविसणसमकालं पुव्वदारेण ठाई परिकहणा । तिगुणं पुरओ पाडण तस्सद्धं अवडियं देवा ॥ ३ ॥
अद्धद्धं अहिवइणो तदद्धमो होइ पागयजणस्स । सव्वामयप्पसमणी कुप्पइ नऽन्नो अ छम्मासे ॥ ४ ॥"
इतः पुरे कुबेराह्वे कोटिनार्यभिधे पुरे । देवभट्टद्विजन्माभू-द्देवलाऽजनि गेहिनी ॥ ६३५ ॥
क्रमात् तयोरभूत् सोम-भट्टः पुत्रो मनोहरः । सोमभट्टस्य पत्न्यासी-दम्बिका जिनधर्मकृत् ॥ ६३६ ॥
क्रमाद्दिवं गते देव-भट्टे निकेतनप्रभुः । सोमभट्टो व्यधात् पितृ-कृत्यं सद्गतये तदा ॥ ६३७ ॥
तदैव श्राद्धदिवसे मासक्षपणपारणे । भिक्षायै संयतं द्वन्द्वं सोमभट्टालये ययौ ॥ ६३८ ॥
साधू तौ शमिनौ वीक्ष्य दध्यावित्यम्बिका हृदि । ममाऽद्य सदनं जातं पवित्रं संयतागमात् ॥ ६३९ ॥
श्वश्रूरेव गृहे नास्ति शुद्धमन्नं गृहे पुनः । प्रतिलाभ्य यतौ चेमौ कृतार्थाऽद्य भवाम्यहम् ॥ ६४० ॥
ध्यात्वेति हर्षिताऽऽदाय शुद्धमन्नं करे निजे । अम्बिकाऽवग् यतीनां तु चान्नं प्रासुकमुत्तमम् ॥ ६४१ ॥
शुद्धमन्नं तदा ज्ञात्वा धत्तः पात्रं यती वरौ । तदाऽम्बिका मुदा साध्वो-स्तयोरन्नं ददौ द्रुतम् ॥ ६४२ ॥
हव्यकव्यमकृत्वा तां ददानां दानमम्बिकाम् । दृष्ट्वा प्रातिगृहिण्येका तस्यामीर्ष्यां व्यधात्तमाम् ॥ ६४३ ॥
तस्याः श्वश्रूर्यदाऽऽयाता तदाऽवक् प्रातिगेहिनी । अकृत्वा हव्यकव्यादि भवत्याः स्नुगेहिनी ॥ ६४४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनादृत्य भवन्तीं तु साधुभ्यामन्नमादरात् । अदिताथ न तेनैव रुचिरा विधते ननु ॥ ६४५ ॥
तदाऽम्बिका भिया कम्प-माना श्वश्रू समीपतः । कृष्णपक्षेन्दुवत् कार्श्यं बभारानघमानसा ॥ ६४६ ॥
इतः सोमो द्विजान् प्रेत-कृत्यायाऽऽनीतवान् गृहे । पत्नीकृत्यं निशम्याथ तर्जयामास तां प्रियाम् ॥ ६४७ ॥
अम्बिका तर्जिता पत्या श्वश्रा च दूनचेतसा । लात्वा शुभंकरं विभुं-करं सूनुद्वयं तदा ॥ ६४८ ॥
तौ मुनी मानसेऽत्यन्तं स्मरन्ती नेमिनं जिनम् । चचाल रैवतक्षोणी-धरस्य दिशि वेगतः ॥ ६४९ ॥ युग्मम् ॥
मार्गे यान्त्यम्बिका खिन्ना बुभुक्षापिडितौ सुतौ । दर्शं दर्शं रुरोदेति जल्पन्ती दैवतं प्रति ॥ ६५० ॥
रे दैव ! किं मया चक्रे-ऽपराधस्तेऽधुना किल । येनेदृक्षामहं नीताऽवस्थां पुत्रयुता त्वया ॥ ६५१ ॥
साधुभ्यां शुद्धमाहारो मया मुक्तिप्रदो ददे । पापं न विहित किञ्चित् किन्तु धर्मः कृतः किल ॥ ६५२ ॥
एवं कृते मया पुण्ये साधुदानेन ते किल । यत्ते समे न चित्ते तत् कुरु त्वमपि साम्प्रतम् ॥ ६५३ ॥
जल्पन्त्या इति तस्यास्तु सरो वर्याम्बुपूरितम् । फलिताम्रतरूद्धासि समागाद् दृष्टिगोचरे ॥ ६५४ ॥
एकं पुत्रं कटौ धृत्वा कृत्वाऽन्यं पाणिनाऽन्तिके । अम्बिका त्वरितं कान्त-भीता चचाल कानने ॥ ६५५ ॥
पाययित्वा पयः पुत्रौ सरस्याम्रमहीरुहात् । गृहीत्वाऽऽम्रलताद्वन्द्वं पुत्राभ्याममम्बिका ददौ ॥ ६५६ ॥
पुण्यप्रभावतोऽरण्य-मभूदाम्रलतोदयम् । ध्यायन्ती हृदयेऽचाली-दम्बिका नेमिनं जिनम् ॥ ६५७ ॥

For Private and Personal Use Only

इतो ममान्नमुच्छिष्टं वध्वाऽद्य साधुदानतः । चक्रे ध्यात्वेति गेहान्त-र्ययौ रोषेण पूरिता ॥ ६५८ ॥
अन्नपूर्णान्यमत्राणि बहिः क्षेप्तुं यदाऽम्बिका । गृहमध्ये ययौ ताव-दपश्यद् रैमयानि सा ॥ ६५९ ॥
अध्यासीदम्बिका जैन-साधुदानप्रभावतः । ममागमद् गृहे स्वर्णा-ऽमत्रमेतन् मनोहरम् ॥ ६६० ॥
मुधा मया वृषो जैनो धिक्कृतो मुक्तिशर्मदः । जगद्वन्द्या जगद्ध्येयाः साधवश्चावहीलिताः ॥ ६६१ ॥
 अतो मे दुर्गतौ पातो भविष्यति न संशयः । भ्रमिष्यामि च संसारे भवान् भूरितरान् पुनः ॥ ६६२ ॥
 इतः पतिः प्रियां पुत्र-युतां यातां निजालयात् । सद्यो वालयितुं भ्रान्त-चेताः पुर्या बहिर्ययौ ॥ ६६३ ॥
 पदे पदे प्रियापादौ पश्यन् सोमस्तदाऽचलत् । वने बभ्राम सर्वत्र सोमभट्टस्य गेहिनी ॥ ६६४ ॥
शब्दयन् पतिः पत्नीति सोमभट्टः पुनः पुनः । आगच्छन् त्वरितं दृष्टोऽम्बिकया कम्पितं ततः ॥ ६६५ ॥
अध्यासीदम्बिका रुष्टः कान्त एव ममोपरि । आहत्य हस्तपादाद्यैः मां हनिष्यति वेगतः ॥ ६६६ ॥
नाधुना रक्षिता कोऽपि मामत्र वीक्ष्यते वने । दत्ते भूर्विवरं चेन्मे प्रविशामि तदाऽहकम् ॥ ६६७ ॥
मुनिभ्यां यन्मया दानं दत्तं तच्छरणं मम । ध्यायन्त्या इति तस्यास्तु कूप एकः समागमत् ॥ ६६८ ॥
भूयासुः शरणं मेऽत्र पञ्चैव परमेष्ठिनः । धर्म्मो जिनोदितो नेमि-नाथस्य चरणौ पुनः ॥ ६६९ ॥
स्मरन्तीत्यम्बिका पुत्रौ स्मारयन्ती पदे पदे । पुत्रयुक्ता ददौ झम्पां कूपे तस्मिन् कृतत्वरा ॥ ६७० ॥

मृत्वाऽजनिष्ट पाताल-वासिनी निर्जरी वरा । पुत्रद्वयाश्रितोत्सङ्गा भास्वरद्युतिधारिणी ॥ ६७१ ॥
मा पत त्वं प्रिये ! कूपे सोमभट्टे प्रजल्पति । सूनुद्वयीयुता सद्योऽम्बिका पपात वेगतः ॥ ६७२ ॥
मृतां पुत्रयुतां पत्नीं दृष्ट्वा सोमो व्यचिन्तयत् । इमां प्रियां विना किं मे जीवितेनामुनाऽधुना ॥ ६७३ ॥
विना पुत्रौ विना पत्नीं गत्वा पश्चान्निजालये । कथं दर्शयिता वक्त्रं स्वजनानामहं किल ॥ ६७४ ॥
प्रिया पुत्रयुता मृत्युं गता ममाधुना खलु । अतो मृत्युपरि श्रेयान् जीवितेन किमस्तु मे ? ॥ ६७५ ॥
विमृश्येति ततः कूपे पतित्वा सोमभट्टकः । आसीदम्बासने सिंह-नामा देवः स्फुरद् द्युतिः ॥ ६७६ ॥
इभारिवाहनीं तां च जितेन्दुवरभूषणाम् । पीयूषदेश्यवाग्सारां कम्बुकण्ठीं स्फुरद्द्युतिम् ॥ ६७७ ॥
सुरस्त्रीसेव्यमानाङ्घ्रीं दर्शनीय चतुष्टमाम् । पाशाम्रलुम्बके वामे हस्ते च दधतीं वराम् ॥ ६७८ ॥
वहन्तीं दक्षिणेनाङ्ग-जन्मद्वयाङ्कुशौ पुनः । हेमप्रभावतीं वीक्ष्य प्राहेत्येकः सुरस्तदा ॥ ६७९ ॥ त्रिभिर्विशेषकम्
देवि ! त्वया पूर्वभवे तपांसि दानानि तीर्थानि व्रपाणि कानि ।
कृतानि यद् व्यन्तरसुन्दरीणां जातासि नः स्वामिनि ! सेवनीया ॥ ६८० ॥
निशम्येदं वचः पूर्व-भवं स्मृत्वाऽथ चेतसि । अम्बिका नेमिनं साधू तावस्मार्षीं पुनः पुनः ॥ ६८१ ॥
मरुत्कृतलसद्याना-रूढा गीतगुणा सुरैः । द्योतयन्ती दिशोऽगादीद् रैवताचलमम्बिका ॥ ६८२ ॥

तस्मिन् कथयतो नेमे-र्जिनस्य धर्म्मदेशनाम् । नत्वाऽम्बिका वृषं श्रोतुं यथास्थानमुपाविशत् ॥ ६८३ ॥
वरदत्तादयो भूपा महेभ्या बहवस्तदा । तत्राऽऽगत्य स्थितास्तत्र धर्मं श्रोतुं स्त्रियोपि च ॥ ६८४ ॥
* धर्म्मो जगद्बन्धुरकारि येन धर्म्मो जगद्वत्सल आर्त्तिहर्ता । 卐
क्षेमङ्करो निर्वृतिदोऽत्र धर्म्मो धर्म्मस्ततो भक्तिभरेण सेव्यः ॥ ६८५ ॥
* सत्पात्रदानं प्रथमाऽत्र शाखा धर्म्मद्रुमे शीलमथ द्वितीया । 卐
ततस्तपोऽपायभयापहारि भवापहन्त्री शुभभावना च ॥ ६८६ ॥
* सिद्धोज्जयन्ताचलतीर्थसेवा देवार्चनं सद्गुरुसेवनं च । 卐
अघौघहृन्मन्त्रपदानि पञ्च तदग्रशाखा कुसुमाङ्कुराणि ॥ ६८७ ॥ त्रिभिर्विशेषकम् ॥
श्रुत्वा नेमिगिरं तत्र वरदत्तमहीपतिः । राज्ञां द्वाभ्यां सहस्रेण समं संयममाददौ ॥ ६८८ ॥
वरदत्तादयो भूपा वर्या एकादश क्रमात् । सम्प्राप्य त्रिपदीमासन् प्रभोर्नेमेर्गणाधिपाः ॥ ६८९ ॥
यक्षिण्याद्याः प्रवर्त्तिन्यो बह्व्योऽभूवन् सुमानसाः । सम्यक्त्वं लेभिरे विष्णु-मुख्याः श्राद्धाश्च भूरिशः ॥ ६९० ॥
रुक्मिणी-सत्यभामाद्याः श्राद्धयो बह्व्योऽभवन् पुनः । एवं चतुर्विधः सङ्घ प्रभोरासीत् क्रमात्तदा ॥ ६९१ ॥
श्रीनेमिशासनाधिष्ठा-यिका श्रीसङ्घविघ्नहृत् । अम्बिकाऽजनि सुत्रामा-देशाद्रैवतभूधरे ॥ ६९२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतो गोमेधयागादि-कारी गोमेधवाडवः । सुग्रामेऽजनि निःशेष-क्षीणश्रीर्भूरिरोगयुक् ॥ ६९३ ॥
क्रमात् कुर्वन् भृगुपातं गोमेधः पूतिगन्धयुग् । निषिद्धः साधुना नत्वा तस्य पादाम्बुजं जगौ ॥ ६९४ ॥
किं मां प्राणांस्त्यजन्तं हि निषेधयसि संयत ! । न शक्नोमि रुजः पीडां सोढुं तेन म्रियेऽधुना ॥ ६९५ ॥
साधुः प्राह न छुट्टन्ति जीवाः स्वात्महतेः क्वचित् । किन्तु स्याच्छुट्टनं पापात् तीव्रेण तपसा पुनः ॥ ६९६ ॥
गच्छ त्वं रैवतशैले भजस्व नेमिनं जिनम् । स्नानं कुरु गजेन्द्राह्वे कुण्डे रोगहराम्भसि ॥ ६९७ ॥
ततः स वाडवो गत्वो-ज्जयन्ते संयतोदितम् । कृत्वा नीरोगतां प्राप्य जैनधर्म्मं व्यधात्तमाम् ॥ ६९८ ॥
नेमिनाथार्चनां कुर्वन् मृत्वा गोमेधवाडवः । यक्षेश्वरोऽभवद्यक्षः सेवको नेमिनः प्रभोः ॥ ६९९ ॥
अन्यदेन्द्रो जगौ नेमे ! वरदत्तो गणी तव । कस्मात् पुण्यादभूत् तन्मे संशयं भिन्धि साम्प्रतम् ॥ ७०० ॥
प्रभुराचष्ट चम्पायां वरज्ञानधरो मुनिः । अवर्णयत् सभामध्ये मुक्तेः स्वरूपमादरात् ॥ ७०१ ॥
तथाहि—'सिवमयलमरुअमणंतमक्खयमव्वाबाहमपुणराविति । सिद्धिगइनामधेयं ठाणं संपत्ताणं नमोजिणाणं ॥'
अनन्तमचलं शान्तं शिवं सङ्ख्यातिगं महत् । अक्षयारूपमव्यक्तं जगुः केवलिनः पदम् ॥ ७०२ ॥
"एगा जोअणकोडी बायाल संभवे सयसहस्साइं । तीसं चेव सहस्सा दो चेव सया अउणवन्ना ॥ १ ॥
जत्थ य एगो सिद्धो तत्थ अणंता भवक्खयविमुक्का । अन्नुन्नसमोगाढा पुट्ठा सव्वे य लोगंते ॥ २ ॥

For Private and Personal Use Only

सुरगणसुहं समग्गं सव्वद्धापिंडियं अणंतगुणं । नवि पावइ मुत्तिसुहंऽणंताहिं वग्गवग्गूहिं ॥ ३ ॥"
तदा पञ्चमकल्पेशो नत्वाऽप्राक्षीत् प्रभो ! मम । कदा मे भाविनी मुक्ति-स्ततो ज्ञानधरो जगौ ॥ ७०३ ॥
ज्ञान्यवगवसर्पिण्या-मग्रेतन्यां हरेस्तव । नेमेर्द्वाविंशसार्वस्य भविष्यत्यादिमो गणी ॥ ७०४ ॥
गणेशो वरदत्तस्त्वं प्रबोध्य भविनो बहून् । श्रीरैवताभिधे शैले ज्ञानी भूत्वा गमी शिवम् ॥ ७०५ ॥
श्रीब्रह्मेशो निशम्येति नत्वा तत्र जिनं मुदा । गत्वा स्वर्गे वरैः रत्नै-र्व्यधान्मे मूर्त्तिमुत्तमाम् ॥ ७०६ ॥
तस्याः पुरोऽनिशं गीत-नृत्यादि सोऽकरन् मुदा । ततः प्रान्तेऽत्र शैलान्तर्गुप्तं देवगृहं व्यधात् ॥ ७०७ ॥
आयुःप्रान्ते ततश्च्युत्वा लब्ध्वोत्तरोत्तरान् भवान् । वरदत्ताभिधो गच्छा-धीशोऽयं मेऽभवद्धरे ! ॥ ७०८ ॥
यस्मान् मूर्त्तिस्तदा ब्रह्म–नाथेन पूजिता मम । तत्फलात् प्राप्त गच्छेश-पदं मुक्तिं गमिष्यति ॥ ७०९ ॥
उक्तंच—श्रीब्रह्मेन्द्रकृतेयं श्रीनेमेर्मूर्त्तिरमरगणपूज्या ।
विंशतिसागरकोटीं स जयति गिरिनारगिरिराजः ॥ २ ॥"
नेमिनाथान्तिके दीक्षां लात्वा राजीमती सती । ययौ मुक्तिं प्रभोरर्वाक् पुण्यपापक्षयाल्लघु ॥ ७१० ॥
नेमिपार्श्वे व्रतं लात्वा यादवा बहवः क्रमात् । कृष्णस्य पुत्रपुत्र्यश्च पत्न्यश्च निर्वृतिं ययुः ॥ ७११ ॥
महानेमिरथनेमी तथाऽन्येऽपि यदूत्तमाः । श्रीनेमिसन्निधौ दीक्षां लात्वा मुक्तिं ययुः क्रमात् ॥ ७१२ ॥

॥५३१॥

यादवो मेघनादाह्व श्चलम् रैवतके गिरौ । यत्र सिद्धोऽभवत्तत्र तद्विम्बं सद्मसंश्रितम् ॥ ७१३ ॥
यत्रस्थेन भगवता नेमिनाऽऽलोकितो गिरिः । अवलोकननामाऽभूत् शृङ्गं तन्नेमिबिम्बयुग् ॥ ७१४ ॥
उक्तश्च—"पुण्डरीकगिरेः शृङ्गमेतन्मुख्यं हि काञ्चनम् । मन्दारकल्पवृक्षाद्यैरादृतं तरुभिर्वरम् ॥ १ ॥"
सम्पातिनिर्झरैर्धौत-पातकं प्राणिनां सदा । स्पर्शतोऽपि महातीर्थ-मेतत्पापं व्यपोहति ॥ ७१५ ॥
पुण्योऽयं पर्वतो वर्यः पृथिव्यास्तिलकोपमः । श्री सर्वज्ञक्रमैः पूतो भाति त्रैलोक्यभूषणम् ॥ ७१६ ॥
उत्तमः सर्वतीर्थानां सर्वतीर्थफलप्रदः । दर्शनस्पर्शनेनापि दुरितं हन्ति सर्वतः ॥ ७१७ ॥
न्यायोपात्तं धनं येत्र कुर्वते पात्रमङ्गिनाम् । तेषां समृद्धयः सर्वा सम्पद्यन्ते भवे भवे ॥ ७१८ ॥
अम्बिका निर्जरी यत्र स्थिता पाति च यात्रिकान् । अम्बिकाख्यमभूच्छृङ्गं तदम्बाबिम्बसद्मयुग् ॥ ७१९ ॥
छत्रं यत्राऽमुचत्कृष्ण-स्तीर्थं नन्तुं समागतः । स्थानस्य तस्य तु छत्र-शिलेत्याह्वाऽभवत्तदा ॥ ७२० ॥
सहस्रबिन्दुरुर्वीशः सहस्रभूपसंयुतः । आत्तदीक्षोऽगमन्मुक्तिं यत्र स्थाने तमःक्षयात् ॥ ७२१ ॥
सहस्रबिन्दुनामाऽभूत्तस्य स्थानस्य लोकतः । तीर्थं तदपि कल्याण-कमलादायि विद्यते ॥ ७२२ ॥
सहस्राम्रवने नेमि-जिनस्य प्रवरं गृहम् । कारयामास लक्ष्मीशो भूयिष्ठकमलाव्ययात् ॥ ७२३ ॥
लक्षाम्रकानने नेमि-नाथस्य सदनं महत् । नेमिबिम्बयुतं कृष्णः कारयामास रैव्ययात् ॥ ७२४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृष्णः सङ्घं बहुं नीत्वा सिद्धाद्रयुज्जयन्तयोः किल । यात्रां कुर्वन् बहूनां तु बोधिबीजं व्यधात्तमाम् ॥ ७२५ ॥
यत्र राजीमती साध्वी रथनेमियतीश्वरम् । यातमुन्मार्गमानैषीत् सन्मार्गं वरया गिरा ॥ ७२६ ॥
तस्य स्थानस्य लोकेन रथनेमिगुहाऽभिधाम् । ददेऽतो विद्यते तीर्थं तदेव शिवशर्मदम् ॥ ७२७ ॥
मेघे वर्षति एकस्यां गुहायां रथनेमि-राजीमत्योः समागमनं जातं, राजीमतीरूपं दृष्ट्वा रथनेमिस्तां ॥ भोगाय याचतेस्म, तयाऽतः स प्रबोधित इत्यादिसम्बन्धः स्वयमेव विस्तराद् ज्ञेयः ।
" अहं च भोगरायस्स तं च सि अंधगवह्णिणो । मा कुले गंधणा होमो संजमं निहुओ चर ॥ १ ॥"
अन्यदा प्राभृते तार्क्ष्य-युग्मे समागते सति । शाम्बश्च पालकः पुत्रौ याचेते युगपत् स्फुटम् ॥ ७२८ ॥
तदाऽऽचष्ट हरिः शाम्ब-पालकाङ्गजयोः पुरः । कल्ये यः प्रथमं नौति नेमिं तस्मै ददाम्यहम् ॥ ७२९ ॥
यामिनीपश्चिमे यामे उत्थायोच्चैःस्वरं गदन् । गत्वा पुर्या बहिर्नेमिं पालकः प्राणमन्मुदा ॥ ७३० ॥
स्वस्थानकस्थितः शाम्बः कृत्वोत्तरयिकं वरम् । रजनीपश्चिमे यामे नेमिं भक्त्याऽनमत्तमम् ॥ ७३१ ॥
प्रातः कृष्णः प्रभुं नत्वा जगौ पालकशाम्बयोः । मध्ये केन भवान् भक्त्याऽवन्दि प्राह ततः प्रभु ॥ ७३२ ॥
शाम्बेन भावतोऽवन्दि पालकेन च द्रव्यतः । ततः कृष्ण ददावश्वं शाम्बाय पालकाय न ॥ ७३३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

* यतः—"ध्यात्वा हृदि स्वं फलमाप शाम्बः साक्षान्निरीक्ष्यापि न पालकश्च । 卐
तेनान्तराङ्गं विधिमामनन्ति मनीषिणो बाह्यविधेर्बलिष्ठम् ॥ १ ॥

द्वारवत्यां हरेर्भेर्य-स्तिस्रो विद्यन्त एव तु । आद्या सङ्ग्रामिकोद्भूता वर्या कौमुदिकी क्रमात् ॥ ७३४ ॥
उद्भूतिका तु कस्मिंश्चित् कार्येऽमात्यादिभृस्पृशाम् । ज्ञापनार्थं पुरीमध्ये वाद्यते सेवकैर्दृढम् ॥ ७३५ ॥

उक्तश्च—'तिन्नि गोसीसचंदणमइआउ देवयापरिग्गहियाओ । तस्स चउत्थी भेरि असिवोवसमणी । तीसे उप्पत्ति कहिज्जइ-सक्को देवलोगे वासुदेवस्स गुणकित्तणं करेइ-अहो ! उत्तमपुरिसा एए अवगुणं न गिण्हन्ति, नीएण जुद्धेण न जुज्झंति, तत्थ एगो देवो असद्दहंतो आगओ, वासुदेवोवि जिणसगासं वंदओ पट्ठिओ, सो अन्तरा कालसुणयरूवं मययं दुब्भिगंधं विउव्वइ, तस्स गंधेण सव्वो लोगो पराभग्गो, वासुदेवेण दिट्ठो, भणियं चणेण-अहो ! इमस्स कालसुणयस्य पंडुरा दंता मरगयभायणनिहिअमुत्ताहलव्व रेहंति, देवो चिंतइ सच्चं गुणग्गाही, तओ वासुदेवस्स आसरयणं हरइ, वासुदेवो भणइ, कीस मम आसरयणं हरसि ? देवो भणइ, नीअजुज्झेण पराजिऊण गिण्हाहि, वासुदेवेण भणियं, पराजिओहं नेहि आसरयणं, नाहं नीअजुज्झेण जुज्झामि, देवो तुट्ठो भणइ-किं ते वरं देमि ? सो भणइअसिवोवसमणिं भेरिं देहि, तेण दिन्ना, सा छण्हं मासाणं अंते वाइज्जइ, तत्थ जो सद्दं सुणेइ तस्स पुव्वुप्पन्ना रोगा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उवसमंति नवगावि छम्मासे ण उप्पज्जंति । अन्नया आगंतुगो वाणियओ आगओ अईव दाहजरेण अभिभूओ तं भेरिपालगं भणइ-गिण्ह तुमं सयसहस्सं मम इत्तो पलमित्तं देहि, तेण लोभेण दिन्नं, तत्थ अन्ना चंदणथिगलिआ दिन्ना, एवं अन्नेण अन्नेण मग्गिओ दिन्नं च सा सव्वा चंदणकंथा जाया, सा कइया असिवे वासुदेवेण ताडाविया, जाव तं चेव सभं पूरेइ, तेण भणियं-भेरि सव्वा विणासिया, सो भेरीपालो ववरोविओ, अन्ना भेरी अट्ठमंते देवेण दिन्ना ॥

अन्यदा सुलसा श्राद्धी-वर्द्धिता देवकीसुताः । श्रीनेमिसन्निधौ दीक्षां गृहीत्वा कुर्वते तपः ॥ ७३६ ॥
द्वारकाबहिरुद्याने नेमिं पृष्ट्वा वसोः सुताः । षडपीयुः पुरीमध्ये ते भिक्षायै मध्यवासरे ॥ ७३७ ॥
एकः साधुर्हरेर्गेहे देवकीकरतो यदा । भिक्षां लात्वा गतस्ताव-दन्यस्तत्र समागमत् ॥ ७३८ ॥
सोऽपि भिक्षां गृहीत्वाऽगा-द्यावत् तावत्तृतीयकः । आगाद् भिक्षाकृते सोऽपि देवक्या प्रतिलाभितः ॥७३९॥
एवं षडपि देवक्या प्रतिलाभ्येति चिन्तितम् । स एव संयतो भूयो भूयः किं याचतेऽदनम् ? ॥ ७४० ॥
ततो नेम्यन्तिकेऽभ्येत्य पप्रच्छ देवकी प्रभुम् । किमेको भूरिशो वारान् भिक्षायै साधुरागमत् ? ॥ ७४१ ॥
ततः प्रभुर्जगौ तेषां साधुनामादितस्तदा । सम्बन्धं देवकी हृष्टा नेमे षडपि नन्दनान् ॥ ७४२ ॥
ततो नत्वा प्रभुं गेहे समेत्य पुरतो हरेः । जगौ सप्तापि नो पुत्राः पालिता लालिता मनाग् ॥ ७४३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेनैकश्चेत् सुतो मे स्या-त्तत्तदा मम जीवितम् । ततो हरिः समाराध्य सुरं याचितवानिति ॥ ७४४ ॥
एकं देहि सुतं मातु र्देवक्याः शर्मणेऽधुना । भाविनं तनयं नत्वा सुरः प्राह हरिं प्रति ॥ ७४५ ॥
देवक्या यः सुतो भावी स च दीक्षां गृहीष्यति । कृष्णोऽवग् नन्दनो भूयात् गृह्णातु संयमं पुनः ॥ ७४६ ॥
एषा मे जननीवाञ्छा पूर्णीभवतु साम्प्रतम् । यतः पूज्या प्रसूः सर्व-जनानां हितकारिणी ॥ ७४७ ॥
क्रमाज्जाते सुते माता देवकी भर्तृसंयुता । सूनोर्नाम ददौ गज-सुकुमालेति सोत्सवम् ॥ ७४८ ॥
सोमभट्टस्य विप्रस्य पुत्री मनोरमाभिधा । पितुरादेशतस्तेन सूनुनाङ्गीकृता तदा ॥ ७४९ ॥
अन्येद्युर्नेमिनः पार्श्वे माहात्म्यं सिद्धभूभृतः । सुश्राव केशवश्चैवं योजयित्वाञ्जलीद्वयम् ॥ ७५० ॥
प्राणिभिर्यं समारूढैर्लोकाग्रमतिदुर्लभम् । प्राप्यते सर्वतीर्थेशः शाश्वतोऽयं शिवाचलः ॥ ७५१ ॥
तीर्थं चानादि सिद्धाद्रि यत्रानन्ताः शिवं ययुः । तत्र यः कुरुते यात्रां नौति श्रीवृषभं जिनम् ॥ ७५२ ॥
तस्य स्तोकैर्भवैरेव मुक्तिर्भवति निश्चितम् । प्रभुं पूजयतो भावात् स्तवतो रुचिरैः स्तवैः ॥ ७५३ ॥
नमस्कारसमो मन्त्रः शत्रुञ्जयसमो गिरिः । गजेन्द्रपदजं नीरं निर्द्वन्द्वं भुवनत्रये ॥ ७५४ ॥
कृत्वा पापसहस्राणि हत्वा जन्तुशतानि च । शत्रुञ्जयं समाराध्य तिर्यञ्चोऽपि दिवं गताः ॥ ७५५ ॥
पल्योपमसहस्रं तु ध्यानाल्लक्षमभिग्रहात् । दुष्कर्म्म क्षीयते मार्गे सागरोपमसञ्चितम् ॥ ७५७ ॥

॥ ५३६ ॥

श्रीतीर्थपान्थरजसा विरजीभवन्ति, तीर्थेषु बंभ्रमणतो न भवे भ्रमन्ति ।
तीर्थेश्वरार्चनकृतो जगदर्चनीया-स्तीर्थव्ययादिह नराः स्थिरसम्पदः स्युः ॥ ७५७ ॥
श्रुत्वेति तीर्थमाहात्म्यं रैमयान् जिनपालयान् । आदौ पञ्चशतीं कृष्णः कारयामास मोदतः ॥ ७५८ ॥
यात्रां शत्रुञ्जये कर्त्तुं सर्वान् देवालयान् क्रमात् । रथारूढान् व्यधात् कृष्णः शोभते वासरे किल ॥ ७५९ ॥
काष्ठात्मकान् सहस्रं तु शतानि सप्त च क्रमात् । कारयामास कंसारि भूयिष्ठविभवव्ययात् ॥ ७६० ॥
सम्प्रेष्य भूरिदेशेषु वह्वीः कुंकुमपत्रिकाः । सङ्घमाकारयामास कृष्णः शोभनवासरे ॥ ७६१ ॥
नृणां कोट्यश्चतुर्विंश-प्रमाणा भूधवादयः । मिलिता वृषभं देवं नन्तुं सङ्घे हरेस्तदा ॥ ७६२ ॥
ग्रामे ग्रामे पुरे पुर्यां श्रीजिनेश्वरसद्मसु । पूजोत्सवं वितन्वानः कृष्णः सङ्घयुतोऽचलत् ॥ ७६३ ॥
क्रमाच्छत्रुञ्जये गत्वा चक्रे स्नात्रमहोत्सवम् । विस्तरान्मुख्यसर्वज्ञ गेहे कृष्णनरेश्वरः ॥ ७६४ ॥
ततो राजादनीं मुक्ता-फलैरामलकोपमैः । मुदा वर्द्धापयामास त्रिःप्रदक्षिणया हरिः ॥ ७६५ ॥
पुष्पैर्मनोहरैः स्वामि-पादुके मुक्तिशर्म्मदे । कंसारिः पूजयामास भूरिसङ्घसमन्वितः ॥ ७६६ ॥
ततः सर्वेषु सर्वज्ञ-गेहेषु श्रीजिनाधिपान् । अर्चयामास कंसारिः पुत्रपत्न्यादिसंयुतः ॥ ७६७ ॥
ततो रमाधवोऽभ्येत्य वरदत्तगुरोर्मुखात् । माहात्म्यं सिद्धशैलस्य सुश्रावेति कृतादरम् ॥ ७६८ ॥

॥५३७॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शत्रुञ्जय
कल्पवृ०
॥५३८॥

※ यतः–" बंभणखत्तियवइसा सद्धाविन्नाणबाहिरा जेवि । तित्थफलं पावेंति अचयसंताले वि सित्तुंजे ॥ १ ॥ 卐
※ जं लहइ अन्नतित्थे चरणेण तवेण बंभचेरेणं । तं लहइ पयत्तेणं सित्तुंजगिरिम्मि संपत्तो ॥ २ ॥ 卐
※ जं कोडीए दिन्नं कामिअआहारभोयणाए य । तं लहइ तित्थपुन्नं इक्को वासेण सित्तुंजे ॥ ३ ॥ 卐
※ गाविय सुवण्णभूमीअ दाणे अ जं भवे पुण्णं । तं लहइ पयत्तेणं पूयाकरणेण सित्तुंजे ॥ ४ ॥ 卐
※ जो पडिमां चेइयहरं सित्तुंजगिरिस्स मत्थए कुणइ । भोत्तूण भरहवासं वसइ सग्गे निरुवसग्गे ॥ ५ ॥ 卐
※ पूयं करेइ विहिणा सित्तुंज्जे चेइयाण सव्वेसिं । सो पूइज्जइ निच्चं देवासुरमाणुसेहिंपि ॥ ६ ॥ 卐
※ जंकिंचि नाम तित्थं सग्गे पायालि माणुसे लोए । तं सयलमेव दिट्ठं पुंडरीए वंदिए जाण ॥ ७ ॥ 卐
※ अट्ठावय सम्मेए चंपा पावाइ उज्जितनगे य । वंदित्ता पुण्णफलं सयगुणियं होइ पुण्डरीए ॥ ८ ॥ 卐
※ नवकारपोरिसिए पुरिमड्ढेगासणे य आयामे । पुंडरीअं च सरंतो फलकंखी कुणइ अभत्तट्ठं ॥ ९ ॥ 卐
※ छट्ठट्ठमदसमदुवालसाइं मासद्धमासखमणाइं । तिगरणसुद्धो लहइ सित्तुंज्जं संभरंतो य ॥ १० ॥" 卐

इत्यादि तीर्थमाहात्म्यं श्रुत्वा कृष्णो धनं बहु । व्ययित्वा तत्र भूमिध्रे भूरि पुण्यमुपार्जयत् ॥ ७६९ ॥ ॥५३८॥
ततः श्री उज्जयन्ताद्रौ गत्वा नेमिजिनेश्वरम् । अर्चयन् विस्तरात् कृष्ण-भूपः सङ्घसमन्वितः ॥ ७७० ॥
परिधाप्याखिलं सङ्घं वस्त्रैर्वरतरैस्तदा । विसृज्य चाऽऽगमत् स्वीय-पुर्यां मधुरिपुः क्रमात् ॥ ७७१ ॥

For Private and Personal Use Only

ततः प्रतिदिनं ध्यानं शत्रुञ्जयसमाश्रितम् । कृष्णश्चकार पूतात्मा प्रातः प्रातः प्रमोदतः ॥ ७७२ ॥
अन्यदा नेमिनः पार्श्वे देवकीनन्दनो गजः । धर्म्मोपदेशनामेतां सुश्रावाऽनघमानसः ॥ ७७३ ॥
अनाज्यभोज्यमप्राज्यं विप्रयोगः प्रियैः समम् । अप्रियैः सम्प्रयोगश्च सर्वपापविजृम्भितम् ॥ ७७४ ॥
* निर्द्रव्यो धनचिन्तया धनपतिस्तद्रक्षणे व्याकुलो, निश्रीकस्तदुपायसङ्गतमतिःस्त्रीप्राप्त्यपत्येच्छया ।卐
प्राप्तापत्यपरिग्रहोऽपि सततं रोगैरभिद्रूयते, जीवः कोऽपि कथञ्चनाऽपि नियतं प्रायः सदा दुःखितः ॥ ७७५ ॥
आकर्ण्यैतच्च सम्प्राप्त-वैराग्यो गजनन्दनः । नेमिपार्श्वे व्रतं लात्वा तीव्रं वितनुते तपः ॥ ७७६ ॥
कायोत्सर्गे स्थितं गज-सुकुमालं यतिं स्थिरम् । विलोक्य श्वशुरो रुष्टो जगावेवं पुनः पुनः ॥ ७७७ ॥
मुञ्च व्रतं न चेद् हन्मि त्वां नः पुत्रीपते ! द्रुतम् । ध्यानलीनोऽभवत् साधु-र्गजस्तत्र क्षणे दृढम् ॥ ७७८ ॥
तदा तन्मस्तके मुक्त्वा शकटीं वह्निपूरिताम् । चिक्षेपेन्धनसङ्घातं भूयोभूयः स वाडवः ॥ ७७९ ॥
गजस्य कुर्वतः शुक्लं ध्यानं सर्वतमःक्षयात् । उत्पन्नमव्ययं ज्ञानं मुक्तिश्चाभूत्तदा द्रुतम् ॥ ७८० ॥
तदाऽप्राक्षीद्धरिः स्वामिन् ! गजस्य कस्य हस्ततः । अभून्मृतिस्ततोऽवादी-न्नेमिर्हरे पुरः किल ॥ ७८१ ॥
तवाऽद्य गच्छतः पुर्यां स्फुटित्वा हृदयं स्वयम् । मृतिं यास्यति ते भ्रातुर्हन्ता स एव भूपते ! ॥ ७८२ ॥
आगच्छन् केशवः पुर्यां सोमभट्टं द्विजं तदा । अकस्मान्मरणे यान्तं भीत्या ददर्श वेगतः ॥ ७८३ ॥

For Private and Personal Use Only

ततः कृष्णो जगावेष भाग्यहीनो द्विजो ननु । मुधाऽनेन यतिः प्राण-त्यागश्च कारितः किल ॥ ७८४ ॥
कृष्णेनाभिग्रहो नेमि-पार्श्वे लले इति ध्रुवम् । यो लास्यति व्रतं पुत्रः पुत्री वा प्रभुसन्निधौ ॥ ७८५ ॥
न निषेध्यो मया स्वामिन् ! स एव नन्दनः क्वचित् । ततो लले व्रतं विष्णो-र्भूरिपुत्रीसुतादिभिः ॥ ७८६ ॥
कृष्णोऽन्यदा जगौ स्वामिन् ! द्वारकेयं मनोहरा । संस्थास्यति कियत्कालं कुतो मे स्यान्मृतिः पुनः ? ॥७८७॥
द्वारकायाः स्वरूपं तु भावि ज्ञात्वा दृढं तदा । प्रभुर्नेमिजिनः प्राह विष्णोरिति पुरः स्फुटम् ॥ ७८८ ॥
कृष्ण ! द्वीपायनान्मद्याद् दाहः पुर्या भविष्यति । जराकुमारतो भ्रातु-र्मृत्युर्भावी तवाऽचिराद् ॥ ७८९ ॥
ततः कृष्णो बहिः पुर्यां सुरामत्याजयत् क्षणात् । कृष्णद्वीपायनो बाह्यो-द्याने तस्थौ तपः परः ॥ ७९० ॥
वसुदेवस्य पुत्रोपि, त्यक्त्वाद्वारामतीं पुरीं । अस्माद् भ्रातुर्मृतिं मत्वा जराको दूरमीयिवान् ॥ ७९१ ॥
प्रद्युन्नसाम्बभीर्वाद्याः कुमाराः कंसविद्विषः । क्रीडां कर्त्तुं गता बाह्यो-द्याने शैलस्थितां सुराम् ॥ ७९२ ॥
वीक्ष्याऽऽकण्ठं पपुर्नर्म-कुर्वाणाश्च परस्परम् । कृष्णद्वीपायनं दृष्ट्वा दध्युस्ते कृष्णनन्दनाः ॥ ७९३ ॥
अस्माद् ऋषेः पुरश्छेदो भाव्यतः पापमानसः । हंतव्योऽयमिति कृत्वा, निर्दयायदुनंदनाः ॥ ७९४ ॥
त्वं पापी त्वं पुरछेद-कारीति कृष्णसूनवः । जल्पन्तो यष्टिमुष्ट्या तु बाढं तेऽकुट्टयंस्तदा ।
हन्यमान ऋषिस्तैश्च निदानमकरोदिति । द्वारकाया विनाशाय भूयासमहमग्रतः ॥ ७९५ ॥

मृतप्रायं ऋषिं कृत्वा गतास्ते नगरान्तरे । स्वपुत्रचेष्टितं श्रुत्वा कृष्णोऽगाद् ऋषिसन्निधौ ॥ ७९५ ॥
पतित्वा पादयोस्तस्य कृष्णो जगाविदं तदा । क्षमस्व दुर्विनीतत्वं मम देहभुवां ऋषे ! ॥ ७९६ ॥
न कुप्यन्ति रिपौ सन्तः पीडिता अपि बालिशैः । किन्तमः पीडितोऽपीन्दुः करैर्दहति जातुचित् ॥७९७॥
 द्वीपायनो जगौ क्षान्तं मयाऽद्योपरि ते नृप ! । निदानं नान्यथा प्रायो जायते विहितं नृप ! ॥७९८॥
 प्रणम्य तमृषिं कृष्णो गत्वा पुर्यां विस्मृत्य तत् । पपाल जनता भुङ्क्ते भोगान् स्वचित्तचिन्तितान् ॥७९९॥
 ततो मृत्वा ऋषिर्वह्नि-कुमारेषु सुरोऽभवत् । जज्ञौ चावधिना कृष्ण-पुत्रैः कृतं पराभवम् ॥ ८०० ॥
इतोऽप्राक्षीज्जिनं कृष्णः कथं शाम्यत्युपप्लवः । पुरस्यास्य ततः प्राह नेमीशस्तपसा खलु ॥ ८०१ ॥
श्रुत्वैतत् पटहात् कृष्ण-वादितान् नगरीजनः । आचाम्लादि तपः शश्वत् कुरुते स्माऽऽदरपूर्वकम् ॥ ८०२ ॥
अत्रान्तरे प्रभुः कुर्वन् विहारं रैवताचले । उपेत्य समवासार्षीद् भूरिसंयतसेवितः ॥ ८०३ ॥
तत्र प्रभोर्गिरं भूरि-भवासातापहारिणीम् । यादवा बहवा दीक्षां जगृहुः स्वामिसन्निधौ ॥ ८०४ ॥
शाम्बप्रद्युम्नमुख्यास्ते कोटिशो हरिसूनवः । वैराग्यवासितस्वान्ताः स्वाम्यन्ते संयमं ललुः ॥ ८०५ ॥
रुक्मिण्याद्या हरेः पत्न्यो बह्व्योऽन्याः श्राविकाः पुनः । प्रभोः पार्श्वे व्रतं लात्वा तेपुश्च प्रचुरं तपः ॥८०६॥
भाविनं द्वारकादाहं निशम्य प्रभुसन्निधौ । जिनं नत्वा हरिः पुर्यां जगामाऽमलमानसः ॥ ८०७ ॥

तपस्यति जने तीव्रं तपः श्रुत्वा जिमाननात् । दग्धुं न नगरीं शक्तः कृष्णद्वीपायनस्तदा ॥ ८०८ ॥
देवयोगाद् विहारं तु प्रभावन्यत्र कुर्वति । कारं कारं तपो लोको निवृत्तस्तपसोऽखिलः ॥ ८०९ ॥
ऋषिः सोऽग्निसुरः पुर्या-मुत्पातान् दर्शयन् जने । वात्याभिस्तृणकाष्ठानि चिक्षेपान्तः पुरेऽभितः ॥८१०॥
सर्वं पुरं तदा सोऽग्नि-कुमारोऽमरशात्रवः । भस्मीचक्रे विना राम-कृष्णौ दीक्षाभिलाषिणः ॥ ८११ ॥
उक्तश्च–' षष्टिं बाह्या कुलकोटिः द्वासप्ततिं तु मध्यगाः । संपीड्य द्वारकापुर्यां सो सुरोऽग्निमदीपयत् ॥८१२॥
दह्यमाना जना ये येऽस्मार्षुर्नेमिं व्रतेच्छवः । ताँस्तान् सुराः प्रभूपान्ते मुमुचुस्ते व्रतं ललुः ॥ ८१३ ॥
देवकीवसुदेवौ च कृष्यमाणौ पुराद्बहिः । पुत्राभ्यां ददते नासौ सुरो निर्गन्तुमंहसा ॥ ८१४ ॥
वसुदेवो देवकी च रोहिणी च समाधिना । गृहीत्वाऽनशनं प्रापु र्निर्जरालयमञ्जसा ॥ ८१५ ॥
बलकृष्णौ तदा देव-प्रोक्तौ पुर्या बहिर्भुवि । गत्वाऽग्निदह्यमानां तु पुरीं वीक्ष्योचतुर्मिथः ॥ ८१६ ॥
* यतः–' अनित्यानि शरीराणि विभवो नैव शाश्वतः । नित्यं सन्निहितो मृत्युः कर्त्तव्यो धर्म्मसङ्ग्रहः ॥१॥" 卐
स्फुरन्त्युपायाः शान्त्यर्थ-मनुकूले विधातरि । प्रतिकूले पुनर्यान्ति तेऽप्युपाया अपायताम् ॥ ८१७ ॥
ज्वालामालाकुलां स्वीय-पुरीं द्रष्टुमशक्नुवन् । कृष्णो भ्रातृयुतोऽचालीन् मथुरां प्रति तत्क्षणाद् ॥ ८१८ ॥
इतोऽनलासुरो ज्वाल-यित्वा तामग्निना पुरीम् । षण्मासातिक्रमे वार्द्धि-वारिणाऽप्लावयत् पुनः ॥ ८१९ ॥

मार्गे यान्तौ बलश्रीशौ जातौ बुभुक्षितौ तराम् । हस्तिकाह्वपुरोद्याने जग्मतुः कर्म्मयोगतः ॥ ८२० ॥
मुक्त्वा कृष्णं वने भक्ता-नयनाय पुरान्तरे । गतो बलो निरुद्धस्तत् पुरेशेनारिणा द्रुतम् ॥ ८२१ ॥
युद्धं कुर्वन् बलस्तेना-रिणा सार्द्धं पुरान्तिके । सिंहनादं तथा चक्रे यथा तत्राऽगमद्धरिः ॥ ८२२ ॥
बलकृष्णौ रिपुं जित्वा तस्मिन्नेव पुरान्तरे । बुभुजाते ततोऽटव्यां जग्मतुर्निर्भयौ तदा ॥ ८२३ ॥
लग्नतृषोहरिर्गच्छन् बलं च जलहेतवे । प्रेष्य स्वयं तु सुष्वाप वसनाच्छादिताननः ॥ ८२४ ॥
इतो भ्रमन् मृगव्येन वने तत्र जराङ्गजः । मृगबुद्ध्या न्यहन् कृष्णं बाणेन चरणे दृढम् ॥ ८२५ ॥
उत्थायाऽथ हरिः प्राह हतोऽहं केन पत्रिणा । वृक्षान्तरे स्थितो जज्ञौ जरासूनुर्हरेर्वचः ॥ ८२६ ॥
आगत्य सोदरस्याङ्घ्री नत्वा जरासुतो जगौ । मया मृगधिया त्वं तु हतः पापात्मनाऽधुना ॥ ८२७ ॥
द्वादशाब्दीमहं दूर-देशेऽस्थां ते मृतेर्भिया । पापात्मना मयाऽद्य त्वं हतो दुर्गतिहेतवे ॥ ८२८ ॥
कृष्णो जगौ न छुट्येत कर्म्मतः कोऽपि केनचित् । जरासूनो ! व्रजाह्राय दूरे व्रजतु साम्प्रतम् ॥ ८२९ ॥
गतोऽम्बुनो(धुना)बलोऽत्रैतो मां त्वया निहतं यदि । ज्ञास्यति त्वां तदा सद्यो हनिष्यति सहोदर ! ॥८३०॥
क्षमयित्वा ततः कृष्णं सद्यो जरासुतो ययौ । यावद्धरिर्मृतस्तावत्तृतीयं नरकं ययौ ॥ ८३१ ॥
यतः–' एगो य सत्तमाए पंच य छट्ठीइ पंचमी एगो । एगो य चउत्थीए कण्हो पुण तच्चपुढवीए ॥१॥ "

※ यतः—" ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे, रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः ।
विष्णुर्येन दशावतारगहने क्षिप्तो महासङ्कटे, सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्म्मणे ॥१॥"
इतो बलो जलं नीत्वाऽऽगतः सुप्तं सहोदरम् । मत्वा सोऽवक् पिब भ्रात-रुत्थाय सलिलं वरम् ॥८३३॥
अब्रुवन्तं हरिं स्नेहात् धूनयन् सोदरो बलः । मृतं सहोदरं मत्वा मुमूर्च्छ च रुरोद च ॥ ८३४ ॥
अपश्यन् घातकं भ्रातु-र्वनेऽभितो हली तदा । सिंहनादान् बहून् जीवान-त्रासयन् निरन्तरम् ॥ ८३५ ॥
स्नेहादंसे हरिं कृत्वा स्थाने स्थाने वने भ्रमन् । क्षितौ मुक्त्वा वचोभिस्त-मुदलापयदञ्जसा ॥ ८३६ ॥
यदा न मन्यते कृष्णं मृतं लाङ्गलभृत्तदा । देवा एत्य शिलायां तु पयोजरोपणं व्यधुः ॥ ८३७ ॥
प्रपील्य बालुकास्तैलं कर्षयन्तः पुनः पुनः । प्राबोधयन् मृतं कृष्णं हलिनं युक्तिहेतुभिः ॥ ८३८ ॥
षण्मासातिक्रमे कृष्णं मृतं ज्ञात्वा तु लाङ्गली । चकार वह्निसंस्कारं तस्याऽस्थीनि जलेऽक्षिपत् ॥८३९॥
श्रीनेमिसन्निधौ दीक्षां लात्वा हली तपस्तपन् । तुङ्गिकाक्षितिभृच्छृङ्गे तस्थौ ध्यानपरायणः ॥ ८४० ॥
पारणायाऽन्यदा गच्छन् पुर्युपान्तेऽवटे स्त्रियम् । स्वरूपमोहितां रज्वा बध्नन्तीं स्वसुतं गले ॥ ८४१ ॥
कुम्भबुद्ध्या विमुश्चानां वीक्ष्योद्विग्नो हली जगौ । मा पुत्रं प्रक्षिपाऽन्धी त्वं सावधानी भवाऽधुना ।८४२। युग्मम् ।
तस्यां स्त्रियि निवृत्तायां पुत्रकण्ठस्य बन्धनात् । अभिग्रहं हली तत्र जग्राहेति स्वचेतसि ॥ ८४३ ॥

For Private and Personal Use Only

अतः परं मयाऽऽहारो निरवद्यो वनान्तरे । गृहीतव्योऽन्यथा भूया-दुपवासो निरन्तरम् ॥ ८४४ ॥
तपस्यतो मुनेस्तस्य साम्यभाजोऽनुभावतः । व्याघ्रसिंहादयः सेवां कुर्वते श्वापदाः सदा ॥ ८४५ ॥
पूर्वसंसारसम्बन्धी कश्चिदेको मृगो वने । हल्यर्पेः शिष्यवत् सर्वं करोति स्म पदोस्तले ॥ ८४६ ॥
यदा तत्र वने कोऽपि सार्थो जिमति तत्र च । ऋषिं नीत्वा सदा प्रत्य-लाभयत् पारणे मृगः ॥ ८४७ ॥
अन्यदा स मृगस्तं च मासक्षमणपारणे । काष्ठहेत्वागताऽनःकृत्-पार्श्वेऽनैपीत् स्वसंज्ञया [मृगः] ॥ ८४८ ॥
ऋषिं भिक्षाकृते तत्रा-गतं निरीक्ष्य सूत्रकृत् । मुक्त्वा छिन्नार्द्धशाखाकं वृक्षं दानोत्सुकोऽभवत् ॥ ८४९ ॥
ददानो रथकृद्दानं यतये ध्यातवानिति । मदीयं विद्यते भाग्य-मीदृक्साध्वन्नदानतः ॥ ८५० ॥
साधुर्दध्यौ तदा भाग्यं विद्यते च ममाधुना । यतो मे प्रासुकान्नस्य प्राप्तिर्वर्याधुनाऽर्जिता ॥ ८५१ ॥
मृगो दध्यो ममान्नं चेत् प्रासुकं भवतीदृशम् । तदाऽहं साधुमीदृशं प्रत्यलाभयमादरात् ॥ ८५२ ॥
तदाऽहं साधवे दानं ददामीदृक्षमादरात्, पाठान्तरे-
एवं चिन्तयतां तेषां मुन्यादीनां तदात्मनि । अकस्मान्मस्तके वृक्ष-शाखाऽपतन्महत्तमा ॥ ८५३ ॥
त्रयाणामपि तेषां तु प्राण-त्यागात्तदाऽभवत् । उत्पत्तिः पञ्चमे स्वर्गे एकस्मिन् स्थानके समम् ॥ ८५४ ॥
" अट्ठंतकडा रामा एगो पुण बंभलोयकप्पंमि । उववन्नो तत्थ भोए भोत्तुं अयरोवमा दस उ ॥ १ ॥

For Private and Personal Use Only

तत्तो अ चइत्ताणं इहेव उस्सप्पिणीइ भरहम्मि । भवसिद्धीओ भयवं सिज्झिस्सइ कण्हतित्थम्मि ॥ २ ॥"
प्रद्युम्नाद्याः कुमाराश्च तपस्यन्तश्च भूरिशः । पप्रच्छुर्नेमिनं मुक्ति–सौख्यं कदा भविष्यति ॥ ८५५ ॥
स्वाम्यवक् सिद्धिशैले च तपो वितन्वतांतराम् । भविष्यति शिवप्राप्ति-र्यूयं तत्रेत तद् द्रुतम् ॥ ८५६ ॥
श्रुत्वा स्वामिगिरं सद्यः सार्द्धं त्रिकोटिसम्मिताः । प्रद्युम्नाद्याः कुमाराश्च ययुः शत्रुञ्जयाचले ॥ ८५७ ॥
तत्र प्रदक्षिणीकृत्य प्रियालां जिनपादुके । सिद्धाद्रौ सप्तमे शृङ्गे तस्थू रेवतकान्तिके ॥ ८५८ ॥
शुक्लध्यानवराः सर्वेऽप्युष्टा कोटयस्तदा । प्रद्युम्नाद्याःकुमारास्तु विष्णोर्मुक्तिपुरीं ययुः ॥ ८५९ ॥
अन्येऽपि यादवा दीक्षां लात्वा श्रीनेमिसन्निधौ । सर्वकर्म्मक्षयान्मुक्ति-नगरीमगमन् क्रमात् ॥ ८६० ॥
समुद्रविजयः पत्नी-युक्तो दीक्षां जिनान्तिके । लात्वा प्रान्ते मृतः प्राप माहेन्द्रं ताविषं क्रमात् ॥ ८६१ ॥
"उसभपिया नागेसु सेसाणं सत्त हुंति ईसाणे । अट्ठ य सणंकुमारे माहिंदे अट्ठ बोधव्वा ॥ १ ॥
अट्ठण्हं जणणीओ तित्थयराणं तु हुंति सिद्धाओ । अट्ठ य सणंकुमारे माहिंदे अट्ठ बोधव्वा ॥ २ ॥"
अथ द्वारवतीदाहा–दनु भूपः परीक्षितः । नवीनद्वारकायां तु महानेमिसुतं यदुम् ॥ ८६२ ॥
मेदिनीमल्लनामान–मानीय सूर्यपत्तनात् । सुराष्ट्रासूज्जयन्ताद्रौ गिरिदुर्गे न्यवीविशत् ॥ ८६३ ॥ युग्मम् ॥
तथा तेन प्रजा न्यायाद्रक्षिता विभवव्ययात् । यथा पूर्वनृपान् चित्ता-द्व्यस्मार्षुरुदितोदिताः ॥ ८६४ ॥

शत्रुञ्जय कल्पवृ० ॥५४६॥

शत्रुञ्जयोज्जयन्ताद्रौ यात्रां कृत्वा स विस्तरात् । आपृच्छ्य यादवं भूपं परीक्षिः स्वपुरं ययौ ॥ ८६५ ॥
पवित्रपत्रितो नेमि-र्भुव टङ्काभिधे पुरे । प्रतिबोध्यासुरं धूम-केतुमभ्रपुरे ययौ ॥ ८६६ ॥
तत्र सकलवेतालं दुष्टं पापपरं सदा । ग्राहयामास सम्यक्त्वं नेमिनाथो जिनेश्वरः ॥ ८६७ ॥
कोरटङ्कवने नागं कर्कोटमसुरं पुनः । अबोधयत् सिद्धवटे सिद्धनाथं सयोगिनम् ॥ ८६८ ॥
नागं तु नगरे कोटे इन्द्रकेतुमिलागिरौ । दुर्गादित्यं देवगिरौ ब्रह्माद्रौ ब्रह्मनायकम् ॥ ८६९ ॥ युग्मम् ॥
अन्यानपि बहून् भिल्ल-म्लेच्छादिकवनेचरान् । पक्षिणो धर्म्मविध्वंस-करान् लोकद्रुहान् पुनः ॥ ८७० ॥
चौरान् पारिखिकान् कूट-जल्पकांश्च कुतीर्थिकान् । प्रबोध्य गमयामास सद्गतिं नेमितीर्थकृत् ॥ ८७१ ॥
आर्यानार्येषु देशेषु विहरन् नेमिजिनेश्वरः । ज्ञात्वा निजायुषः प्रान्तं रैवताद्रिं समीयिवान् ॥ ८७२ ॥
दिनानि कतिचित्तत्र स्थित्वा प्रबोध्य भाविकान् । प्रपेदेऽनशनं नेमिः सिताष्टम्यां शुचौ प्रभुः ॥ ८७३ ॥
षट्त्रिंशदधिकैः पञ्च-शतैर्वाचंयमै समम् । अलञ्चकार कल्याण-पुरीं पुण्यतमःक्षयात् ॥ ८७४ ॥
इन्द्रोऽभ्येत्य दिवो नेमेः कल्याणगमनोत्सवम् । कृत्वा नन्दीश्वरेऽष्टाह्निं निष्पाद्य स्वर्गमीयिवान् ॥ ८७५ ॥
दीक्षाज्ञानशिवान्यासन् यत्र नेमिर्जिनेशितुः । तं रैवतगिरिं भव्याः सेवध्वं शिवहेतवे ॥ ८७६ ॥
बन्धवोऽद्य विभोरष्टौ प्रेयस्योऽपि मुरद्विषः । राजीमती च मुक्तिश्री-भाजो रैवतकेऽभवन् ॥ ८७७ ॥

यतः—" उज्जितसेलसिहरे दिक्खा नाणं निसीहिआ जस्स । तं धम्मचक्कवट्टिं अरिट्ठनेमिं नमंसामि ॥ १ ॥"
यत्रार्हत एकमपि भवेत् कल्याणकं किल । तत्तीर्थं मुनयः प्राहु-र्गिरिनारस्ततोऽधिकः ॥ ८७८ ॥
पवित्रा भगवत्पादै रैवताचलरेणवः । पुनन्ति विश्वसंयुक्ताः शुद्धिकृच्चूर्णजा इव ॥ ८७९ ॥
भूरुहा दृषदो भूमि वाय्वम्ब्वग्निशरीरिणः । अचेतना अपि शिवं यातारोऽत्र कियद्दिनैः ॥ ८८० ॥
तपःक्षमाभ्यां संयुक्ता-स्तथा साम्यरसप्लुताः । त्यक्त्वा धातुमयं देहं देही प्राप्नोति निर्वृतिम् ॥ ८८१ ॥
यथा स्पृष्टमयः स्पर्शो-पलेनाप्नोति हेमताम् । तथाऽस्य स्पर्शतो देही भवेच् चिन्मयरूपभाग् ॥ ८८२ ॥
मलयाद्रौ यथाऽन्येऽपि यान्ति चन्दनतां द्रुमाः । तथाऽत्र पापिनोऽप्यङ्गि-गणा यान्ति हि पूज्यताम् ॥ ८८३ ॥
न श्रीनेमिसमः स्वामी नोज्जयन्तसमो गिरिः । न गजेन्द्रपदाभं तु कुण्डमस्ति जगत्त्रये ॥ ८८४ ॥
सिद्धाभिधगिरेः शृङ्गं रैवतोऽयं च विद्यते । अतोऽत्र कुर्वतः पुण्यं सिद्धाद्राविव जायते ॥ ८८५ ॥
उक्तश्च—" भावतः प्रतिमामत्र जिनानां जन्तुरर्चयन् । लभते शिवसौख्यानि नृसौख्यस्य किमुच्यते ? ॥ १ ॥
प्रत्याख्यानं दशविधं विवेकी यो व्यधान्नरः । अस्मात्तस्य क्रमात् स्वर्ग-सौख्यानि दशधा पुनः ॥ २ ॥"
न्यायोपात्तं धनं यत्र कुर्वते पात्रसान् निजम् । तेषां समृद्धयः सर्वाः सम्पद्यन्ते भवे भवे ॥ ८८६ ॥
शैलमेकाहमत्रस्थो बिभर्त्ति भविकाग्रणीः । सुरासुरनृनारीभिः सेव्यते स सदा यतः ॥ ८८७ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शुद्धान्नवस्त्रपानाद्यैर्यः साधुं प्रतिलाभयन् । मुक्तिनारीहृदानन्द-दाता स जायते नरः ॥ ८८८ ॥
रूप्यस्वर्णसुवस्त्रादि यो ददात्यत्र भावतः । तदनन्तगुणं सोऽपि लभते लीलया जनः ॥ ८८९ ॥
महातीर्थमिदं सर्व-तीर्थोत्कृष्टं जगत्त्रये । तिर्यञ्चोऽपि हि यद्वासात् सिध्यन्त्यन्तर्भवाष्टकम् ॥ ८९० ॥
द्रुमा धन्या मयूराद्याः पक्षिणः पुण्यशालिनः । वसन्ति रैवते यत्र मनुष्याणां किमुच्यते ? ॥ ८९१ ॥
देवता ऋषयः सिद्धा गन्धर्वा किन्नरादयः । सोत्साहाश्च समायान्ति यं सेवितुमनारतम् ॥ ८९२ ॥
न ता औषधयो दिव्या न ताः स्वर्णादिसिद्धयः । रसकूपा न ते यत्र गिरौ सन्ति न शाश्वताः ॥ ८९३ ॥
गजेन्द्रपदमत्रास्ति कुण्डं तुण्डं शिवश्रियः । न यत्र जीवसंसक्तिः शक्तिः पापापनोदने ॥ ८९४ ॥
परेषामपि कुण्डानां प्रभावोऽयं पृथक् पृथग् । षण्मासस्नानतो रोगा कुष्ठाद्या यान्ति जन्तुषु ॥ ८९५ ॥
नेमिनिर्वाणतोऽब्दानां द्विसहस्रे गते सति । अम्बासान्निध्यतो हेम-बलानकादवाप्य च ॥ ८९६ ॥
रत्नाह्वः श्रावको नेमे-र्बिम्बं वज्रमयं ततः । पूजयिष्यति भक्त्याऽत्रा-र्चयिष्यन्ति च मानवाः ॥ ८९७ ॥
उक्तश्च शत्रुञ्जयमाहात्म्ये 'द्विसहस्रीमतिक्रम्य वर्षाणामतिदुःखदाम् । अस्मन्निर्वाणसमयादम्बादेशाद्वणिग्वरः ।
ततोऽप्यानीय रत्नाह्व एतां सम्पूजयिष्यति । पुना रैवतकेऽत्रैव सुप्रसादां सुवासनः ॥ ८९८ ॥
उक्तं च–स्थित्वा लक्षं सहस्राश्च समास्तिस्रः शतद्वयम् । पञ्चाशतं तथात्रासौ तिरोधास्यत्यतः परम् ॥ ८९९ ॥

For Private and Personal Use Only

एकादशदुःषमाकाले तां नेमिप्रतिमां किल । लास्याम्बिका सुरी वार्द्धौ पूजयिष्यति भावतः ॥ ९०० ॥
प्राग्वाट् स सुराष्ट्रीयः काश्मीरविषयादिह । समेत्य प्रतिमां पूज्य-मानां नेमेः करिष्यति ॥ ९०१ ॥
अस्य सम्बन्धः मत्कृताद् जावडि प्रबन्धात् ग्रन्थान्तराद् वा ज्ञेयः स्वयम् ।
पूर्वं कृष्णो गिरावुज्ज-यन्ते जिनालयं व्यधात् । ततो लेप्यमयं-बिम्ब-मतिष्ठिपत्प्रमोदतः ॥ ९०२ ॥
उक्तंच–' विष्णुस्ततोऽवग् मच्चैत्ये स्थापितेऽयं मयाऽत्र किं । कालं स्थास्यत्यथान्यत्र क्व क्व पूजामवाप्स्यति ॥
उवाच स्वाम्यपीयं ते प्रासादे त्वत्पुरावधि । पूजामवाप्स्यत्यतः शैले काञ्चनाख्ये सुरैः कृते ॥ ९०३ ॥
अस्मिन् रैवतके शैलेऽसङ्ख्याता जिनालयाः । कारिता नृपतीभ्याद्यै-स्तेषामुद्धृतयः पुनः ॥ ९०४ ॥
बिम्बान्यपि मणि मृत्स्ना-दृषल्लेप्यमयानि च । असङ्ख्यातानि जातानि भविष्यन्ति वसन्ति च ॥ ९०५ ॥
सर्वकर्म्मक्षयं कृत्वा सङ्ख्यातीतास्तनूभृतः । मुक्तिं याता गमिष्यन्ति प्रयान्ति च न संशयः ॥ ९०६ ॥
क्रमाद्यादववंशेऽभूत् सोमचन्द्रमहीपतिः । जीर्णदुर्गे जिनागार-महेभ्योको विराजते ॥ ९०७ ॥
अन्येद्युस्तत्र नगरे चन्द्रशेखरसूरयः । बोधयन्तोऽवनीं भूरि-साधुयुक्ताः समाययुः ॥ ९०८ ॥
तदानीं वन्दनायाते तस्मिन् वसुन्धरापतौ । गुरवो जगदुः शत्रुञ्जयमाहात्म्यमद्भुतम् ॥ ९०९ ॥
कृता शत्रुञ्जये येन यात्रा विस्तारपूर्वकम् । स एव लभते सद्योऽपवर्गस्वर्गसम्पदाम् ॥ ९१० ॥

विना तपो विवेका दानं विनाऽर्चां शुभभावतः । केवलं स्पर्शनं सिद्ध क्षेत्रस्याक्षयसम्पदाम् ॥ ९११ ॥
शत्रुञ्जयसमं तीर्थमादिदेवसमः प्रभुः । जीवरक्षासमो धर्मो नास्ति विश्वत्रये परः ॥ ९१२ ॥
श्रुत्वेति भूपतिर्भूरि-संघलोकसमन्वितः । शत्रुञ्जये जिनं नन्तुं कुर्वन्महोत्सवं ययौ ॥ ९१३ ॥
पुष्पैरादौ युगादीश-मर्चयित्वा सविस्तरम् । आरात्रिकं च मङ्गल-दीपकं च व्यधान्नृपः ॥ ९१४ ॥
ततश्च स्वामिनः पादौ प्रणम्य च प्रपूज्य च । वर्द्धयामास भूपालः प्रियालुं मणिभिर्वरैः ॥ ९१५ ॥
तत्र श्रीगुरुपादान्ते धर्म्मं श्रोतुं ययौ नृपः । यदा तदा जगादेति माहात्म्यं तस्य भूभृतः ॥ ९१६ ॥
अत्र तीर्थे तपो यच्च क्रियते प्राणिभिर्मनाग् । तन्मुक्तिफलसङ्घातैः फलति क्ष्मापतेऽचिरात् ॥ ९१७ ॥
न रोगा न च सन्तापो न दुःखं न वियोगिता । न दुर्गतिर्न नाशश्च पुंसां शत्रुञ्जयस्पृशाम् ॥ ९१८ ॥
दीक्षां लात्वा तपो योऽत्र कुरुते शुभभावतः । तस्याशु जायते मुक्ति-सातं तनुभृतो नृप ! ॥ ९१९ ॥
श्रुत्वैतन्नृपतिः पुर्यां समेत्य निजसूनवे । दत्त्वा राज्यं गुरूपान्ते ललौ दीक्षां शिवप्रदाम् ॥ ९२० ॥
क्रमात् सूरिपदं प्राप्य भूरिसाधुनिसेवितः । शत्रुञ्जये ययौ चन्द्र-शेखरसूरिराट् क्रमात् ॥ ९२१ ॥
तत्र तीव्रं तपः कृत्वा केवलज्ञानमादरात् । आसाद्य निर्वृतिं यातो भूरिसाधुसमन्वितः ॥ ९२२ ॥

卐 इति श्रीकृष्णचरिते नेमिनाथसम्बन्धगुंफितसाम्बप्रद्युम्नप्रमुख-श्रीकृष्णनरकागमनस्वरूपं समाप्तम् 卐

॥ ५५१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

※ श्रीधर्मघोषसूरिरचित: श्री शुभशीलगणिविहितवृत्तियुत: श्री शत्रुञ्जयकल्पवृत्ते: प्रथमो विभाग: संपूर्ण: ※

—: શ્રી શત્રુંજયગિરિરાજના ૧૦૮ નામો :—

શ્રી શત્રુંજયગિરિ શ્રી બાહુબલી શ્રી મરુદેવ શ્રી પુંડરીકગિરિ શ્રી રૈવતગિરિ શ્રી વિમલાચલ શ્રી સિદ્ધરાજ શ્રી ભગીરથ શ્રી સિદ્ધક્ષેત્ર શ્રી સહસ્રકમલ શ્રી મુક્તિનિલયગિરિ શ્રી સિદ્ધાચલ શ્રી શતકૂટ શ્રી ઢંકગિરિ શ્રી કદંબગિરિ શ્રી કોડિનિવાસ શ્રી લૌહિત્યગિરિ શ્રી તાલધ્વજગિરિ શ્રી પુણ્યરાશિ શ્રી મહાબલગિરિ શ્રી દૃઢશક્તિ શ્રી શતપત્ર શ્રી વિજયાનંદ શ્રી ભદ્રંકર શ્રીમહાપીઠ શ્રી સુરગિરિ શ્રી મહાગિરિ શ્રી મહાનંદગિરિ શ્રી કર્મસૂદન શ્રી કૈલાસ શ્રીપુષ્પદંત શ્રીજયંત શ્રી આનંદ શ્રી પદ્મગિરિ શ્રી હસ્તગિરિ શ્રી શાશ્વતગિરિ શ્રી ભવ્યગિરિ શ્રી સિદ્ધશેખર શ્રી મહાજસગિરિ શ્રીમાલ્યવંત શ્રી પૃથ્વીપીઠ શ્રી દુઃખહર શ્રી મુક્તિરાજ શ્રી મણિકંત શ્રી મેરુમહીધર શ્રી કંચનગિરિ શ્રી આનંદઘર શ્રી પુણ્યકંદ શ્રી જયાનંદ શ્રી પાતાલમૂલ શ્રી વિભાસ શ્રી વિલાસ શ્રી જગતારણ શ્રી અકલંક શ્રી અકર્મક શ્રી મહાતીર્થ શ્રી હેમગિરિ શ્રી અનંતશક્તિ શ્રી પુરુષોત્તમ શ્રી પર્વતરાજા શ્રી જ્યોતિસ્વરૂપ શ્રી વિલાસભદ્ર શ્રી સુભદ્રગિરિ શ્રી અજરામર શ્રી ક્ષેમંકરું શ્રી અમરકેતુ શ્રી ગુણકંદ શ્રી સહસ્રપત્ર શ્રી શિવંકરું શ્રી કર્મક્ષય શ્રી તમોકંદ શ્રી રાજરાજેશ્વર શ્રી ભવતારણ શ્રી ગજચંદ્ર શ્રી મહોદય શ્રી સુરકાંત શ્રી અચલ શ્રી અભિનંદ શ્રી સુમતિ શ્રી શ્રેષ્ઠગિરિ શ્રી અભયકંદ શ્રી ઉજ્જવલગિરિ શ્રી મહાપદ્મ શ્રી વિશ્વાનંદ શ્રી વિજયભદ્ર શ્રી ઇન્દ્રપ્રકાશ શ્રી કપર્દીવાસ શ્રી મુક્તિનિકેતન શ્રી કેવલદાયક શ્રી ચર્ચગિરિ શ્રી અષ્ટોત્તરશતકૂટ શ્રી સૌંદર્ય શ્રી યશોધર શ્રી પ્રીતિમંડન શ્રી કામુકકામ શ્રી સહજાનંદ શ્રી મહેન્દ્રધ્વજ શ્રી સર્વાર્થસિદ્ધ શ્રી પ્રિયંકર શ્રી બ્રહ્મગિરિ શ્રી નાન્દિગિરિ શ્રી શ્રેયઃપદ શ્રી પ્રભોપદ શ્રી સર્વકામદ શ્રી ક્ષિતિમંડલમંડન શ્રી સહસ્રાખ્ય શ્રી તાપસગિરિ સ્વર્ણગિરિ.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ए६०॥ ॐ नमः॥ यस्यादेशाडुपेत्य प्रथमगणधरः पुंडरीकाभिधानः सिद्धोऽपंचकोटीमितयतिसहितः केव
लज्ञानमाप्य श्रेयः पुर्यामयासीदमरनरपति श्रेणिसंसेवितांह्रिः स श्रीमान्नादिदेवः शिवसुखमचिरात्त्रा
ण्मनाभिजदेयात् ॥१॥ यत्र तीर्थे स्विजं कर्म राशिं क्लेशाद्विरार्जितं असंख्यायतयो जग्मु र्यास्यंति च शि
वश्रियं ॥२॥ तस्मिंस्तीर्थे जिनाधीशात् वृषभादीन्सुरार्चितान् स्मरन् ध्यायन् ध्यानं कुर्वन् शिवशर्मवि
त ॥३॥ यतः शत्रुंजये जिनेन्द्रे दृष्टे दुर्गतिद्वितयं क्षिपेत् सागराणां सहस्रं च पूजास्नात्रविधानतः ॥४॥ पल्यो
पमसहस्रं तु ध्यानादभिग्रहात् दुःकर्म क्षीयते मार्गे सागरोपमसंचितं ॥५॥ सिद्धाद्रौ पहिलः सं
ति शुद्धा अन्येपि येगिनः हिंस्रकाअपि सेवंते तेऽत्र वैरिनिरुत्तमाः ॥६॥ तावद्गर्जंति हत्यादि पातका
नीह सर्वतः यावच्छत्रुंजयेत्याख्या श्रूयते न गुरोर्मुखात् ॥७॥ शास्त्रांतरेप्युक्तं। अष्टषष्टिषु तीर्थेषु या
त्रया यत्फलं भवेत् आदिनाथस्य देवस्य स्मरणेनापि तद्भवेत् ॥८॥ इत्यादि भूरिशो यस्य माहा
त्म्यं श्रूयते जनैः तस्य तीर्थस्य वर्णनं तत्कथं मंदबुद्धिभिः ॥९॥ सुधर्मस्वामिना यस्य माहात्म्यं ग्रंथकोटिभिः
भाषितं तत्संक्षिप्तं नवनागगुरूत्तमैः ॥१०॥ [illegible] पकारायज्ञकृते ततः श्री

ભાનુમતીબેન [illegible] દલાલના સૌજન્યથી

For Private and Personal Use Only

२ पादलिप्तेन सूरिणा विदितेशुना ॥११॥ ततो धर्मेश्वरः सूरीश्वरः संविग्नवांस्तदा ततोन्वे गुरुस्त मासंवि
ग्निषु श्रुतस्तुनः ॥१२॥ ततस्तपागणाधीशो धर्मघोषगुरुस्ततः श्रीशत्रुंजयकल्पांतः चकारामुंतमोपहं ॥१३॥
तथाहि तपागच्छावरादित्याः श्रीमद्देवेंद्रसूरयः आसंस्तेषां विनेयास्तु श्रीविद्यानंदसूरयः ॥१४॥ तयोर्ज्ञा
निम्रतेकस्मात्त्रयोदशादिनांतरे धर्मकीर्तिरुपाध्यायो जनितस्मिन्गणे तदा ॥१५॥ क्रमात्तस्य पदे सूरे जा
ति सति शुभोदये धर्मघोषगुरुरिति नामा जनि जनेभितः ॥१६॥ तेनेव धर्मघोषेण सूरिणा विदधे त रां ॥
श्रीशत्रुंजयकल्पोयं जन्मिनां बोधहेतवे ॥१७॥ तत्रैदंरूतवनं तथाहि सुयधम्मकित्तिअं तं तिज्झं ध
र्मघोषगुरुस्तेसकृतस्यास्य स्तवस्य वृत्ति विधीयते तत्र कथा युक्ता मया किल ॥१॥ तथाहि । सोम
सुंदरसूरीशां स्तपागच्छविप्रद्वेः परालंकरणे जातो मुनिसुंदरसूरिराट् ॥२॥ तस्य पट्टोदयाद्रिं त
नास्यंस्यधुना शंवं रत्नशेखरसूरीशा सूर्याः प्रतापिनः धनः ॥३॥ श्रीमुनिसुंदरसूरीशां शिष्येण सुगधु
ना श्रुतज्ञानानिधेनैव जन्मिनां बोधहेतवे ॥४॥ धर्मघोषगुरूत्तंस कृतस्यास्य स्तवस्य तु वृत्तिस्त
त्र कथा युक्ता क्रियते सांप्रतं किल ॥५॥ युग्मं तस्यास्तोत्रस्य प्रथमगाथायाः संबंधः आदौ ज्ञोमते २

રમાલક્ષ્મીબેન રસીકલાલ દલાલના સૌજન્યથી